[14]उडुपकुलपतिः कृष्णः श्रीरामस्त[15]रणिकुलपतिश्चान्यः ॥ ७ ॥

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ॥
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ॥ ८ ॥

---

१ गकारेण भेदः । २ महती या गदा तया युक्तः पक्षे महः उत्सवः त्यागो दानं दया करुणा एतैर्युक्तः । ३ सत्यभामया समन्वितः पक्षे सत्यं सूनृतं भा कांतिः मा लक्ष्मीः आभिः सम्यग्युक्तः । ४ वेमा प्राकृते 'धोटें' इत्युच्यते तद्व्यापाररहितम् । ५ तुरी प्रा० 'तुरई' इत्युच्यते तत्स्पर्शं विना । ६ भवः संसारः स एव पित्तं भ्रमोत्पादकत्वात् । ७ सूतेषु शेखरं श्रेष्ठं पक्षे सूतशेखरनामानं रसम् पित्तशामको हि सूतशेखर इति प्रसिद्धिः । ८ कृष्णं कृष्णनामानं देवं पक्षे वर्णतः कृष्णम् । ९ सतां या गीर्वाणी तस्या रसो ब्रह्मानन्दरूपो रसस्तेन, पक्षे सम्यग्गोदुग्धेन । १० हसितेन सहितम् पक्षे सशर्करम् । ११ अनुक्षणं पक्षे त्रुटिरेला तद्युक्तम् । १२ पुत्रधनादिलोभम्, पक्षे तैलादिकं पित्तजनकत्वात् । १३ अन्धंतमः नरकः पक्षे गाढान्धकारः । १४ उडुपो नक्षत्रनाथः स कुलपतिर्वंश्य पक्षे उडुपान्यल्पनावः तासां कुलं समूहस्तत्पतिः । १५ तरणिः सूर्यः पक्षे नौः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुञ्जीभूतं प्रेम गोपाङ्गनानां मूर्तीभूतं भागधेयं यदूनाम् ।
एकीभूतं गुप्तवित्तं श्रुतीनां श्यामीभूतं ब्रह्म मे सन्निधत्ताम् ॥९॥

परमिममुपदेशमाद्रियध्वं निगमवनेषु नितान्तखेदखिन्नाः ।
विचिनुत भवनेषु बल्लवीनामुपनिषदर्थमुलूखले निबद्धम् ॥१०॥

नवनीलमेघरुचिरः परः पुमानवनीमवाप्य धृतगोपविग्रहः ।
नवनीयकीर्तिरपरैरपि स्वयं नवनीतभिक्षुरधुना स चिन्त्यते ॥११॥

खिन्नोसि मुञ्च शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः ।
भरभुग्नविनतबाहुषु गोपेषु हसन् हरिर्जयति ॥ १२ ॥

दर्पणार्पितमालोक्य मायास्त्रीरूपमात्मनः ।
आत्मन्येवानुरक्तो वः शिवं दिशतु केशवः ॥ १३ ॥

हृदयं कौस्तुभोद्भासि हरेः पुष्णातु वः श्रियम् ।
राधाप्रवेशरोधाय दत्तमुद्रमिव श्रिया ॥ १४ ॥

रामो नाम बभूव हुं तदबला सीतेति हुं तौ पितु-
र्वाचा पञ्चवटीवने निवसतस्तामाहरद्रावणः ।
कृष्णेनेति पुरातनीं निजकथामाकर्ण्य मात्रेरिताम्
सौमित्रे क्व धनुर्धनुर्धनुरिति प्रोक्ता गिरः पान्तु वः ॥ १५ ॥

पीठे पीठनिषण्णबालकगले तिष्ठन्सगोपालको
यन्त्रान्तःस्थितदुग्धभाण्डमवभिद्याच्छाद्य घण्टारवम् ।
वक्त्रोपान्तकृताञ्जलिः कृतशिरःकम्पं पिबन् यः पयः
पायादागतगोपिकानयनयोर्गण्डूषफूत्कारकृत् ॥१६॥

कस्त्वं कृष्णमवेहि मां किमिह ते मन्मन्दिराशङ्कया
युक्तं तन्नवनीतभाजनपुटे न्यस्तः किमर्थं करः ।
कर्तुं तत्र पिपीलिकापनयनं सुप्ताः किमुद्बोधिता
बाला वत्सगतिं विवेक्तुमिति संजल्पन् हरिः पातु वः ॥१७॥

---

१ पृथ्वीम् । २ देहः । ३ यथा माता स्वपुत्रप्रस्वापनाय प्राचीनाः कथाः कथयति तथा यशोदाऽपि राम इति कश्चिद्राजा आसीदिति वदति स्म तत् श्रुत्वा कृष्णोऽपि हुंकारं दत्तवान् । ४ शिक्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राधा पुनातु जगदच्युतदत्तचित्ता
मन्थानमाकलयती दधिरिक्तपात्रे ।
तस्याः स्तनस्तबकचूचुकलोलदृष्टि-
र्देवोऽपि दोहनधिया वृषभं दुदोह ॥ १८ ॥

अंगुल्या कः कपाटं प्रहरति कुटिले माधवः[1] किं वसन्तो
नो चक्री[2] किं कुलालो नहि धरणिधरः[3] किं द्विजिह्वः फणीन्द्रः।
नाहं घोराहिमर्दी[4] किमुत खगपतिर्नो[5] हरिः[6] किं कपीन्द्र
इत्येवं सत्यभामाप्रतिवचनजितः पातु वश्चक्रपाणिः ॥ १९ ॥

माधव रन्धनसमये मा रव मुरलीमहो रहोरसिकाम्
विरसतरू रसतरतां यद्‌ कृशतरतां कृशानुराधत्ते ।
गोपाल इति कृष्ण त्वं प्रचुरक्षीरवाञ्छया
श्रितो मातुः स्तनक्षीरमप्यलब्धं कृतं त्वया ॥ २० ॥

गौरी ।

श्रीः ॥ प्रत्यासन्न[7]विवाहमङ्गलविधौ देवार्चनव्यग्रया
दृष्ट्वाग्रे परिणेतु[8]रेव लिखितां गङ्गाधरस्याकृतिम् ।
उन्मोद[9]स्मितरोषलज्जितधिया गौर्या कथंचिच्चिरा-
द्वृद्धस्त्रीवचनात्प्रिये विनिहितः पुष्पाञ्जलिः पातु वः॥१॥

वक्षःपीठे निरीक्ष्य स्फटिकमणिशिलामण्डले स्वच्छभासि
स्वच्छायां[10] साभ्यसूया[11] त्वमियमिति मुहुः सत्यमाश्वासिताऽपि ।
वामे मे दक्षिणेऽस्याः श्रवसि[12] कुवलयं नाहमित्यालपन्ती
दत्ताऽऽश्लेषा सहासं मदनविजयिना पार्वती वः पुनातु॥२॥

खेदस्ते कथमीदृशः प्रियतमे त्वन्नेत्रवन्हेर्विभो
कस्माद्वेपितमेतदिन्दुवदने भोगीन्द्रभीतेस्तव ।

---

१ वसन्तो लक्ष्मीपतिश्च । २ कुलालो विष्णुश्च । ३ शेषो विष्णुश्च । ४ सर्पः । ५ गरुडः । ६ कपीन्द्रो विष्णुश्च । ७ समीपवर्ती । ८ भर्तुः । ९ चित्तविभ्रमः । १० स्वप्रतिबिम्बम् । ११ सख्या । १२ कर्णे ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोमाञ्चः[1] कथमेष देव भगवन् गङ्गाम्भसां सीकरै-
रित्थं भर्तरि भावगोपनपरा[2] गौरी चिरं पातु वः ॥ ३ ॥

भिक्षुः क्वास्ति बलेर्मखे पशुपतिः किं नास्त्यसौ गोकुले
मुग्धे पन्नगभूषणः सखि सदा शेते च तस्योपरि ।
आर्ये मुञ्च विषादमाशु[3] कमले नाहं प्रकृत्या चला[4]
चेत्थं वै गिरिजासमुद्रसुतयोः संभाषणं पातु वः ॥ ४ ॥

हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम् ।
कालकूटस्य संस्पर्शाज्जातमूर्छागमामिव ॥ ५ ॥

उदारांस्[5]त्वदृते नान्यान् प्रपश्याम्ययि पार्वति ।
श्रीरामभक्तिमाणिक्यमदेयमपि देहि मे ॥ ६ ॥

विद्राणे[6] रुद्रवृन्दे सवितरि तरले वज्रिणि ध्वस्तवज्रे
जाताशङ्के शशाङ्के विरमति मरुति त्यक्तवैरे कुबेरे ।
वैकुण्ठे कुण्ठितास्त्रे महिषमतिरुषं पौरुषोपघ्ननिघ्नं[7]
निर्विघ्नं निघ्नती वः शमयतु दुरितं भूरिभावा[8] भवानी ॥ ७ ॥

पार्वतीमोषधीमेकामपर्णां[9][10] मृगयामहे ।
शूली[11] हालाहलं पीत्वा यया मृत्युंजयो[12]ऽभवत् ॥ ८ ॥

लक्ष्मीः ।

श्रीः ॥ पायात्पयोधिदुहितुः कपोलामलचन्द्रमाः ।
यत्र संक्रान्तबिम्बेन हरिणा हरिणायितम्[13] ॥ १ ॥

---

१ सात्त्विकाविर्भावसूचकं रोमहर्षणम् । २ स्वाभिप्रायगोपनपरा । ३ खेदम् पक्षे विषमत्तीति विषादस्तम् । ४ चञ्चला । ५ ओः शिवस्य दारान् भार्याम् पक्षे उदारान् औदार्यशीलान् । ६ पलायिते । ७ पौरुषोपघ्नः पराक्रमाश्रयो महिषो निघ्नं आयत्तो यस्मिन् कर्मणि, यद्वा पौरुषोपघ्नानां पराक्रमिणां निघ्न आयत्तस्तमिति महिषविशेषणम् । ८ प्रभूतप्रभावा । ९ पर्वतसम्बन्धिनीम्, पर्वतपुत्रीं च । १० पर्णरहिताम्, एतन्नाम्नीं च । ११ शूलरोगवान् त्रिशूलधारी च । १२ मृत्युनाशक एतन्नाम्ना प्रसिद्धश्च । १३ हरिण इवाचरितम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥२॥

कमलासनकमलेक्षणकमलारिकिरीटकमलभृद्वाहैः ।
नुतपदकमला कमला करधृतकमला करोतु मे कमलम् ॥३॥

सरस्वती ।

श्रीः ॥ शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्व[1]दा सर्वदाऽस्माकं सन्निधिं[2] सन्निधिं क्रियात् ॥ १ ॥

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः ॥
पश्यन्ति सू[3]क्ष्ममतयः सा जयति सरस्वती देवी ॥ २ ॥

श्रीरामचन्द्रः ।

श्रीः ॥ श्रान्तोसि चेत्संसृ[4]तितीव्रतापतः
सीता[5]न्वितं मारुत[6]पोतसेवितम् ।
प[7]लाशिसंघातविवृद्धविक्रमं
रामं धृ[8]ताकारमुपेहि सत्वरम् ॥ १ ॥

यातायातैः सुबहुभिः श्रान्तोसि यदि हे सखे ।
एकं गुरुघ[9]नच्छायं सीतां[10]रामपदं भज ॥ २ ॥

---

१ सर्वदात्री । २ उत्तमनिधिरूपम् । ३ कुशाग्रबुद्धयः । ४ संसारः । ५ जानकी-सहितम् पक्षे सीतया लांगलपद्धत्या युक्तम् । ६ हनूमता सेवितम् पक्षे मन्दवायुना सेवितम् । ७ पलाशिनो राक्षसास्तेषां संघातेन मारणेन विवृद्धो विक्रमो यस्य पक्षे पलाशिनो वृक्षास्तेषां समूहेन । ८ गृहीतावतारम् पक्षे धृतः आकारो येन तं आ-राममित्यर्थः । गुरुरेव घनो मेघस्तस्य छाया यस्मिन्, पक्षे गुर्वी महती घना निबिडा छाया यस्मिन् । १० सीतासहितस्य रामस्य [illegible] सीतं शीतलं पदं रामपदं उप-वनस्थानम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राकारोच्चारमात्रेण मुखान्निर्याति पातकम् ॥
पुनः प्रवेशसन्देहान्मकारस्तत्कपाटवत् ॥ ३ ॥

अश्वामास तृणं प्रियाद्रुहि तृणामास स्मरारेर्धनु-
र्दारामास मुनेः शिलाऽपि नृवरामास स्वयं पादुका ।
कुल्यामास महार्णवोऽपि कपयो योधाम्बभूवुस्तदा
पौलस्त्यो मशकाम्बभूव भगवंस्त्वं मानुषामासिथ ॥ ४ ॥

नालीकभङ्गकृदतीव नदीनबन्धु-
र्नक्षत्रपो नवसुधाविभवैकहेतुः ।
राजा किमिन्दुरपि नार्यभिमानहारी
राजा परं जयति राघवसार्वभौमः ॥ ५ ॥

कान्तं श्रीरघुतिलकं सर्वजगत्पालकं विहाय जनः ।
अनुसरति नरं कान्तं नानाकष्टाश्रयं शिव शिवाय ॥ ६ ॥

महाजनप्रशंसा ।

श्रीः ॥ सौजन्याऽमृतसिन्धवः परहितप्रारब्धवीरव्रता
वाचालाः परवर्णने निजगुणाऽऽलापे च मौनव्रताः ।
आपत्स्वप्यविलुप्तवीर्यनिचयाः संपत्स्वनुत्सेकिनो
मा भूवन् खलवक्त्रनिर्गतविषज्वालातताः सज्जनाः ॥ १ ॥

मुखेन नोद्गिरत्यूर्ध्वं हृदयान्नाऽऽनयत्यधः ।
जरयत्यन्तरे साधुर्दोषंविषमिवेश्वरः ॥ २ ॥

विकृतिं नैव गच्छन्ति सङ्गदोषेण साधवः ।
आवेष्टितं महासर्पैश्चन्दनं न विषायते ॥ ३ ॥

---

१ अलीकभङ्गकृत् पक्षे कमलविकासकृत् । २ अनाथबन्धुः पक्षे नदीनः समुद्र-स्तद्बन्धुः । ३ क्षत्रियश्रेष्ठः पक्षे नक्षत्रनायकः । ४ वसुधैश्वर्यस्य कारणम् पक्षे नवीनायाः सुधाया यो विभवस्तस्य मुख्यकारणम् । ५ शत्रुमानहारी, पक्षे नारीणां मानहारकः ६ रमणीयं पक्षे ककारान्तम् । ७ रमणीयं पक्षे ककारोन्ते यस्य तादृशं नरं नर-कमित्यर्थः । ८ सुजनतामृतसमुद्राः । ९ विपत्तिकालेषु । १० गर्वरहिताः । ११ व्याप्ताः
१२ जीर्णं करोति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुजनो न याति वैरं परहितकार्ये विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभयति[1] मुखं कुठारस्य[2] ॥ ४ ॥

मज्जन्तोऽपि विपत्पयोधि[3]गहने निःशङ्कधैर्याऽऽवृताः
कुर्वन्त्येव परोपकारमनिशं सन्तो यथाशक्ति वै ।
राहोरुग्रकराल[4]वक्त्रकुहरग्रासाभिभूतोऽप्यलं
चन्द्रः किं न जनं करोति सुखिनं ग्रासावशेषैः करैः[5] ॥ ५ ॥

धवलयति समग्रं चन्द्रमा जीवलोकं
किमिति निजकलङ्कं नात्मसंस्थं प्रमार्ष्टि[6] ।
भवति विदितमेतत्प्रायशः सज्जनानां
परहितनिरतानामादरो नाऽऽत्मकार्ये ॥ ६ ॥

अहो महत्त्वं महतामपूर्वं[7] विपत्तिकालेऽपि परोपकारः ।
यथाऽऽस्यमध्ये[8] पतितोऽपि राहोः कलानिधिः पुण्यचयं[9] ददाति ॥ ७ ॥

उपकर्तुं प्रियं कर्तुं कर्तुं स्नेहमकृत्रिमम्[10] ।
सज्जनानां स्वभावोऽयं केनेन्दुः शीतलीकृतः ॥ ८ ॥

मान्या एव हि मान्यानां मानं कुर्वन्ति नेतरे ।
शम्भुर्बिभर्ति मूर्ध्नेन्दुं स्वर्भानु[11]स्तं जिघृक्षति[12] ॥ ९ ॥

ये जाते व्यसने[13] निराकुलधियः[14] संपत्सु नाऽभ्युन्नताः
प्राप्ते नैव पराङ्मुखाः प्रणयिनि प्राणप्रयोगैरपि ।
ह्रीमन्तः[15] स्वगुणप्रकाशनविधावन्यस्तुतौ पण्डिता-
स्ते भूमण्डलमण्डनैकतिलकाः सन्तः कियन्तो जनाः ॥ १० ॥

ये दीनेषु दयालवः स्पृशति यानल्पोऽपि न श्रीगदो
व्यग्रा ये च परोपकारकरणे हृष्यन्ति[16] ये याचिताः ।

---

१ सुगन्धयति । २ परशोः । ३ विपदेव पयोधिः समुद्रः । ४ करालं भयंकरं । ५ किरणैः । ६ शोधयति, नाशयतीत्यर्थः । ७ अलौकिकम् । ८ मुखमध्ये । ९ वृद्धिम् । १० निष्कपटम् । ११ राहुः । १२ महीतुमिच्छति । १३ संकटे । १४ अव्यग्रमनसः । १५ लज्जावन्तः । १६ हर्षयुक्ता भवन्ति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्थाः सन्ति च यौवनोन्मदमहाव्याधिप्रकोपेऽपि ये
तैः स्तम्भैरिव सुस्थिरैः किल भरक्रान्ता धेरा धार्यते ॥ ११ ॥

संपदि यस्य न हर्षो विपदि विषादो रणे च धीरत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥ १२ ॥

शरदि न वर्षति गर्जति वर्षति वर्षासु निःस्वनो मेघः
नीचो वदति न कुरुते वदति न साधुः करोत्येव ॥ १३ ॥

गवादीनां पयोऽन्येद्युः सद्यो वा जायते दधि ।
क्षीरोदधेस्तु नाद्यापि महतां विकृतिः कुतः ॥ १४ ॥

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः
नहि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनि ॥ १५ ॥

सुजनं व्यजनं मन्ये चारुवंशसमुद्भवम् ।
आत्मानं च परिभ्राम्य परतापनिवारणम् ॥ १६ ॥

इहानेके सन्तः सततमुपकारिण्युपकृतिं
कृतज्ञाः कुर्वन्तो जगति निवसन्तोऽपि सुधियः ।
कियन्तस्ते सन्तः सुकृतपरिपाकप्रणयिनो
विना स्वार्थं येषां भवति परकृत्यव्यसनिता ॥ १७ ॥

अर्थः सुखं कीर्तिरपीह मा भूदनर्थ एवाऽस्तु तथाऽपि धीराः ।
निजप्रतिज्ञामनुरुध्यमाना महोद्यमाः कर्म समारभन्ते ॥ १८ ॥

अपकारिषु यः साधुः स साधुः सद्भिरुच्यते, ।
उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ॥ १९ ॥

आदिमध्यनिधनेषु सौहृदं सज्जने भवति नेतरज्जने ।
छेदतापननिघर्षताडनैर्नान्यभावमुपयाति काञ्चनम् ॥ २० ॥

क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः

---

१ पृथ्वी । २ श्रेष्ठम् । ३ शब्दरहितः । ४ अन्यस्मिन् दिवसे । ५ विकारः । ६ प्राणिषु । ७ चन्द्रकान्तिम् । ८ चाण्डालगृहे । ९ 'विजणा' इति लोके । १० वेणुः कुलं च । ११ दुर्जन । १२ विकृतिम् । १३ सुवर्णम् । १४ नीचाः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः[1] ।
दुष्पूरोदरपूरणाय पिबति स्रोतःपतिं[2] वाडवो[3]
जीमूतस्तु[4] निदाघ[5]संभृतजगत्संतापविच्छित्तये ॥ २१ ॥

नहि भवति वियोगः स्नेहविच्छेदहेतु-
र्जगति गुणनिधीनां सज्जनानां कदाचित् ।
घनतिमिर[6]निबद्धो दूरसंस्थोऽपि चन्द्रः
किमु कुमुदवनानां प्रेमभङ्गं करोति ॥ २२ ॥

उदधिरवधिरुर्व्यास्तं[7] हनूमांस्ततार[8]
निरवधि गगनं चेत्काण्डकोशे विलीनम् ।
इति परिमितिमन्तो भान्ति सर्वेऽपि भावाः
स तु निरवधिरेकः सज्जनानां विवेकः ॥ २३ ॥

चन्द्रः क्षयी प्रकृतिवक्रतनु[9]र्जडात्मा[10]
दोषाऽऽकरः[11] स्फुरति मित्र[12]विपत्तिकाले ।
मूर्ध्ना तथापि विधृतः परमेश्वरेण[13]
नैवाऽऽश्रितेषु महतां गुणदोषशङ्का ॥ २४ ॥

उदये सविता रक्तो रक्तश्चाऽस्तमये तथा ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥ २५ ॥

दृश्यन्ते भुवि भूरिनिम्बतरवः कुत्राऽपि ते चन्दनाः
पाषाणैःपरिपूरिता वसुमती वज्रो[14] मणिर्दुर्लभः ॥
श्रूयन्ते करटाऽऽरवाः[15] प्रतिदिनं चैत्रे कुहूकूजितं[16]

---

१ अग्रेसरः । २ समुद्रम् । ३ वडवाग्निः । ४ मेघः । ५ ग्रीष्मः । ६ गाढान्धकारः । ७ मर्यादा । ८ तीर्णवान् । ९ प्रकृत्या स्वभावेन वक्रा तनुर्यस्य । १० जडस्वभावः डलयोः सावर्ण्यात् जडात्मा जलरूपः । ११ दोषा रात्रिस्तस्याः करः पक्षे दोषाणां आकरः खनिरिति यावत् । १२ मित्रः सूर्यः तस्य विपत्तिकालः अस्तकालस्तस्मिन् पक्षे मित्रं [illegible] दीनाम्, पक्षे केनचिद्रत्नादिना । १४ हीरकमणिः । १५ काकशब्दाः । १६ कोकिलशब्दः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
तन्मध्ये खलसंकुलं जगदिदं द्वित्राः क्षितौ सज्जनाः॥ २६ ॥

इक्षोरग्रात्क्रमशः पर्वणि पर्वणि यथा रसविशेषः ।
तद्वत्सज्जनमैत्री विपरीतानां च विपरीता ॥ २७ ॥

आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च ।
महाऽऽरम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥ २८ ॥

पिबन्ति नद्यः स्वयमेव नाऽम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं[1] खलु वारिवाहाः[2] परोपकाराय सतां विभूतयः[3]॥२९॥

गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते तदिदमपि नो विस्मयपदम्[4] ।
महामेघः क्षारं पिबति कुरुते वारि मधुरं
फणी[5] क्षीरं पीत्वा वमति गरलं दुःसहतरम् ॥ ३० ॥

संपदो महतामेव महतामेव चाऽऽपदः ।
वर्धते क्षीयते चन्द्रो न तु तारागणः क्वचित् ॥ ३१ ॥

किं जन्मना च महता पितृपौरुषेण
शक्त्या हि याति निजया पुरुषः प्रतिष्ठाम् ।
कुम्भा न कूपमपि शोषयितुं समर्थाः
कुम्भोद्भवेन[6] मुनिनाऽम्बुधिरेव पीतः ॥ ३२ ॥

महतां सद्व्ययेनैव विपत्तिरपि शोभते ।
दन्तभङ्गो हि नागानां श्लाघ्यो[7] गिरिविदारणे[8] ॥ ३३ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो[9]
ज्ञानस्योपशमः[10] कुलस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता[11]
सर्वेषामपि सर्वकारणमिदं शीलं[12] परं भूषणम् ॥ ३४ ॥

---

१ धान्यम् । २ मेघाः । ३ ऐश्वर्याणि । ४ आश्चर्यस्थानं । ५ सर्पः । ६ अगस्त्येन । ७ स्तुत्यः । ८ पर्वतः । ९ नियमनम् । १० शान्तिः । ११ कपटराहित्यम् । १२ स्वभावः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनु[1]कुरुतः खलसुजनावग्रिमपाश्चात्यभागयोः सू[2]च्याः ।
विद्[3]धाति रन्ध्रमेको गु[4]णवानन्यस्तु पिद्[5]धाति ॥ ३५॥
दा[6]क्षिण्यं स्वजने दया परज[7]ने शाठ्यं सदा दुर्जने
नीतिः साधुजने नयो[8] नृपजने विद्वज्जनेष्वार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः॥३६॥
केनाञ्जितानि नयनानि मृगाङ्गनानां
को वा करोति रुचिराऽङ्ग[10]रुहान्मयूरान् ।
कश्चोत्पलेषु दलसंनिचयं करोति
को वा करोति विनयं कुलजेषु पुंसु ॥ ३७ ॥
आरभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति ॥ ३८ ॥
प्रिया न्याय्या[11] वृत्ति[12]र्मलि[13]नमसुभङ्गे[14]ऽप्यसुकरं
त्वसन्तो नाभ्यर्थ्याः[15] सुहृदपि न याच्यः कृ[16]शधनः ॥
विपद्युच्चैः स्थेयं पदमनु[17]विधेयं च महतां
सतां केनोद्दिष्टं[18] विषममसि[19]धाराव्रतमिदम् ॥ ३९ ॥
प्रदानं प्रच्छन्नं[21] गृहमुपगते संभ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं नाप्युप[22]कृतेः ।
अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ४० ॥

---

१ अनुकरणं कुरुतः । २ प्राकृते 'सुई' इत्युच्यते । ३ उत्पादयति । ४ गुणवन्तुः पक्षे सुशीलत्वादिः । ५ आच्छादयति । ६ औदार्यम् । ७ अन्यजने । ८ अनुकूलम् । ९ विनयः । १० लोमानि । ११ न्यायादनपेता । १२ वर्तनम् । १३ दुष्कलम् । १४ प्राणनाशेऽपि । १५ न याचनीयाः । १६ स्वल्पधनः । १७ अनुसरणीयम् । १८ उपदिष्टम् । १९ अतिकठिनम् [illegible] खड्गधाराताडनम् । २१ गुप्तम् । २२ उपकारस्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
न प्राणान्ते प्रकृतिविकृतिर्जायते चोत्तमानाम् ॥ ४१ ॥

दुर्जनवचनाङ्गारैर्दग्धोऽपि न विप्रियं वदत्यार्यः ।
अगुरुरपि दह्यमानः स्वभावगन्धं परित्यजति किं नु ॥ ४२ ॥

सत्सङ्गाद्भवति हि साधुता खलानां
साधूनां नहि खलसङ्गमात्खलत्वम् ।
आमोदं कुसुमभवं मृदेव धत्ते
मृद्गन्धं नहि कुसुमानि धारयन्ति ॥ ४३ ॥

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥ ४४ ॥

असाधुः साधुर्वा भवति खलु जात्यैव पुरुषो
न सङ्गाद्दौर्जन्यं नहि सुजनता कस्य चिदपि ।
प्ररूढे संसर्गे मणिभुजगयोर्जन्मजनिते
मणिर्नाऽहेर्दोषान्स्पृशति नहि सर्पो मणिगुणान् ॥ ४५ ॥

वनेऽपि सिंहा मृगमांसभक्षिणो बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूता न नीचकर्माणि समाचरन्ति ॥ ४६ ॥

कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयांश्च न लोभपाशा
लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ ४७ ॥

पतितोऽपि राहुवदने तरणिर्बोधयति पद्मखण्डानि ।

---

१ अनिष्टम् २ सुगन्धम् ३ दूषणम् ४ शोभिता ५ संबन्धे ६ सर्पस्य ७ संकटस्थाः ८ कटाक्षा एव विशिखाः बाणाः ९ न छिन्दन्ति १० कोपः क्रोधः स एव कृशानुरग्निस्तत्तापः ११ संपूर्णम् १२ विकासयति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति विपद्यपि महतामङ्गीकृतवस्तुनिर्वाहः ॥ ४८ ॥

दाता न दापयति दापयिता न दत्ते
यो दानदापनपरो मधुरं न वक्ति ।
दानं च दापनमथो मधुरा च वाणी
त्रीण्यप्यमूनि खलु सत्पुरुषे वसन्ति ॥ ४९ ॥

मलयाचलगन्धेन त्विन्धनं चन्दनायते ।
तथा सज्जनसङ्गेन दुर्जनः सज्जनायते ॥ ५० ॥

हृदयानि सतामेव कठिनानीति मे मतिः ।
खलवाग्विशिखैस्तीक्ष्णैर्भिद्यन्ते न मनाग्यतः ॥ ५१ ॥

वक्त्रे वल्गाप्रकर्षः समरभुवि तव प्राणरक्षाऽपि दैवा-
त्स्वेच्छाचारो नचाऽऽस्ते नहि भवति तथा भारवाहो नितान्तम् ।
इत्युक्तोऽश्वः खरेण प्रहसितवदनो मूक एवाऽवतस्थे
तस्माज्जात्या महान्तोऽधमजनविषये मौनमेवाश्रयन्ति ॥ ५२ ॥

अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयम् ।
अहो सुमनसां प्रीतिर्वामदक्षिणयोः समा ॥ ५३ ॥

माभूत्सज्जनयोगो यदि योगो मा पुनः स्नेहः ।
स्नेहो यदि विरहो मा यदि विरहो जीविताऽऽशा का ॥ ५४ ॥

प्रेमैव माऽस्तु यदि चेत्पथिकेन सार्धं
तेनाऽपि चेद्गुणवता न समं कदाचित् ।
तेनाऽपि चेद्भवतु माऽस्तु कदापि भङ्गो
भङ्गोऽपि चेद्भवतु वश्यमवश्यमायुः ॥ ५५ ॥

कुम्भः परिमितमम्भः पिबत्यसौ कुम्भसंभवोऽम्भोधिम् ।
अतिरिच्यते सुजन्मा कश्चिज्जनकान्निजेन चरितेन ॥ ५६ ॥

तुङ्गासनास्तुङ्गतराः समर्था मनोरथान्पूरयितुं न नीचाः ।

---

१ किंचिदपि २ 'लगाम' इति लोके ३ समागमेन ४ सह ५ विख्यात ६ अगस्त्यः ७ अधिको भवति ८ पितुः ९ सदाचरणेन १० उच्चासनाः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धाराधरा एव धराधराणां निदाघदाहं शमितुं[1] न नद्यः ॥ ५७ ॥

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथेनापि जले लिखितमक्षरम् ॥ ५८ ॥

प्रथमवयसि दत्तं तोयमल्पं पिबन्तः
शिरसि निहितभारा नारिकेला नराणाम् ।
उदकममृतकल्पं[2] दद्युराजीवितान्तं
नहि कृतमुपकारं साधवो विस्मरन्ति ॥ ५९ ॥

अद्याऽपि नोज्झति[3] हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ॥
अम्भोनिधिर्वहति दुःसहवाडवाऽग्नि-
मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ ६० ॥

हरेः[4] पदाहतिः[5] श्लाघ्या न श्लाघ्यं खररोहणम् ॥
स्पर्धाऽपि विदुषा युक्ता न युक्ता मूर्खमित्रता ॥ ६१ ॥

विपदि धैर्यमथाऽभ्युदये[6] क्षमा
सदसि वाक्पटुता[7] युधि विक्रमः ।
यशसि चाऽभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं[8] हि महात्मनाम् ॥ ६२ ॥

यत्र विद्वज्जनो नाऽस्ति श्लाघ्यस्तत्राऽल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते[9] ॥ ६३ ॥

गोत्रस्थितिं[10] न मुञ्चन्ति सदा सन्नतिमाश्रिताः[11]
उदन्वन्तश्च[12] सन्तश्च महासत्त्वतया[13] तथा ॥ ६४ ॥

साधोः प्रकोपितस्याऽपि मनो नाऽऽयाति विक्रियाम्[14] ।

---

१ शमितुं शमयितुमित्यर्थः 'शमयन्ति नान्ये' इति वा पाठः २ अमृततुल्यम् ३ उज्झ उत्सर्गे, न त्यजति ४ सिंहस्य अश्वस्य वा ५ पादताडनम् ६ उदयकाले ७ वक्तृत्वशक्तिः ८ स्वभावसिद्धम् ९ वृक्षवदाचरति १० कुलमर्यादां पक्षे पर्वतस्थितिम् ११ सन्नमनम् १२ समुद्राः १३ महान्तः सत्त्वाः प्राणिनो यस्मिन्, पक्षे सत्त्वं धैर्यम् १४ विकारम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नहि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥ ६५ ॥

नारिकेलसमाऽऽकारा दृश्यन्तेऽपि हि सज्जनाः ।
अन्ये बदरिकाऽऽकारा बहिरेव मनोहराः ॥ ६६ ॥

स्नेहच्छेदेऽपि साधूनां गुणा नाऽऽयान्ति विक्रियाम् ।
भङ्गेनाऽपि मृणालानामनुबध्नन्ति तन्तवः ॥ ६७ ॥

घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्ताऽऽवलि-
र्न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।
प्रीत्यै सज्जनभाषितं प्रभवति प्रायो यथा चेतसि
सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टि मन्त्रोपमम् ॥ ६८॥

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं कस्यचित्सुमहात्मनः ॥ ६९ ॥

उपचरितव्याः सन्तो यद्यपि कथयन्ति नैकमुपदेशम् ।
यास्तेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि ॥ ७० ॥

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले-
ष्वेते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः॥ ७१ ॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजति भुजयोर्वीर्यमतुलम् ।
हृदि स्वस्था वृत्तिः श्रुतमधिगतैकव्रतफलं
विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ७२ ॥

संपत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ ७३ ॥

---

१ 'कोलीत' इति लोके २ संबन्धं कुर्वन्ति ३ मुक्तासरः ४ सदा ५ स्वैराला-
दा ६ स्त्रक्रियां ७ शंकरे ८ मनोजये ९ शानम् १० निस्तुलम् ११ पूजनम्
१२ काठिन्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ॥
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ ७४ ॥

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान्गुणान्ख्यापयन्तः
स्वार्थान्संपादयन्तो विततबहुतराऽऽरम्भयत्नाः परार्थे ॥
क्षान्त्यैवाक्षेपरूक्षाऽक्षरमुखरमुखान्दुर्मुखान्दूषयन्तः
सन्तश्चाऽऽश्चर्यचर्या जगति बहुमताः कस्य नाऽभ्यर्चनीयाः ॥ ७५

मनसि वचसि काये पुण्यपीयूषपूर्णा
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ ७६ ॥

किं तेन हेमगिरिणा रजताद्रिणा वा
यत्र श्रिताश्च तरवस्तरवस्त एव ।
मन्यामहे मलयमेव यदाश्रयेण
कङ्कोलनिम्बकुटजा अपि चन्दनाः स्युः ॥ ७७ ॥

अतिकुपिता अपि सुजना योगेन मृदूभवन्ति न तु नीचाः।
हेम्नः कठिनस्याऽपि द्रवणोपायोऽस्ति न तृणानाम् ॥ ७८ ॥

पातितोपि कराघातैरुत्पतत्येव कन्दुकः
प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः ॥ ७९ ॥

छिन्नोऽपि रोहति तरुश्चन्द्रः क्षीणोऽपिवर्धते लोके ।
इति विमृशन्तः सन्तः सन्तप्यन्ते न लोकेऽस्मिन् ॥ ८० ॥

इयमुन्नतसत्त्वशालिनी-महतां काऽपि कठोरचित्तता ।
उपकृत्य भवन्ति दूरतः परतः प्रत्युपकारशङ्कया ॥ ८१ ॥

नाल्पीयसि निबध्नन्ति पदमुन्नतचेतसः ।

---

१ प्रकटयन्तः २ अमृतम् ३ पर्वताम ४ ... ५ ...मानाः ६ उदारचेतसः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

येषां भुवनलाभेऽपि निःसीमानो मनोरथाः ॥ ८२ ॥

अहो किमपि चित्राणि चरित्राणि महात्मनाम् ।
लक्ष्मीं तृणाय मन्यन्ते तद्भरेण[1] नमन्त्यपि ॥ ८३ ॥

आपत्स्वेव हि महतां शक्तिरभिव्यज्यते[2] न संपत्सु ।
अगुरोस्तथा न गन्धो घ्राणेऽस्ति यथाऽग्निपतितस्य ॥ ८४ ॥

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ ८५ ॥

तरुमूलादिषु निहितं जलमाविर्भवति पल्लवाऽग्रेषु ।
निभृतं[3] यदुपक्रियते तदपि महान्तो वहन्त्युच्चैः ॥ ८६ ॥

अचिन्त्याः पन्थानः किमपि महतामन्धकरिपो-[4]
र्यदक्ष्णोऽभूत्तेजस्तदकृत[5] कथाशेषमदनम् ।
मुनेर्नेत्रादत्रेर्यदजनि पुनर्ज्योतिरहह ।
मतेने[6] तेनेदं मदनमयमेव त्रिभुवनम् ॥ ८७ ॥

नूनं दुग्धाब्धिमन्थोत्थाविमौ सुजनदुर्जनौ ।
किं त्विन्दोः सोदरः पूर्वः कालकूटस्य चेतरः ॥ ८८ ॥

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताऽग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥ ८९ ॥

किमत्र चित्रं यत्सन्तः पराऽनुग्रहतत्पराः ।
नहि स्वदेहशैत्याय जायन्ते चन्दनद्रुमाः ॥ ९० ॥

प्राज्ञो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाऽशुभाः ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाऽम्भसः ॥ ९१ ॥

---

१ लक्ष्मीभरेण २ व्यक्ताभवति ३ निःशलाके एकान्ते इत्यर्थः ४ शंकरस्य ५ अकरोत् ६ वार्तावशिष्टो मदनो यस्मिंस्तत्तथाविधम् अत्रोत्तरार्धस्थं त्रिभुवन-मिति विशेष्यं योजनीयम् ७ अग्नेः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिपुः पौलस्त्याख्यश्चरणचरितव्यो जलनिधि-
र्विजेतव्या लंका रणभुवि सहायाश्च कपयः ।
तथाऽप्येको रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥ ९२ ॥

रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगा
निरालम्बो मार्गश्चरणरहितः सारथिरपि ।
रविर्यात्येवाऽन्तं प्रतिदिनमपारस्य नभसः
क्रियासिद्धिः सत्त्वे भवति महतां नोपकारणे ॥ ९३ ॥

धनुः पौष्पं[3] मौर्वी[4] मधुकरमयी[5] चञ्चलदृशां
दृशां कोणो बाणः सुहृदविजितात्मा हिमकरः ।
तथाप्येकोऽनङ्गस्त्रिभुवनमपि व्याकुलयति
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥ ९४ ॥

अपेक्षन्ते न च स्नेहं[6] न पात्रं[7] न दशान्तरम्[8] ॥
सदालोकहितासक्ता[9] रत्नदीपा इवोत्तमाः ॥ ९५ ॥

किं मधुना किं विधुना किं सुधया[10] किं च वसुधयाऽखिलया ।
यदि हृदयहारिचरितः पुरुषः पुनरेति नयनयोरयनम्[11] ॥ ९६ ॥

काकैः सह प्रवृद्धस्य कोकिलस्य कलौ[12] गिरः ।
खलसंगेऽपि नैष्ठुर्यं कल्याणप्रकृतेः कुतः ॥ ९७ ॥

अम्बरमनूरुलङ्घ्यं वसुन्धरा साऽपि वामनैकपदा ।
अब्धिरपि पोत[13]लङ्घ्यः सतां मनः केन तुल्यं स्यात् ॥ ९८ ॥

आपद्गतः खलु महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्ता-

---

१ रावणः २ अनूरुः अरुणः ३ पुष्पमयम् ४ ज्या ५ भ्रमरकृता ६ स्नेहम् घृतादि च ७ योग्यतां भाण्डं च ८ अवस्थान्तरं सूत्रवर्त्तिकां च ९ लोकानां हितं तस्मिन्नासक्ताः पक्षे आलोकः प्रकाशः तदेवहितं तस्मिन्नासक्ताः १० अमृतेन ११ स्थानम् १२ अत्यन्तमधुराः १३ तरणिः नौकादिर्यावत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्लोकोत्तरं परिमलं प्रकटीकरोति ॥ ९९ ॥
विश्वाऽभिरामगुणगौरवगुम्फितानां
रोषोऽपि निर्मलधियां रमणीय एव ॥
लोकप्रियैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुतापि नितान्तरम्या ॥ १०० ॥

शून्ये ऽपि च गुणवत्तामातन्वानः स्वकीयगुणजालैः ।
विवराणि मुद्रयन्द्रागूर्णायुरिव सज्जनो जयति ॥ १०१ ॥

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधि-
र्निरुत्सेको लक्ष्म्यामनभिभवगंधाः परकथाः ॥
प्रियं कृत्वा मौनं सदसि कथनं चाऽप्युपकृतेः
श्रुतेऽत्यन्तासक्तिः पुरुषमभिजातं कथयति ॥ १०२ ॥

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधिविशुद्धं विजयते ॥ १०३ ॥

ये पापं शमयन्ति सङ्गतिभृतां ये दानशृङ्गारिणो
येषां चित्तमतीव निर्मलतरं येषां न भग्नं व्रतम् ।
ये सर्वान्सुखयन्ति हि प्रतिदिनं ते साधवो दुर्लभा
गङ्गावद्गजगण्डवद्गगनवद्गाङ्गेयवद्गेयवत् ॥ १०४ ॥

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ १०५ ॥

विवेकः सह संयत्या विनयो विद्यया सह ।
प्रभुत्वं प्रश्रयोपेतं चिन्हमेतन्महात्मनाम् ॥ १०६ ॥
हितेच्छुना तु कर्तव्यः सतामेव समागमः

---

१ सुन्दरः २ केशरस्य ३ 'कोळी' इति लोके लता ४ पाठभेदत्वेन नास्य पद्यस्य पुनरुक्तिः ५ [illegible] ६ [illegible]त्मिका ७ विनयः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरसानां सुमनसां षट्पदेनेव सर्वदा ॥ १०७ ॥
सद्वृत्तमेव संसेव्यंगुरवो लघवोऽपि च ।
सर्वे वर्णाः समायान्ति सर्वार्थैः श्रुतियोग्यताम् ॥ १०८ ॥
सर्वाभीष्टप्रदो नित्यं सन्मार्गेणैव गच्छताम् ॥
विचित्रमेतद्विद्वांस्तु जङ्गमः कल्पपादपः ॥ १०९ ॥
सतां सङ्गं विना कोपि लभेत्किं वाञ्छितं फलम् ।
नहि सन्तापशान्तिः स्यात्पूर्णचन्द्रोदयं विना ॥ ११० ॥
साधूनां चरणाम्भोजपरागं भगवानपि ।
वाञ्छतीति त एवेह वन्द्याः पद्माकरा इव ॥ १११ ॥

दुर्जननिन्दा ।

श्रीः ॥ दुर्जनः परिहर्तव्यो विद्ययाऽलंकृतोपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ १ ॥
अहमेव गुरुः सुदारुणानामिति हालाहल मास्म तात दृप्यः[1] ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम् ॥२॥
अपूर्वरसना[2] व्यालाः[3] खलाननबिलेशयाः ।
कर्णमूले स्पृशन्त्यन्यं हरन्त्यन्यस्य जीवितम् ॥ ३ ॥
न दुर्जनः सज्जनतामुपैति बहुप्रकारैरपि सेव्यमानः ।
भूयोऽपि सिक्तः पयसा घृतेन न निम्बवृक्षो मधुरत्वमेति॥४॥
खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ॥
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥ ५ ॥
खलानां कण्टकानां च द्विविधैव प्रतिक्रिया[4] ।
उपानन्मुखभङ्गो[5] वा दूरतो वा विसर्जनम् ॥ ६ ॥
न विना परवादेन रमते दुर्जनो जनः ॥
काकः सर्वरसान् भुङ्क्ते विनाऽमेध्यं[6] न तृप्यति ॥ ७ ॥

१ गर्वोद्धतो मा भव २ जिह्वाः ३ सर्पाः ४ प्रतीकारः ५ उपानहा पादस्थचर्मणामुखभङ्गः ६ विष्ठाद्यशुचि,

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पोतो[1] दुस्तरवारिराशितरणे दीपोऽन्धकारागमे
निर्वाते व्यजनं मदान्धकरिणां दर्पोपशान्तौ सृणिः[2] ।
इत्येतद्भुवि नाऽस्ति यस्य विधिना नोपायचिन्ता कृता
मन्ये दुर्जनचित्तवृत्तिहरणे धाताऽपि भग्नोद्यमः[3] ॥ ८ ॥

कर्पूरधूलीरचिताऽऽलवालैः[4] कस्तूरिकाकुंकुमलिप्तदेहः ।
सुवर्णकुम्भैःपरिषिच्यमानो निजं गुणं मुञ्चति किं पलाण्डुः[6]॥९॥

सर्पः क्रूरः खलः क्रूरः सर्पात्क्रूरतरः खलः ।
मंत्रेण शाम्यते सर्पो न खलः शाम्यते कदा ॥ १० ॥

विषधरतोप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः
यदयं नकुलद्वेषी[5] सुकुलद्वेषी पुनः पिशुनः ॥ ११ ॥

सर्वास्तुम्ब्यः[7] समकटुरसास्तुम्बिवल्लीप्रसूता-
स्ताः संबद्धा अपि कतिपया दुस्तरं तारयन्ति ॥
शब्दायन्ते[8] सरसमपराःशुष्ककाष्ठे निषण्णा-
स्तन्मध्येऽन्या ज्वलितहृदयाः शोणितं[9] संवहन्ति ॥१२॥

धातस्तात तवैव दूषणमिदं यन्नाम कस्तूरिका
कान्तारान्तरचारिणां[10] तृणभुजां यन्नाभिमूले कृता ।
यद्येवं पिशुनस्य[11] हन्त रसनामूलेऽकरिष्यस्तदा[12]
प्रो[13]ऽऽयासेन विनाऽभविष्यदतुला कीर्तिश्च निर्दोषता॥१३॥

कस्तूरिकां तृणभुजामटवीचराणां[14]
निक्षिप्त नाभिषु चकार च तान्वधार्हान् ।
मूढो विधिः सकलदुर्जनलोलजिह्वा-
मूले स्म निक्षिपति चेत्सकलोपकारः ॥ १४ ॥

---

१ नौका. २ अंकुशः ३ भग्नप्रयत्नः ४ 'आळें' इतिलोके ५ कन्दर्पः 'कान्दा' इतिप्र. ६ 'मुङ्गूस' इति लोके ७ तुम्बीफलानि. ८ शब्दं कुर्वन्ति. ९ रक्तम्. १० दुर्गममार्गसंचारिणाम् ११ सचरुहृदय. १२ जिह्वामूले. १३ प्रकृष्टेन यत्नेन १४ वनम्.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते वै सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परोपकारनिरताः स्वार्थाऽविरोधेन ये ॥
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥१५॥

यत्रात्मीयो जनो नास्ति भेदस्तत्र न विद्यते ॥
कुठारैर्दण्डनिर्मुक्तैर्भिद्यन्ते तरवः कथम् ॥ १६ ॥

दुर्जनं प्रथमं वन्दे सज्जनं तदनंतरम् ।
मुखप्रक्षालनात्पूर्वं गुदप्रक्षालनं यथा ॥ १७ ॥

दह्यमानाः सुतीक्ष्णेन नीचाः परयशोऽग्निना ।
अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते ॥ १८ ॥

दुर्जनदूषितमनसां पुंसां सुजनेऽप्यविश्वासः ।
बालः पायसदग्धो दध्यपि फूत्कृत्य भक्षयति ॥ १९ ॥

नौश्च दुर्जनजिह्वा च प्रतिकूलविसर्पिणी ॥
परप्रतारणायैव दारुणा केन निर्मिता ॥ २० ॥

दुर्जनं सुजनं कर्तुं नोपकारशतैरपि ॥
अपानं मृत्सहस्रेण धौतं चास्यं कथं भवेत् ॥ २१ ॥

भग्नकुम्भशकलेन वै मलं बालकस्य जननी व्यपोहति ॥
तद्वदोष्ठवदनेन दुर्जनो मातृतः शतगुणाऽधिको भवेत् ॥ २२ ॥

अप्यात्मनो विनाशं गणयति न खलः परव्यसनहृष्टः ॥
प्रायो मस्तकनाशे समरमुखे नृत्यति कबन्धः ॥ २३ ॥

जलनिधौ जननं धवलं वपुर्मुररिपोरपि पाणितले स्थितिः ।
इति समस्तगुणान्वित शंख भो कुटिलता हृदये न निवारिता॥२४॥

---

१ परश्ववैः २ फूत्कारं कृत्वा. ३ प्रतितीरं पक्षे विरुद्धम्. ४ परेषां प्रकर्षेण तारणम्. पक्षे वञ्चनं ५ दारुणा भयंकरा. पक्षे दारुणा काष्ठेन । ६ न कोपि शक्नोतीति शेषः ७ भिन्नकलशखण्डेन. ८ अशिरस्कं कलेवरम् ९ कौटिल्यम्.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्जनस्य विशिष्टत्वं परोपद्रवकारिणम् ।
व्याघ्रस्य चोपवासेन पारणं पशुमारणम् ॥ २५ ॥
किंशुके[1] शुक माऽतिष्ठ चिरकालफलेच्छया ॥
बाह्यरङ्गप्रसङ्गेन के के नाऽनेन वञ्चिताः ॥ २६ ॥
सुमुखोऽपि सुवृत्तोपि सन्मार्गे पतितोऽपि च ॥
महतां पादलग्नोपि व्यथयत्येव कण्टकः ॥ २७ ॥
रविरपि न दहति तादृग्यादृग्दहति वालुकानिकरः[2] ।
अन्यस्माल्लब्धपदो नीचः प्रायेण दुःसहो भवति ॥ २८ ॥
त्यक्त्वापि निजप्राणान्परहितविघ्नं खलः करोत्येव ।
कवले पतिता सद्यो वमयति[3] मक्षिकाऽन्नभोक्तारम् ॥२९॥
संत्यज्य शूर्पवद्दोषान्गुणान्गृह्णाति पण्डितः ।
दोषग्राही गुणत्यागी पल्लोलीव[4] हि दुर्जनः ॥ ३० ॥
नलिकागतमपि कुटिलं न भवति सरलं शुनः पुच्छम् ।
तद्वत्खलजनहृदयं बोधितमपि नैव याति माधुर्यम् ॥३१॥
भिक्षो कंथा श्लथा ते नहि शफरिवधे जालमश्नासि मत्स्यां-
स्ते वै मद्योपदंशाः पिबसि मधुसमं वेश्यया यासि वेश्याम् ।
दत्त्वांऽघ्रि मूर्ध्न्यरीणां तव किमुरिपवो भित्तिभेत्ताऽस्मि येषां
चोरोऽसि द्यूतहेतोस्त्वयि सकलमिदं नाऽस्ति नष्टे विचारः ३२
विद्या विवादाय धनं मदाय शक्तिः परेषां परपीडनाय ।
खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय ॥ ३३ ॥
सद्वंशजातं[5] गुणकोटियुक्तं[6] धनुः कथं पार्थिववामहस्ते ।
शरः परप्राणविहारदक्षः सपक्षपातोऽप्यधमो गरीयान् ॥ ३४ ॥
अकस्मादेव कुप्यन्ति प्रसीदन्त्यनिमित्ततः ।
शीलमेतदसाधूनामभ्रं पारिप्लवं[8] यथा ॥ ३५ ॥

१. पलाशवृक्षे. २ वालुकासमूहः ३ वान्ति करोति. ४ 'चालनी' इति लोके. ५ वेणुः कुलं च ६ मौर्वी विद्याविनयादिश्च. ७ भ्रमम् संख्याविशेषश्च ८ चञ्चलम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संवर्धितोऽपि भुजगः पयसा न वश्य-
स्तत्पालकानपि निहन्ति बलेन सिंहः ॥
दुष्टः परैरुपकृतस्तदनिष्टकारी
विश्वासलेश इह नैव बुधैर्विधेयः ॥ ३६ ॥

अशक्ताः शक्तिमात्मीयां [1]श्लाघयन्ते च दुर्जनाः ।
ते भवन्त्युपहासाय महतामेव सन्निधौ ॥ ३७ ॥

एते स्निग्धतमा इति मामा क्षुद्रेषु यात विश्वासम् ।
सिद्धा[2]र्थानामेषां स्नेहो[3]ऽप्यश्रूणि[4] पातयति ॥ ३८ ॥

गुणिनां गुणेषु सत्स्वपि पिशुनजनो दोषमात्रमादत्ते ।
पुष्पे फले विरागी [5]क्रमेलकः कण्टकौघमिव ॥ ३९ ॥

सुजनानामपि हृदयं पिशुनपरिष्वङ्गलिप्तमिह भवति ।
पवनः परागवाही [6]रथ्यासु वहन्र[7]जस्वलो भवति ॥४०॥

विद्यया विमलयाऽप्यलंकृतो दुर्जनः [8]सदसि माऽस्तु कश्चन ।
साक्षरा हि विपरीततां गताः केवलं जगति तेऽपि राक्षसाः ४१

अहो दुर्जनसंसर्गान्मानहानिः पदे पदे ।
पावको लोहसंगेन मुद्गरैरभिहन्यते ॥ ४२ ॥

परिपूर्णेऽपि तटाके काकः कुम्भोदकं पिबति ।
अनुकूलेऽपि कलत्रे नीचः परदारलम्पटो भवति ४३

सर्वलोकपरितोषकारिणि स्वर्धुनीविमलवारिणि स्थिते ।
[9]पूतिगन्धवति प[10]ल्वलोदके सूकरः सुखमतीव मन्यते ॥४४॥

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनम[11]सत्यसन्धं भगवति वसुधे कथं वहसि ॥ ४५ ॥

दुर्जनेन समं सख्यं प्रीतिं चाऽपि न कारयेत् ।

---

१ श्लाघां कुर्वन्ति । २ शिरीषाणां पक्षे सिद्धः अर्थः कार्यं येषाम् । ३ तैलं स्नेहभावश्च । ४ नेत्रोदकम् । ५ [illegible] । ६ वीथीषु । ७ रजोयुक्तः । ८ सभायाम् । ९ दुर्गन्धवति । १० अल्पजलाशयोदके । ११ असत्यप्रतिज्ञम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णो दहति चाऽङ्गारः शीतः कृष्णायते करम् ॥५६॥

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाऽग्रे हृदि हालाहलं विषम् ॥ ४७ ॥

प्राक्पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति[1] शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः[2] करोति ॥ ४८ ॥

मृद्घटवत्सुखभेद्यो दुःसन्धानश्च[3] दुर्जनो भवति ।
सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु सन्धेयः ॥ ४९ ॥

मनस्यन्यद्वचस्यन्यत्कार्यें चाऽन्यद्दुरात्मनाम्
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥ ५० ॥

दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारिताऽर्धासनो
गाढाऽऽलिङ्गनतत्परः प्रियकथाप्रश्नेषु दत्ताऽऽदरः ।
अन्तर्भूतविषो बहिर्मधुमयश्चाऽतीव मायापटुः[4]
को नामाऽयमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः॥५१॥

अकरुणत्वमकारणविग्रहः[5] परधने परयोषिति च स्पृहा[6] ।
सुजनबन्धुजनेष्वसहिष्णुता[7] प्रकृतिसिद्धमिदं[8] हि दुरात्मनाम् ५२

जाड्यं ह्रीमति[9] गण्यते व्रतरुचौ[10] दम्भः शुचौ कैतवं[11]
शूरे निर्घृणता[12] मुनौ[13] विमतिता दैन्यं[14] प्रियालापिनि ।
तेजस्विन्यवलिप्तता[15] मुखरता[16] वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्सुगुणिनां यो दुर्जनैर्नाऽङ्कितः॥५३

१ शब्दं करोति । २ मच्छर इति लोके । ३ दुःखेन संधातुं शक्यः ४ कपटपटुः
५ निरर्थकविरोधः ६ इच्छा । ७ असहनशीलता । ८ स्वभावसिद्धम् ९ लज्जावति
१० व्रते । रुचिः प्रीतिर्यस्य तस्मिन् ११ [illegible] । १२ [illegible] । १३ मननशीले
१४ दीनत्वम् १५ सगर्वता । १६ वाचालत्वं सर्वदा वक्तृत्वमिति यावत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्भासिताखिलखलस्य[1] विशृङ्खलस्य[2] ।
प्राग्जातविस्मृतनिजाऽधमकर्मवृत्तेः ॥
दैवादवाप्तविभवस्य गुणद्विषोऽस्य ।
नीचस्य गोचरगतैः सुखमाप्यते कैः ॥ ५४ ॥

मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् ।
लुब्धक[3]धीवरपिशुना निष्कारण[4]वैरिणो जगति ॥ ५५ ॥

अतिमलिने[5] कर्तव्ये भवति खलानामतीव निपुणा[6] धीः ।
तिमिरे[7] हि कौशिकानां[8] रूपं प्रतिपद्यते दृष्टिः ॥ ५६ ॥

परवादे दशवदनः पररन्ध्रनिरीक्षणे सहस्राक्षः ।
सद्वृत्तवित्तहरणे बाहुसहस्रार्जुनो नीचः ॥ ५७ ॥

विशिख[9]व्याल[10]योरन्त्य[11]वर्णाभ्यां यो विनिर्मितः ।
परस्य हरति प्राणान्नैतच्चित्रं कुलोचितम् ॥ ५८ ॥

विषमा[12] मलिनात्मानो[13] द्विजिह्वा जिह्मगा[14] इव ।
जगत्प्राणहरा नित्यं कस्य नोद्वेजकाः खलाः ॥ ५९ ॥

परिशुद्धामपि वृत्तिं समाश्रितो दुर्जनः परान्व्यथयते[15] ।
पवनाशिनो[16]ऽपि भुजगाः परपरितापं न मुञ्चन्ति ॥ ६० ॥

जीवन[17]ग्रहणे नम्रा गृहीत्वा पुनरुन्नताः ।
किं कनिष्ठाः किमु ज्येष्ठा घटीयन्त्रस्य दुर्जनाः ॥ ६१ ॥

अपूर्वः कोऽपि कोपाऽग्निः सज्जनस्य खलस्य च ।
एकस्य शाम्यति स्नेहाद्वर्धतेऽन्यस्य वारितः ॥ ६२ ॥

पादाऽऽहतोऽपि दृढदण्डसमाऽऽहतोऽपि ।
यं दंष्ट्रया स्पृशति तं किल हन्ति सर्पः ॥

---

१ आविष्कृतसकलदुष्टस्य । २ अमर्यादस्य । ३ 'पारधी' इति लोके । ४ निष्कारणशत्रवः ५ अत्यन्तमलदूषिते । ६ पूर्णाः ७ तमसि. ८ घूकानां । 'घुबड' इति लो० ९ बाणः १० सर्पः ११ अंत्यवर्णौ खल इति । १२ वक्राः १३ दुष्टस्वभावाः १४ सर्पा इव । १५ व्यथां करोति । १६ वायुभक्षका अपि । १७ उदकं प्राणश्च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हर्षादिवैष पिशुनोऽत्र मनुष्यधर्मा ।
कर्णे परं स्पृशति हन्त्यपरस्य मूलम् ॥ ६३ ॥

यस्मिन् वंशे[1] समुत्पन्नस्तमेव निजचेष्टितैः[2] ।
दूषयत्यचिरेणैव घुणकीट[3] इवाऽधमः ॥ ६४ ॥

प्रेरयति परमनार्यः शक्तिविहीनोऽपि जगदभिद्रोहे ।
तेजयति शस्त्रधारां स्वयमसमर्थः शिलां छेत्तुम् ॥ ६५ ॥

स्वभावकठिनस्याऽस्य कृत्रिमां[4] बिभ्रतो नतिम्[5] ।
गुणोऽपि[6] परहिंसायै चापस्य[7] च खलस्य च ॥ ६६ ॥

अयःपिण्ड इवोत्तप्ते खलानां हृदये क्षणात् ।
पतिता एव नश्यन्ति गुणास्तोयकणा इव ॥ ६७ ॥

वक्रतां बिभ्रतो यस्य गुह्यमेव प्रकाशते ।
कथं च न समानः स्यात्पुच्छेन पिशुनः शुनः ॥ ६८ ॥

शिरसि विधृतोऽपि नित्यं यत्नादपि सेवितो बहुस्नेहैः[8] ।
तरुणीकच इव नीचः कौटिल्यं नैव विजहाति ॥ ६९ ॥

यथायथैव स्नेहेन भूयिष्ठमुपचर्यते[9] ।
धत्ते तथा तथा तापं महावैश्वानरः खलः ॥ ७० ॥

स्तोकेनोन्नतिमायाति स्तोकेनाऽऽयात्यधोगतिम् ।
अहो नु सदृशी वृत्तिस्तुलायष्टेः[11] खलस्य च ॥ ७१ ॥

दुर्जनः कृतशिक्षोऽपि सज्जनो नैव जायते ।
अपि गङ्गाजलस्नानादधःकेशः कुशायते ॥ ७२ ॥

खलः सत्क्रियमाणोऽपि ददाति कलहं[12] सताम्[13] ।

---

१ वेणौ कुले च २ स्वकर्मभिः ३ 'वाळवी' इति लोके ४ क्रियया निर्वृतां कपटयुक्तां च । ५ नम्रत्वम् ६ मौर्वी विनयादिश्च । ७ धनुषः ८ बहुप्रकारैः स्नेहैः घृततैलादिभिः ९ [illegible] १० दूषयति ११ तुलायष्टेः 'दांडी' इतिप्रसिद्धायाः १२ कलिम् १३ साधूनाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुग्धधौतोऽपि किं याति वायसः[1] कलहंसताम्[2] ॥ ७३ ॥

बिभ्राणा गरलं कण्ठे भुजंगपरिवेष्टिता[3] ।
शांभवीव तनुः कस्य न वन्द्या दौर्जनी[4] सभा ॥ ७४ ॥

अक्षमालापवृत्तिज्ञा[5] कुशासनपरिग्रहा[6] ।
ब्राह्मीव दौर्जनी संसद्वन्दनीया समेखला[7] ॥ ७५ ॥

पात्रमपात्रीकुरुते[8] दहति गुणं[9] स्नेहमाशु[10] नाशयति ।
अमले मलं[11] नियच्छति दीपज्वालेव खलमैत्री ॥ ७६ ॥

दुर्वृत्तसंगतिरनर्थपरम्पराया ।
हेतुः सतां भवति किं वचनीयमेतत् ॥
लङ्केश्वरो हरति दाशरथेः कलत्रं ।
प्राप्नोति बन्धमथ दक्षिणसिंधुराजः ॥ ७७ ॥

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत्सीतां बन्धनं च महोदधेः ॥ ७८ ॥

करोति स्वमुखेनैव बहुधान्यस्य[12] खण्डनम् ।
नमः पतनशीलाय मुसलाय खलाय च ॥ ७९ ॥

न देवाय न धर्माय न सिन्धुभ्यो न चार्थिने ।
दुर्जनस्याऽर्जितं वित्तं भुज्यते राजतस्करैः ॥ ८० ॥

मुखं पद्मदलाकारं वाचा चन्दनशीतला ।
हृदयं क्रोधसंयुक्तं त्रिविधं धूर्तलक्षणम् ॥ ८१ ॥

---

१ काकः २ राजहंसत्वम् ३ सर्पैः परिवेष्टिता पक्षे जारैः परिवेष्टिता । ४ दुर्जनसंबन्धिनी । ५ अक्षमाः ये आलापास्तेषां वृत्तिज्ञा पक्षे अक्षमाला जपमाला तस्या अपवृत्तिः भ्रमणं जानातीति । ६ कुत्सितं यत् शासनं शिक्षा. तस्य परिग्रहोऽवलम्बो यस्याः सा पक्षे कुशासनं दर्भासनं तत्परिग्रहः स्वीकारो यस्याः ७ समे साधौ खलाः पक्षे मेखलया सहिता । ८ अयोग्यम् । ९ सूत्रं विनयादिश्च । १० तैलं प्रीतिश्च । ११ मर्षां रोषं च । १२ बहुधा अन्यस्य परस्य पक्षे पुष्कलधान्यस्य खण्डनं चूर्णम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतमपि महोपकारं पय इव पीत्वा निरातङ्कः[1]।
प्रत्युत[2] हन्तुं यतते काकोदरः खलो जयति ॥ ८२ ॥

वहति विषधरान्पटीरजन्मा[3] शिरसि मषीपटलं[4] दधाति दीपः[5]।
विधुरपि भजतेतरां कलङ्कं पिथुनजनं खलु बिभ्रति क्षितीन्द्राः॥८३

रे खल तव खलु चरितं विदुषामग्रे विविच्य वक्ष्यामि।
अथवाऽलं पापात्मन्कृतया कथयाऽपि ते हतया ॥ ८४ ॥

आनन्दमृगदावाऽग्निः[6] शीलशाखिमदद्विपः[7]।
ज्ञानदीपमहावायुरयं[8] खलसमागमः ॥ ८५ ॥

निष्णातोऽपि च वेदान्ते साधुत्वं नैति दुर्जनः।
चिरमग्नो जलनिधौ मैनाक इव मार्दवम् ॥ ८६ ॥

खलः सज्जनकार्पासधक्षणैकहुताशनः[9]।
परदुःखाऽग्निधमनमारुतः केन वर्ण्यताम् ॥ ८७ ॥

यशः[10] सौरभ्यलशुनः शान्तिशैत्यहुताशनः[11]।
कारुण्यकुसुमाऽऽकाशः[12] खलः सज्जनदुःखदः ॥ ८८ ॥

खलास्तु कुशलाः साधुहितप्रत्यूहकर्मणि[13]।
निपुणाः फणिनः प्राणानपहर्तुं निरागसाम्[14] ॥ ८९ ॥

वदने विनिवेशिता भुजंगी पिशुनानां रसनामिषेण[15] धात्रा।
अनया कथमन्यथाऽवलीढा नहि जीवन्ति जनामनागमन्त्राः ९०

उन्नतं पदमवाप्य यो लघुर्हेलयैव सपतेदिति ब्रुवन्।

---

१ निःशङ्कः २ वैपरीत्ये। ३ सर्पबन्धुः ४ सर्वाङ्गम्। ५ चन्द्रनः। ६ आनन्द एव मृगस्तस्य दावाग्निरिव दाहकत्वात्। ७ शीलमेव शाखी वृक्षस्तस्य मदाद्विप इव उन्मूलकत्वात्। ८ ज्ञानमेव दीपस्तस्य महावातः निर्वाणकरणत्वात्। ९ धक्षणं दहनम्। १० कीर्तिरेव सौगन्ध्यं तन्नाशकत्वाल्लशुन इव लशुनो हि कस्तूर्यादेः सौगन्ध्यं नाशयतीति प्रसिद्धिः ११ शान्तिरेव शैत्यं तन्नाशकत्वादग्निरिव। १२ कारुण्यमेव कुसुमं तस्याकाशः आकाशस्य यथा पुष्पं कदापि नोपलभ्यते तथैव खलं कारुण्यं कदापि नोपलभ्यत इत्यर्थः १३ विघ्नः १४ निरपराधानाम् १५ जिह्वाछलेन

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैलशेखरगतः पृषद्गणश्चारुमारुतधुतः[1][2] पतत्यधः ॥ ९१ ॥

नन्वाश्रयस्थितिरियं[3] तव कालकूट ।
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ॥
प्रागर्णवस्य[4] हृदये वृषलक्ष्मणोऽथ ।
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥९२॥

अन्तर्मलिनदेहेन बहिराल्हादकारिणा ।
महाकालफलेनेव[5] के खलेन न वञ्चिताः ॥ ९३ ॥

अन्तर्वाणिं[6] मन्यमानः खलोऽयं पौरोभाग्यं[7] सूक्तिमुक्तासु[8] धत्ते ।
सर्वाऽऽनन्दिन्यङ्कके[9] कामिनीनामीर्मं[10] मार्गत्येष[11] वै बम्भरालिः[12] ९४

अपि वेत्ति षडक्षराणि चेदुपदेष्टुं शितिकण्ठमिच्छति[13] ।
वसनाऽशनमात्रमस्ति चेद्धनदादप्यतिरिच्यते[14] खलः ॥९५॥

अर्थग्रहणे न तथा दुनोति[15] कटुकूजितैर्यथा पिशुनः ।
रुधिराऽऽदानादधिकं दुनोति कर्णे क्वणन्[16] मशकः ॥ ९६ ॥

विध्वस्तपरगुणानां[17] भवति खलानामतीव मलिनत्वम् ।
अन्तरितशशिरुचामपि सलिलमुचां[18] मलिनिमाऽभ्यधिकः[19] ९७

परगुह्यगुप्तिनिपुणं[20] गुणमयमखिलैः[21] समीहितं नितराम् ।
ललिताऽम्बरमिव सज्जनमाखव इव दूषयन्ति खलाः ॥ ९८ ॥

त्यजति च गुणान् सुदूरं तनुमपि[22] दोषं निरीक्ष्य गृह्णाति ॥
मुक्त्वाऽलंकृतकेशान् यूकामिव[23] वानरः पिशुनः ॥ ९९ ॥

---

१ अम्बुकणसमुदायः २ कम्पितः ३ आश्रयो निवासस्तत्र स्थितिः ४ सदाशिवस्य । ५ तालफलेन । ६ अन्तर्वाणिस्तु शास्त्रवित् । ७ दोषैकदृक्त्वम् । ८ सूक्तय एव मुक्ताः मुक्ताफलानि तासु । ९ सर्वेषामाह्लादके १० व्रणम् ११ शोधयति । १२ मक्षिका। १३ शिवम् । १४ कुबेरात् । १५ संतापयति १६ गुणगुण इति शब्दं कुर्वन् १७ नाशिताः १८ मेघानाम् १९ मालिन्यम् २० गुह्यगोपने निपुणम् २१ तन्तुप्रचुरं पक्षे दयादाक्षिण्यादिप्रचुरम् २२ सूक्ष्मम् २३ ऊ इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्त्वं भद्र खलेश्वरोऽहमिह किं घोरे वने स्थीयते ।
शार्दूलादिभि[2]रेव हिंस्रपशुभि[3]: खाद्यो[4]ऽहमित्याशया ॥
कस्मात्कष्टमिदं त्वया व्यवसितं मद्देहमांसाशिनः ।
प्रत्युत्पन्ननृमांसभक्षणधियस्ते घ्नन्तु सर्वान्नरान् ॥१००॥

अहो प्रकृतिसादृश्यं श्लेष्मणो दुर्जनस्य च ।
मधुरैः कोपमायाति कटुकेनैव शाम्यति ॥ १०१ ॥

ईषल्लब्धप्रवेशोऽपि स्नेहविच्छेदकारकः ।
कृतक्षोभो नरीनर्ति खलोमन्थनदण्डवत् ॥ १०२ ॥

विवृण्वती पुरस्तैक्ष्ण्यं पृष्ठतः कुर्वती गुणम् ।
कर्णान्विध्यति लोकस्य सूचीवत्सूचकस्य वाक् १०३

दोषाऽऽलोकननिपुणाः परुषगिरो दुर्जनाश्च काकाश्च ।
दर्शनमपि भयजननं येषामनिमित्तपिशुनानाम् ॥ १०४ ॥

पिशुनत्वमेव विद्या परदूषणमेव भूषणं येषाम् ।
परदुःखमेव सौख्यं शिव शिव ते केन वेधसा सृष्टाः ॥१०५॥

कविं गुरुं वा बुधमात्मजं वा योऽस्तं स्वतेजः प्रकटं निनाय ।
दिनेदिने सोऽस्तमुपैति सूर्यः क्व स्वस्ति सर्वास्तमयोत्सुकाय १०६

मानमुपैति महानपि कलावतो मन्दिरे न मन्दस्य ।
उच्चः कर्कगतः स्यादमरगुरुर्मकरगो नीचः ॥ १०७ ॥

दुर्जनवदनविनिर्गतवचनभुजङ्गेन सज्जनो दष्टः ।
तद्विषघातनिमित्तं विद्वज्जनमौनमौषधं पिबति १०८

पूतना हरिवधार्थमाययौ प्राप सैव वधमात्मनस्ततः ।
यः परस्य विषमं विचिन्तयेत्प्राप्नुयात्स कुमतिः स्वयं हि तत् १०९

न यत्नकोटिशतकैरपि दुष्टः सुधीर्भवेत् ।

---

१ खलराजः २ व्याघ्रादिभिः ३ घातकपशुभिः ४ भक्षणीयः ५ स्वभावसाम्यम् ६ कफस्य । ७ स्वादुद्रव्यैः वचनैश्च । ८ अतिशयेन पुनःपुनर्वा नृत्यति । ९ घूकपक्षे दोषा रात्रिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीं मर्दितोपि कस्तूर्या लशुनो याति सौरभम् ॥ ११० ॥
अलं दुर्जनचित्तस्य सौजन्याऽऽप्तिप्रयत्नतः
नहि संतर्पितो दुग्धैरपि सर्पस्त्यजेद्विषम् ॥ १११ ॥
हा हन्त हन्त पिशुनाऽऽराधनापेक्षया वरम् ।
दावानले ऽप्यवस्थानं मरणं वाऽशनं विना ॥ ११२ ॥
कोनु कुर्यात्कदा ऽप्यत्र खलं निजवशं बुधः ।
किमु कल्पान्तरेपि स्याज्जीवद्धकनिबन्धनम् ॥ ११३ ॥
क्वचित्सर्पोपि मित्रत्वमियान्मूर्खस्तु न क्वचित् ॥
न शेषशायिनो ऽप्यासीद्वशो दुर्योधनो हरेः ॥ ११४ ॥

खलास्तु दूरतस्त्याज्याः कण्टका इव सर्वथा ।
येषां क्षणिकयोगेन सन्मार्गोऽप्यतिदुःखदः ॥ ११५ ॥
कल्याणेच्छुस्तु कः कुर्यात्कुवृत्तस्य कथामपि ।
किं कोकिलोपि कलयेदाम्रेच्छुः पञ्चमं विना ॥ ११६ ॥
स्वप्नेपि मास्तु कस्यापि दुर्जनस्य समागमः ।
यस्मात्कुजस्य संसर्गाद्वैरं बुधसुधास्मृतोः ॥ ११७ ॥
गुणैरनेकैर्युक्तोपि दुष्टस्यैकस्य योगतः ।
वर्ज्य एव पुमान्भूयाद्भुजंगस्येव चन्दनः ॥ ११८ ॥
असतां मास्तु कुत्रापि विलोकनमपि क्वचित् ।
चतुर्थीन्दुं समीक्ष्यैव कृष्णोऽपि ह्यभिशापवान् ॥ ११९॥

त्यजति च गुणान्सुदूरं तनुमपि दोषं निरीक्ष्य गृह्णाति ।
मुक्तालंकृतकेशान् यूकामिव वानरः पिशुनः ॥ १२० ॥

विद्वत्प्रशंसा ।

श्रीः ॥ रोहणं सूक्तिरत्नानां वन्दे वृन्दं विपश्चिताम् ॥
यन्मध्यपतितो नीचः काचोप्युच्चैर्महीयते[1] ॥ १ ॥

---

१ पूज्यते । 'मणीयत' इति पाठे मणिरिव गण्यते इत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रोपस्कृतशब्दसुन्दरगिरः[1] शिष्यप्रदेयाऽऽगमा
विख्याताः कवयो[2] वसन्ति विषये[3] यस्य प्रभोर्निर्धनाः
तज्जाड्यं[4] वसुधाधिपस्य कवयो ह्यर्थं विनापीश्वराः
कुत्साः स्युः कुपरीक्षका न मणयो यैरर्घतः[5] पातिताः ॥ २ ॥

विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ॥
नहि वन्ध्या विजानाति गुर्वीं[6] प्रसववेदनाम्[7] ॥ ३ ॥

हर्तुर्याति न गोचरं किमपि[8] शं[9] पुष्णाति यत्सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमान[10]मनिशं[11] प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रति मानमुज्झत[12] नृपाः कस्तैः सह स्पर्धते[13] ॥ ४ ॥

अधिगतपरमार्थान्पण्डितान्माऽवमंस्था-[14]
स्तृणमिव लघुलक्ष्मीर्नैव तान्संरुणद्धि[15] ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम्[16] ॥ ५ ॥

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन ॥
स्वदेशे पूज्यते राजा विद्वान्सर्वत्र पूज्यते ॥ ६ ॥

इभतुरगशतैः प्रयान्ति मूर्खा धनरहिताश्च बुधाः प्रयान्ति पद्भ्याम् ।
गिरिशिखरगताऽपि काकपङ्क्तिः पुलिनगतैर्न[17] समत्वमेति हंसैः ७

अलंकरोति[18] यः श्लोकं शुक एव न मध्यमः ॥
अलंकरोति यः श्लोकं शुक[19] एव नमध्यमः ॥ ८ ॥

---

१ शास्त्रसंस्कारेण शुद्धा ये शब्दास्तैः सुन्दरा गिरो येषां ते । २ पाण्डिताः । ३ देशे । ४ मौर्ख्यम् । ५ मूल्यतः । ६ महतीम् । ७ प्रसवकाले या वेदना ताम् । ८ अचिन्त्यम् । ९ सुखम् । १० दीयमानम् । ११ निरन्तरम् । १२ त्यजत । १३ स्पर्धां करोति । १४ अवमानं मा कुरु । १५ रोधं न कुरुते । १६ गजानाम् । १७ सैकतगतैः । १८ पर्याप्तं करोति । निषेधति तिरस्करोतीति यावदिति वा । १९ नमध्यमः शुकः नकारो मध्ये यस्य एवं विधः शुनकः श्वा इत्यर्थः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदीरितो[1]ऽर्थः पशुनाऽपि गृह्यते हयाश्च नागाश्च वहन्ति नोदिताः[2] ।
अनुक्तमप्यूहति[3] पण्डितो जनः परेङ्गितज्ञानफला[4] हि बुद्धयः ९

पण्डिते हि गुणाः सर्वे मूर्खे दोषाश्च केवलाः ।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको न लभ्यते ॥ १० ॥

सदोषमपि[5] निर्दोषं भवत्यग्रे विपश्चितः ।
रामस्येवा[6]र्जुनवपुः[7] कवेश्च सरसं वचः ॥ ११ ॥

अन्या जगद्धितमयी[8] मनसः प्रवृत्ति-
रन्यैव काऽपि रचना वचनाऽऽवलीनाम् ।
लोकोत्तरा च कृतिराकृतिरङ्ग हृद्या
विद्यावतां सकलमेव गिरां दवीयः[9] ॥ १२ ॥

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडा[10]विवेश्वरः ॥
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥ १३ ॥

स्थिरा शैली[11] गुणवतां खलबुद्ध्या न बाधते ।
रत्नदीपस्य हि शिखा वात्यया[12]ऽपि न नाश्यते १४

यदि सन्ति गुणाः पुंसां विकसन्त्येव केवलम् ।
नहि कस्तूरिकाऽऽमोदः शपथेन विभाव्यते ॥ १५ ॥

मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः ।
पंकच्छिदः फलस्ये[13]व निकषेणाऽऽविलं[14] पयः[15] ॥ १६

अर्थाहरणकौशल्यं किं स्तुमः शास्त्रवादिनाम् ।
अव्ययेभ्यो[16]ऽपि ये चाऽर्थान् निष्कर्षन्ति सहस्रशः ॥ १७

---

१ उच्चारितः । २ प्रेरिताः । ३ तर्कयति । ४ अभिप्रायः । ५ दोषसहितं पक्षे दोषोऽस्तास्तत्संहितम् । ६ परशुरामस्य । ७ सहस्रार्जुनशरीरम् । ८ लोकहितप्रचुरा, । ९ अतिदूरम् । १० गरलम् । ११ रीतिः । १२ 'वावटळ' इति लोके । १३ कतकफलस्येव । १४ कलुषम् 'गढूळ' इतिलो० । १५ उदकम् । १६ अव्ययेभ्यः अव्ययानामनेकार्थत्वात्. पक्षे व्ययरहितेभ्यः कृपणेभ्यः इति यावत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलावतः[1] सैव कला ययाऽधः[2] क्रियते भवः[3] ॥
बह्वीभिश्च कलाभिः किं याभिरङ्कः[4] स्फुटीकृतः[5] ॥१८
ॐकारावर्तरम्या यजुरमलजला सामगम्भीरघोषा
ऋग्वेदाथर्वकूला क्रमपदपुलिना न्यायशास्त्रोत्तरङ्गा ।
अङ्गग्राहावनद्धा शतपथगमना ब्रह्मविद्यार्णवान्ता
विद्वद्वाग् जान्हवीयं क्षपयति दुरितं सर्वदा शर्मदा नः॥१९

मूर्खवर्णनम् ।

आ ॥ अज्ञःसुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ॥
ज्ञानलवदुर्विदग्धं[6] ब्रह्माऽपि तं नरं न रञ्जयति[7] ॥ १ ॥
प्रसह्य[8] मणिमुद्धरेन्मकरवक्त्रदंष्ट्राऽङ्कुरा-
त्समुद्रमपि संतरेत्प्रचलदूर्मिमालाऽऽकुलम् ॥
भुजंगमपि कोपितं शिरसि पुष्पवद्धारये-
न्नतु प्रतिनिविष्ट[9]मूर्खजनचित्तमाराधयेत् ॥ २ ॥
लभेत सिकतासु[10] तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु[11] सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्छशविषाण[12]मासादये-
न्नतु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ३ ॥
व्यालं[13] बालमृणालतन्तुभिरसौ[14] रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणीञ्[15] शिरीषकुसुमप्रान्तेन[16] सन्नह्यते[17] ॥
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते[18]
नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः[19] ४

---

१ चन्द्रस्य । पक्षे विदुषः । २ अधोभागे ।क्रियते पक्षे तिरस्क्रियते । ३ शिवः संसारश्च । ४ कलंकः दोषश्च । ५ स्पष्टीकृतः । ६ विकृतिभावं गतम् । ७ रञ्जयितुमसमर्थो भवति । ८ बलात्कारं कृत्वा । ९. ज्ञानलेशशून्यत्वेन विपरीतार्थग्राही । १० मरीचिकासु । ११ वालुकासु । १२ शशशृंगम् । १३ सर्पम् । १४ बिसम् । १५ हीरकादीन् । १६ सर्षपपुष्पम् । १७ सन्नद्धो भवति । १८ इच्छति । १९ अमृतस्राविभिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा किंचिज्ज्ञोऽहं द्विप[1] इव मदाऽन्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं[2] मम मनः ।
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर[3] इव मदो मे व्यपगतः ॥५॥
कृमि[4]कुलचितं लालाक्लिन्नं[5] विगन्धि[6] जुगुप्सितं[7]
निरुपमरसं प्रीत्या खादन्नराऽस्थि निरामिषम्[8] ।
सुरपति[9]मपि श्वा पार्श्वस्थं विलोक्य न शंकते
नहि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्[10] ॥ ६ ॥
शिरः शार्वं[11] स्वर्गात्पशुपतिशिरस्तः[12] क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चाऽपि जलधिम् ॥
अधोऽधो गङ्गेयं पदमुपगता स्तोकमधुना ।
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ ७ ॥
शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्याऽऽतपो
नागेन्द्रो निशिता[13]ङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्॥८॥
साहित्य[14]संगीत[15]कलाविहीनः साक्षात्पशुः पुच्छविषाण[16]हीनः ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं[17] परमं पशूनाम् ॥९॥
येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥१०॥

---

१ गज इव । २ सगर्वम् । ३ सन्तापः यद्वा ज्वर इवेतिछेदः ज्वरं यथा मदो ग- च्छति तथेत्यर्थः । ४ कीटकसमूहैर्व्याप्तम् । ५ लालया क्लिन्नमार्द्रम् । ६ आमगन्धि ७ गर्हितम् । ८ निर्मांसम् । ९ इन्द्रम् । १० क्षुल्लकत्वम् । ११ शर्वसंबन्धि । १२ म- स्तकात् । १३ तीक्ष्णः । १४ साहित्यशास्त्रम् । १५ गायनम् । १६ शृङ्गम् १७ दैवम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसंपर्कः सुरेन्द्र[1]भवनेष्वपि ॥ ११ ॥
यस्य नाऽस्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ १२ ॥
मूर्खोऽपि मूर्खं दृष्ट्वा च चन्दनादतिशीतलः ।
यदि पश्यति विद्वांसं मन्यते पितृघातकम् ॥ १३ ॥
गुणिगणगणनाऽऽरम्भे न पतति [2]कठिनी सुसंभ्रमाद्यस्य ।
तेनाऽम्बा यदि [3]सुतिनी वद वन्ध्या कीदृशी भवति ॥१४॥
अन्तः[4]सारविहीनस्य सहायः किं करिष्यति ।
मलयेऽपि स्थितो वेणुर्वेणुरेव न चन्दनः ॥ १५ ॥
मुक्ताफलैः किं मृगपक्षिणां च मिष्टान्नपानं किमु गर्दभानाम् ।
अन्धस्य दीपो बधिरस्य गीतं मूर्खस्य किं धर्मकथाप्रसङ्गः १६
व्यासादीन्[5]कविपुङ्गवाननुचितैर्वाक्यैः सलीलं हस-
न्नुच्चैर्जल्प निमील्य लोचनयुगं श्लोकान् सगर्वं पठन् ।
काव्यं धिक्कुरु यत्परैर्विरचितं स्पर्धस्व सार्धं बुधै-
र्यद्यभ्यर्थयसे श्रुतेन रहितः पाण्डित्यमाप्तुं बलात् १७
ये संसत्सु विवादिनः परयशःशल्येन शूलाऽऽकुलाः
कुर्वन्ति स्वगुणस्तवेन गुणिनां यत्नाद्गुणाच्छादनम् ।
तेषां [7]रोषकषायितोदरदृशां कोपोष्णनिःश्वासिनां
दीप्ता रत्नशिखेव [8]कृष्णफणिनां विद्या जनोद्वेगिनी १८
[10]ग्रीवास्तम्भभृतः [11]परोन्नतिकथामात्रे शिरःशूलिनः
सोद्वेगभ्रमणप्रलापविपुलक्षोभाभिभूतस्थितेः ।

---

१ सुरेन्द्राणां भवनेषु स्वर्गादिलोकेष्वपीत्यर्थः । २ लेखनी तत्स्थानीया कनिष्ठिकाङ्गुलिर्वा । ३ पुत्रिणी । ४ मज्जा स्थिरांशो बलं वा । ५ कविश्रेष्ठान् । ६ अयोग्यैः । ७ रोषेण कषायितं ताम्रं उदरं गर्भो यस्या एवं विधा दृक् येषाम् । ८ कृष्णसर्पाणाम् । ९ श्वासवर्षी । १० ग्रीवास्तम्भं धारयतः । ११ परोत्कर्षः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्तर्द्वेषविषप्रवेशविषमक्रोधोष्णनिश्वासिनः
कष्टा नूनमपण्डितस्य[1] विकृति[2]र्भीमज्वरारम्भभूः[3] ॥१९॥

वितरति[4] गुरुः प्राज्ञे विद्यां यथैव तथा जडे[5]
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति[6] वा ।
भवति च पुनर्भूयान्[7] भेदः फलं प्रति तद्यथा
प्रभवति तथा बिम्बग्राहे[8] मणिर्न मृदां[9] चयः ॥ २० ॥

मूर्खत्वं सुलभं भजस्व कुमते मूर्खस्य चाऽष्टौ गुणा
निश्चिन्तो वहुभोजको ऽतिमुखरो रात्रिंदिवं स्वप्नभाक् ।
कार्याकार्यविचारणान्धवधिरो मानापमाने समः
प्रायेणामयवर्जितो[10] दृढवपुर्मूर्खः सुखं जीवति ॥ २१ ॥

मूर्खचिन्हानि षडिति गर्वो दुर्वचनं मुखे ।
विरोधी विषवादी च कृत्याऽकृत्यं न मन्यते ॥ २२ ॥

मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाऽशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव[11] सूकरः ॥ २३ ॥

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥ २४ ॥

अरण्यरुदितं कृतं शवशरीर[12]मुद्वर्तितं[13]
स्थलेऽब्जमवरोपितं सुचिरमूखरे[14] वर्षितम् ।
श्वपुच्छमवनामितं बधिरकर्णजापः[15] कृतो
धृतोऽन्धमुखदर्पणो यदबुधो जनः सेवितः ॥ २५ ॥

न मौर्ख्यसदृशं क्वापि विषं क्वाप्यवलोक्यते ।
यदन्यान्स्वाश्रयं चापि भूयो मारयति स्फुटम् ॥ २६ ॥

---

१ मूर्खस्य । २ विकारः । ३ दारुणज्वरारम्भकभूमिः । ४ ददाति । ५ मूर्खे । ६ नाशयति । ७ महान् । ८ बिम्बग्रहणे । ९ मृत्पिण्डः । १० रोगवर्जितः ११ शकृत् । १२ प्रेतशरीरम् । १३ [illegible] । १४ [illegible]प्रदेशे । १५ कर्णमन्त्र

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं नानानरकैः किं वा यमयातनयापि च ।
यन्मौढ्यमेव सर्वाणि दुःखान्यासादयिष्यति ॥ २७ ॥
अज्ञानतिमिरस्यैव प्रसादेनायमात्मनः ।
मुक्ताहारोपि बहुधा भोगीन्द्रत्वं गतः किल ॥ २८ ॥
न मद्यं मादकं तादृक्कान्ता नापि च काञ्चनम् ।
यथेदमविवेकित्वं प्रत्यक्षेणानुभूयते ॥ २९ ॥
मूर्खताख्या पिशाचीयं यस्य चेतसि संविशेत् ।
तमेव भ्रामयत्याशापंचकेऽप्यनिशं वृथा ॥ ३० ॥

सदुपदेशः

श्रीः ॥ तृष्णांछिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुपाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान्मानय विद्विषोऽप्यनुनय ह्याछादय स्वान्गुणा-
न्कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम् ॥ १ ॥
यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखनने प्रत्युद्यमः कीदृशः ॥ २ ॥
मूढ जहीहि धनागमतृष्णां कुरु तनुबुद्धे मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ ३ ॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ ४ ॥
का तव कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातस्तत्त्वं चिन्तय तदिदं भ्रातः ॥५॥

१ नाशय । २ घातय । ३ प्रीतिम् । ४ साधुमार्गम् । ५ विद्विषां कोधापनयनं कुर्वित्यर्थः । ६ रुजारहितम् । ७ प्रतीकारार्थमुद्योगः । ८ त्यज । ९ अल्पबुद्धे । १० धनवताम् । ११ विलक्षण[illegible] । १२ वास्तवम् । १३ विचारं कुरु !

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा कुरु धनजनयौवनगर्वं हरति निमेषात्[1] कालः सर्वम् ।
मायामयम्[2]इदम्[3]अखिलं हित्वा[4] ब्रह्मपदं प्रविशाऽऽशु[5] विदित्वा[6] ॥ ६
नलिनीदलगतजलवत्तरलं तद्वज्जीवनमतिशयचपलम् ।
क्षणमपि सज्जनसंगतिरेका भवति भवार्णवतरणे नौका ॥ ७ ॥
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः[7] ।
तदनु च जरया जर्जरदेहे वार्तां कोऽपि न पृच्छति गेहे ॥ ८ ॥
कामं क्रोधं लोभं मोहं त्यक्त्वाऽऽत्मानं[8] पश्य हि कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ ९ ॥
बालस्तावत्क्रीडाऽऽसक्तस्तरुणस्तावत्तरुणीरक्तः ॥
वृद्धस्तावच्चिन्तामग्नः परे ब्रह्मणि कोऽपि न लग्नः ॥ १० ॥
शत्रौ मित्रे बन्धौ मा कुरु यत्नं विग्रह[9]सन्धौ[10] ।
भव सम[11]चित्तः सर्वत्र त्वं वाञ्छस्यचिराद्[12]यदि सत्त्वम्[13] ॥ ११ ॥

महता पुण्य[14]पण्येन क्रीतेयं काय[15]नौस्त्वया ।
पारं दुःखोदधेः[16]गन्तुं तर[17] यावन्न भिद्यते ॥ १२ ॥

दधति तावदमी विषयाः सुखं स्पृशति तावदियं हृदि मूढता[18]
मनसि तत्त्वविदां चविवेचके क विषयाः क सुखं क परिग्रहः॥ १३ ॥

मन्निन्दया यदि जनः परितोषम्[19]एति
नन्वप्रयत्नसुलभोऽयमनुग्रहो[20] मे ।
श्रेयोऽर्थिनो[21]ऽपि पुरुषाः परतुष्टि[22]हेतो-
र्दुःखाऽर्जितान्यपि धनानि परित्यजन्ति ॥ १४ ॥

---

१ निमेषमात्रेण । २ आविद्यारूपम् । ३ पुरोवर्ति जगत् । ४ त्यक्त्वा । ५ शी-
घ्रम् । ६ ज्ञात्वा । ७ अनुरक्तः । ८ आत्मस्वरूपम् । ९ विरोधः । १० सख्यम् ।
११ सर्वभूतेषु समानबुद्धिः । १२ शीघ्रम् । १३ सद्वस्तु । १४ पुण्यमेव पण्यं द्रव्यम् ।
१५ काय एव नौः नौका । १६ दुःखसमुद्रस्य १७ 'तरून जा' इति लोके. १८ अ-
ज्ञानम् १९ संतोषम् २० प्रसादः २१ कल्याणेच्छवः २२ अन्यसन्तोषः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी[1]
सत्यं [2]सूनुरयं दया च भगिनी भ्राता [3]मनःसंयमः
शय्या भूमितलं दिशोऽपि [4]वसनं ज्ञानामृतं भोजन-
मेते यस्य कुटुम्बिनो वद सखे कस्माद्भयं योगिनः॥१८॥
[5]क्लेशत्यागकृतेर्पितेन [6]करणव्यूहेन देहेन च
[7]स्वार्थेऽनर्थं [8]बत जन्तु[9]रर्जयति चेन्मन्तु[10]र्नियन्तुः कुतः।
शस्त्रे शत्रुजयाय [11]नैजगुरुणा दत्तेऽथ तेनैव चे-
त्पुत्रो हन्ति निजं वपुः कथय रे तत्राऽपराधी तु कः॥१९॥

सत्कविः।

श्रीः॥ जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां [12]यशःकाये जरामरणजं भयम्॥ १ ॥
काव्यप्रपञ्च[13]चञ्चू रचयति काव्यं न सारविद्भवति।
तरवः फलानि सुवते विन्दति सारं पतङ्गसमुदायः॥२॥
[14]अनन्तपदविन्यासरचना सरसा [15]कवेः॥
[16]बुधो यदि समीपस्थो न [17]कुजन्मा पुरो यदि॥ ३ ॥
कविर[18]हिताः कविलापा जायन्ते कण्ठशोषणायैव।
संमुखगतः कविश्चेद्भवति [19]कुलपिताऽपि कविकुलपितैव॥४॥

---

१ गृहस्था पत्नी. २ पुत्रः ३ मनोनिग्रहः ४ वस्त्रम् ५ क्लेशनाशाय. ६ इंद्रिय समूहेन. ७ स्वकीयानिष्टम् ८ बत इति खेदे. ९ संपादयाति १० अपराधः ११ स्वगुरुणा. १२ कीर्तिशरीरे. १३ वित्तः १४ अनेकपदानि. पक्षे अनन्तपदंविष्णुपदम् आकाशमित्यर्थः १५ कवयितुः पक्षे शुक्रस्य, १६ पण्डितः पक्षेबुधग्रहः १७ नीचः पक्षे कुः पृथ्वी तस्याः जन्म यस्य मङ्गलस्यत्यथः १८ कविना रहिताः कवयोऽपि उक्तयः पक्षे ककारेण रहिताः कविलापा विलापाइत्यर्थः १९ कुत्सितं लपिता वक्तापि कविशब्दः पृष्ठतो युक्तश्चेत्कुलपिता कविकुलपितैव भवति इति कविहृदयम्.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नूनं निसर्गतः कविरूढमलप्रशमने हि सरसानाम् ।
प्रतिकूलतापि न भवेदनर्थकृत्कतकवत्कदाचिदपि ॥ ५ ॥

त्रिद्वत्कवयः कवयः केवलकवयस्तु केवलं कपयः ।
कुलजा या सा जाया केवलजाया तु केवलं माया ॥ ६ ॥

कविः करोति पद्यानि लालयत्युत्तमो जनः ।
तरुः प्रसूते पुष्पाणि मरुद्वहति सौरभम्[1] ॥ ७ ॥

कतिपयनिमेषवर्तिनि जन्मजरामरणविह्वले जगति ।
कल्पान्तकोटिबन्धुः स्फुरति कवीनां यशः[2]प्रसरः ॥ ८ ॥

कवयः परितुष्यन्ति नेतरे कविसूक्तिभिः ।
नह्यकूपार[3]वत्कूपा वर्धन्ते विधुकान्तिभिः ॥ ९ ॥

किं कवेस्तस्य काव्येन किं काण्डेन धनुष्मतः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥ १० ॥

उत्फुल्लगल्लैरालापाः क्रियन्ते दुर्मुखैः सुखम् ।
जानाति हि पुनः सम्यक् कविरेव कवेः श्रमम् ॥ ११ ॥

अर्थान्केचिदुपासते कृपणवत्केचित्त्वलंकुर्वते
वेश्यावत्खलु धातुवादिन इवोद्बध्नन्ति केचिद्रसान् ।
अर्थाऽलंकृतिसद्रसद्रवमुचां वाचां प्रशस्तिस्पृशां ।
कर्तारः कवयो भवन्ति कतिचित्पुण्यैरगण्यैरिह ॥ १२ ॥

मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादलसपुरुषाऽनादरभरैः ।
यथा यूनस्तद्वत्परमरमणीयाऽपि रमणी ।
कुमाराणामन्तःकरणहरणं नैव कुरुते ॥ १३ ॥

लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनरा[4]द्यानां वाचमर्थोऽनुधावति ॥ १४ ॥

---

१ सौगन्ध्यम् २ कीर्तिप्रकाशः । ३ समुद्रवत् । ४ वाल्मीक्यादीनम् ।

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

माघश्चोरो मयूरो मुररिपुरपरो भारविः सारविद्यः
श्रीहर्षः कालिदासः कविरथभवभूत्याह्वयो भोजराजः।
श्रीदण्डी डिण्डिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः
ख्याताश्चाऽन्ये सुबन्ध्वादय इह कृतिभिर्विश्वमाह्लादयन्ति॥१५॥

काव्यं करोति सुकविः सहृदय[1] एव [2]व्यनक्ति तत्त्वम् ।
रत्नं खनिः प्रसूते रचयति शिल्पी तु तत्[3]सुषमाम् ॥ १६

मन्दं निक्षिपते पदा[4]नि परितः श[5]ब्दं समुद्वीक्षते
नाना[6]ऽर्थाहरणं च कांक्षति मुदाऽलंकार[7]माकर्षति ।
आदत्ते सकलं [8]सुवर्णनिचयं धत्ते रसो[9]ऽन्तर्गतं
दो[10]षांऽन्वेषणतत्परो विजयते चोरोपमः सत्कविः ॥१७॥

कुकविनिन्दा ।

श्रीः ॥ गणयन्ति नाऽपश[11]ब्दं न वृ[12]त्तभङ्गं क्षयं न चा[13]ऽर्थस्य ।
रसिकत्वेनाऽऽकलिता वे[14]श्यापतयः कुकवयश्च ॥ १ ॥

अप्रगल्भाः प[15]दन्यासे ज[16]ननीरागहेतवः ।
सन्त्येके ब[17]हुलालापाः कवयो बालका इव ॥ २ ॥

द्रा[18]घीयसा धाष्टर्यगुणेन युक्ताः कैः कैरपूर्वैः परकाव्यखण्डैः ।
आ[19]डम्बरं ये वचसां वहन्ति ते केचिदार्याः कवयो जयन्ति॥३॥

---

१ सरसहृदयः । २ प्रकाशयति । ३ शोभाम् ४ सुप्तिङन्तादीनि, अन्यत्रपादविक्षेपे चरणान् । ५ शब्दः शुद्धो वाऽपशब्दो वेति सम्यग्विचारयति । पक्षेध्वनिम् । ६ श्लेषेण ध्वनिना वा अनेकार्थानां संपादनम् पक्षे सुवर्णरूप्यादीनां हरणामिच्छाति । ७ उपमाद्यलंकारम् पक्षे कंकणादिभूषणम् ८ सुष्ठु वर्णानां संचयं पक्षे हेमसंचयम् । ९ शृंगारादिरसामिश्रम् पक्षे रसा पृथ्वी तदन्तर्गतम् १० दोषाःकाव्यदोषास्तेषामन्वेषणं गवेषणं तस्मिंस्तत्पर आसक्तः पक्षे दोषा रात्रिस्तस्यामन्वेषणम् । ११ दुःशब्दं । १२ वृत्तानि प्रहर्षिणीमालिनीवंशस्थादीनि तेषां भंगम्-पक्षे शीलभंगम् १३ वाच्यस्य पक्षे द्रव्यस्य १४ जाराः १५ पदनिवेशने पदं सुप्तिङन्तं पक्षे अङ्घ्रिः १६ जनानां नीरागो विरसता तस्य हेतवः पक्षे जनन्याः मातुः रागहेतवः प्रीतिहेतुभूताः । १७ बहुला आलापाः येषां । पक्षे बन्हीया लाला तां पिबन्ति ते । १८ आतिदीर्घेण । १९ प्रागल्भ्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविभिर्नृपसेवासु विद्याऽलंकारहारिणी ॥
वाणी वेश्येव लोभेन परोपकरणी कृता ॥ ४ ॥
अन्यवर्णपरावृत्त्या बन्धचिह्ननिगूहनैः ॥
अनाख्यातः सतां मध्ये कविश्चोरो विभाव्यते ॥ ५ ॥

कविता ।

श्रीः॥ स्वर्गं करोति काव्यं सुकविः कुकविश्च तद्वयं काव्यम्॥
नरकं करोति चित्ते सद्यः स्वश्रवणमात्रेण ॥ १ ॥
अविदितगुणापि सुकवेर्भणितिः कर्णेषु किरति मधुधाराम् ॥
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला ॥ २ ॥
काम्यूक्तामः सुधा स्वर्गे निवसामो वयं भुवि ॥
किं वा काव्यरसः स्वादुः किं वा स्वादीयसी सुधा ॥ ३ ॥
सत्कविभाव्ये हिते काव्ये वृथा दुर्जनगर्जनम् ॥
चण्डीशाङ्गीकृते चन्द्रेऽरुन्तुदश्च विधुन्तुदः ॥ ४ ॥
कविः पिता पोषयति पालको रसिकः पतिः ॥
कविता सुवतेर्नूनं सोदरास्तु विवेकिनः ॥ ५ ॥
त एव पदविन्यासास्ता एवाऽर्थविभूतयः ॥
तथाऽपि नव्यं भवति काव्यं ग्रथनकौशलात् ॥ ६ ॥
अरसाऽपि कवेर्वाणी हरिनामाङ्किता यदि ॥
साऽऽदरं गृह्यते तज्ज्ञैः शुक्तिर्मुक्ताऽन्विता यथा ॥ ७ ॥
कृतपर्द्दपदन्यासा विकचश्रीशाखमन्दपंक्तपदी ॥
कस्य न कम्पयते कं जरेव जीर्णस्य सत्कवेर्वाणी ॥ ८ ॥

---

१ [illegible] २ [illegible] ३ [illegible] पक्षे [illegible] ४ [illegible] पक्षे [illegible] ५ [illegible] ६ [illegible] ७ [illegible] ८ [illegible] ९ [illegible] पक्षे [illegible] १० [illegible] पक्षे [illegible] ११ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरसा साऽलंकारा सुपदन्यासा सुवर्णमयमूर्तिः ॥
आर्या तथैव भार्या न लभ्यते पुण्यहीनेन ॥ ९ ॥
अतिरमणीये काव्ये पिशुनोऽन्वेषयति दूषणान्येव ॥
अतिरमणीये वपुषि व्रणमिव हि मक्षिकानिकरः ॥ १० ॥
कर्णाऽमृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान्खलस्य ॥
अवेक्षते शालवनं प्रविष्टः क्रमेलकः[1] कण्टकजालमेव[2] ॥ ११ ॥

विद्याप्रशंसा ।

श्रीः ॥ विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं[3] धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ॥
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥ १ ॥
सद्विद्या यदि का चिन्ता वराकोदरपूरणे ॥
शुकोऽप्यशनमाप्नोति हरे राम इति ब्रुवन् ॥ २ ॥
मातेव रक्षति पितेव हिते नियुङ्क्ते ।
कान्तेव चाऽपि रमयत्यपनीय खेदम् ॥
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं ।
किं किं न साधयति कल्पलतेव विद्या ॥ ३ ॥
न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं नच भारकारि ॥
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥ ४ ॥
विद्यया विनयाऽवाप्तिः सा चेदविनयावहा ॥
किं कुर्मः कं प्रति ब्रूमो गरदायां स्वमातरि ॥ ५ ॥
सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ॥
अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्च सर्वदा ॥ ६ ॥
किं कुलेन विशालेन विद्याहीनस्य देहिनः ॥
अकुलीनोऽपि विद्यावान्देवैरपि स पूज्यते ॥ ७ ॥

---

१ उष्ट्रः २ बब्बूलवृक्षकण्टकादिकाटिकण्टकसमूहम्. ३ अन्तर्हितम्; ४ शुश्रूषाम् ।
५ नियोजयति. ६ विद्यशाब्रिज्ञाप ७ दातृणामपि अल्पाय ८ विद्वद्भिरपि.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीपेव श्रोत्रहीनस्य लोलाऽक्षीव[1] विचक्षुषः[2] ॥
[3]ष्यैसोः कुसुममालेव विद्या स्तब्धस्य निष्फला ॥ ८ ॥
[4]गतेऽपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः ॥
यद्यपि स्यान्न फलदा सुलभा साऽन्यजन्मनि ॥ ९ ॥
शुनः पुच्छमिव व्यर्थं जीवितं विद्यया विना ॥
न गुह्यगोपने शक्तं न च दंशनिवारणे[5] ॥ १० ॥
अपूर्वो भाति भारत्याः काव्यामृतफले रसः ॥
चर्वणे सर्वसामान्ये स्वादुवित्केवलं कविः ॥ ११ ॥

धनिधनयोर्निन्दा ।

श्रीः ॥ वरं[6] हालाहलं पीतं सद्यः प्राणहरं विषम् ।
न दृष्टव्यं धनाढ्यस्य भ्रूभङ्ग[7]कुटिलं मुखम् ॥ १ ॥
खिङ्गिताश्च पैर्यान्ति प्रस्खलन्ति[8] समे पथि ।
अव्यक्तानि च भाषन्ते धनिनो मद्यपा इव ॥ २ ॥
भक्तद्वेषो[9] जडप्रीतिः[10] सुरुचिर्गुरुलङ्घने[11] ।
मुखे कटुकता[12] नित्यं धनिनां ज्वरिणामिव ॥ ३ ॥
वाक्चक्षुःश्रोत्रलयं लक्ष्मीः कुरुते नरस्य को दोषः ।
गरलसहोदरजाता न मारयति यच्च तच्चित्रम् ॥ ४ ॥
लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् ।
शेषे धराभराक्रान्ते शेते नारायणः सुखम् ॥ ५ ॥
यस्याऽस्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान्[13] गुणज्ञः ।
स एव वक्ता स च दर्शनीयः[14] सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ ६ ॥

---

१ चञ्चलाक्षी मृगनयनेतियावत्. २ अन्धस्य. ३ प्राणरहितस्य प्रेतस्येतियावत्. ४ वृद्धत्वेपि. ५ वनमक्षिका. ६ मनाक्प्रियम् ७ भ्रुकुटिमोटनेन वक्रम् ८ अविषमे. ९ भक्ताः सेवकास्तेषां द्वेषः पक्षे भक्तमन्नं तद्द्वेषः १० जडेषु मूर्खेषु प्रीतिः पक्षे डलयोः सावर्ण्यात् जले रुचिः ११ गुरूणां पित्रादीनामुल्लंघने पक्षे गुरुयल्लंघनमपवासस्तस्मिन् अतिप्रीतिः १२ कटुभाषित्वं पक्षे कटुत्वम् १३ शास्त्रज्ञः १४ प्रेक्षणीयः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्याऽर्थः स पुमाँल्लोके यस्याऽर्थः स च पण्डितः ॥ ७ ॥

वयोवृद्धास्तपोवृद्धा ज्ञानवृद्धास्तथा परे ।
ते सर्वे धनवृद्धस्य द्वारि तिष्ठन्ति किङ्कराः ॥ ८ ॥

जातिर्यातु रसातलं गुणगणस्तस्याऽप्यधो गच्छतु
शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना ॥
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥ ९ ॥

धिगस्त्वेतां विद्यां धिगपि कवितां धिक्सुजनतां ।
वयोरूपं धिक्धिक् धिगपि च यशो निर्धनवतः ॥
असौ नीचादेकः सकलगुणहीनोऽपि धनवान् ।
बहिर्यस्य द्वारे तृणलवनिभाः सन्ति गुणिनः ॥ १० ॥

धनमर्जय काकुत्स्थ धनमूलमिदं जगत् ।
अन्तरं नैव पश्यामि निर्धनस्य मृतस्य च ॥ ११ ॥

ब्रह्मघ्नोऽपि नरः पूज्यो यस्याऽस्ति विपुलं धनम् ।
शशिना तुल्यवंशोऽपि निर्धनः परिहीयते[2] ॥ १२ ॥

विभवो हि यथा लोके न शरीराणि देहिनाम् ।
चाण्डालोऽपि नरः पूज्यो यस्याऽस्ति विपुलं धनम् ॥ १३

न विद्यया नैव कुलेन गौरवं ।
जनाऽनुरागो धनिकेषु सर्वदा ॥
[3]कपालिना मौलिधृताऽपि जान्हवी ॥
प्रयाति रत्नाऽऽकरमेव सत्वरम् ॥ १४ ॥

त्यजन्ति मित्राणि धनैर्विहीनं पुत्राश्च दाराश्च सुहृज्जनाश्च ।
तमर्थवन्तं पुनराश्रयन्ति ह्यर्थो हि लोके पुरुषस्य बन्धुः ॥ १५ ॥

---

१ प्राणान् धारयतु २ परिभवं प्राप्नोति ३ कपालेन ४ रत्नाकरः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रायेण धनिनामेव धनलोभो निरन्तरम् ।
पश्य कोटिद्वयोपेतं लक्षं प्रार्थयते धनुः ॥ १६ ॥
कुत आगत्य घटते विघटय्य क्व नु याति च ।
न लक्ष्यते गतिः सम्यग्घनस्य च धनस्य च ॥ १७ ॥
वित्तार्थं यतसे भृशं यदनिशं संसारमध्यात्मनो ।
व्यर्थं तन्मम मित्र तत्र भवतो नाऽऽत्यन्तिकं स्यात्सुखम् ॥
गुर्वाराधनतत्परेण मनसा कुर्वात्मसंशोधनं ।
किं तस्मिन्नुपलभ्यते नहि धनं नो वाऽऽत्मनः शंसनम् ॥ १८ ॥
कुतः श्रियै त्वं यतसे निष्कामं श्रीरामदासो भव मानव त्वम् ।
श्रीरामदासस्य पराङ्मुखस्य सदानपायिन्युपतिष्ठते श्रीः ॥ १९ ॥
गङ्गां च धारयति मूर्ध्नि सदा कपाली ।
सा तस्य चुम्बति मुखं न कदाचिदेव ॥
रत्नाकरं प्रति चुचुम्ब सहस्रवक्त्रै-
र्गङ्गादयो युवतयः सधनानुकूलाः ॥ २० ॥
तानीन्द्रियाण्यविकलानि मनस्तदेव ।
सा बुद्धिरप्रतिहता वचनं तदेव ॥
अर्थोष्मणा विरहितः पुरुषः स एव ।
अन्यः क्षणेन भवतीति विचित्रमेतत् ॥ २१ ॥
अहो कनकमाहात्म्यं वक्तुं केनाऽपि शक्यते ।
नामसाम्यादहो चित्रं धत्तूरोऽपि मदप्रदः ॥ २२ ॥
वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च ।
तासु तेष्वप्यनासक्तः साक्षाद्भर्गो नराकृतिः ॥ २३ ॥

---

१ निरंतरम् । २ स्तुतिः । ३ आत्मसुखम् । ४ उपायः पक्षे आत्माशंसा धनं इत्यु-पलभ्यते. ५ यत्नं करोषि । ६ अत्यन्तम्. ७ श्रीरामदासशब्दो विलोमः कृतश्चेत् सदा अमरा अनपायिनी श्रीरिति भवति. ८ वक्त्रैरुपलक्षिताः. ९ अखण्डिता । १० द्रव्य-रूपाष्णतया. ११ हरन्ति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दायादाः स्पृहयन्ति तस्करगणा मुष्णन्ति भूमीभुजो ।
दूरेण च्छलमाकलय्य हुतभुग्भस्मीकरोति क्षणात् ॥
अम्भः प्लावयते क्षितौ विनिहितं यक्षा हरन्ति ध्रुवं ।
दुर्वृत्तास्तनया नयन्ति निधनं धिग्धिग्धनं तद्बहु ॥ २४ ॥

वाणी दरिद्रस्य शुभा हिताऽपि ह्यर्थेन शब्देन च संप्रयुक्ता ।
न शोभते वित्तवतः समीपे भेरीनिनादोपहतेव वीणा ॥ २५ ॥

हेतुप्रमाणयुक्तं वाक्यं न श्रूयते दरिद्रस्य ।
अप्यतिपरुषमसत्यं पूज्यं वाक्यं समृद्धस्य ॥ २६ ॥

न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो ।
मुनेरपि वनस्थस्य मनश्चलति दर्शनात् ॥ २७ ॥

लक्ष्म्या परिपूर्णोऽहं न भयं मेऽस्तीति मोहनिद्रैषा ।
परिपूर्णस्यैवेन्दोर्भवति भयं सिंहिकासूनोः ॥ २८ ॥

पतन्ति खड्गधारासु विशन्ति मकरालयम् ।
किं न कुर्वन्ति सुभगे कष्टमर्थाऽर्थिनो जनाः ॥ २९ ॥

न सा विद्या न तच्छीलं न तद्दानं न सा कला ।
अर्थार्थिभिर्न तच्छौर्यं धनिनां यन्न कीर्त्यते ॥ ३० ॥

बधिरयति कर्णविवरं वाचं मूकयति नयनमन्धयति ।
विकृतयति गात्रयष्टिं संपद्रोगोऽयमद्भुतो राजन् ॥ ३१ ॥

दैववशादुत्पन्ने सति विभवे यस्य नाऽस्ति भोगेच्छा ।
न च परलोकसमीहा स भवति धनपालको मूर्खः ॥ ३२ ॥

दुन्दुभिस्तु सुतरामचेतनस्तन्मुखादपि धनं धनं धनम् ।
इत्थमेव निनदः प्रवर्तते किं पुनर्यदि जनः सचेतनः ॥ ३३ ॥

अर्जुनीयति यदर्जने मनो वर्जनीयजनतर्जनादिभिः ।
पक्षु नश्यति चिराय सञ्चिता वञ्चिता जगति केन संपदा ॥ ३४ ॥

१ कपटम्. २ अग्निः । ३ दुराचरणाः । ४ नाशम् । ५ कल्याणी. ६ दुन्दुभिध्वनिः धनं धनं धनमिति [illegible] ७ अतिकठोरम् । ८ [illegible] [illegible] ११ । [illegible] । १२ [illegible] । १३ भवको भवति. १४ भयवासाधिक्ये । १५ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आपद्गतं हससि किं द्रविणान्धमूढ ।
लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम् ॥
एतान्प्रपश्यसि घटाञ्जलयन्त्रचक्रे ।
रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः ॥ ३५ ॥

लभेद्यदयुतं धनं तदधनं धनं यद्यपि ।
लभेत नियुतं धनं निधनमेव तज्जायते ॥
तथा धनपरार्धकं तदपि भावहीनात्मकं ।
यदक्षरपदद्वयान्तरगतं धनं तद्धनम् ॥ ३६ ॥

अनुभवत ददत वित्तं मान्यान्मानयत सज्जनान्भजत ।
अतिपरुषपवनविलुलितदीपशिखाचञ्चला लक्ष्मीः ॥ ३७ ॥

धिग्धिग्धनं महानर्थनिधानं मोहसाधनम् ।
स्त्रीसूनाद्यूतमद्यानां हेतुस्थानं यतः कलेः ॥ ३८ ॥

पण्डितोऽपि सुशीलोऽपि धनार्थी तृणतामियात् ।
यथा बिसार्थी हंसोऽपि मधुपैरपि वञ्च्यते ॥ ३९ ॥

द्रव्यज्वरातुराणां तु शान्तये नौषधाद्यपि ।
नहि वृष्टिशतेनापि पाषाणादङ्कुरोदयः ॥ ४० ॥

वित्तमत्तो हि नापीशं मनुते केतरे तदा ।
श्रीरामपत्न्यनादृत्याऽगर्जद्रत्नाकरः किल ॥ ४१ ॥

यत्कुवर्णैकहेतुस्तत्सुवर्णं कथमुच्यताम् ।
नोचेत्कुमार्यपि जनैः सुमारीत्येव भाष्यताम् ॥ ४२ ॥

---

१ विपद्ग्रस्तम् । ‘ राहाट ’ इति लोके. । २ दशसहस्रं अथ च अकारेण युतं धन- मधनमित्यर्थः । ४ लक्षसङ्ख्याकं अथ च निशब्देन युतं धनं निधनमित्यर्थः । ५ धनस्य परार्धं संख्याविशेषः अथ च धनशब्दस्य [illegible] परमर्धं न तत्र भावहीनात्म- कं भावबोधकमित्यर्थः । ६ अक्षराः परमात्मा तत्स्वरूपद्वयान्तरे गतं प्राप्तं अद्धनं यो- [illegible] धनं तदेव धनं [illegible] -शब्दा[illegible] धन- [illegible] धनमित्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनस्विप्रशंसा.

श्रीः ॥ कामं प्रियानपि प्राणान् विमुञ्चन्ति मनस्विनः ।
इच्छन्ति नत्वमित्रेभ्यो महतीमपि सत्क्रियाम् ॥ १ ॥

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपाली कपाली-
मादाय न्यायगर्भद्विजवरहुतभुग्धूमधूम्रोपकण्ठम् ॥
द्वारं द्वारं प्रवृत्तो वरमुदरदरीपूरणाय प्रवृत्तो ।
मानी प्राणी स्वदेशे न पुनरनुदिनं तुल्यकुल्येषु दीनः २

वरं महिषमुखे क्रोधाँऽऽध्माते करौ विनिवेशितौ ।
विषमपि वरं पीत्वा सुप्तं कृतान्तनिवेशने ॥
गिरिवरतटीमुक्तश्चाऽऽत्मा वरं शतधा कृतो ।
न तु खलजनाऽवाप्तैरर्थैः कृतं हितमात्मनः ॥ ३ ॥

ब्रह्माण्डं कियदस्तु तत्र वसुधापिण्डं किमाचक्ष्महे ।
तत्राऽप्येकतरं तु खण्डममितास्तस्मिन्नृपाः केचन ॥
तेभ्यो दैन्यशतोपनीतविभवा दृष्टाऽनुकम्पास्तु ते ।
धिङ्मूढाः स्पृहयन्ति हन्त किमपि स्वाऽर्थो न तेभ्योऽपि ये ४

एकः स एव जीवति हृदयविहीनोऽपि सहृदयो राहुः ।
यः सकलँलघिमकारणमुदरं न बिभर्ति दुष्पूरम् ॥ ५ ॥

अभ्युपकुर्वन्बह्वपि न भवति पूर्वोपकारिणा तुल्यः ।
एकोऽनुकरोति कृतं निष्कारणमेव यत्परः कुरुते ॥६॥

प्रतिदिनमयत्नसुलभे भिक्षुकजननि साधुजनकल्पलते ।
नृपनमननरकतारिणि भगवति भिक्षे नमस्तुभ्यम् ॥ ७ ॥

ब्रह्माण्डमण्डलीपात्रं किं लोभाय मनस्विनः ।
[12]शफरीस्फुरितेनाब्धेः क्षुब्धता जातु[13] जायते ॥ ८ ॥

---

१ यथेच्छम्. । २ शुभ्रवस्त्रेण पिहिता पाली यस्याः । ३ भिक्षापात्रम् । ४ उपकुर्वी
५ क्रोधपूर्णे. । ६ कालगृहे. । ७ लघुत्वकारणम् । ८ न धारयति । ९ दुःखेन पूर-
विपुलमपकारं. । १० प्रत्युपकारं कुर्वन्. । ११ अनुकरणं करोति. । १२ मत्सीस्फुर-
णम्. १३ कदाचित्. ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुसुमस्तबकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येदथवा वने ॥ ९ ॥
पादाहतं समुत्थाय मूर्धानमधिरोहति ।
स्वस्था देवापमानेऽपि देहिनस्तद्वरं रजः ॥ १० ॥
यो जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्याऽजननिरेवाऽस्तु जननीक्लेशकारिणः ॥ ११ ॥
सयुक्तग्रासमश्नन्तः पशवो हन्ति मानिनः ।
विध्वंसिताऽन्धतमसस्तमोदाहरणं रविः ॥ १२ ॥

दातृप्रशंसा.

त्वयि सति शिवदातर्यस्मदभ्यर्थितानां-
मितरमनुसरन्तो दर्शयन्तोऽर्थिमुद्राम् ॥
चरमचरणपातैर्दुग्धं दोग्धुकामाः ।
करभमनुसरामः कामधेनौ स्थितायाम् ॥ १ ॥

तेजस्वीप्रशंसा ।

श्रीः ॥ बालस्याऽपि रवेः पादाः पतन्त्युपरि भूभृताम् ।
तेजसा सह जातानां वयः कुत्रोपयुज्यते ॥ १ ॥
सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां[11] न खलु वयस्तेजसो हेतुः ॥ २ ॥
एकः स एव तेजस्वी सैंहिकेयः[12] सुरद्विषाम् ।
शिरोमात्राऽवशेषेण जीयन्ते येन शत्रवः ॥ ३ ॥
तुल्येऽपराधे स्वर्भानुर्[13]भानुमन्तं चिरेण यत् ।
हिमांशुमाशु[14] ग्रसते तन्म्रदिम्नः[15] स्फुटं फलम् ॥ ४ ॥

---

१ गुच्छः । २ गर्हितं जीवतीति मा जीवन् । ३ परैः कृता याऽवज्ञा तयैव दुःखं तेन दग्धः खिन्नः । ४ अनुत्पत्तिः । ५ याचितानाम् । ६ पाश्चात्त्यचरणपातैः । ७ उष्ट्रं । ८ किरणाः चरणाश्च । ९ पर्वतानां पक्षे राज्ञाम् । १० प्रचलत्कपोलेषु । ११ बलवताम् । १२ विधुंतुदः । १३ राहुः । १४ चन्द्रम् । १५ मार्दवस्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेजस्विनि क्षमासारे नाऽतिकार्कश्यमाचरेत् ।
निःशङ्को हि जनो धत्ते पदं भस्मन्यनूष्मणि[1] ॥ ५ ॥
यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः[2] ।
तत्तेजस्वी पुरुषः परकृतविकृतिं[3] कथं सहते ॥ ६ ॥

हस्ती स्थूलतनुः स चाऽङ्कुशवशः किं हस्तिमात्रोऽङ्कुशो ।
वज्रेणाऽभिहताः पतन्ति गिरयः किं शैलमात्रः पविः[4] ॥
दीपे प्रज्वलिते विनश्यति तमः किं दीपमात्रं तम-
स्तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः[5] ॥७॥

न तेजस्तेजस्वी प्रसृतमपरेषां[6] प्रसहते ।
स तस्य स्वो भावः प्रकृतिनियतत्वाद[7]कृतकः[8] ॥
मयूखैर[9]श्रान्तं[10] तपति यदि देवो दिनकरः ।
किमाग्नेयग्रावा[11] निकृत इव[12] तेजांसि वमति ॥ ८ ॥
एकचक्रो रथो यन्ता[13] विकलो[14] विषमा हयाः[15] ।
आक्रामत्येव तेजस्वी तथाप्यर्को नभस्थलम् ॥ ९ ॥

उदारप्रशंसा ।

श्रीः ॥ अयं निजः[16] परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ १ ॥
बुध्यन्ते पक्षिपशवः पठन्ति शुकसारिकाः ।
दातुं शक्नोति यो वित्तं स शूरः स च पण्डितः ॥ २ ॥
एकेन तिष्ठताऽधस्तादन्येनोपरि तिष्ठता ।
दातृयाचकयोर्भेदः कराभ्यामेव सूचितः ॥ ३ ॥

---

१ ऊष्मरहिते । २ इनकान्तः सूर्यकान्तमणिः । ३ विकारम् । ४ वज्रम् । ५ विश्वासः ६ विस्तृतम् । ७ स्वभावाधीनत्वात् । ८ अकृत्रिमः । ९ किरणैः । १० सततम् । ११ सूर्यकान्तः । १२ धिक्कृत इव । १३ सारथिः । १४ अनूरुः । १५ तुरगाः । १६ स्वकीयः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैव परं न विनश्यति तनुरपि या श्रीर्निवेशिता सत्सु ।
अवशिष्यते हिमांशोः सैव कला या स्थिरा शंभौ ॥ ४ ॥
यद्ददासि विशिष्टेभ्यो यच्चाऽश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्याऽपि रक्षसि ॥ ५ ॥
किं तया क्रियते लक्ष्म्या या वधूरिव केवला ।
या न वेश्येव सामान्या पथिकैरपि भुज्यते ॥ ६ ॥
दाता नीचोऽपि सेव्यः स्यान्निष्फलो न महानपि ।
जलार्थी वारिधिं त्यक्त्वा पश्य कूपं निषेवते ॥ ७ ॥
कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ॥ ८ ॥

धीरप्रशंसा ।

श्रीः ॥ सह परिजनेन विलसति धीरो गहनानि तरति पुनरेकः ।
विषमेकेन निपीतं त्रिपुरजिता सह सुरैरमृतम् ॥ १ ॥
निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु ।
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ॥
अद्यैव वा मरणमस्तु युगान्तरे वा ।
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ २ ॥
श्लाघ्या महतामुन्नतिरद्भुतमध्यवसितं च धीराणाम् ।
कनकगिरिरनभिलङ्घ्यो रविरनिशमनुष्ठिताऽऽरम्भः ॥ ३ ॥
कदर्थितस्याऽपि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधोमुखस्याऽपि तनूनपातो नाऽधः शिखा याति कदाचिदेव ४
अर्थः सुखं कीर्तिरपीह मा भूदनर्थ एवाऽस्तु तथाऽपि धीराः ।
निजप्रतिज्ञामधिरूढमाना महोद्यमाः कर्म समारभन्ते ॥ ५ ॥

---

१ अल्पा. । २ अपेक्षोपभोग्या । ३ समुद्रम्. । ४ दुस्तराणि. । ५ शंकरेण. । ६ न्यायमार्गादनपेतात् । ७ मार्गात् । ८ व्यापारः । ९ पीडितस्य. । १० लोपयितुम् । ११ अग्नेः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मज्जनवेदी वसुधा कुल्या जलधिः स्थली च पातालम्।
वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य धीरस्य ॥ ६ ॥

वीरः।

श्रीः ॥ को वीरस्य मनस्विनः स्वविषयः को वा विदेशस्तथा।
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ॥
यद्दंष्ट्रानखलाङ्गलप्रहरणः सिंहो वनं गाहते।
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥ १ ॥

विनाप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदं।
समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः ॥
स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां।
द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ॥ २ ॥

एकेनाऽपि हि शूरेण पदाऽऽक्रान्तं महीतलम्।
क्रियते भास्करस्येव स्फारस्फुरिततेजसा ॥ ३ ॥

पङ्गुवतः कल्पतरोरेष विशेषः करस्य ते वीर।
भूषयति कर्णमेकः परस्तु कर्णं तिरस्कुरुते ॥ ४ ॥

गुणप्रशंसा।

श्रीः ॥ गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम्।
केतकीगन्धमाघ्राय स्वयं गच्छन्ति षट्पदाः ॥ १ ॥
गुणवज्जनसंसर्गाद्याति सर्वोऽपि गौरवम्।
पुष्पमालाप्रसङ्गेन सूत्रं शिरसि धार्यते ॥ २ ॥

१ अर्जितम्। २ कृमिभक्षितेन. । ३ 'भास्कर' इति कोशे. । ४ पयोदः । ५ पंङ्गु 'दात' इत्यर्थे० मतः पुनर्मर्ः [illegible] पुरुष [illegible] अकल्याणि [illegible] याः । ६ प्राप्नोति । ७ पराभवस्थानम् । ८ कान्तिम् । ९ सिंहसंबन्धिनीम् । १० धृता कनकमय सुवर्णस्य माला येन । ११ भिन्नकमात् । ११ मोचयम् । ११ [illegible] । १२ भ्रमराः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः।
वसुदेवं परित्यज्य वासुदेवं नमेज्जनः ॥ ३ ॥

यदि सन्ति गुणाःपुंसां विकसन्त्येव ते स्वयम्।
नहि कस्तूरिकाऽऽमोदः शपथेन निवार्यते ॥ ४ ॥

गुणिनि गुणज्ञो रमते नाऽगुणशीलस्य गुणिनि परितोषः।
अलिरेति[1] वनात्पद्मं न दर्दुरस्त्वेकवासोऽपि[2] ॥ ५ ॥

गुणैः सर्वज्ञकल्पोऽपि[3] सीदत्येको[4] निराश्रयः।
अनर्घ्यमपि[5] माणिक्यं हेमाऽऽश्रयमपेक्षते ॥ ६ ॥

गुणैर्गौरवमायाति न महत्याऽपि संपदा।
पूर्णेन्दुर्न तथा वन्द्यो निष्कलङ्को यथा कृशः ॥ ७ ॥

गुणवन्तः क्लिश्यन्ते[6] प्रायेण भवन्ति निर्गुणाः सुखिनः।
बन्धनमायाति शुका यथेष्टसंचारिणः काकाः ॥ ८ ॥

गुणयुक्तोऽप्यधो[7] याति रिक्तः[8] कूपे यथा घटः।
निर्गुणोऽपि भृतः पश्य जनैः शिरसि धार्यते ॥ ९ ॥

कौशेयं[9] कृमिजं सुवर्णमुपलाद्[10] दिन्दीवरं[11] गोमया-
त्पङ्कात्[12] तामरसं[13] शशाङ्क उदधेर्गोपित्ततो रोचनम्[14]।
काष्ठादग्निरहेः फणादपि मणिर्दूर्वाऽपि गोरोमतः।
प्राकाश्यं स्वगुणोदयेन गुणिनो यास्यन्ति किं जन्मना १०

गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थितः।
प्रासादशिखरारूढः[15] काकः किं गरुडायते ॥ ११ ॥

गुणेषु क्रियतां यत्नः किमाटोपैः[16] प्रयोजनम्।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥ १२ ॥

---

१ भ्रमरः २ भेकः ३ शिवतुल्यः ४ दुःखं प्राप्नोति. ५ अमूल्यम्. ६ क्लेशं प्राप्नुवन्ति. ७ रज्जुयुक्तः अन्यत्र विनयादिगुणसंपन्नः ८ 'रिता इति लो० पक्षे निर्द्रव्यः ९ 'पाटाम्बर' 'पीताम्बर' इति लो० १० पाषाणात्. ११ कमलम् १२ कर्दमात् १३ रक्तकमलम् १४ गोरोचनम् १५ राजभवनं देवालयं वा १६ आडम्बरैः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जात्युत्कृष्टस्य हि मणेर्नोचितं शाणघर्षणम् ।
आदर्शे चित्रकारैः किं लिख्यते प्रतिबिम्बितम् ॥१३॥
अनवसरे गुणवानपि हृदयादवतार्यते हारः ।
पश्य शलाकाऽवसरे तृणाय भूपैः प्रसार्यतेस्वकरः १४
गुणिनोऽपि हि सीदन्ति गुणग्राही न चेदिह ।
सगुणः पूर्णकुम्भोऽपि कूप एव निमज्जति ॥ १५ ॥

संतोषप्रशंसा ।

श्रीः ॥ अकृत्वा परसन्तापमगत्वा खलनम्रताम् ।
अनुत्सृज्य सतां वर्त्म[2] यत्स्वल्पमपि तद्बहु ॥ १ ॥
वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या ।
सम इह परितोषो निर्विशेषो विशेषः ॥
स हि भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः ॥ २ ॥
दरिद्रस्य परा मूर्तिस्तृष्णा न द्रविणाल्पता ।
जरद्गवधनः[3] शंभुस्तथाऽपि परमेश्वरः ॥ ३
संतोषाऽमृततृप्तानां यत्सुखं शान्तचेतसाम् ॥
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ ४ ॥
यो मे गर्भगतस्याऽपि वृत्तिं[4] कल्पितवान् विभुः ।
शेषवृत्तिविधानाय स किं सुप्तोऽथवा मृतः ॥ ५ ॥
पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे ।
अनृणी चाऽप्रवासी च स वारिचर मोदते ॥ ६ ॥
अप्रार्थितानि दुःखानि यथैवाऽऽयान्ति देहिनाम् ।
सुखान्यपि तथाऽऽयान्ति दैन्यमत्राऽतिरिच्यते[5] ॥ ७ ॥
आत्माऽधीनशरीराणां स्वपतां निद्रया स्वया ।
कदन्नमपि[6] मर्त्यानाममृतत्वाय कल्पते ॥ ८ ॥

---

१ 'साहाण' इति लोके. २ मार्गम्. ३ वृद्धवृषभः स एव धनं यस्य स. ४ जीवनोपायम्. ५ विशिष्यते. ६ कुत्सितमन्नम्.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाः संपत्तयस्तस्य संतुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्माऽऽवृतैव भूः ॥ ९ ॥

आरोग्यं विद्वत्ता सज्जनमैत्री महाकुले जन्म ।
स्वाऽऽधीनता च पुंसां महदैश्वर्यं विनाऽप्यर्थम् ॥ १० ॥

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालं
संतोष एव पुरुषस्य परं निधानम् ॥ ११ ॥

अर्थी करोति दैन्यं लब्धाऽर्थो गर्वपरितोषम् ।
नष्टधनश्च सशोकः सुखमास्ते निस्पृहः पुरुषः ॥ १२ ॥

तन्मूलं गुरुतायास्तत्सौख्यं तद्यशस्तदौर्जित्यम् ।
तत्सौभाग्यं पुंसां यदेतदप्रार्थनंनाम ॥ १३ ॥

मित्रम् ।

यस्य मित्रेण संभाषो यस्य मित्रेण संस्थितिः ।
मित्रेण सह यो भुङ्क्ते ततो नास्तीह पुण्यवान् ॥ १ ॥

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ २ ॥

शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ ३ ॥

रहस्यभेदो याञ्चा च नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥ ४ ॥

अन्यथैव हि सौहार्दं भवेत्स्वच्छाऽन्तरात्मनः ।
प्रवर्ततेऽन्यथा वाणी शाठ्योपहतचेतसः ॥ ५ ॥

---

१ उपानद्भ्यां गूढौ पिहितौ पादौ यस्य २ गौरवस्य. ३ उत्साहशीलत्वम् ४ अयाचनम् ५ मिथोभाषणम् ६ तस्मात्पुरुषात् ७ निर्मलचित्तत्वम् ८ दानशीलत्वम् ९ समानस्य भावः सामान्यं समत्वमित्यर्थः १० सरलत्वं ११ प्रीतिः १२ गुप्तप्रकाशनम् १३ प्रार्थनम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र मित्र न वस्तव्यं यत्र नाऽस्ति चतुष्टयम् ।
ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ ६ ॥
स्वामिनि गुणान्तरज्ञे गुणवति भृत्येऽनुकूलिनि कलत्रे
मित्रे सदोपकारिणि निवेद्य दुःखं सुखी भवति ॥ ७ ॥
स्वाभाविकं तु यन्मित्रं भाग्येनैवाऽभिजायते ।
तद[1]कृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ॥ ८ ॥
न मातरि न दारेषु न सोदर्ये नचाऽऽत्मनि ।
विश्वासस्तादृशः पुंसां यावान्मित्रे स्वभावजे ॥ ९ ॥
शोका[2]ऽरातिभयत्राणं प्रीतिविश्र[3]म्भभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥ १० ॥
मित्र प्रीति[4]र्रसायनं नयनयोरानन्दनं चेतसः
पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम् ।
ये चाऽन्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाऽऽकुला-
स्ते सर्वत्र मिलन्ति तत्त्वनिक[5]षग्रावा तु तेषां विपत् ११
क्षीरेणाऽऽत्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ[6] हुतः ।
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रा[7]ऽऽपदं
युक्त तन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी १२
उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयन्समृद्धीनां फलं [8]सुहृदनुग्रहम् ॥ १३ ॥
नहि बुद्धिगुणेनैव सुहृदामर्थदर्शनम् ।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाऽप्युपलभ्यते ॥ १४ ॥
विवादो धनसंबन्धो याचनं स्त्रीषु संगतिः
आदानमग्रस्थायित्वं मैत्रीभङ्गस्य हेतवः ॥ १५ ॥

---

१ अकपटमित्रता. २ शत्रुः ३ विश्वासः ४ प्रीतिः रसायनमिव रसायनं प्रीतिवर्धकमित्यर्थः ५ 'कसोटी' इति लो० ६ अग्नौ ७ मित्रविपत्तिम् ८ सुहृत्सु अनुग्रहः प्रसादस्तम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दारिद्र्यवर्णनम् ।

श्रीः ॥ हे दारिद्र्य नमस्तेऽस्तु धन्योऽहं त्वत्प्रसादतः ।
लोकान्पश्याम्यहं सर्वान्न मां पश्यति कश्चन ॥ १ ॥

दारिद्र्य शोचामि भवन्तमेवमस्मच्छरीरे सुहृदित्युषित्वा ।
विपन्नदेहे मयि मन्दभाग्ये ममेति चिन्ता क गमिष्यसि त्वम् ॥ २ ॥

दग्धं खाण्डवमर्जुनेन बलिना दिव्यैर्द्रुमैः सवितं
दग्धा वायुसुतेन रावणपुरी लङ्का पुनः स्वर्णभूः ।
दग्धः पञ्चशरः पिनाकपतिना तेनाऽप्ययुक्तं कृतं
दारिद्र्यं जनतापकारकमिदं केनाऽपि दग्धं नहि ॥ ३ ॥

द्वाविमावम्भसि क्षेप्यौ गाढं बद्ध्वा गले शिलाम् ।
धनिनं चाऽप्रदातारं दरिद्रं चाऽतपस्विनम् ॥ ४ ॥

अर्था न सन्ति न च मुञ्चति मां दुराशा
दाता न संकुचितदुर्ललितं मनो मे ।
याञ्चा हि लाघवकरी स्ववधे च पापं
प्राणः स्वयं व्रजतु किं प्रविलम्बितेन ॥ ५ ॥

उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं गुरुं
श्रान्तस्तावदहं चिरं मरण भोः सेवे त्वदीयं सुखम् ।
इत्युक्त्वा धनवर्जितेन सहसा गत्वा श्मशाने शवं
दारिद्र्यान्मरणं वरंवरमिति ज्ञात्वैव तूष्णीं स्थितम् ॥ ६ ॥

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥ ७ ॥

---

१ स्थित्वा. २ विनष्टशरीरे ३ हतभाग्ये. ४ मदनः ५ लघुत्वकारिणी. ६ प्रविलम्बितेन कालदैर्घ्येणेति यावत्. ७ धारय. ८ पृथूनि कार्तस्वरस्य सुवर्णस्य पात्राणि यस्मिंस्तत् पक्षे पृथुकानां बालानामार्तस्वरा रुदितशब्दास्तेषां पात्रं भाजनम् ९भूषिता अलंकृता निःशेषा परिजना यस्मिन् पक्षे भुवि उषिता निःशेष परिजना यस्मिन् १० विलसन्त्यः शोभमानाः करेणवो हस्तिन्यस्ताभिर्गहनम् निबिडं पक्षेऽवयोः सावर्ण्यात् बिले सन्त एव सत्का बिलवर्तिनो ये रेणवो धूलयस्तैर्गहनं व्याप्तम् ११ गृहम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो गङ्गामतरत्तथैव यमुनां यो नर्मदां शर्मदां
का वार्ता सरिदम्बुलङ्घनविधौ यश्चार्णवांस्तीर्णवान् ।
सोऽस्माकं चिरमास्थितोऽपि सहसा दारिद्र्यनामा सखा
त्वद्दानाम्बुसरित्प्रवाहलहरीमग्नो न संभाव्यते ॥ ८ ॥

दारिद्र्यान्मरणाद्वा मरणं संरोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥ ९ ॥

अत्यन्तविमुखे दैवे व्यर्थे यत्ने च पौरुषे ।
मनस्विनो दरिद्रस्य वनादन्यत्कुतः सुखम् ॥ १० ॥

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः सत्त्वात्परिभ्रश्यते
निःसत्त्वः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकनिहतो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥ ११ ॥

इह लोकेऽपि धनिनां परोऽपि स्वजनायते ।
स्वजनोऽपि दरिद्राणां तत्क्षणाद्दुर्जनायते ॥ १२ ॥

परीक्ष्य सत्कुलं विद्यां शीलं शौर्यं सुरूपताम् ।
विधिर्ददाति निपुणः कन्यामिव दरिद्रताम् ॥ १३ ॥

माँ रोदीश्चिरमेहि वत्स रुदतो दृष्ट्वाऽद्य बालानिमा-
नायातस्तव वत्स दास्यति पिता ग्रैवेयकं वाससी ।
श्रुत्वैवं गृहिणीवचांसि निकटे कुड्यस्य निष्किंचनो
निःश्वस्याऽश्रुजलप्लवप्लुततनुः पान्थः पुनः प्रस्थितः ॥ १४ ॥

अये लाजानुच्चैः पथि वचनमाकर्ण्य गृहिणी
शिशोः कर्णौ यत्नात्सुपिहितवती दीनवदना ।
मयि क्षीणोपाये यदकृत दृशावश्रुशबले
तदन्तःशल्यं मे त्वमिव पुनरुद्धर्तुमुचितः ॥ १५ ॥

---

१ सुखदात्रीम् २ न दृश्यते ३ पराङ्मुखे ४ लज्जां प्राप्नोति ५ खेदम् ६ स्थानम्. ७ रोदनं मा कुरु ८ कण्ठभूषणम्. ९ वस्त्रे. १० भिक्षुः ११ दरिद्रः १२ छादितवती ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]कन्थाखण्डमिदं प्रयच्छ यदि वा स्वांके गृहणाऽर्भकं
रिक्तं भूतलमत्र नाथ भवतः पृष्ठे [2]पलालोच्चयः ।
दम्पत्योरिति जल्पतोर्निशि यदा चोरः प्रविष्टस्तदा
लब्धं [3]कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ॥ १६ ॥

वृद्धो नः पतिरेष [4]मञ्चकगतः [5]स्थूणाऽवशेषं गृहं
कालो[6]ऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्ताऽपि नो ।
यत्नात्संचिततैलबिन्दुघटिका भग्नेति [7]पर्याकुला
दृष्ट्वा गर्भभराऽऽकुलां निजवधूं श्वश्रूश्चिरं रोदिति ॥ १७ ॥

अम्बा तुष्यति न मया न स्नुषया साऽपि नाम्बया नमया ।
अहमपि नतया न तया वद राजन् कस्य दोषोयम् ॥ १८ ॥

चाण्डालश्च दरिद्रश्च द्वावेतौ सदृशाविह ॥
चाण्डालोऽपि दरिद्रोऽपि सर्वकर्मसु निन्दितः ॥ १९ ॥

नो सेवा विहिता गुरोरपि च नो नो वा कृतं पूजनं
देवानां विधिवन्न वा शिवशिव स्निग्धादयः सेविताः ॥
किंतु त्वच्चरणौ सरस्वति रसादाजन्मनः सेवितौ
तस्मान्मां विजहाति सा भगवती शङ्के [9]सपत्नी तव ॥ २० ॥

[10]दूये कान्ताकरं वीक्षे मणि[11]कङ्कणवर्जितम् ।
अतःपरं परं[12] दूये मणिकं[13] [14]कणवर्जितम् ॥ २१ ॥

एको हि दोषो [15]गुणसन्निपाते निमज्जतीन्दोरिति यो बभाषे ।
न तेन दृष्टं कविना समस्तं दारिद्र्यमेकं [16]गुणकोटिहारि ॥ २२ ॥

रात्रौ जानुर्दिवा भानुः [17]कृशानुः सन्ध्ययोर्द्वयोः ॥
पश्य शीतं मयानीतं जानुभानुकृशानुभिः ॥ २३ ॥

---

१ 'गोधडी' इति लो० २ तुषसंचयः ३ जीर्णवस्त्रखंडं ४ शय्या 'खाट' इतिलो० ५ 'मेढ' इतिलोके ६ समीपः ७ व्याकुला ८ स्नुषाम् ९ 'सवत' इति लो० १० खेदं प्राप्नोमि ११ मणियुक्तं यत्कङ्कणं तेन वर्जितम् १२ अत्यन्तम् १३ मृण्मयभाजनं 'मडकें' इति लो० १४ धान्यकणरहितम् १५ गुणसमुदाये १६ कोटीगुणनाशकमिति भावः १७ अग्निः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुत्क्षामाः शिशवः शवा इव भृशं मन्दाऽऽशया बान्धवा
लिप्ता जर्जरकर्करी[2]जतुलवैर्नो मां तथा बाधते ।
गेहिन्या त्रुटितांऽशुकं घटयितुं कृत्वा सका[3]कुस्मितं
कुप्यन्ती प्रतिवेशिलोकगृहिणी सूचीं यथा याचिता ॥२४॥

दारिद्र्य भो त्वं परमं विवेकिं गुणाऽधिके पुंसि सदानुरक्तम् ।
विद्याविहीने गुणवर्जिते च मुहूर्तमात्रं न रतिं करोषि ॥ २५ ॥

भद्रे वाणी ममाऽऽनने कुरु दयां वर्णाऽनुपूर्व्या चिरं
चेतः स्वास्थ्यमुपैहि याहि करुणे प्रज्ञे स्थिरत्वं व्रज ॥
लज्जे तिष्ठ पराङ्मुखी क्षणमहो तृष्णे पुरः स्थीयतां
पापा यावदहं ब्रवीमि धनिनां देहीति दीनं वचः ॥२६॥

अयं पटो मे पितुरङ्गभूषणं पितामहाद्यैरुपभुक्तयौवनः ।
अलंकरिष्यत्यथ पुत्रपौत्रकान्मयाऽधुना पुष्पवदेव धार्यते ॥२७॥

याचकनिन्दा ।

श्रीः ॥ तृणादपि लघुस्तूल[6]स्तूलादपि च याचकः ।
वायुना किं न नीतोऽसौ मामयं याचयेदिति ॥ १ ॥

वे[7]पथुर्मलिनं वक्त्रं दीना वाग्गद्गदः स्वरः
मरणे यानि चिन्हानि तानि चिन्हानि याचके ॥ २ ॥

तावत्सर्वगुणालयः पटुमतीः साधुः सतां वल्लभः
शूरः सच्चरितः कलङ्करहितो मानी कृतज्ञः कविः ।
दक्षो धर्मरतः सुशीलगुणवांस्तावत्प्रतिष्ठाऽन्वितो
यावन्निष्ठुरवज्रपातसदृशं देहीति नो भाषते ॥ ३ ॥

दक्षिणाशाप्रवृत्तस्य प्रसारितकरस्य च ।
तेजस्तेजस्विनोऽर्कस्य ह्रियतेऽन्यस्य का कथा ॥ ४ ॥

---

१ चालनीसदृशः सच्छिद्रः कुम्भः २ लाक्षाखण्डैः ३ स्तवसहितं स्मितम् ४ विचारशीलम् ५ प्रीतिम् ६ कार्पासः ७ कम्पः ८ दक्षिणदिशायां प्रवर्तमानस्य पक्षे दक्षिणाया आशा तया प्रवृत्तस्य. ९ प्रसारिताः विस्तारिताः कराः किरणाः येन पक्षे प्रसारितः करो हस्तो येन १० ह्रासं प्राप्नोति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काक आह्वयते काकान् याचको न तु याचकान् ।
काकयाचकयोर्मध्ये वरं काको न याचकः ॥ ५ ॥

याचनायां प्रवृत्तस्य काकानाम न दुर्दशा ।
चेत[1]श्चेत्क्रियते तस्यां यातनैवोपतिष्ठते ॥ ६ ॥

तावन्महतां महती यावत्किमपि हि न याच्यते लोकम् ।
बलिमनुयाचनसमये श्रीपति[2]रपि वामनो[3] जातः ॥ ७ ॥

सन्तापितानां मधुरैर्वचोभिर्मिथ्योपचारैश्च वशीकृतानाम् ।
आशावतां श्रद्दधतां च लोके किमर्थिनां वञ्चयितव्यमस्ति ॥८॥

सेवेव मानमखिलं ज्योत्[4]स्नेव तमो जरेव लावण्यम् ।
हरिहरकथेव दुरितं गुणशतमप्यर्थि[5]ता हरति ॥ ९ ॥

भ्रातर्धातरशेषयाचकजनैर्वैरायसे सर्वथा
यस्माद्विक्रमशालिवाहनमहीभृन्मुञ्जभोजादयः ।
अत्यन्तं चिरजीविनो न विहितास्ते विश्वजीवातवो
मार्कण्डध्रुवलोमशप्रभृतयः सृष्टाः प्रभूताऽऽयुषः ॥ १० ॥

विद्यावतः कुलीनस्य धनं याचितुमिच्छतः ।
कण्ठे पारावतस्येव वाक्करोति गताऽगतम् ॥ ११ ॥

उड्डीना गुणपत्रि[6]णः सुखफलान्या[7]राद्विकीर्णान्यधः
पर्यस्ताः परितो यशः स्तबकिताः संपल्लताऽपल्लवाः ।
प्रागेवाऽपसृतप्रमोदहरिणच्छायाकथाऽन्तं गता
दैन्या[8]ऽरण्यमतङ्गजेन सहसा भग्नेऽभिमानद्रुमे ॥ १२ ॥

गुरुतामुपयाति यन्मृतः पुरुषस्तद्विदितं मयाऽधुना ।
ननु लाघवहेतुरर्थिता न मृते तिष्ठति सा मनागपि[9] ॥१३॥

साधुरेवाऽर्थिभिर्याच्यः क्षीणवित्तोऽपि सर्वदा ॥
शुष्काऽपि हि नदी मार्गे खन्यते सलिलाऽर्थिभिः ॥ १४॥

---

१ अंतःकरणं पक्षे याचनाशब्दस्थचकारे तकारः क्रियते चेद्यातनैव जायते २ लक्ष्मीपतिरपि, ३ ह्रस्वः पक्षे लघुः ४ चन्द्रकान्तिः ५ याचकत्वम् ६ गुणा एव पक्षिणः ७ समीपे ८ दैन्यमेव अरण्यगजः ९ किंचिदपि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देहीति वचनं श्रुत्वा हृदिस्थाः पञ्च देवताः ।
मुखान्निर्गत्य गच्छन्ति श्रीह्रीधीधृतिकीर्तयः ॥ १५ ॥

नवीनदीनभावस्य याचकस्याऽतिमानिनः ।
वचोजीवितयोरासीत्[1]पुरोनिःसरणे रणः ॥ १६ ॥

वदनाच्च बहिर्यान्ति प्राणा याञ्चाक्षरैः सह ।
ददामीत्यक्षरैर्दातुः पुनः कर्णाद्विशन्ति हि ॥ १७ ॥

द्वारेद्वारे परेशामविरलमटति द्वारपालैः क[2]रालै-
र्दृष्टो योऽप्याहतः सन् रणति गणयति स्वाऽपमानं तु नैव ।
क्षन्तुं शक्नोति नाऽन्यं स्वसदृशमितराऽगारमप्याश्रयन्तं
श्राम्यत्यात्मोदरार्थे कथमहह शुना नो समो याचकः स्यात् ॥ १८ ॥

ज[3]नस्थाने भ्रान्तं विषयमृ[4]गतृष्णाऽऽकुलतया
व[5]चो वै देहीति प्रतिपदमुदश्रु प्रलपितम् ।
कु[6]तालङ्काभर्तुर्वदनपरिपाटीषु रचना
मयाऽऽप्तं रामत्वं कु[7]शलवसुता न त्वधिगता ॥ १९ ॥

तीक्ष्णधारेण खड्गेन वरं जिव्हा द्विधा कृता ।
नतुमानं परित्यज्य देहि देहीति भाषितम् ॥ २० ॥

याचकवीरो धन्यः क[8]रदानग्राहकः स्वदातृभ्यः ।
कुरुते पराङ्मुखं वा ह्यतिनम्रं वा हरत्यसौ पुण्यम् ॥ २१ ॥

पुरतः प्रेरयत्याशा लज्जापृष्ठाऽवलम्बिनी ।
ततो लज्जाऽऽशयोर्मध्ये दोलायत्यर्थिनां मनः ॥ २२ ॥

---

१ अहमहमिकया अग्रतो निःसरणे. २ विकटैः ३ जनानां स्थानानि नगरपत्तनादीनि तेषु भ्रमणं कृतं रामपक्षे जनस्थाने नासिके परिभ्रमणं कृतम्. ४ विषया एव मृगास्तेषां तृष्णा तया व्याप्तत्वेन ५ वै इति पदच्छेदः देहीति प्रलपितं पक्षे वैदेही जानकीतिप्रलपितं ६ काभर्तुः कुत्सितस्वामिनः वदनपरिपाटीषु रचना अलं अत्यर्थं कृता. पक्षे लङ्काभर्तुः रावणस्य वदनपरिपाट्यां इषुरचना बाणरचना कृता. ७ कुशलं यद्वसु द्रव्यं तद्भावो न संपादितः पक्षे कुशलवौ सुतौ यस्याः स वैदेही ८ करात् हस्तात् दानस्य ग्राहकः पक्षे करः 'खण्डणी' इति लोके दानं समर्पणं तद्ग्राहकः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शूराः केऽपि पुरःस्थितां रिपूनरश्रेणिं सहन्तेसुखं
धीराः केचन पञ्चबाणसदृशं कान्तादृगन्ताऽऽहतिम् ।
केचित्क्रूररवांश्च पञ्चवदनान्दन्तीचपेटान्भटा-
नैवाऽर्थिप्रकरं प्रसारितकरं कश्चिद्विसोढुं क्षमः ॥ २३ ॥
याचना हि पुरुषस्य महत्त्वं नाशयत्यखिलमेव तथा हि ।
सद्य एव भगवानपि विष्णुर्वामनो भवति याचितुमिच्छन् २४
द्वारंद्वारमटन्भिक्षुः शिक्षत्येवं न याचते ।
अदत्वा मादृशो मा भूर्दत्त्वा त्वं त्वादृशो भव ॥ २५ ॥

कृपणनिन्दा ।

श्रीः ॥ कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति ॥ १ ॥
कृपणो धनलोभेन स्वां भार्यां नाभिगच्छति ।
अस्यां यो जायते पुत्रः स मे वित्तं हरेदिति ॥ २ ॥
प्राप्तानपि नो लभते भोगान्भोक्तुं स्वकर्मभिः कृपणः ।
द्राक्षाप्रपाकसमये मुखपाको भवति काकानाम् ॥ ३ ॥
यदधोऽधः क्षितौ वित्तं निचखान मितंपचः ।
तदधोनिलयं गन्तुं चक्रे पन्थानमग्रतः ॥ ४ ॥
निजसौख्यं निरुन्धानो यो धनाऽर्जनमिच्छति ।
परार्थं भारवाहीव क्लेशस्यैव हि भाजनम् ॥ ५ ॥
दानोपभोगहीनेन धनेन धनिनो यदि ।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥ ६ ॥
असंभोगेन सामान्यं कृपणस्य धनं परैः ।
अस्येदमिति सम्बन्धो हानौ दुखेन गम्यते ॥ ७ ॥
यद्ददाति यदश्नाति तदेव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥ ८ ॥

---

१ कान्ताकटाक्षवेधम्. २ सिंहान्. ३ मुखरोगः ४ आरोपयामास ५ पातालम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलं स्वेच्छालभ्यं प्रतिवनम[1]खेदं क्षितिरुहां[2]
पयः स्थानेस्थाने शिशिरमधुरं पुण्यसरिताम् ।
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी
सहन्ते संतापं तदपि धनिनां द्वारि कृपणः ॥ ९ ॥

[3]यदर्ज्यते परिक्लेशैरर्जितं यन्न भुज्यते ।
विभज्यते यद[4]न्तेऽन्यैः कस्यचिन्माऽस्तु तद्धनम् ॥ १० ॥

यत्करो[5]त्यरतिं क्लेशं तृष्णां मोहं[6] प्रजागरम् ।
न तद्धनं क[7]दर्याणां हृदये [8]व्याधिरेव सः ॥ ११ ॥

मृत्युः शरीरगोप्तारं धनरक्षं वसुंधरा ।
दुश्चारिणीव हसति स्वपतिं पुत्रवत्सलम् ॥ १२ ॥

[9]दृढतरनिबद्धमुष्टेः को[10]शंनिषण्णस्य स[11]हजमलिनस्य ।
कृपणस्य कृपाणस्य च केवलमा[12]कारतो भेदः ॥ १३ ॥

कृपणस्य समृद्धीनां भोक्तारः सन्तिकेचिदतिनिपुणाः
जलसंपदोऽम्बु[13]राशेर्यान्ति वशं [14]श्वदौर्वाग्नेः ॥ १४ ॥

यो न ददाति नभुङ्क्ते सति विभवे नैव तस्य तद्द्रव्यम् ।
[15]तृणमयकृत्रिमपुरुषो रक्षति सस्यं परस्यार्थे ॥ १५ ॥

यदि भवति धनेन धनी क्षिति[16]तलनिहितेन भोगै[17]रहितेन ।
तस्माद्वयमपि धनिनस्तिष्ठति नः काञ्चनो मेरुः ॥ १६ ॥

---

१ क्लेशरहितम् २ वृक्षाणाम् ३ संपाद्यते. ४ अवसाने. ५ अस्वस्थत्वम् ६ विचारा-शक्ति. ७ कृपणानाम् ८ पीडेव ९ दृढतरं अतिनिबिडं निबद्धा मुष्टिर्येन पक्षे दृढतरं निबद्धा मुष्टिःत्सरुर्यस्य १० कोशागारे निषणस्य स्थितस्य पक्षे कोशे खड्गपिधाने स्थितस्य. ११ सहजमलिनस्येति उभयत्रापि समम् १२ आकारतः आकृत्याभेदः कृपणशब्दो अकारोवर्तते कृपाणशब्देन आकारोवर्तते एतावतैव भेदः भिन्नत्वम् कृपाणः खड्ग 'तरवार' इति लोके १३ समुद्रस्य. १४ वाड-वाग्नेः १५ तृणकृतकपटपुरुषः सस्यरक्षणार्थं उच्चप्रदेशे श्वापदभयहेतुस्तृणादिभिः पुरुषः क्रियते इति [illegible] १६ [illegible] १७ [illegible]धीनेन.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृपणेन शवेनैव मृतेनापि न दीयते ॥
मांसं वर्धयता तेन काकस्योपकृतिः कृता ॥ १७ ॥

उदारचरितस्त्यागी याचितः कृपणोऽधिकः ।
एको धनं ततः प्राणानन्यः प्राणांस्ततो धनम् ॥ १८ ॥

देहीति वक्तुकामस्य यद्दुःखमुपजायते ।
दाता चेत्तद्विजानीयाद्द्यात्स्वपिशितान्यपि ॥ १९ ॥

जहाति सहसाऽऽसनं झटीति पृच्छति स्वागतं ।
नमस्यति मुहुर्मुहुः श्रुतिमनोहरं भाषते ।
ददाति कुसुमं फलं शिथिलयत्यभीष्टां क्रिया ।
महो न परिचीयते कृपणवञ्चना चातुरी ॥ २० ॥

अर्थिनि कवयति कवयति पठति च पठति स्तवोद्यतं स्तौति
पश्चाद्यामीत्युक्ते कृपणः प्रणतोञ्जलिं कुरुते ॥ २१ ॥

निरौचित्यान्नरात्तस्माद्वरं कूपोऽप्यचेतनः ।
आगतं गुणवत्पात्रमाशु पूर्णं करोति यत् ॥ २२ ॥

रक्षन्ति कृपणाः पाणौ द्रव्यं क्रव्यमिवात्मनः ।
तदेव सन्तः सततमुत्सृजन्ति यथा मलम् ॥ २३ ॥

अक्षरद्वयमभ्यस्तं नास्ति नास्तीति यत्पुरा ।
तदेव देहि देहीति विपरीतमुपस्थितम् ॥ २४ ॥

दानप्रशंसा ।

श्रीः ॥ अनुकूले विधौ देयं यतः पूरयिता हरिः ।
प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति ॥ १ ॥

दातव्यं भोक्तव्यं सति विभवे संग्रहो न कर्तव्यः ।
पश्यामि मधुकरीणां संचितमर्थं हरन्त्यन्ते ॥ २ ॥

---

१ कस्य का उपकृतिरुपकारः कृता अपि तु न कस्यापि कापीत्यर्थः अथ च काकस्य पक्षिणः २ त्यजतीति शेषः ३ मांसानि. ४ सत्वरम् ५ कर्णमधुरम् ६ याचके ७ कवितां करोति. ८ नम्रः ९ दैवे १० पूरणकर्ता ११ ऐश्वर्ये १२ भ्रमरीणाम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य [1]तृतीया गतिर्भवति ॥ ३ ॥

कलिमहिमा ।

श्रीः ॥ न देवे देवत्वं कपटपटवस्तापसजना
जनो मिथ्यावादी विरलतनु[2]वृष्टिर्जलधरः ॥
प्रसङ्गो नीचाना[3]मवनिपतयो दुष्टमनसो
जना भ्रष्टा नष्टा अहह कलिकालः प्रभवति ॥ १ ॥

श्रुतिर्भ्रष्टा नष्टा स्मृतिरपि पुराणं विगलितं
गता लोपं सर्वे प्रचुरतरवेदान्तनिवहाः ।
इदानीं नामैका कविरवचनान्मोक्षपदवी
न जाने को हेतुः शिवशिव कलेरेष महिमा ॥ २ ॥

निर्वीर्या पृथिवी निरोषधिरसा नीचा महत्वं गता
भूपाला निजकर्मधर्मरहिता विप्राः कुमार्गे रताः ।
भार्या भर्तृविरोधिनी पररता पुत्राः पितुर्द्वेषिणो
हा कष्टं खलु वर्तते कलियुगे धन्या नराः सज्जनाः ॥३॥

सीदन्ति सन्तो विलसन्त्यसन्तः पुत्रा म्रियन्ते जनकश्चिरायुः ।
परेषु मैत्री स्वजनेषु वैरं पश्यन्तु लोकाः कलिकौतुकानि ॥४॥

दूरादर्थिनमाकलय्य भजते सद्यो विरूपाक्ष[4]ताम् ।
सङ्गे किं च वि[5]रोचनत्वमथ संस्थाने [6]नृसिंहाकृतिम् ।
पाण्डित्योक्तिषु [7]वक्रतुंडरचनां दाने [8]स्वपर्णात्मता-

---

१ नाश इत्यर्थः २ विरला क्वाचित्की तथापि अल्पा वृष्टिर्यस्य सः विरलतर-वृष्टिरिति वा पाठः। ३ राजानः । ४ विकृतनेत्रत्वं पक्षे शिवताम् । ५ रुचिराहित्यम् पक्षे बलिपितृत्वम् । ६ नृसिंह इव क्रूरामाकृतिं पक्षे नृसिंहस्याकृतिम् । ७ वक्रा या तुण्डस्य रचना तां मुखवक्रत्वमित्यर्थः पक्षे वक्रतुण्डस्य गणपतेरिव या रचना तां गणेशरूपत्वमित्यर्थः । ८ न विद्यन्ते पर्णान्यपि यस्यास्तामकिंचनत्वमित्यर्थः पक्षे अपर्णा पार्वती तद्रूपताम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेकः पञ्चसुरात्मकः प्रभुरहो भाग्यैः कलौ लभ्यते ॥ ५ ॥

कुशलाः शब्दवार्तायां वृत्तिहीनास्तु रागिणः ।
कलौ वेदन्तिनो भान्ति फाल्गुने बालका इव ॥ ६ ॥

धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं च दूरे गतं
पृथ्वी मन्दफला नृपाश्च कुटिला लौल्यं[१] गता ब्राह्मणाः ।
लोकः स्त्रीषु रतः स्त्रियश्च चपलाः पुत्राः पितुर्द्वेषिणः
साधुः सीदति दुर्जनः प्रभवति प्राप्ते कलौ दुर्युगे ॥ ७ ॥

सन्तः क्वाऽपि न सन्ति सन्ति यदि वा दुःखेन जीवन्ति ते
विद्वांसोऽपि न सन्ति सन्ति यदि वा मात्सर्ययुक्ताश्च ते ।
राजानोऽपि न सन्ति सन्ति यदि वा तृष्णाधनग्राहिणो
दातारोऽपि न सन्ति सन्ति यदि वा सेवाऽनुकूलाःकलौ॥८॥

हर्म्यस्थानमधर्मकर्मवितते[२]र्दुर्मानभर्माऽऽसनं
शास्त्रस्तोमललाटभूलिपिलयः शान्तिः सवानामपि ।
सर्वाम्नाय[३]वचः समापनदिनं संस्थासदर्चाविधे-
रर्थाऽऽशाजनिभूरभूदिह महाऽनर्थावहोऽयं कलिः ॥ ९ ॥

सीदन्ति चाग्निहोत्राणि गुरुपूजा प्रणश्यति ।
कुमार्यश्च प्रसूयन्ते प्राप्ते कलियुगे सदा ॥ १० ॥

परान्नेन मुखं दग्धं हस्तौ दग्धौ प्रतिग्रहात् ।
परस्त्रीभिर्मनो दग्धं कुतः शापः कलौ युगे ॥ ११ ॥

राक्षसाः कलिमाश्रित्य जायन्ते ब्रह्मयोनिषु ।
ब्राह्मणानेव बाधन्ते तत्राऽपि श्रोत्रियान्कृशान् ॥ १२ ॥

प्रातर्हन्त कृताऽऽप्लवोऽपि[४] रजकस्पृष्टाजडो रासभै-
[५]रूढान्धारयते पटाननुदिनं धृत्वा बहिर्गच्छति ॥

१ लोलुपत्वम् । २ यज्ञानाम् । ३ वेदवचसाम् । ४ स्नानम् । ५ गर्दभैः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गत्वा म्लेच्छमुखाऽशुचीन्स्पृशति च स्पृष्ट्वाऽपि न स्नात्यहो[१]
न स्नातोऽप्यथभुङ्क्त एव चपलो भुक्त्वाऽपि न व्रीडति १३
शस्त्रैर्जीवति शास्त्रमुज्झति परं शूद्राऽऽहृतैरम्बुभिः
स्नात्वाऽऽचामति देवताः स्नपयति स्वैरं पचत्योदनम्[२] ।
उच्छिष्टान्न बिभेति याति यवनैरुच्चावचैः[३] संगतिं
मातङ्गान्[४]निकटं गतानगणयन्मार्गान्मुहुर्गाहते[५] ॥ १४ ॥
नीचैर्दुर्यवनैः[६] शुनीभि[७]रपि वा निःशङ्कमालोकितं
भुङ्क्ते पङ्क्तिविदूषकैः[८] सह नरैरज्ञातवेदाऽक्षरैः ।
मद्याऽऽस्वादनमत्तचित्तजनतामोहाय भीहानितः
कर्माण्यारभते श्रुतिस्मृतिवचो दूराण्यसाराण्यहो[९] ॥ १५ ॥
कन्यां काम[१०]प्युदूह्य प्रविजहदुदंयद्यौवनामज्ञ एनां
द्रव्याऽऽशापाशकृष्टो भ्रमति चिरतरं हन्त देशान्तरेषु ।
अन्योन्याऽऽश्लेषवाञ्छा विगलितवयसोरात्तमालिन्यमत्यो-
र्दम्पत्योर्व्याकृतैवं हतविधिरुभयोर्लोकयोः शोकयोगम् ॥१६॥
नाधीते[११]ऽत्र जनो यदि कश्चिदधीते शते सहस्रे वा ॥
दुस्तर्केषु श्राम्यति दूरीकुरुते श्रुतिस्मृतिसुतर्कान् ॥ १७ ॥
एतादृशे कलियुगेऽपि शतेषु कश्चि-
ज्ज्ञाताऽऽदरो जगति यः श्रुतिमार्ग एव ।
यत्किंचिदाचरति पात्रमसौ स्तुतीनां
श्लाघ्यं मितां[१२]ऽपमपि किं न मरौ[१३] सरश्चेत् ॥ १८ ॥
विद्वत्ता वसुधातले विगलिता पाण्डित्यधर्मो गतः
श्रोतॄणां हृदयेष्वबुद्धिरधिका ज्ञानं गतं चौरणे[१४] ।

१ न लज्जति । २ अन्नम् । ३ उच्चनीचैः अनेकभेदाभिन्नैः । ४ 'मांग' इतिलोके ५ प्रविशति । ६ दुष्टयवनैः । ७ 'कुत्री' इति लो० । ८ पंक्तिबाह्यैः । ९ निष्फलानि १० संजातयौवनाम् । ११ अध्ययनं न करोति । १२ स्वल्पजलम् । १३ मरुदेशे । १४ नद्यादौ ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गाथागीतविनोदवाक्यरचनायुक्त्या जगद्रञ्जितं
ज्योतिर्वैद्यकशास्त्रसारमखिलं क्षुद्रेषु जातं कलौ ॥ १९॥

तृष्णानिन्दा ।

श्रीः॥ तृष्णे देवि नमस्तुभ्यं धैर्यविप्लवकारिणि ।
विष्णुस्त्रैलोक्यपूज्योऽपि यस्त्वया वामनीकृतः ॥ १ ॥
आशाया ये दासास्ते दासाः सर्वलोकस्य ।
आशा येषां दासी तेषां दासायते विश्वम् ॥ २ ॥
भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं
त्यक्त्वा जातिकुलाऽभिमानमुचितं सेवाकृता निष्फला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्कया काकवत्
तृष्णे जृम्भसि पापकर्मनिरते नाऽद्याऽपि संतुष्यसि॥३॥
उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः ।
मन्त्राऽऽराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुञ्च माम्॥४
अपि मेरूपमं प्राज्ञमपि शूरमपि स्थिरम् ।
तृणीकरोति तृष्णैका निमेषेण नरोत्तमम् ॥ ५ ॥
वलिभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः ।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ ६ ॥
निवृत्ता भोगेच्छा बहुपुरुषमानो विगलितः
समानाः स्वर्याता सपदि सुहृदो जीवितसमाः ॥
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो दुष्टः कायस्तदपि मरणाऽपायचकितः ॥ ७ ॥
आशानाम नदी मनोरथजला तृष्णातरङ्गाऽऽकुला

---

१ नीचेषु २ विलयम् ३ ह्रस्वीकृतः ४ निक्षेपः ५ सच्छिद्रकपर्दिका ' फुटकी कवडी' इतिलोके. ६ मेरुसदृशम् ७ तृणवल्लघूकरोति. ८ प्राकृते ' वळ्या ' इति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहाऽऽवर्तसुदुस्तराऽतिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥८

खलोल्लापाः सोढाः कथमपि तदाराधनपरै-
र्निगृह्यान्तर्बाष्पं हसितमपि शून्येन मनसा ।
कृताश्चित्तस्तम्भः प्रतिहतधियामञ्जलिरपि
त्वमाशे मोघाऽऽशे किमु परमितो नर्तयसि माम् ॥ ९ ॥

अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नऽस्माभिर्विगलितविवेकैर्व्यवसितम् ।
यदाढ्यानामग्रे द्रविणमदनिस्संज्ञमनसां
कृतं म्लानव्रीडैर्निजगुणकथापातकमपि ॥ १० ॥

अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ॥
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ११

तेनाऽधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ॥
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ॥ १२ ॥

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिराजतां क्षितिपतिश्चक्रेशतां वाञ्छति
चक्रेशः सुरराजतां सुरपतिर्ब्रह्माऽऽस्पदं वाञ्छति
ब्रह्मा शैवपदं शिवो हरिपदं तृष्णाऽवधिं को गतः॥१३

आशा बलवती राजन्विपरीता हि शृंखला ॥
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पंगुवत् ॥ १४ ॥

नास्त्यन्या तृष्णया तुल्या क्वचिदस्ति निर्तम्बिनी ॥
या प्राणानपि मुष्णन्ती भवत्येवाऽधिकं प्रिया ॥ १५॥

च्युता दन्ताः सिताः केशाः दृङ्निरोधः पदे पदे ॥
पातसज्जमिमं देहं तृष्णा साध्वी न मुञ्चति ॥ १६ ॥

---

१ नक्रः । २ 'भोंवरे' इति लोके । ३ धमिकानाम् । ४ शून्यमनसाम् । ५ शिरः ६ मुखम् । ७ 'बेडी' इति लोके ८ स्त्री । ९ हस्ती ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृष्णे त्वमपि तृष्णाऽन्धा त्रिषु स्थानेषु पूज्यसे ॥
व्याधितेष्वनपत्येषु जरापरिणतेषु च ॥ १७ ॥

तृष्णे देवि नमस्तुभ्यं या त्वं सर्वस्य सर्वदा ।
उत्पादयस्ययत्नेन गोष्पदे सागरभ्रमम् ॥ १८ ॥

गिरिर्महान् गिरेरब्धिर्महानब्धेर्नभो महत् ॥
नभसोऽपि महद्ब्रह्म ततोऽप्याशा गरीयसी ॥ १९ ॥

मानेनेच्छति वारयत्युपशमे क्ष्मामालिखन्त्या ह्रियां
स्वातन्त्र्ये परिवृत्य तिष्ठति करौ व्याधूय धैर्ये गते ॥
तृष्णे त्वामनुबध्नता फलमियत्प्राप्तं जनेनाऽमुना
यः स्पृष्टो न पदा स एव चरणौ स्प्रष्टुं न संमन्यते ॥२०॥

दन्तैरुच्चलितं धिया तरलितं पाण्यङ्घ्रिणा कम्पितं
दृग्भ्यां कुण्डलितं बलेन गलितं रूपश्रिया प्रोषितम् ।
प्राप्तायां यमभूपतेरिह महाधाट्यां धरायामियं
तृष्णा केवलमेकिकैव सुभटी धीरा पुरो नृत्यति ॥ २१॥

धनेषु जीवितव्येषु स्त्रीषु चाऽऽहारकर्मसु ।
अतृप्ताः प्राणिनः सर्वे याता यास्यन्ति यान्ति च ॥ २२

आशैव राक्षसी पुंसामाशैव विषमञ्जरी ।
आशैव जीर्णमदिरा धिगाशा सर्वदोषभूः ॥ २३ ॥

ते धन्याः पुण्यभाजस्ते तैस्तीर्णः क्लेशसागरः ।
जगत्संमोहजननी यैराशाऽऽशीविषी जिता ॥ २४ ॥

शान्तेर्मातुर्विवेकात्पितुरपि कृपणं मङ्क्षु कृत्वा पृथङ्मा-
माशा योषा स्वतन्त्रा व्रजति परगृहान्सर्वदा वीतलज्जा ।
संधत्ते मत्कृशत्वं मम यमनियमौ भ्रातरौ भर्त्सयन्ती
पुष्ट्वा चैवात्मबन्धूंस्तदपि पुनरहो हन्त वन्ध्यां श्रयामः२५

---

१ वार्धक्यम् । २ पर्वतः अस्मिन् श्लोके सारालंकारः । ३ पृथ्वी । ४ तव अनुबन्धं कुर्वतेत्यर्थः । ५ मुकुलितम् । ६ सर्पिणी । ७ शीघ्रम् । ८ गतलज्जा निर्लज्जेत्यर्थः ९ 'पुष्ट्वा दम्भं स्वबन्धुं तदपी' इति वा पाठः । १० अहो इत्याश्चर्ये ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशाऽवलम्बो[1]पचितानकस्य तृष्णालताऽनर्थफलं प्रसूते ।
दिनेदिने लब्धरुचिर्विवस्वा[2]न्मीनं[3] च मेषं[4] च वृषं[5] च भुङ्क्ते ॥२६॥

क्षुत्तृडाशाः कुटुम्बिन्यो मयि जीवति नान्यगाः ।
तासामाशा महासाध्वी कदाचिन्मां न मुञ्चति ॥२७॥

तृष्णा हि चेत्परित्यक्ता को दरिद्रः क ईश्वरः ।
तस्याश्चेत्प्रसरो दत्तो दास्यं च शिरसि स्थितम् ॥२८॥

यौवनं जरया ग्रस्तमारोग्यं व्याधिभिर्हतम् ।
जीवितं मृत्युरभ्येति तृष्णैका निरुपद्रवा ॥ २९ ॥

त्वामुदर साधु मन्ये शाकैरपि यदसि लब्धपरितोषम् ।
हतहृदयं ह्यधिकाधिकवाञ्छाशतदुर्भरं न पुनः ॥ ३० ॥

आशानिष्ठाप्रतिष्ठाः किल मम महिला[6]स्तासु सौख्यं कदाचि-
द्या प्रान्त्या[7] सा प्रदद्यादि[8]ह किमपि तथा मध्यमा[9] सा परत्र[10] ।
आद्या[11] सा नोभय[12]त्राऽप्यहह तदपि किं सक्ततां यामि तस्य
या मौढ्यादप्रगल्भे प्रतिदिवसमु[13]भे ते कदर्थी[14]करोति ॥३१॥

कलावन्तमपि स्वच्छं सद्वृत्तमपि शीतलम् ॥
लोभः क्षयं नयत्येव पूर्णचन्द्रं यथा मदः ॥ ३२ ॥

तृष्णा भुजङ्गीदंशेन भूरिविभ्रान्तचेतसाम् ।
नौषध्यो न च मन्त्राः स्युः शमाय मणयोऽपि न ॥३३॥

आशानां पूरणं कर्तुं ये यतन्ते मनस्विनः ।
आकाशं कवलीकर्तुमुद्युक्तास्ते कुतो न वा ॥ ३४ ॥

चतुर्मुखसमस्यापि यदा पुंसः स्पृहा भवेत् ।
तदैव स चतुष्पादाधमतोऽप्यधमायते ॥ ३५ ॥

तृष्णयैवाखिला दोषास्तच्छित्यैवाखिला गुणाः ।
मोदाः सर्वे विद्ययैव शोकाः सर्वेऽप्यविद्यया ॥ ३६ ॥

---

१ अवलम्बः आश्रयः । २ सूर्यः । ३ मत्स्यम् । ४ 'मेंढा' इति लोके । ५ वृषभं पक्षे मीनादयोराशिविशेषाः । ६ स्त्रियः । ७ प्रतिष्ठा । ८ अस्मिन्लोके । ९ निष्ठा । १० परलोके । ११ आशा । १२ इहलोके परलोके च । १३ निष्ठाप्रतिष्ठे १४ पीडयति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोभनिन्दा ।

श्रीः ॥ लोभः सदा विचिन्त्यो लब्धेभ्यः सर्वतो भयं दृष्टम् ।
कार्याऽकार्यविचारो लोभविमूढस्य नाऽस्त्येव ॥ १ ॥

अतिसाहसमतिदुष्करमत्याश्चर्यं च दानमर्थानाम् ।
योऽपि ददाति शरीरं न ददाति स वित्तलेशमपि ॥२॥

केचित्स्वभावलुब्धास्तीव्रतरां यातनामपि सहन्ते ।
नतु संत्यजन्ति वित्तं मात्सर्यमिवाऽधमाः सततम् ॥३॥

नाऽस्त्यर्थमर्थाऽर्थितया लुब्धमुद्वेजयेज्जनम् ।
अब्धिर्दत्त्वाऽश्वरत्नस्त्रीर्मथ्यमानोऽसृजद्विषम् ॥ ४ ॥

प्रायेण धनिनामेव धनलोभो निरन्तरम् ।
पश्यकोटिद्वयोपेतं लक्षाय प्रणतं धनुः ॥ ५ ॥

यद्दुर्गा[1]मटवी[2]मटन्ति विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमटनं क्लेशं कृषिं कुर्वते ।
सेवन्ते कृपणं पतिं गजघटासंघट्ट[3]दुःसंचरं
सर्पन्ति[4] प्रधनं[5] धनाऽन्वितधियस्तल्लोभविस्फूर्जितम् ॥६॥

दैवम् ।

श्रीः ॥ दैवं फलति सर्वत्र न विद्या न च पौरुषम् ॥
समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम् ॥ १ ॥

प्राप्तव्यमर्थं लभते मनुष्यो देवोऽपि तं लङ्घयितुं न शक्तः ॥
तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं नहि तत्परेषाम् ॥२

मा धाव मा धाव विनैव दैवं नो धावनं साधनमस्ति लक्ष्म्याः ।
चेद्धावनं साधनमस्ति लक्ष्म्याः श्वा[6] धावमानो न[7] लभेत लक्ष्मीम् ३

दैवे विमुखतां याते न कोऽप्यस्ति सहायवान् ।
पिता माता तथा भार्या भ्राता वाऽथ सहोदरः ॥ ४ ॥

---

१ गहनाम् । २ अरण्यम् । ३ युद्धम् । ४ विलासः । ५ पराक्रमः । ६ भक्षकः ।
७ 'नकुतोधनाढ्य' इति पाठः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूयिष्ठं द्रविणात्मजं[1] जनयितुं लिप्सावता चेतसा
नार्यः पञ्च मया क्रमेण कुलजाः काले समुद्वाहिताः[2] ।
सद्विद्या कविता विदेशवसतिः सेवा तथाऽभ्यर्थना
दैवेन प्रतिबन्धकेन युगपद्वन्ध्याः[3] समस्ताः कृताः ॥ ५ ॥

सच्छिद्रो मध्यकुटिलः कर्णः स्वर्णस्य भाजनम् ।
धिग्दैवनिहतं नेत्रं पात्रं कज्जलभस्मनः ॥ ६ ॥

ईशः करस्थीकृतकांचनाद्रिः कुबेरमित्रो रजताऽचलस्थः ।
तथाऽपि भिक्षाऽटनमस्य जातं विधौ[4] शिरस्थे कुटिले[5] कुतः श्रीः ७

क्वचित्पाणिप्राप्तं घटितमपि कार्यं विघटय-
त्यशक्यं केनाऽपि क्वचिदघटमानं घटयति ।
तदेवं सर्वेषामुपरि परितो जाग्रति विधा-
वुपालम्भः कोऽयं जनतनुधनोपार्जनविधौ ॥ ८ ॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाऽधिकम्
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ ९ ॥

नेता यस्य बृहस्पतिः प्रहरणं[6] वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः किल हरेरैरावतो वारणः ॥
इत्याश्चर्यबलाऽन्वितोऽपि बलिभिर्भग्नः परैः संगरे
तद्व्यक्तं वरमेव दैवशरणं धिग्धिग्वृथा पौरुषम् ॥ १० ॥

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ॥
फलं कर्माऽऽयत्तं यदि किममरैः किंच विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति[7] ॥ ११ ॥

---

१ द्रविणं द्रव्यं तदेव आत्मजः पुत्रस्तम् । २ विवाहिताः । ३ निष्फलाः । ४ दैवे पक्षे चन्द्रे । ५ वक्रे. पक्षे विपरीते । ६ आयुधम् । ७ समर्थो भवति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भग्नाऽऽशस्य करण्डपीडिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥१२॥

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके
वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः ।
तत्रोच्चैर्महता फलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्राऽऽपदां भाजनम्॥१३॥

गजभुजङ्गमयोरपि बन्धनं शशिदिवाकरयोर्ग्रहपीडनम् ।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः१४

सृजति तावदशेषगुणाऽऽकरं पुरुषरत्नमलंकरणं भुवः ।
तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता[2] विधेः॥१५॥

स्वयं महेशः श्वशुरो नगेशः[3] सखा धनेशस्तनयो गणेशः ।
तथाऽपि भिक्षाऽटनमेव शम्भोर्बलीयसी केवलमीश्वरेच्छा॥१६॥

यद्यपि दैवाल्लब्धा कस्तूरीभूमिरत्र भूरितरम् ।
नेया किमसौ तदपि हि शौचार्थं[4] जानता पुंसा ॥ १७ ॥

स्ववशः करोति कर्म प्रमादतस्तु परवशो भवति ।
स्ववशो रोहति वृक्षं निपतत्यवशस्ततः पुरुषः ॥ १८ ॥

किं त्वं न वेत्सि जगति प्रख्यातं लाभकारणे मूलम् ।
विधिलिखिताऽक्षरमालं फलति कपालं न भूपालः ॥ १९ ॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ्जयत्वाहवे[5]
वाणिज्यं[6] कृषिसेवनादिसकला विद्या कलाः शिक्षतु ।
आकाशं सकलं प्रयातु खगवत्कृत्वा प्रयत्नं परं ।
नोभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ २० ॥

---

१ दैवम् । २ मूर्खता । ३ हिमालयः । ४ हस्तपादादिक्षालनार्थम् । ५ युद्धे ।
६ 'व्यापार' इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥२१॥
दैवमुल्लङ्घ्य यत्कार्यं क्रियते फलवन्न तत् ।
सरोऽम्भश्चातकेनाऽऽत्तं गलरन्ध्रेण गच्छति ॥ २२ ॥
भाग्यवन्तं प्रसूयेथा मा शूरं मा च पण्डितम् ।
शूराश्च कृतविद्याश्च वने सीदन्ति पाण्डवाः ॥ २३ ॥
न केवलं मनुष्येषु दैवं देवेष्वपि प्रभुः ।
सति मित्रे धनाऽध्यक्षे चर्मप्रावरणो हरः ॥ २४ ॥
अम्भोऽधिः स्थलतां स्थलं जलधितां धूलीलवः शैलतां
मेरुर्मृत्कणतां तृणं कुलिशतां[1] वज्रं तृणप्रायताम् ।
वन्हिः शीतलतां हिमं दहनतामायाति यस्येच्छया
लीलादुर्ललिताऽद्भुतव्यसनिने दैवाय तस्मै नमः ॥ २५ ॥
अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वनेऽपि रक्षितःकृतप्रयत्नोऽपि गृहे विनश्यति॥
दाता बलिः प्रार्थयिता च विष्णुर्दानं भुवो वाजिमखस्य[2] कालः।
नमोऽस्तु तस्यै[3] भवितव्यतायै यस्याः फलं बन्धनमेव जातम् २७
भगवन्तो जगन्नेत्रे सूर्याचन्द्रमसावपि ।
पश्य गच्छत एवाऽस्तं नियतिः[4] केन लङ्घ्यते ॥ २८ ॥
प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥ २९ ॥
किं करोति नरः प्राज्ञः शूरो वाऽप्यथ पण्डितः
दैवं यस्य च्छलान्वेषि करोति विफलाः क्रियाः ॥३०॥
यन्मयोरथशतैरगोचरं न स्पृशन्ति कवयोऽपि गिरा यत् ।
स्वप्नवृत्तिरपि यत्र दुर्लभा लीलयैव विदधाति तद्विधिः ॥३१॥
माता यस्य धराधरेन्द्रदुहिता[5] तातो महेशस्तथा

१ वर्जताम् । २ अश्वमेधस्य । ३ दैवाय । ४ दैवम् । ५ पर्वतराजपुत्री पार्वती ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्राता विघ्नकुलान्तकः पितृसखो देवो धनानां पतिः ।
ख्यातः क्रौञ्चविदारणे सुरपतेः सेनाग्रगः षण्मुख-
स्तद्दुर्दैवबलेन कुत्र घटते नाऽद्यापि पाणिग्रहः ॥ ३२ ॥

अनुकूले सति धातरि भवत्यनिष्टादपीष्टमविलम्बम् ।
पीत्वा विषमपि शम्भुर्मृत्युंजयतामवाप तत्कालम् ॥ ३३ ॥

अनुचितमेवाऽऽचरितं पशुपतिना यद्विधेः शिरश्छिन्नम् ।
छिन्नो न चाऽस्य हस्तो येनाऽयं दुर्लिपिं लिखति ॥ ३४ ॥

कांश्चित्तुच्छयति प्रपूरयति वा कांश्चिन्नयत्युन्नतिं
कांश्चित्पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान् ।
अन्योन्यं प्रति पक्षसंहतिमिमां लोकस्थितिं बोधय-
न्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः ॥ ३५ ॥

सदसि विदुरभीष्मद्रोणशारद्वतानां
पतिभिरमरकल्पैः पञ्चभिः पालिताऽपि ।
अहह परिभवस्य द्रौपदी पात्रमासी-
द्बलवति सति दैवे बन्धुभिः किं विधेयम् ॥ ३६ ॥

पिबन्ति मधुपद्मेषु भृङ्गाः केसरधूसराः ॥
हंसाः शैवालमश्नन्ति धिग्दैवमसमञ्जसम् ॥ ३७ ॥

उद्योगप्रशंसा ।

श्रीः ॥ उद्योगः खलु कर्तव्यः फलं मार्जारवद्भवेत् ।
जन्मप्रभृति गौर्नास्ति पयः पिबति नित्यशः ॥ १ ॥

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ २ ॥

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ॥
षडेते यत्र वर्तन्ते तत्र देवः सहायकृत् ॥ ३ ॥

---

१ गजाननः २ कुबेरः ३ विवाहः ४ दैवे. ५ दुर्लेखम् ६ 'राहाटगाडगें' इति लोके ७ सभायाम् ८ देवतुल्यैः ९ अहह इति खेदे । १० पराभवस्य । ११ उद्योगेन ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योगिनं पुरुषसिंह[1]मुपैति लक्ष्मी-
र्दैवं प्रधानमिति कापुरुषा[2] वदन्ति ।
दैवं विहाय कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ॥ ४ ॥

उद्योगिनः कराऽऽलम्बं करोति कमला[3]ऽऽलया ।
अनुद्योगिकराऽऽलम्बं करोति कमलाऽग्रजा[4] ॥ ५ ॥

काकतालीयवत्[5] प्राप्तं दृष्ट्वाऽपि निधिम[6]ग्रतः ।
न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥ ६ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वाऽयं नाऽवसीदति[7] ॥ ७ ॥

न दैवमिति संचिन्त्य त्यजेदुद्योगमात्मनः ।
अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमिच्छति ॥ ८ ॥

विहाय पौरुषं यो हि दैवमेवाऽवलम्बते[8] ।
प्रासाद[9]सिंहवत्तस्य मूर्ध्नि तिष्ठन्ति वायसाः ॥ ९ ॥

पूर्वजन्मजनितं पुराविदः कर्म दैवमिति संप्रचक्षते ।
उद्यमेन तदुपार्जितं चिराद्दैवमुद्यमवशं न तत्कथम् ॥ १० ॥

दैवं पुरुषकारेण साध्यसिद्धिनिबन्धनम्[10] ।
योऽतिक्रमितु[11]मिच्छेत्स न लोकेष्ववसीदति ॥ ११ ॥

संपदा सुस्थितंमन्यो[12] भवति स्वल्पयाऽपि यः ॥
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ १२ ॥

असंपादयतः कंचिदर्थं जातिक्रियागुणैः ॥
यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥ १३ ॥

---

१ पुरुषश्रेष्ठम् । २ कुत्सितपुरुषाः । ३ लक्ष्मीः । ४ अलक्ष्मीः 'अवदसा' इति लोके । ५ काकागमनमिव तालपतनमिव काकतालीयं तद्वत् अवितर्कितं अकस्मादिति यावत् । ६ निक्षेपं 'ठेवा' इति लोके. । ७ नावसीदति खिन्नो न भवति ८ आश्रयति । ९ प्रासादे देवालयशिखरे यः सिंहस्तद्वत् १० साध्यसिद्ध्यधीनं तदायत्तमित्यर्थः ११ [illegible] १२ [illegible] मन्यतेऽसौ सुस्थितंमन्यः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri
कामपि श्रियमासाद्य यस्तद्वृद्धौ न चेष्टते ॥
तस्याऽयतिषु न श्रेयो बीजभोजिकुटुम्बवत् ॥ १४ ॥

परगृहवासः ।

श्रीः ॥ उडुगणपरिवारो नायकोऽप्योषधीना-
ममृतमयशरीरः कान्तियुक्तोऽपि चन्द्रः ।
भवति विगतरश्मिर्मण्डलं प्राप्य भानोः
परसदननिविष्टः को लघुत्वं न याति ॥ १ ॥
कष्टं खलु मूर्खत्वं कष्टं यौवनेषु दारिद्र्यम् ।
कष्टादपि कष्टतरं परगृहवासः परान्नं ॥ २ ॥

ऋणम् ।

श्रीः ॥ न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रिकम् ॥ १ ॥
पापं कर्तुमृणं कर्तुं मन्यन्ते मानवाः सुखम् ।
परिणामोऽतिगहनो महतामपि नाशकृत् ॥ २ ॥
लोकद्वयप्रतिभयैकनिदानमेत-
द्धिक् प्राणिनामृणमहो परिणामघोरम् ।
एकः स एव हि पुमान्परमस्त्रिलोके
क्रुद्धस्य येन धनिकस्य मुखं न दृष्टम् ॥ ३ ॥

कर्म ।

श्रीः ॥ ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशाऽवतारगहने क्षिप्तः सदा संकटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाऽटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ १ ॥

---

१ व्यापारं न करोति २ उत्तरकालेषु ३ कल्याणम् ४ नक्षत्रसमूहः परिवारो यस्य । ५ वनस्पतीनाम् । ६ निस्तेजाः । ७ सूर्यस्य । ८ परगृहम् । ९ नीचताम् १० ऋणम् । ११ कारणम् १२ परिणामे भयंकरम् १३ कुम्भकारः 'कुंभार' इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धनानि भूमौ पशवश्च गोष्ठे भार्या गृहद्वारि जनः श्मशाने ।
देहश्चितायां परलोकमार्गे कर्माऽनुगो गच्छति जीव एकः ॥२॥

यथा धेनुसहस्रेषु वत्सो विन्दति¹ मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ ३ ॥

यस्माच्च येन च यथा च यदा च यच्च
यावच्च यत्र च शुभाऽशुभमात्मकर्म ।
तस्माच्च तेन च तथा च तदा च तच्च
तावच्च तत्र च विधातृवशादुपैति² ॥ ४ ॥

रोगशोकपरीतापबन्धनव्यसनानि च ।
आत्माऽपराधवृक्षाणां फलान्येतानि देहिनाम् ॥ ५ ॥

नैवाऽकृतिः फलति नैव कुलं न शीलं
विद्याऽपि नैव न च यत्नकृताऽपि सेवा ॥
भाग्यानि पूर्वतपसा किल संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ६ ॥

वने जने शत्रुजलाऽग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि॥७॥

या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥८॥

गुणवदगुणवद्वा कुर्वता कार्यमादौ
परिणतिरवधार्या³ यत्नतः पण्डितेन⁴ ।
अतिरभसकृतानां⁵ कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ९ ॥

स्थाल्यां वैदूर्यमय्यां⁶ पचति तिलकणांश्चन्दनैरिन्धनाद्यैः

१ प्राप्नोति । २ दैववशात् । ३ परिणामः । ४ निश्चेतव्या ५ अतित्वरया । ६ रत्नविशेषः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौवर्णैर्लाङ्गलाद्यैर्निखनति वसुधामर्कमूलस्य हेतोः ॥
छित्त्वा कर्पूरखण्डान्वृतिमिह कुरुते कोद्रवाणां समन्ता-
त्प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः १०
अचोद्यमानानि यथा पुष्पाणि च फलानि च ।
स्वं कालं नाऽतिवर्तन्ते तथा कर्म पुराकृतम् ॥ ११ ॥

आकाशमुत्पततु गच्छतु वा दिगन्त-
मम्भोनिधिं विशतु तिष्ठतु वा यथेच्छम्
जन्मान्तराऽर्जितशुभाऽशुभकृन्नराणां
छायेव न त्यजति कर्मफलाऽनुबन्धः ॥ १२ ॥

सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाऽभिमानः स्वकर्मसूत्रग्रथितो हि लोकः १३

विपत्तौ किं विषादेन संपत्तौ हर्षणेन किम् ।
भवितव्यं भवत्येव कर्मणामीदृशी गतिः ॥ १४ ॥

उदरपूरणदूषणम् ।

श्रीः ॥ दीना दीनमुखैस्तथैव शिशुकैराकृष्टजीर्णाऽम्बरा
क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्येत चेद्गेहिनी ॥
याञ्चाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाऽक्षरं
को देहीति वदेत्स्वदग्धजठरस्याऽर्थे मनस्वी जनः ॥ १ ॥

अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाऽम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्लीवितानकुठारिका
जठरपिठरीदुष्पूरेयं करोति विडम्बनम् ॥ २ ॥

गङ्गातरङ्गकणशीकरशीतलानि

---

१ 'नांगर' इति लोके । २ प्राचीरं 'कुंपण' इतिलोके. ३ अप्रेर्यमाणानि ४ खेदेन । ५ कृपणा । ६ रोदनं कुर्वद्भिः । ७ भार्या । ८ समर्था । ९ 'कुऱ्हाड' इति लोके । १० [illegible] ११ [illegible] १२ अम्बुकणाः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्याधराऽध्युषितचारुशिलातलानि ।
स्थानानि किं हिमवतः प्रलयंगतानि
यत्सा[1]ऽवमानपरपिण्डरतो मनुष्यः ॥ ३ ॥

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः
प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ।
वीक्ष्यन्ते यन्मुखानि प्रसभमपगतप्रश्रयाणां[2] खलानां
दुःखोपात्ताल्पवित्तस्मय[3]पवनवशान्नर्तितभ्रूलतानि ॥ ४ ॥

पुण्यैर्मूलफलैः प्रियप्रणयिनि वृत्तिं[4] कुरुष्वाऽधुना
भूशय्यां नवपल्लवैः कुरु तृणैरुत्तिष्ठ यामो वने ।
क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा
वित्तव्याध्यविवेकसंकुलगिरां नामाऽपि न श्रूयते ॥ ५ ॥

ये वर्धन्ते धनपतिपुरःप्रार्थनादुःखभाजो
ये चाऽल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः[5] ।
तेषामन्तःस्फुरितहसितं वासराणां स्मरेयं
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः[6] ॥ ६ ॥

भिक्षाऽऽहारमदैन्यमप्रतिहतं भीतिच्छिदं सर्वदा
दुर्मात्सर्यमदाऽभिमानमथनं दुःखौघविध्वंसनम् ।
सर्वत्राऽन्वहमप्रयत्नसुलभं साधुप्रियं पावनं
शंभोः सत्रमवार्यमक्षयनिधिं शंसन्ति योगीश्वराः ॥ ७ ॥

लाँगूलचालनमधश्चरणाऽवपातं[7]
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु[8]
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ८ ॥

---

१ दरीभ्यः २ अविनीतानाम् ३ गर्वः ४ उपजीवनम् ५ विषयाक्षेपेण पर्यस्ता भ्रष्टा बुद्धिर्यस्य । ६ शिखरीपर्वतस्तस्य कुहरं बिलं तत्संबन्धी यो ग्रावा पाषाणः स एव शय्या तस्यां निषण्ण उपविष्टः ७ पुच्छविक्षेपणम् ८ गजश्रेष्ठः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्जीवति क्षणमपि प्रथितं मनुष्यै-
र्विज्ञानविक्रमयशोभिरभज्यमानम् ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥ ९ ॥

यो नाऽऽत्मजे न च गुरौ न च भृत्यवर्गे
दीने दयां न कुरुते न च बन्धुवर्गे ।
किं तस्य जीवितफलं हि मनुष्यलोके
काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥ १० ॥

अहितहितविचारशून्यबुद्धेः श्रुतिसमयैर्बहुभिस्तिरस्कृतस्य ।
उदरभरणमात्रकेवलेच्छोः पुरुषपशोश्च पशोश्च को विशेषः ११

अस्य दग्धोदरस्याऽर्थे किं न कुर्वन्ति पण्डिताः ।
वानरीमिव वाग्देवीं नर्तयन्ति गृहेगृहे ॥ १२ ॥

मौनगुणाः ।

आत्मनो मुखदोषेण बद्ध्यन्ते शुकसारिकाः ।
बकास्तत्र न बद्ध्यन्ते मौनं सर्वाऽर्थसाधनम् ॥ १ ॥

स्वाँऽऽयत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ॥ २ ॥

भद्रं भद्रं कृतं मौनं कोकिलैर्जलदागमे ।
वक्तारो दर्दुरा यत्र तत्र मौनं समाचरेत् ॥ ३ ॥

वैयाकरणानां
स्तुतिर्निन्दा च ।

श्रीः ॥ वैयाकरणकिरातादपशब्दमृगाः क्व यान्ति संत्रास्ताः

१ प्रख्यातम् । २ सिद्धान्तैः । ३ स्वस्याधीनम् । ४ पिधानम् । ५ मूर्खतायाः ६ सभायाम् ७ वर्षाकाले CC-0. Prof. Satya Vrat Shastri Collection. ...किरातो ...स्तस्तस्मात् १० भीताः

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिर्नटविटगायकभिषगाननगह्वराणि यदि न स्युः॥[1] १ ॥

कुप्वो ᳲ क ᳲ पौ च शेषोऽप्यसखि ससजुषोरुर्विरामोऽवसानं
शश्छोटीत्यादिशब्दैःसदसि यदि शठाः[2] शाब्दिकाःपण्डिताःस्युः।
तेषां को वाऽपराधः कथयत सततं ये पठन्तीह थोङ्त[3]-
त्ताथय्याथय्यथय्याधिगधिगधिगधिकूथय्यथय्येति शब्दान् ॥२॥

टिड्ढाणञ्द्वयसच्चुटूङसिङसोस्तिसम्झिसिप्थस्थमि-
ब्वस्मस्ता हशि च ष्टुनाष्टुरतइञ्शश्छोटयचोन्त्यादिटि ।
लोपोव्योर्वलिवृद्धिरेचियचिभं दाधाघ्वदाप्छेच टे-
रित्यब्दा[4]नखिलान्नयन्ति[5] कतिचिच्छब्दान् पठन्तः कटून्[6] ॥३॥

सूत्रैः पाणिनिनिर्मितैर्बहुतरैर्निष्पाद्य शब्दाऽऽवलिं
वैकुण्ठस्तव[7]मक्षमा रचयितुं मिथ्याश्रमाः शाब्दिकाः ।
पक्काऽन्नं विविधं श्रमेण[8] विविधाऽपूपाऽग्र्यसूपाऽन्वितं
मन्दाऽग्नीननुरुन्धते[9] मितबलानाघ्रातुमप्यक्षमान् ॥ ४ ॥

कृतदुरितनिराकरणं व्याकरणं चतुरधीरधीयानः ।
बुधगणगणनाऽवसरे कनिष्ठिकायां परं जयति ॥ ५ ॥

पातञ्जले[10] विष्णुपदा ऽपगायाः पातञ्जले[11] चाऽपि नये[12]ऽवगाहम्[13]।
आचक्षते शुद्धिदमाप्तसूतेराचक्षते रागमधोक्षजे च ॥ ६ ॥

नृणामनभ्यस्तफणाभृदीशगिरां दुरापा[14] बुधराजगोष्ठी[15] ।
अबुद्धचापश्रुतिपद्धतीनां[16] युद्धक्षमेवोद्धृतयोद्धृसार्था ॥ ७ ॥

नांगीकृतव्याकरणौषधानामपाटवं वाचि सुगाढमास्ते ॥
कस्मिंश्चिदुक्ते तु पदे कथञ्चित्स्वैरं वपुः स्विद्यति वेपते[17] च ॥८॥

---

१ ज्योतिः शब्देन गणकाः नटा नाट्यकाराः विटा जाराः नायकाः भिषजो वैद्यास्तेषामाननान्येव गह्वराणि गुहाः २ धूर्ताः ३ थोङ्तत्तथय्येतिगायकानां तालशब्दानुकरणम् ४ वर्षाणि । ५ यापयन्ति । ६ कर्णकठोराम् ७ विष्णुस्तवम् ८ श्रमेण कृत्वेति शेषः ९ अनुकुर्वन्ति । १० गंगायाः जले पातं पतनम् ११ पतञ्जलिनिर्मिते । १२ नये व्याकरणशास्त्रे १३ मज्जनमभ्यासं च १४ दुष्प्रापा १५ पण्डितराजसभा । १६ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]सूत्रं पाणिनिबद्धं [2]कलयन् पुरुषः [3]समुद्वहति [4]सुदृशम् ।
[5]वर्णादीनां धर्मान् [6]बुद्ध्वा [7]विधिवत्[8]प्रयुङ्क्तेऽसौ ॥ ९ ॥

[9]शब्दशास्त्र[10]मनधीत्य यः पुमान्वक्तुमिच्छति वचः सभान्तरे ।
बद्धुमिच्छति वने मदोत्कटं हस्तिनं कमल[11]नालतन्तुना ॥१०॥

नैयायिकप्रशंसा ।

[12]मोहं [13]रुणद्धि विमलीकुरुते च बुद्धिं
[14]सूते च संस्कृतपदव्यवहारशक्तिम् ।
शास्त्राऽन्तराऽभ्यसनयोग्यतया [15]युनक्ति
तर्कश्रमो न तनुते किमिहोपकारम् ॥ १ ॥

प्रायः काव्यैर्गमितवयसः पाणिनीयाऽम्बुराशेः
सारज्ञस्याऽप्यपरि[16]कलितन्यायशास्त्रस्य पुंसः ।
वादाऽऽरम्भे वदितुमनसो वाक्यमेकं सभायां
[17]मह्वा जिह्वा भवति कियतीं पश्य कष्टामवस्थाम् ॥ २ ॥

अपरीक्षितलक्षणप्रमाणैरपरामृष्टपदार्थसार्थतत्त्वैः ।
अवशीकृतजैत्रयुक्तिजालैरलमेतैरनधीततर्कविद्यैः ॥ ३ ॥

अद्भुत[18]स्तर्कपाथोधिरगाधो यस्य वर्धकः

---

१ पाणिनिना बद्धं रचितं सूत्रं पक्षे पाणौ हस्ते निबद्धं सूत्रं कंकणमिति लोके, विवाहकाले सूत्रनिर्मिते कंकणे वधूवरयोर्हस्तयोर्बध्नन्तीति प्रसिद्धिः २ अर्थज्ञानपूर्वकं विचारयन् पक्षे धारयन् । ३ सम्यग्धारयति पक्षे सम्यगुद्वहति पाणिग्रहणपूर्वकं स्वीकरोति । ४ शोभनां दृष्टिं शुद्धाशुद्धविवेचनशक्तिमित्यर्थः पक्षे शोभना दृक् यस्या एतादृशीं स्त्रियम् ५ अकारप्रभृतिवर्णादीनाम् पक्षे ब्राह्मणवर्णादीनाम्. ६ ज्ञात्वा । ७ यथाशास्त्रम् ८ प्रयोगं करोति पक्षे योजयति ९ व्याकरणम् १० अध्ययनमकृत्वा । ११ बिसतन्तुना १२ अज्ञानं। १३ रोधयति नाशयतीत्यर्थः १४ उत्पादयति । १५ योजयति । १६ अनभ्यस्तन्यायशास्त्रस्य १७ वक्ता । १८ तर्कसमुद्रः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्षपादो[1]ऽतमः[2]स्पृष्टस्त्वकलङ्कः कला[3]निधिः ॥ ४ ॥
ज्ञानाऽब्धिरक्षि[4]चरणः कणभक्ष[5]कश्च
श्रीपक्षिलोऽप्युदयनः स च वर्धमानः ॥
गङ्गेश्वरः शशधरो वहवश्च नव्या
ग्रन्थैर्निरुन्धत इमे हृदयाऽन्धकार[6]म् ॥ ५ ॥

नैयायिकनिन्दा ।

कर्म[7]ब्रह्मविचारणां विजहतो भोगापवर्ग[8]प्रदां
घोषं कंचन कण्ठशोषफलकं कुर्वन्त्यमी तार्किकाः[9] ।
प्रत्यक्षं न पुनाति नाऽपहरते पापानि पीलुच्छटा
व्याप्तिर्नाऽवति नैव पात्यनुमितिर्नो पक्षता रक्षति ॥ १ ॥
हेतुः कोऽपि विशिष्टधीरनुमितौ न ज्ञानयुग्मं मरु-
त्वाचो नेति च मोघवादमुखरा नैयायिकाश्चेद्बुधाः ।
मेषस्याऽण्डमियत्पलं बलिभुजो दन्ताः कियन्तस्तथेत्येवं
संततचिन्तनैः श्रमजुषो न स्युः कथं पण्डिताः ॥ २ ॥
न जिघ्रत्याम्नायं[10] स्पृशति न तदङ्गान्य[11]पि सकृ-
त्पुराणं नाऽऽदत्ते न गणयति किंच स्मृतिगणम् ॥
पठञ्छुष्कं[12] तर्कं परपरिभवार्थोक्तिभिरसौ
नयत्यायुः सर्वं निहतपरलोकार्थयतनः ॥ ३ ॥
प्रयत्नैरस्तोकैः[13] परिचितकुतर्कप्रकरणाः
परं वाचो वश्यान्कतिपयपदौघान्विदधतः ।
सभायां वाचाटाः श्रुतिकटुरटन्तो घटपटा-
न्न लज्जन्ते मन्दाः[14] स्वयमपि तु जिहेति[15] विबुधः ॥ ४ ॥

---

१ गौतमः पक्षे क्षपां ददातीति क्षपादः स न भवतीति तथाविध इति चन्द्र-विशेषणम् । २ अज्ञानेनास्पृष्टः पक्षे तमसा राहुणा न स्पृष्टः । ३ कलानां निधि-रित्यक्षपादविशेषणं पक्षे चन्द्रः एतैर्विशेषणैरद्भुतत्वं बोधितम् ४ गौतमः ५ कणा-दः ६ अज्ञानं । ७ कर्मचिन्तनं ब्रह्मचिन्तनं च ८ मोक्षः ९ जल्पाकाः १० वेदम् ११ वेदाङ्गानि । १२ नीरसम् १३ बहुभिः १४ मूर्खाः १५ लज्जां प्राप्नोति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्यप्रशंसा ।

श्री॥गुरोरधीताऽखिलवैद्यविद्यः पीयूषपाणि[1]: कुशलः क्रियासु ।
गतस्पृहो धैर्यधरः कृपालुः शुद्धोऽधिकारी भिषगीदृशः स्यात् १

रागादिरोगान्त्सततानुषक्तानशेषकायप्रसृतानशेषान् ।
औत्सुक्य[2]मोहा[3]ऽरति[4]दाञ्जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै॥२॥

मस्ते[5] दुःसहवेदनाकवलिते मग्ने स्वरेऽन्तर्गलं
तप्तायां ज्वरपावकेन च तनौ तान्ते[6] हृषीक[7]व्रजे ।
दूने[8] बन्धुजने कृतप्रलपने धैर्यं विधातुं पुनः
कः शक्तः कलितामयप्रशमनो वैद्यात्परो विद्यते ॥३॥

मा बोधि वैद्यकमथाऽपि महाऽमयेषु
प्राप्तेषु यो भिषगिति प्रथितस्तमेव ।
आकारयत्य[10]खिल एव विशेषदर्शी
लोकोऽपि तेन भिषगेष न दूषणीयः ॥ ४ ॥

निर्वृत्ता[11]ध्वरकृत्यमृत्विजमहो तीर्णापगो[12] नाविकं
युद्धान्ते सुभटं[13] च सिद्धविजयो वोढारमाप्तस्थलः ।
वृद्धं वारवधूजनं च कितवो[14] निर्घृष्टतद्यौवनो
ध्वस्ता[15]ऽऽतङ्कचयश्चिकित्सक[16]मपि द्वेष्टि प्रदेयाऽर्थिनम्॥५॥

भ्रान्ता वेदान्तिनः किं पठथ शठतयाऽद्यापि चाऽद्वैतविद्यां
पृथ्वीतत्त्वे लुठन्तो विमृशथ सततं कर्कशास्तार्किकाः किम् ।
वेदैर्नामागमैः किं ग्लपयथ हृदयं श्रोत्रियाः[17] श्रोत्रशूलै[18]-
र्वैद्यं सर्वानवद्यं[19] विचिनुत शरणं प्राणसंप्रीणनाय ॥ ६ ॥

---

१ पीयूषममृतं पाणौ यस्य सः अमृतवदवश्यमारोग्यद इत्यर्थः 'पद्महस्त' इति लोका वदन्ति । २ अविचार्यकार्यप्रवृत्तिः । ३ विचाराशक्तिः । ४ असंतोषः ५ मस्तके । ६ व्याकूले । ७ इन्द्रियसमूहे. । ८ खिन्ने । ९ वैद्यः । १० आह्वयति ११ संपादितयज्ञकृत्यः । १२ तीर्णा उत्तीर्णा आपगा नदी येन सः । १३ योद्धारम् १४ धूर्तः । १५ निरस्तरोगसंचयः । १६ वैद्यम् । १७ वेदाध्यायिनः । १८ कर्णकटुभिः १९ सर्वेषां मध्ये निर्दोषम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुवैद्योपहासः ।

वैद्यराज नतस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान्वैद्यः प्राणन्धनानि च ॥१॥

मिथ्यौषधैर्हन्त मृषाकषायैरयसद्यलेह्यैरयथार्थतैलैः ।
वैद्या इमे वञ्चितरुग्णवर्गाः पिचण्डभाण्डं परिपूरयन्ति २

न धातोर्विज्ञानं न च परिचयो वैद्यकनये
न रोगाणां तत्त्वाऽवगतिरपि नो वस्तुगुणधीः ।
तथाऽप्येते वैद्या इति तरलयन्तो जडजना-
नसून्मृत्योर्भृत्या इव वसु हरन्ते गदजुषाम् ॥ ३ ॥

कषायैरुपवासैश्च कृतामुल्लाघतां नृणाम् ।
निजौषधकृतां वैद्यो निवेद्य हरते धनम् ॥ ४ ॥

आज्ञातशास्त्रसद्भावाञ्छास्त्रमात्रपरायणान् ।
त्यजेद्दूराद्भिषक्पाशान्पाशान्वैवस्वतानिव ॥ ५ ॥

गणकप्रशंसा ।

न दैवं पित्र्यं च कर्माऽवसिद्ध्येन्न यत्राऽस्तिदेशे ननु ज्योतिषज्ञः।
न तारा न चारा नवानां ग्रहाणां न तिथ्यादयो वा यतस्तत्र बुद्धाः १

भानोः शीतकरस्य वाऽपि भुजगग्रासे पुरो निश्चिते
तीर्थानामटनं जनस्य घटते तापत्रयोच्चाटनम् ॥
इष्टे प्रागवधारिते सति धृतेस्तुष्टेश्च लाभो भवे-
त्तुष्टे तु व्यसनेऽत्र तत्परिहृतिः कर्तुं जपाद्यैः क्षमा ॥ २ ॥

वृद्धिह्रासौ कुमुदसुहृदः पुष्पवन्तोपरागः
शुक्रादीनामुदयविलयावित्यमी सर्वदृष्टाः ।

---

१ रोगिसमूहः । २ उदरभाण्डम् । ३ पारदादेः । ४ कंपयन्तः ५ प्राणान् ६ यमस्य ७ द्रव्यम् ८ रोगिणाम् ९ रोगशान्तिम् १० वास्तवानर्थान् । ११ कुत्सिता भिषजो भिषक्पाशास्तान् १२ यमसंबन्धिनः १३ ग्रहणे । १४ दुःखे १५ परिहारः १६ क्षयवृद्धी १७ चन्द्रस्य १८ सूर्याचन्द्रमसोः १९ ग्रहणम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आविष्कुर्वन्त्यखिलवचनेष्वत्र कुम्भीपुलाक-
न्यायाज्ज्योतिर्नयगतिविदां निश्चलं मानभावम् ॥ ३ ॥

असुखमथ सुखं वा कर्मणां पक्तिवेला-
स्विहह नियतमेते भुञ्जते देहभाजः ।
तदिह पुरत एव प्राह मौहूर्तिकश्चे-
त्कथय फलममीषामन्ततः किं ततः स्यात् ॥ ४ ॥

विदैवज्ञं ग्रामं विबुधविधुरां भूपतिसभां
मुखं श्रुत्या हीनं मनुजपतिशून्यं च विषयम् ।
अनाचारान्दारानपहरिकथं काव्यमपि च
प्रवक्तृत्वाऽपेतं गुरुमपि सुबुद्धिः परिहरेत् ॥ ५ ॥

एकाऽऽसनस्था जलवायुभक्षा मुमुक्षवस्त्यक्तपरिग्रहाश्च ।
पृच्छन्ति तेऽप्यम्बरचारिचारं दैवज्ञमन्ये किमुताऽर्थचित्ताः॥६॥

कुगणकनिन्दा ।

श्रीः ॥ गणिकागणकौ समानधर्मौ निजपञ्चाऽङ्गनिदर्शकावुभौ।
जनमानसमोहकारिणौ तौ विधिना वित्तहरौ विनिर्मितौ ॥१॥

ज्योतिःशास्त्रमहोदधौ बहुतरोत्सर्गाऽपवादात्मभिः
कल्लोलैर्निबिडे कणान्कतिपयाँल्लब्ध्वा कृतार्था इव ।
दीर्घायुःसुतसंपदादिकथनैर्दैवज्ञपाशा इमे
गेहंगेहमनुप्रविश्य धनिनां मोहं मुहुः कुर्वते ॥ २ ॥

विलिखति सदसद्वा जन्मपत्रं जनानां
फलति यदि तदानीं दर्शयत्यात्मदार्क्ष्यम् ।
न फलति यदि लग्नद्रष्टुरेवाऽऽह मोहं
हरति धनमिहैवं हन्त दैवज्ञपाशः ॥ ३ ॥

प्रमोदे खेदे वाऽप्युपनमति पुंसां विधिवशा-

१ परिपाककालेषु. २ रहिताम् ३ वेशम्. ४ मोक्षेच्छवः ५ त्यक्तः परिग्रहः कलत्रं यैस्ते. ६ आकाशसंचारिग्रहगतिम् ७ कुदैवज्ञाः ८ स्वचातुर्यम् ९ हर्षे ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्मयैवं प्रागेवाऽभिहितमिति मिथ्या कथयति ॥
जनानिष्टाऽनिष्टाऽऽकलनपरिहारैकनिरता-
नसौ मेषादीनां परिगणनयैव भ्रमयति[1] ॥ ४ ॥

विद्याविघ्नानि तत्साधनकथनम् ।

स्वच्छन्दत्वं धनार्थित्वं प्रेमभावोऽथ भोगितां ॥
अविनीतत्वमालस्यं विद्याविघ्नकराणि षट् ॥ १ ॥
यावद्गुरुपदाम्भोजेऽनुरागो याति नोदयम् ।
क्व नाम तावत्सद्विद्यापद्मिनी प्रैति फुल्लताम् ॥ २ ॥
यस्य नास्ति समुद्योगो विद्यासंपादने क्वचित् ।
क्व सा तस्य नहि प्रेक्ष्या सुसैश्चान्द्रमसी कला ॥ ३ ॥
निमेषमपि यो व्यर्थं प्राणान्तेऽपि न वै नयेत् ।
तस्यैव विद्या दासी स्याद्योगीन्द्रस्येव मुक्तता ॥ ४ ॥
सति तीव्रतमे कामे विद्यायां किं न सा वशा ॥
ध्रुवेण बालकेनापि सम्पदा सादिताऽचला ॥ ५ ॥

अभ्यासमाहात्म्यम् ।

अभ्यासेन न यत्सिद्धिस्तादृक् श्रेयोस्ति किं भुवि ॥
तस्मात्तदर्थिभिर्भूयोऽभ्यास एवावलम्ब्यताम् ॥ १ ॥
अभ्यासादेव पवनं भक्षयन्त्येव केचन ।
तरन्त्यम्भोधिमप्यन्ते सहन्त्यपि विषादिकम् ॥ २ ॥
अभ्यासिनामेव लभ्या अपि विद्याश्चतुर्दश ।
अप्यर्कमण्डलं भित्वाऽभ्यासिनैवेह गम्यते ॥ ३ ॥
अभ्यासस्य प्रसादेन वायोरपि जयो भवेत् ।
अणिमाद्यष्टसिद्धीनां भाजनं भवति ध्रुवम् ॥ ४ ॥
अभ्याससदृशं नैव लोकेऽस्ति हितसाधनम् ।
अतः स एव कर्तव्यः सर्वदा साधुवर्त्मना ॥ ५ ॥

---

[1] भ्रमं करोति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलावत्प्रशंसा ।

श्रीः ॥ विबुधानां सभायां तु कलावानेव राजते ।
हरस्तानखिलांस्त्यक्त्वा तमेव शिरसा दधौ ॥ १ ॥
यां सर्वेऽपि दिदृक्षन्ति जनाः सैव कला किल ।
लाञ्छनस्यैव वैशद्यं याभिस्ता विकला न किम् ॥ २ ॥
पक्षिणाममृतावाप्तिः पाषाणानामपि द्रवः ।
सारस्यं पुण्डरीकाणां जायतेऽहो कलावता ॥ ३ ॥
कलावन्तमुपाश्रित्य जीवन्ति विबुधाः किल ।
अमृतात्मकताऽत्रैव यदस्ति तिमिरापहे ॥ ४ ॥
कलावते नमस्तस्मै यत्पादैः शारदागमः ।
स्फुटीभवति लोकानां सर्वेषामपि निर्मलैः ॥ ५ ॥

प्रमादनिन्दा ।

श्रीः ॥ दुःखार्णवसहस्राणि प्रमादेन पदे पदे ॥
प्रत्यक्षमुपलभ्यन्ते स कार्योऽतो न कुत्रचित् ॥ १ ॥
मृत्युं प्रमादमेवाह भगवान्बादरायणः ।
तस्मात्तद्ध्वंसने दक्षो यः स मृत्युंजयो भवेत् ॥ २ ॥
प्रमादिनां न वित्तानि न विद्या वनितापि च ॥
न हि मद्यजुषा क्वापि साधनान्यथ धीश्च ह्रीः ॥ ३ ॥
शङ्के कृतान्तदंष्ट्रेयं याचितेऽनवधानता ॥
क्षणात्तृणीकरोत्येव यतः सा गणितान्गुणान् ॥ ४ ॥
प्रमाद्य इति वक्तव्ये प्रमाद इति जल्पति ।
जनस्तस्यैव माहात्म्याद्वैयाकरणराडपि ॥ ५ ॥

लक्ष्मीस्वभावः ।

श्रीः ॥ लक्ष्मि क्षमस्व वचनीयमिदं दुरुक्त-
मन्धीभवन्ति पुरुषास्त्वदुपासनेन ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोचेत्कथं कमलपत्रविशालनेत्रो ।
नारायणः स्वपिति पन्नग[1]भोग[2]तल्पे[3] ॥ १ ॥

हे लक्ष्मि क्षणिके स्वभावचपले मूढे च पापेऽधमे
न त्वं चोत्तमपात्रमिच्छसि खले प्रायेण दुश्चारिणि ॥
ये देवार्चनसत्यशौचनिरता ये चाऽपि धर्मे रता-
स्तेभ्यो लज्जसि निर्दये गतमतिर्नीचो जनो [4]वल्लभः ॥ २ ॥

शूरं त्यजामि वैधव्यादुदारं लज्जया पुनः ।
सापत्न्यात्पण्डितमपि तस्मात्कृपणमाश्रये ॥ ३ ॥

ये वदन्ति चपलेत्यपवादं नैव दूषणमिदं कमलायाः ।
दूषणं जलनिधेर्हि भवेत्तद्यत्पुराणपुरुषाय ददौ ताम् ॥ ४ ॥

गुणिनं जनमालोक्य निजबन्धनशङ्कया ।
राजलक्ष्मीः[5] कुरङ्गीव[7] दूरं दूरं पलायते ॥ ५ ॥

पद्मे मूढजने ददासि द्रविणं विद्वत्सु किं मत्सरो
नाऽहं मत्सरिणी न चाऽपि चपला नैवाऽस्ति मूर्खे[6] रतिः ।
मूर्खेभ्यो द्रविणं ददामि नितरां तत्कारणं श्रूयतां
विद्वान्सर्वजनेषु पूजिततनुर्मूर्खस्य नाऽन्या गतिः ॥ ६ ॥

रत्नाकरस्तव पिता कमले निवासो
भ्राता सुधामयतनुः[8] पतिरादिदेवः[9]
केनाऽपरेण कमले बत शिक्षितानि
सारङ्गभृङ्गकुटिलानि विचेष्टितानि ॥ ७ ॥

उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ॥ ८ ॥

[10]अव्यवसायिनमलसं दैव[11]परं साहसाच्च परिहीनम् ।
[12]प्रमदा पतिमिव वृद्धं नेच्छति लक्ष्मीरुपस्थातुम् ॥ ९ ॥

---

१ सर्पः २ शरीरम् ३ शय्यायाम् ४ प्रियः ५ लक्ष्म्याः ६ नारायणाय पक्षे वृद्धाय. ७ मृगीव. ८ चन्द्रः ९ नारायणः १० अनुद्योगिनम् ११ नियतिपरम् १२ तरुणस्त्री ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आलस्यं स्त्रीसेवा सरोगता जन्मभूमिवात्सल्यम्[1] ।
संतोषो भीरुत्वं षड्व्याघाता महत्त्वस्य ॥ १० ॥

मातर्लक्ष्मि भजस्व कंचिदपरं मत्कांक्षिणी मास्मभू-
र्भोगेभ्यः स्पृहयालवो नहि वयं का निस्पृहाणामसि ।
सद्यस्स्यूतपलाशपत्रपुटके पात्रे पवित्रीकृते
भिक्षासक्तुभिरेव संप्रति वयं वृत्तिं[2] समीहामहे[3] ॥ ११ ॥

लक्ष्मीर्यादो[4]निधेर्यादो[5] नाऽदो वादोचितं वचः ।
बिभेति या धीवरेभ्यो[6] जडेष्वेव[7] निमज्जति ॥ १२ ॥

हालाहलो[8] नैव विषं विषं रमा जनाः परं व्यत्ययमत्र[9] मन्वते ।
निपीय जागर्ति सुखेन तं शिवः स्पृशन्निमां मुह्यति निद्रया हरिः १३

हन्तुर्बन्धुजनान्धनार्थमनघान्[10]गन्तुः परस्त्रीशतं
रन्तुर्जन्तुविहिंसकैः[11] सहजनैः संतुष्यतो वञ्चनैः ।
वक्तुस्तीक्ष्णमयुक्त[12]मेव वचनं पक्तुमितं[13] चौदनं
नित्यं नृत्यसि मन्दिरेषु कमले कृत्यं[14] तवैतन्मतम् ॥१४॥

पीतोऽगस्त्येन तातश्[15]चरणतलहतो वल्लभोऽन्येन[16] रोषा-
दाबाल्याद्विप्रवर्यैः स्ववदनविवरे धारिता वैरिणी[17] मे ।
गेहं[18] मे छेदयन्ति प्रतिदिवसमुमाकान्तपूजानिमित्तं
तस्मात्खिन्ना सदाहं द्विजकुलसदनं नाथ नित्यं त्यजामि १५

यत्राऽभ्यागतदानमानचरणप्रक्षालनं भोजनं
सत्सेवापितृदेवताऽर्चनविधिः सत्यं गवां पालनम् ।
धान्यानामपि संग्रहो न कलहाश्चित्ताऽनुरूपा प्रिया
हृष्टा प्राह हरिं वसामि कमला तस्मिन् गृहे निश्चला ॥१६॥

---

१ स्वदेशलोभः २ उपजीवनम् ३ वाञ्छामहे । ४ समुद्रस्य । ५ जलजन्तुः ६ कैवर्तेभ्यः पक्षे बुद्धिश्रेष्ठेभ्यः ७ मूर्खेषु पक्षे डलयोः सावर्ण्यात् जलेषु उदकेषु. ८ विषभेदः ९ विपरीतभावम् १० निष्पापान् । ११ प्राणिविघातकैः १२ अयोग्यम् । १३ मितंपचं दरिद्रमिति यावत् । १४ किंप्रकारकम् । १५ समुद्रः १६ भृगुणा । १७ सरस्वती १८ कमलम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

येषामन्यकलत्रदर्शनकलाव्युत्पत्तिशून्ये दृशौ
मूढं हृच्च परार्थचिन्तनविधौ मिथ्याऽनभिज्ञं मुखम् ।
अप्रज्ञातपशून् बुभुक्षितशिशूनम्भोदकैस्ताम्यत-
स्तेषां लक्ष्मि गृहान् दृशाऽपि भयभीतेवेह नो वीक्षसे १७
कुटिला लक्ष्मीर्यत्र प्रभवति न सरस्वती वसति तत्र ।
प्रायः श्वश्रूस्नुषयोर्न दृश्यते सौहृदं लोके ॥ १८ ॥
या स्वसद्मनि पद्मेऽपि [2]सन्ध्याऽवधि वि[3]जृम्भते ॥
इन्दि[4]रा मन्दिरेऽन्येषां कथं स्थास्यति निश्च[5]ला ॥१९॥
आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां
मूकत्वं मितभाषितां वितनुते मौग्ध्यं भवेदार्जवम् ।
पात्रापात्रविचारभारविरहो यच्छत्युदारात्मतां
मातर्लक्ष्मि तव प्रसादवशतो दोषा अपि स्युर्गुणाः ॥२०॥
कृष्णः क्रीडितवान् गोभिरिति गोतुल्यबुद्धिषु ।
पक्षपातवती लक्ष्मीरहो देवी पतिव्रता ॥ २१ ॥

सत्संगतिः ।

श्रीः ॥ जा[6]ड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिश[7]ति पापमपाकरोति[8] ।
चेतः प्रसादयति दिक्षु [9]तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥ १ ॥
असज्जनः सज्जनसङ्गिसङ्गात्करोति दुःसाध्यमपीह साध्यम् ।
पुष्पाश्रयाच्छंभुशिरोऽधिरूढापिपीलिका चुम्बति चन्द्रबिम्बम् २
वंशभवो गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः ।
नहि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥३॥

---

१ स्त्री. २ संध्याकालपर्यन्तम् ३ विराजते ४ लक्ष्मीः ५ स्थिरा । ६ मान्द्यम् ७ ददाति ८ निराकरोति ९ विस्तारयति.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गङ्गेवाऽघविनाशिनी जनमनःसंतोषसच्चन्द्रिका
तीक्ष्णांशोरपि सत्प्रभेव जगदज्ञानाऽन्धकाराऽपहा
छायेवाऽखिलतापनाशनकरी स्वर्धेनुवत्कामदा
पुण्यैरेव हि लभ्यते सुकृतिभिः सत्सङ्गतिर्दुर्लभा ॥ ४ ॥

काचः काञ्चनसंसर्गाद्धत्ते मारकतीर्द्युतीः[1] ॥
तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ॥ ५ ॥

कीटोऽपि सुमनःसंगादारोहति सतां शिरः
अश्माऽपि[2] याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ६ ॥

कल्पद्रुमः[3] कल्पितमेव सूते सा कामधुक्[4] कामितमेव दोग्धि ।
चिन्तामणिश्चिन्तितमेव दत्ते सतां हि सङ्गः सकलं प्रसूते ७

यथोदयगिरौ[5] द्रव्यं सन्निकर्षेण[6] दीप्यते ।
तथा सत्सन्निधानेन हीनवर्णोऽपि दीप्यते[7] ॥ ८ ॥

महाऽनुभावसंसर्गः कस्य नोन्नतिकारकः ।
रथ्याऽम्बुजाह्नवीसङ्गात्त्रिदशैरपि[8] वन्द्यते ॥ ९ ॥

गवाशनानां[9] स शृणोति वाक्यमहं हि राजन् पठितं मुनीनाम् ।
न तस्य दोषो न च मद्गुणो वा संसर्गजा दोषगुणा भवन्ति १०

न स्थातव्यं न गन्तव्यं क्षणमप्यधमैः सह ।
पयोऽपि शौण्डिनीहस्ते[10] मदिरां[11] मन्यते जनः ॥ ११ ॥

वीणावंशाश्रया तुम्बी चुम्बत्युच्चैः कुचौ स्त्रियः ।
पिबत्यनार्यसंयोगाद्रक्तं नक्रञ्चरो यथा ॥ १२ ॥

महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥ १३ ॥

---

१ मरकतः ' पाच ' इति लोके तत्सम्बन्धिनीः २ पाषाणः ३ कल्पवृक्षः ४ कामधेनुः ५ उदयपर्वते । ६ सूर्यसंन्निधानेन । ७ प्रकाशितो भवति. ८ देवैः ९ यवनानां यवनगृहस्थितं सहोदरं शुकमुद्दिश्य मुनिगृहस्थितस्य शुकस्योक्तिरियम् १० मद्यविक्रयकर्त्री. ११ मद्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नम्रत्वप्रशंसा ।

श्रीः ॥ सद्वंशजत्वं साद्गुण्यं शूरहस्तगतापि च ।
पुरुषस्य च चापत्वं नम्रत्वादेव लक्ष्यते ॥ १ ॥
महान्त एव नम्रत्वं समृद्ध्या यान्ति नाल्पकाः ।
दृष्टमाम्रादिषु स्पष्टं बर्बुरादिषु च क्रमात् ॥ २ ॥
नत्या व्याघ्रोऽपि वशतामेतीति सुजना जगुः ।
अतः सैवातियत्नेन साध्या पुरुषपुंगवैः ॥ ३ ॥
रूपं विद्या धनं धर्मोऽप्यफलः स्याद्विना तु यम् ।
विनयोऽसौ न कैर्वात्र संपाद्यः स्याद्धितैषुभिः ॥ ४ ॥
तारुण्यारोपितगुणे सुन्दरीभ्रूशरासने ।
नम्रत्वमेव संपाद्य जगज्जयति मन्मथः ॥ ५ ॥

शान्तिस्तुतिः ।

श्रीः ॥ शमकल्पद्रुमस्यैव फलान्येतानि यद्धरा ।
मृद्रूपाप्यधवत्पत्नी नूनं लक्ष्मीपतेरपि ॥ १ ॥
दुःखलेशोदयोपि क लसतां शान्तिकान्तया ।
न हि भाति शरत्पूर्णचन्द्रे दाहकता कचित् ॥ २ ॥
शाखीन्द्रानखिलान् हित्वा रामेणापि पुरा शमी ।
शाखीश्वरोऽर्चितो लङ्कापुरादिविजयार्थिना ॥ ३ ॥
गुणकोटियुतोप्यत्र न विभाति शमं विना ।
नरो राजकरस्थोपि यथेष्वासः शरं विना ॥ ४ ॥
शान्तिचिन्तामणिस्त्वक्तु यस्य हृद्यस्ति सर्वदा ।
स सर्वपुरुषार्थश्रीवरणीयो न किं भवेत् ॥ ५ ॥

स्वधर्मप्रशंसा ।

श्रीः ॥ पूर्णेन्दुकीर्तिकौमुद्याः सुखस्पर्शः सुधाम्बुधिः ।
ज्ञानोद्यानस्य सुरभिर्धर्म एव न चेतरः ॥ १ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधातृत्वादिपदमप्याप्यते निजधर्मतः ।
एवं चिन्तामणिं हित्वा धनायाटन्ति तान्नुमः ॥ २ ॥
सदाचारवतां पुंसां तपःसिद्धिः पदेपदे ।
यथा मानसहंसानां प्रफुल्ला हेमपद्मिनी ॥ ३ ॥
स्वधर्म एव कर्तव्यः प्राणान्तेऽपि नरैः सदा ।
पुमर्थानर्घ्यरत्नानां स एव यत आकरः ॥ ४ ॥
स्वकर्मनिरतं नित्यं स्तुवन्त्यपि दिवौकसः ।
तद्विहाय हितार्थ्यन्यत्को वा नरस्वरश्चरेत् ॥ ५ ॥

भक्तिप्रशंसा ।

श्रीः ॥ विमुक्तानां तु दूत्येका भक्तिरेव विराजते ।
सैवादौ दृढमाराध्या ततस्तद्गतिलालसैः ॥ १ ॥
भक्तिसौभाग्यभोगेन भगवानपि भृत्यताम् ।
प्रयाति का कथान्यार्थस्वार्थानां स्वहितार्थिनः ॥ २ ॥
अहो भक्त्या कङ्करोपि पुरान्तकसरूपताम् ।
पुरावाणेति सा कस्मान्न कार्यानन्दलिप्सुभिः ॥ ३ ॥
मूढभक्त्यवभासेन पशवोप्यापुरीश्वरम् ॥
तस्माद्विजायते सैव तरी संसारवारिधेः ॥ ४ ॥
रतिं दिशति या पुंसि जीवन्मुक्त्या सह स्फुटम् ।
प्रस्वेदप्रमुखैर्लिङ्गैस्तस्यै भक्त्यै नमोनमः ॥ ५ ॥

स्थानमाहात्म्यम् ।

श्रीः ॥ नक्रः[1] स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ॥
स एव प्रच्युतः स्थानाच्छुनाऽपि परिभूयते ॥ १ ॥
स्थानं प्रधानं न बलं प्रधानं स्थाने स्थितः कापुरुषोऽपि शूरः ।
जानामि नागेन्द्र तव प्रभावं कण्ठं विना गर्जसि शंकरस्य ॥२॥

---

१ मकरः 'मगर' इति कोशे ऽभ्यस्त ।

CC-0. In Public Domain. From Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किंचिदाश्रयसौन्दर्याद्धत्ते शोभामसाध्वपि ।
कान्ताविलोचने न्यस्तं मलीमसमिवाऽञ्जनम् ॥ ३ ॥
गुणैः [1]सर्वज्ञकल्पोऽपि सीदत्येको निराश्रयः
अनर्घ्यमपि माणिक्यं हेमाऽऽश्रयमपेक्षते ॥ ४ ॥
कुस्थानस्य प्रवेशेन गुणवानपि पीड्यते ।
वैश्वानरोऽपि लोहस्थ [2]कारुकैरभिहन्यते ॥ ५ ॥
आश्रयवशेन सततं गुरुता लघुता च जायते पुंसाम् ।
विन्[3]ध्ये विन्ध्यसमानाः करिणो बत दर्पणे लघवः ॥ ६ ॥
अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता भवन्ति योग्या अयोग्याश्च ॥ ७ ॥
आसीत्पूर्वं विमलजलधौ [4]मण्डनं भूपतीनां
नारीणां च प्रबलमुकुटे काञ्चनेन प्रसङ्गात् ।
तन्त्रीबद्धः कथमिदमहोकाच[5]खण्डेन [6]सार्धं
भिल्लीकण्ठे मरकतमणे कामवस्थां गतोऽसि ॥ ८ ॥
पात्रविशेषे न्यस्तं गुणान्तरं व्रजति [7]शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ [8]मुक्ताफलतां [9]पयोदस्य ॥ ९ ॥

जिव्हा ।

श्रीः ॥ हे जिह्वे [10]रससारज्ञे सर्वदा मधुरप्रिये ।
भगवन्नामपीयूषं पिब त्वमनिशं सखे ॥ १ ॥
[11]अङ्गेषु [12]मुख्या [13]द्विजमध्यसंस्था [14]वाणाऽनुसन्धानपराऽसि नित्यम् ।
[15]अन्धस्थिरप्रेमरसा रसज्ञे [16]नरस्तुतिं [17]तत्त्यजकर्णवत्त्वम् ॥ २ ॥

१ शिवतुल्यः २ लोहकारैः ३ विन्ध्यपर्वते । ४ भूषणम् । ५ काचमणिना ६ सह ७ कौशलम् ८ मौक्तिकत्वम् ९ मेघस्य । १० रसस्य सारं जानाति सा ११ शरीरावयवेषु पक्षे देशेषु १२ मुखे भवा मुख्या । १३ दन्ताः ब्राह्मणाश्च । १४ वाणं वर्णनं तदनुसन्धानपरा पक्षे बवयोः सावर्ण्यात् बाणानुसन्धानतत्परः १५ अन्धः अन्नं तस्मिन् स्थिरः प्रेमरसो यस्याः पक्षे अंधो धृतराष्ट्रस्तास्मिन् दृढः प्रेमरसो यस्य । १६ मनुजस्तुतिं पक्षे नरोऽर्जुनः; १७ अङ्गराजवत् । कर्णपक्षे अंगेषु मुख्य इत्यादिलिंगविपरिणामेन योजनीयम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसने[1] रचितोऽयमञ्जलिस्ते परनिन्दापरुषैरलं वचोभिः ।
नरकाऽपहरं नमः शिवायेत्यमुमादिप्रणवं[2] भजस्व मन्त्रम् ॥ ३ ॥
द्वात्रिंशद्दशन[3]द्वेषिमध्ये भ्रमसि नित्यशः ।
तदिदं शिक्षिता केन जिव्हे संचारकौशलम् ॥ ४ ॥

मनः ।

श्रीः ॥ रे रे मनो मम मनोभवशासनस्य[4]
पादाम्बुजद्वयमनारत[5]मानवत्वम् ।
किं मां निपातयसि संसृतिकूपमध्ये[6]
तेनैव किं तव गमिष्यति पुत्रशोकः ॥ १ ॥
रे चित्त चिन्तय चिरं चरणौ मुरारेः
पारं गमिष्यति भवान् भवसागरस्य ।
पुत्रः कलत्रमितरे सुहृदः सहायाः
सर्वं विलोकय सखे मृगतृष्णिकेव[7] ॥ २ ॥
नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः
तत्तु तत्रैवाऽरमत हताः[8] पाणिनिना वयम् ॥ ३ ॥
कृष्ण त्वदीयपदपङ्कजपञ्जरान्ते
अद्यैव मे विशतु मानसराजहंसः ॥
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ४ ॥
मनसैव कृतं पापं न शरीरकृतं कृतम् ।
येनैवाऽऽलिङ्गिता कान्ता तेनैवाऽऽलिङ्गिता सुता ॥ ५ ॥
मनोऽसि सान्तं[9] भज तद्यनन्तं[10] क्षयाऽर्दितं चंद्रमसं[11] जहीहि ।
सोऽपि[12] हि स्वयं सान्त इति प्रशस्तं धत्ते सदाऽनन्तपदाऽवलम्बम् ॥ ६ ॥

---

१ जिव्हे । २ आदौ प्रणवः ओंकारो यस्य एतादृशं मन्त्रम् ३ दन्ताः ४ मनोभवो मदनस्तच्छासनस्य शिवस्य ५ सततम् ६ संसार एव कूपस्तन्मध्ये ७ मरुमरीचिका ८ वञ्चिताः ९ सकारान्तम् पक्षे अन्तसहितं नश्वरमित्यर्थः १० न विद्यते अन्तो यस्य तं विष्णुम् ११ चन्द्रो हि सान्तः मनसो देवता १२ सोपि चन्द्रोपि स्वयं सान्तः सकारान्तः पक्षे नश्वरः अतोऽनन्तपदावलम्बम् आकाशपदाश्रयं पक्षे विष्णुपदाश्रयं धत्ते ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतस्ततश्चङ्क्रमणो रजोभिः क्रीडन्मनोमत्तमतङ्गजोऽयम् ।
यः सर्वदा पिप्पलभोगतुष्टस्तच्छान्तये त्वं हरिमाश्रयस्व॥७॥

भिक्षाऽशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम् ।
वस्त्रं सुजीर्णशतखण्डमयी च कन्था
हाहा तथाऽपि विषयान्न जहाति चेतः ॥ ८ ॥

परिभ्रमसि किं वृथा क्वचन चित्त विश्राम्यतां
स्वयं भवति यद्यथा भवति तत्तथा नान्यथा ।
अतीतमपि न स्मरन्नपि च भावि संकल्पय-
न्नतर्कितगमाऽऽगमाननुभवस्व भोगानिह ॥ ९ ॥

अग्रे गीतं सरसकवयः पार्श्वयोर्दाक्षिणात्याः
पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ।
यद्यस्त्येवं कुरु भवरसाऽऽस्वादने लम्पटत्वं
नोचेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ १० ॥

एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय
श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ।
स्वात्मीभावमुपैहि संत्यज निजां कल्लोललोलां गतिं
मा भूयो भज भंगुरां नवरतिं चेतः प्रसीदाऽधुना ॥ ११ ॥

पतितः पशुरपि कूपे निःसर्तुं चरणचालनं कुरुते ॥
धिक् त्वां चित्त भवाब्धेरिच्छामपि नो बिभर्षि निःसर्तुम्॥१२॥

चित्तं ।

हसति कदाचिद्रौति भ्रान्तं सदशदिशः परिभ्रमति ।
हृष्टं कदापि दुष्टं शिष्टं दुष्टं च निन्दति स्तौति ॥ १ ॥
कमपि द्वेष्टि सरोषं ह्याऽऽत्मानं श्लाघते कदाचिदपि ॥
चित्तं पिशाचमभवद्राक्षस्या तृष्णया व्याप्तम् ॥ २ ॥

---

१ तुच्छः २ गतम् ३ अचिन्त्यगमनागमनान् ४ विषयान् ५ लुब्धत्वम् ६ कल्याणपद्धतिम् । ७ स्वसंवेद्यत्वम् । ८ कल्लोलवच्चञ्चलाम् । ९ नश्वराम् १० स्वाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दम्भाभिमानलोभैः कामक्रोधोरुमत्सरैश्चेतः ।
आकृष्यते समन्ततः श्वभिरिव पतिता तनुर्मार्गे ॥ ३ ॥
तस्माच्छुद्धविरागो मनोभिलषितं त्यजेदर्थम् ।
तदनभिलषितं कुर्यान्निर्व्यापारं तदा भवति ॥ ४ ॥
प्रतिपलमखिलाँल्लोकान् मृत्युमुखं प्रविशतो निरीक्ष्यापि ।
हा हतकं चित्तमिदं विरमति नाद्यापि विषयेभ्यः ॥ ५ ॥

भोगाद्यस्थिरत्वम् ।

श्रीः ॥ भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
माने दैन्यभयं बले रिपुभयं रूपे तरुण्या भयम् ।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयाऽन्वितं भुवि नृणां वैराग्यमेवाऽभयम् ॥ १ ॥
आक्रान्तं मरणेन जन्म जरया यात्युल्बणं यौवनं
संतोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनै-
रस्थैर्येण विपत्तयोऽप्युपहता ग्रस्तं न किं केन वा ॥ २ ॥
आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव प्रापदः ।
जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसा-
त्तत्किं केन निरंकुशेन विधिना यन्निर्मितं सुस्थिरम् ॥ ३ ॥
भोगास्तुंगतरंगभंगचपलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं स्फूर्तिः क्रियासु स्थिता ।
तत्संसारमसारमेव निखिलं बुद्ध्वा बुधा बोधका
लोकाऽनुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ ४ ॥

---

१ उच्छ्रितम् २ शान्तिसुखम् ३ विलासैः ४ प्रकृष्टा आपदो विपत्तयः ५ पराधीनम् ६ कालः ७ आत्माधीनम् ८ स्वतन्त्रेण ९ तुंगाः उच्चा ये तरंगा ऊर्मयस्तेषां भंगस्तद्वच्चपलाः १० अल्पानि । ११ मृदुलेन.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताऽभ्रपटलीलीनाम्बुवद्भंगुरम् ।
लोला यौवनलालसास्तनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥ ५ ॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्री-
रर्थाः सं[1]कल्पकल्पा घनस[2]मयतडिद्विभ्रमा भोगपूराः ।
कण्ठाऽऽश्लेषोपगूढं तदपि च न चिरं यत्प्रिया[3]भिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाऽम्भोधिपारं तरीतुम् ६

कृच्छ्रेणाऽमेध्यमध्ये निपतिततनुभिः स्थीयते गर्भवासे
कान्ताविश्लेषदुःखव्यतिकरसमये यौवने चोपभोगः ।
वामाक्षीणामवज्ञा[4]विहसितवसतिर्वृद्धभावोऽप्यसाधुः ।
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ७

भोगा [5]भंगुरवृत्तयो बहुविधास्तैरेव चा[6]ऽयं भव-
स्तत्कस्येह कृते परिभ्रमत हे लोकाः कृ[7]तं चेष्टितैः ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
कामोत्पत्तिवशे स्वधामनि यदि श्र[8]द्धेयमस्मद्वचः ॥ ८ ॥

पश्चात्तापः ।

श्रीः ॥ विद्या नाऽधिगं[9]ता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषाऽपि सं[10]माहितेन मनसा पि[11]त्रोर्न संपादिता ।
आलोलायतलोचना युवतयः स्वप्नेऽपि नाऽऽलिंगिताः
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेरितः ॥ १ ॥

---

१ संकल्पतुल्याः । २ वर्षाकालविद्युद्विलासाः अतिचञ्चला इत्यर्थः । ३ कान्ताभिः । ४ अवमानः । ५ भङ्गशीलाः । ६ संसारः । ७ चेष्टितैर्व्यापारैः कृतं अलं पर्याप्तमिति यावत् व्यापारं मा कुरुतेत्यर्थः । ८ विश्वसनीयम् । ९ संपादिता । १० स्वस्थेन । ११ माता च पिता च पितरौ तयोः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मज्ञान[1]विवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं[2]
यन्मुञ्चन्त्युपभोगवन्ति च धनान्येका[3]न्ततो निःस्पृहाः[4] ।
न प्राप्तानि पुरा न संप्रति न च प्राप्तो दृढप्रत्ययो[5] ।
वा[6]ञ्छामात्रपरिग्रहाण्यपि परित्यक्तुं न शक्ता वयम् ॥२॥

अर्थाः पादरजःसमा गिरिनदीवेगोपमं यौवनं
आयुष्यं जलबिन्दुलोलचपलं फेनोपमं जीवितम् ।
धर्मं यो न करोति निश्चलमतिः स्वर्गाऽर्गलो[7]द्घाटनं
पश्चात्तापयुतो जरापरिगतः[8] शोकाऽग्निना दह्यते ॥ ३ ॥

धनवानिति हि मदो मे किं गतविभवो विषादमुपयामि ।
करनिहतकन्दुकसमाः पातोत्पाता मनुष्याणाम् ॥ ४ ॥

नाऽभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भपीठदलनैर्नाकं[10] न नीतं यशः ।
कान्ताकोमलपल्लवाऽधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निष्फलमहो शून्याऽऽलये दीपवत् ॥५॥

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये[11]
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
नारीपीनपयोधरोरुयुगलं स्वप्नेऽपि नाऽऽलिंगितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा[12] वयम् ॥ ६ ॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरंगचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥७॥

---

१ ब्रह्मज्ञानविचारेण शुद्धान्तःकरणाः । २ दुःखेन कर्तुं शक्यम् । ३ स्वभावतः नैरन्तर्येणेति वा । ४ निरिच्छाः । ५ विश्वासः । ६ केवलं इच्छया गृहीतानि । ७ 'अडसर' इति लोके । ८ जरया वार्धक्येन परिभूतः । ९ खेदम् । १० स्वर्गम् । ११ छेदनाय । १२ परश्वधाः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरंगैर्नट इव [1]वलीमण्डिततनु-
र्नरः संसाराऽन्ते विशति यम[2]धानीं [3]जवनिकाम् ॥ १० ॥

चिरं ध्याता रामा[4] क्षणमपि न राम[5]प्रतिकृतिः
परं पीतो रामाऽधर इह न रामा[6]ऽङ्घ्रिसलिलम् ।
नता रुष्टा रामा यदरचि न रामाय विन[7]ति-
र्गतं मे साम्राज्यं[8] न दश[9]रथजन्मा परिगतः ॥ ११ ॥

जन्मेदं [10]व्यर्थतां नीतं भवभोगोपलिप्सया ।
[11]काचमूल्येन विक्रीतो हन्त[12] चिन्ता[13]मणिर्मया ॥ १२ ॥

गृहस्थाश्रमः ।

श्रीः ॥ सानन्दं सदनं[14] सुताश्च सुधियः कान्ता न दुर्भाषिणी
सन्मित्रं सधनं स्वयोषिति रतिश्चाऽऽज्ञापराः सेवकाः ।
आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोः संगमुपासते हि सततं धन्यो गृहस्थाश्रमः ॥ १ ॥

मानुष्यं वर[15]वंशजन्म विभवो[16] दीर्घायुरारोग्यता
सन्मित्रं सुसुतः सती प्रियतमा भक्तिश्च नारायणे ।
विद्वत्त्वं सुजनत्वमिन्द्रियजयः सत्पात्रदाने रति-
स्ते पुण्येन विना त्रयोदशगुणाः संसारिणां दुर्लभाः ॥ २ ॥

क्रोशन्तः शिशवः सवारि[17] सदनं पङ्काऽऽवृतं चांऽगणं
शय्या दंशवती[18] च रूक्ष[19]मशनं धूमेन पूर्णं गृहम् ।

१ वलीभिर्मण्डिता तनुर्यस्य । २ कृतान्तनगरीम् । ३ 'पडदा' इति लो० । ४ स्त्री. ५ राममूर्तिः । ६ रामपादोदकम् । ७ नमस्कारः । ८ सार्वभौमत्वम् । ९ दशरथाज्जन्म यस्य सः रामः । १० निष्फलत्वम् । ११ काचमणेर्मूल्येन । १२ हन्त इति खेदे । १३ रत्नविशेषः स हि चिन्तितमर्थम् ददाति इति प्रसिद्धिः । १४ गृहम् । १५ उत्तमकुले उत्पत्तिः । १६ ऐश्वर्यम् । १७ उदकपूर्णम् । १८ मशकपूर्णा । १९ अस्निग्धम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भार्या निष्ठुरभाषिणी[1] प्रभुरपि क्रोधेन पूर्णः सदा
स्नानं शीतलवारिणा हि सततं धिग्धिग्गृहस्थाश्रमम्॥ ३॥
न्याया[2]ऽर्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
शास्त्रवित्सत्यवादी च गृहस्थोऽपि विमुच्यते[3] ॥ ४ ॥

सविप्र[4]पादोदककर्दमानि सवेदशास्त्रध्वनिगर्जितानि ।
स्वाहास्वधाकारनिरन्तराणि स्वानन्दतुल्यानि गृहाणि तानि ५
न विप्रपादोदकपङ्किलानि न वेदशास्त्रध्वनिगर्जितानि ।
स्वाहास्वधाकारविवर्जितानि श्मशानतुल्यानि गृहाणि तानि ६

यदि रामा[5] यदि च रंभा[6] यदि तनयो विनयगुणोपेतः ।
तनये तनयोत्पत्तिः सुरवरनगरे किमाधिक्यम् ॥ ७ ॥

वंशो विश्वा[7]ऽवतंसो जनुरनुपहतं स्वान्त[8]मौन्नत्यकान्तं
लीला शीलानुकूला क्षपितकलिमला काऽपि विद्यानवद्या[9]।
वाणी[10] वैणीगुणानां समधिकयशसां साधिका[11] साधिका श्रीः
श्रीमद्गौरी[12]मयूरीसुदिर पुरहर[13] त्वत्कृपाया विपाकः[14] ॥ ८ ॥

तावद्विद्याऽनवद्या गुणगणमहिमा रूपसंपत्तिशौर्यं
स्वस्थाने सर्वशोभा परगुणकथने वाक्पटुस्तावदेव ।
यावत्पाकाकुलाभिः स्वगृहयुवतिभिः प्रेषिताऽपत्यवक्त्रात्
हे बाबा[15] नास्ति तैलं नच लवणमपीत्यादि वाचां प्रचारः॥९॥

जरा ।

श्रीः ॥ कृतान्तस्य दूती जरा कर्णमूलं
समागत्य वक्तीति लोकाः शृणुध्वम् ।

---

१ कठोरभाषिणी । २ न्यायेन संपादितं धनं येन । ३ मुक्तो भवति । ४ ब्राह्मणचरणक्षालनोदकेन पंकिलानि । ५ स्त्री । ६ लक्ष्मीः । ७ विश्वभूषणम् । ८ मनः । ९ निर्दोषा । १० प्रवादः । ११ साधयित्री । १२ गौर्येव मयूरी तस्याः सुदिरो मेघः । १३ हे त्रिपुरनाशक । १४ परिणामः फलमित्यर्थः । १५ 'हेबाबा' इवं तु पितुर्लौकिकं संबोधनम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परस्त्रीपरद्रव्यवाञ्छां त्यजध्वं
भजध्वं रमानाथपादाऽरविन्दम् ॥ १ ॥

कृष्णवर्त्मनि[1] गुणान् गणयन्ती जीवने[2]ऽपि जनयत्यनुरागम् ॥
आगता बत जरेव हिमानी[3] सेव्यतां सुरतरंगवतीयम्[4] ॥ २ ॥

शशिनीव हिमार्तानां घर्मार्तानां यथा रवौ ।
मनो न रमते स्त्रीणां जरापीतेन्द्रिये[5] पतौ ॥ ३ ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती[6]
रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाऽम्भो
लोकस्तथाऽप्यहितमाचरतीति चित्रम् ॥ ४ ॥

गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दन्तावलि-
र्दृष्टिर्नश्यति वर्धते बधिरता वक्त्रं च लालायते ।
वाक्यं नाद्रियते च बान्धवजनैर्भार्या न शुश्रूषते
हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोऽप्यमित्रायते[7] ॥ ५ ॥

वर्णं सितं वीक्ष्य शिरोरुहाणां[8]
स्थानं जरा परिभवस्य यदेव पुंसाम् ।
आरोपिताऽस्थिशकलं[9] परिहृत्य[10] यान्ति
चाण्डालकूपमिव दूरतरं तरुण्यः ॥ ६ ॥

मलिनैरलकैरेतैः[11] शुक्लत्वं प्रकटीकृतम् ।
तद्रोषादिव निर्याता वदनाद्दन्तावलिः[12] ॥ ७ ॥

---

१ अग्नौ पक्षे कृष्णस्य वर्त्म मार्गस्तस्मिन् । २ उदके प्राणे च । ३ हिमसंहतिः ४ सुरते रंगवती. प० सुराणां तरंगवती भागीरथी । ५ जरया पीतानि ग्रस्तानि इंद्रियाणि यस्य तस्मिन् । ६ कम्पयन्ती । ७ शत्रुवदाचरति । ८ केशानाम् । ९ आरोपितं ध्मस्थ्नः शकलखण्डं यस्मिन् । १० अस्पृश्यत्वादिति भावः । ११ केशैः । १२ दन्तपंक्तिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यममिव करधृतदण्डं हरिमिव सगदं[1] शशांकमिव वक्रम् ।
शिवमिव च विरूपाक्षं[2] जरा करोत्यकृतपुण्यमपि ॥ ८ ॥

श्रुतिः[3] शिथिलतां गता स्मृतिरपि[4] प्रनष्टाऽधुना
गतिर्विपथमागता विगलिता द्विजानां[5] ततिः ।
गवामपि[6] च संहतिः समुचितक्रियातश्च्युता
कृतानुजरया तया कलियुगस्य साधर्म्यता[7] ॥ ९ ॥

वदनं दशनविहीनं[8] वाचो न परिस्फुटा गता शक्तिः ।
अव्यक्तेन्द्रियशक्तिः पुनरपि बाल्यं कृतं जरया ॥ १० ॥

पटुरटति पलितदूतो[9] मस्तकमासाद्य सर्वलोकस्य ।
परिभवति जरामरणं कुरु धर्मं विरम पापेभ्यः ॥ ११ ॥

वृद्धत्वा[10]ऽनलदग्धस्य सारं यौवनवस्तुनः ।
दृश्यते देहगेहेषु भस्मैव पलितच्छलात्[11] ॥ १२ ॥

वीक्ष्यते पलितश्रेणि[12]र्नैव वृद्धस्य मूर्धनि ।
मृषैव[13] जातं जन्मेति किंतु भस्म वि[14]धिर्न्यधात्[15] ॥ १३ ॥

इयत्यामपि सामग्र्यां सुकृतं[16] न कृतं त्वया ।
इतीव कुपितो दन्तानन्तकः[17] पातयत्यलम् ॥ १४ ॥

पादौ संस्तम्भयन्ती[18] मुखमपि नमयन्त्यङ्गमाकुञ्चयन्ती
हस्तावुत्कम्पयन्ती प्रणयिजनवचो न श्रुतीः श्रावयन्ती ।
रत्यामुद्वेजयन्ती[19] वलिततनुमती[20] नूतनोढा[21] जरा वा
तुल्या पूर्वा[22] तु पुंस[23]स्त्रसति[24] बत परा[25] भीतिहेतुर्नरस्य[26] ॥ १५ ॥

---

१ गदया सहित पक्षे गदेन रोगेण सह तम् । २ विकृताक्षम् । ३ कर्णेन्द्रियं वेदश्च । ४ स्मरणं मन्वादिवाक्यं च । ५ दन्तानां ब्राह्मणानां च । ६ इन्द्रियाणां धेनूनां च । ७ समानधर्मत्वम् । ८ दन्तरहितम् । ९ पलितमेव दूतः । १० वार्द्धक्यं तदेवानलस्तेन दग्धस्य । ११ पलितमिषेण । १२ पलितपंक्तिः । १३ व्यर्थमेव । १४ ब्रह्मा । १५ निक्षिप्तवान् । १६ पुण्यम् । १७ यमः । १८ पादयोः स्तंभनं कुर्वती । १९ उद्वेगं कुर्वती । २० वलयः सजाता यस्याः सा वलिता सा चासौ तनुश्च तद्वती पक्षे वलितं बलनं तद्युक्तास्तद्वती । २१ नवीन विवाहिता स्त्री । २२ नूतनोढा । २३ पुरुषात् । २४ उद्वेगं [illegible]ति । २५ जरा । २६ भयकारणम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतमन्युं[1] दण्डधरं[2] कुबेरमपि[3] शूलिनं[4] तथा गदिनम्[5] ।
कुरुते जरा न सा किं कुर्यान्नीरूपनामकं मनुजम् ॥१६॥

स्थूलप्रावरणोऽतिवृत्तकथकः[6] कासाश्रुलालाऽऽविलो
भग्नोरःकटिपृष्ठजानुजघनो मुग्धोऽतिथीन्वारयन् ।
शृण्वन् धृष्टवधूवचांसि[7] धनुषा संत्रासयन्वायसा-
नाशापाशनिवद्धजीवविभवो वृद्धो गृहे ग्लायति[8] ॥१७॥

मृत्योः सेनां किमेनां न कलयसि जरां वायुवाहाधिरूढां
प्रौढान्रोगान्समग्रान्नगरमपि नवद्वारमार्गप्रविष्टान् ।
दन्तान्यातान्दिगन्तान्नयनयुगलमप्यद्रवच्चेतसा ते
सुप्तोऽस्यद्यापि जीव स्मरसि न चरणौ त्वं कुतो राघवस्य १८

संसारः ।

संसार तव निस्सारपदवी[9] न दवीयसी[10] ।
अन्तरा[11] दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ १ ॥

दुःखाङ्गारकतीव्रः संसारोऽयं महानसो[12] गहनः ।
इह विषयाऽमृतलालसमानस मार्जार मा निपत ॥ २ ॥

असारे खलु संसारे सारं श्वशुरमन्दिरम् ।
हरो हिमालये शेते हरिः शेते महोदधौ ॥ ३ ॥

असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां संगो गङ्गाऽम्भः शंभुसेवनम् ॥४॥

क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः
क्वचिद्वीणावादः क्वचिदपि च हाहेति रुदितम् ।

---

१ इन्द्रं कोपनं च । २ यमं यष्टिधरं च । ३ धनाधिपं कुत्सितशरीरं च । ४ शिवं शूलयुक्तं च । ५ विष्णुं गदयुक्तं च । ६ अतिक्रान्तानि वृत्तानि कथयतीति । ७ धाष्टर्ययुक्तस्त्रीवचनानि । ८ खेदं प्राप्नोति । ९ मार्गः । १० अतिदूरा । ११ मध्ये । १२ पाकगृहम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचिद्रम्या रामा क्वचिदपि जराजर्जरतनु-
र्न जाने संसारः किममृतमयः किं विषमयः ॥ ५ ॥
कृच्छ्रेणाऽमे[1]ध्यमध्ये निय[2]मिततनुभिः स्थीयते गर्भ[3]गर्ते
कान्ताविश्लेषदुःखव्यतिकरविषमे यौवने विप्रयोगः ।
नारीणामप्यव[4]ज्ञा विलसति नियतं वृद्धभावेऽप्यसाधुः
संसारे रे मनुष्या वदत यदि सुखं स्तो[5]कमप्यस्ति किंचित् ६

भवजयोपायः ।

श्रीः ॥ शु[6]चिसांनिध्ययोगेन हृदि रा[7]मोपगूहनात् ।
क[8]र्मसाक्षिसमालोकाद्भ[9]वं हेमन्तवज्जयेत् ॥ १ ॥
प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं यु[10]वतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभ[11]ङ्गो गुरुषु च विनयः सर्वभूताऽनु[12]कम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ २॥
[13]इतरभजनघनरसतः [14]फलनिष्पत्तिर्न वा भवेदिति न ।
[15]मुक्ताः परं तु लोके [16]स्वातिघनरसं विना न जायेरन् ॥ ३ ॥

कालः ।

श्रीः ॥ व्योमै[17]कान्तविहारिणोऽपि विहगाः[18] संप्राप्नुवन्त्याप[19]दं
बध्यन्ते निपु[20]णैरगाधसलिलान्मत्स्याः समुद्रादपि ॥

---

१ अशुचि मलादि तन्मध्ये २ जरायुणा बद्धशरीरैः ३ गर्भाशये ४ अवमानः । ५ अल्पम् । ६ अग्निसन्निधानेन पक्षे शुचिः पवित्रो गुर्वादिस्तत्समागमेन ७ रामायाः स्त्रियाः उपगूहनादालिंगनात् पक्षे रामस्य हृदि ध्यानात् । ८ सूर्याऽवलोकनात् पक्षे परमात्मनोऽपारोक्ष्यात् ९ संसारम् । १० स्त्रीजनवार्ता ११ तृष्णाप्रवाहोपरोधः । १२ दया १३ इतरेषां भजने यो घनरसस्तेन पक्षे इतरे ये भजना नक्षत्राणि तेभ्यो या घनरसः उदकं तस्मात् १४ फलोत्पत्तिः पक्षे फलानां सस्यादीनामुत्पत्तिः १५ जीवन्मुक्ताः प० मौक्तिकानि १६ स्वस्य अतिघनरसः अत्यन्तं प्रेमरसस्तं विना पक्षे स्वातिनक्षत्रोदकं विना १७ केवलमाकाशसंचारिणः १८ पक्षिणः १९ विपत्तिम् २० कुशलैः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्नीतं किमिहाऽस्ति किं सुचरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ १ ॥

सा रम्या नगरी महान् स नृपतिः सामन्तचक्रं[1] च त-
त्पार्श्वे तस्य च सा विदग्धपरिषत्[2] ताश्चन्द्रबिम्बाऽऽननाः ।
उन्मत्तः स च राजपुत्रनिवहस्ते बन्दिनस्[3] ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥ २ ॥

यत्राऽनेके क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राऽप्यैकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।
इत्थं चेमौ रजनिदिवसौ दोलयन् द्वाविवा[4]ऽक्षौ
कालः काल्या भुवनफलके[5] क्रीडति प्राणिसारैः[6] ॥ ३ ॥

अशनं[7] मे वसनं[8] मे जाया मे बन्धुवर्गो मे ।
इति मेमेकुर्वाणं कालवृको[9] हन्ति पुरुषाऽजम्[10] ॥ ४ ॥

ब्रह्मा विष्णुदिने याति विष्णू रुद्रस्य वासरे ।
ईश्वरस्य तथा सोऽपि कः कालं लङ्घितुं क्षमः ॥ ५ ॥

अप्सु प्लवन्ते[11] पाषाणा मानुषा घ्नन्ति राक्षसान् ।
कपयः कर्म कुर्वन्ति कालस्य कुटिला[12] गतिः ॥ ६ ॥

क्षमा ।

श्रीः ॥ क्षमा[13]शस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वन्हिः स्वयमेवोपशाम्यति ॥ १ ॥

आजन्मसिद्धं कौटिल्यं खलस्य च हलस्य[14] च ।
सोढुं तयोर्मुखाऽऽक्षेपमलमेकैव सा क्षमा[15] ॥ २ ॥

१ माण्डलिकराजमण्डलम् २ चतुरसभा ३ स्तुतिपाठकाः ४ पाशौ ५ भुवनमेव फलकः शारीपटस्तस्मिन् ६ प्राणिन एव साराः 'सोंगट्या' इति लो० । ७ भोजनम् ८ वस्त्रम् ९ काल एव वृकः 'लांडगा' इति लो० । १० पुरुष एव अजः (बोकड) तम् ११ तरन्ति १२ वक्रा १३ शान्तिः १४ नांगर इति लोके १५ पृथ्वी शान्तिश्च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नरस्याऽऽभरणं रूपं रूपस्याऽऽभरणं गुणः ।
गुणस्याऽऽभरणं ज्ञानं ज्ञानस्याऽऽभरणं क्षमा ॥ ३ ॥

क्षमाबलमशक्तानां शक्तानां भूषणं क्षमा ।
क्षमा वशीकृतिर्लोके क्षमया किं न सिध्यति ॥ ४ ॥

क्रोधनिन्दा ।

श्रीः ॥ क्रोधान्धकूपपतिताः खादन्ति स्ववपूंष्यपि ।
हन्तातस्तं कथं त्यक्तुं विलम्बः क्रियतां बुधैः ॥ १ ॥

दुर्वासःप्रभृतीनां च ब्रह्मतत्त्वविदामपि ।
क्रोधस्यैव प्रसादेन नानाविपदभूत्खलु ॥ २ ॥

शरन्मध्यान्हकालेपि क्रोधान्धः स्वतनूमपि ।
यन्न जानाति तत्रान्यज्ञानवार्तैव का भवेत् ॥ ३ ॥

ाक कुम्भीपाक एवायं कोपरूपेण देहिनाम् ।
त्रैलोक्येपि विपत्यर्थमवतीर्णो भवार्णवे ॥ ४ ॥

क्रोधमुग्धधियां नैव सुखं कालत्रयेपि च ।
दृष्टं कदाप्युलूकानां क्रीडनं फुल्लपङ्कजे ॥ ५ ॥

क्षुधा ।

श्रीः ॥ आदौ रूपविनाशिनी कृशकरी कामांऽकुरच्छेदिनी
पुत्राऽमित्र[1]कलत्र[2]भेदनकरी गर्वांकुरच्छेदिनी ।
कामं मन्दकरी तपःक्षयकरी धर्मस्य निर्मूलनी ।
सा मां संप्रति सर्वरोगजननी प्राणापहन्त्री क्षुधा ॥ १ ॥

शय्या वस्त्रं चन्दनं चारु[3] हास्यं वीणा वाणी दृश्यते या च नारी।
न भ्राजन्ते क्षुत्पिपासातुराणां सर्वाऽऽरम्भास्तण्डुलाः प्रस्थमूलाः २

नाऽस्ति क्षुधासमं दुःखं नाऽस्ति रोगः क्षुधासमः ।
नाऽस्त्याहारसमं सौख्यं नाऽस्ति क्रोधसमो रिपुः ॥ ३ ॥

---

१ शत्रुः २ कुटुम्बम् ३ सुन्दरम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतमन्युं[1] दण्डधरं[2] कुबेरमपि[3] शूलिनं[4] तथा गदिनम्[5] ।
कुरुते जरा न सा किं कुर्यान्नीरूपनामकं मनुजम् ॥१६॥

स्थूलप्रावरणोऽतिवृत्तकथकः[6] कासाश्रुलालाऽऽविलो
भग्नोरःकटिपृष्ठजानुजघनो मुग्धोऽतिथीन्वारयन् ।
शृण्वन् धृष्टवधूवचांसि[7] धनुषा संत्रासयन्वायसा-
नाशापाशनिबद्धजीवविभवो वृद्धो गृहे ग्लायति[8] ॥१७॥

मृत्योः सेनां किमेनां न कलयसि जरां वायुवाहाधिरूढां
प्रौढान्रोगान्समग्रान्नगरमपि नवद्वारमार्गप्रविष्टान् ।
दन्तान्यातान्दिगन्तान्नयनयुगलमप्यद्रवच्चेतसा ते
सुप्तोस्यद्यापि जीव स्मरसि न चरणौ त्वं कुतो राघवस्य १८

संसारः ।

संसार तव निस्सारपदवी[9] न दवीयसी[10] ।
अन्तरा[11] दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ १ ॥

दुःखाङ्गारकतीव्रः संसारोऽयं महानसो[12] गहनः ।
इह विषयाऽमृतलालसमानस मार्जार मा निपत ॥ २ ॥

असारे खलु संसारे सारं श्वशुरमन्दिरम् ।
हरो हिमालये शेते हरिः शेते महोदधौ ॥ ३ ॥

असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां संगो गङ्गाऽम्भः शंभुसेवनम् ॥४॥

क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः
क्वचिद्वीणावादः क्वचिदपि च हाहेति रुदितम् ।

---

१ इन्द्रं कोपनं च । २ यमं यष्टिधरं च । ३ धनाधिपं कुत्सितशरीरं च । ४ शिवं शूलयुक्तं च । ५ विष्णुं गदयुक्तं च । ६ अतिक्रान्तानि वृत्तानि कथयतीति । ७ धाष्टर्ययुक्तस्त्रीवचनानि । ८ खेदं प्राप्नोति । ९ मार्गः । १० अतिदूरा । ११ मध्ये । १२ पाकगृहम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचिद्रम्या रामा क्वचिदपि जराजर्जरतनु-
र्न जाने संसारः किममृतमयः किं विषमयः ॥ ९ ॥

कृच्छ्रेणाऽमे[1]ध्यमध्ये निय[2]मिततनुभिः स्थीयते गर्भगर्ते[3]
कान्ताविश्लेषदुःखव्यतिकरविषमे यौवने विप्रयोगः ।
नारीणामप्यव[4]ज्ञा विलसति नियतं वृद्धभावेऽप्यसाधुः
संसारे रे मनुष्या वदत यदि सुखं स्तोक[5]मप्यस्ति किंचित् ६

भवजयोपायः ।

श्रीः ॥ शु[6]चिसांनिध्ययोगेन हृदि रा[7]मोपगूहनात् ।
क[8]र्मसाक्षिसमालोकाद्ध्रु[9]वं हेमन्तवज्जयेत् ॥ १ ॥

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं यु[10]वतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभ[11]ङ्गो गुरुषु च विनयः सर्वभूताऽनु[12]कम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ २॥

इ[13]तरभजनघनरसतः फ[14]लनिष्पत्तिर्न वा भवेदिति न ।
मु[15]क्ताः परं तु लोके स्वा[16]तिघनरसं विना न जायेरन् ॥ ३ ॥

कालः ।

श्रीः ॥ व्योमैका[17]न्तविहारिणोऽपि विहगाः[18] संप्राप्नुवन्त्याप[19]दं
बध्यन्ते निपु[20]णैरगाधसलिलान्मत्स्याः समुद्रादपि ॥

---

१ अशुचि मलादि तन्मध्ये २ जरायुणा बद्धशरीरैः ३ गर्भाशये ४ अवमानः । ५ अल्पम् । ६ अग्निसन्निधानेन पक्षे शुचिः पवित्रो गुर्वादिस्तत्समागमेन ७ रामायाः स्त्रियाः उपगूहनादालिंगनात् पक्षे रामस्य हृदि ध्यानात् । ८ सूर्याऽवलोकनात् पक्षे परमात्मनोऽपारोक्ष्यात् ९ संसारम् । १० स्त्रीजनवार्ता ११ तृष्णाप्रवाहोपरोधः । १२ दया १३ इतरेषां भजने यो घनरसस्तेन पक्षे इतरे ये भजना नक्षत्राणि तेभ्यो या घनरसः उदकं तस्मात् १४ फलोत्पत्तिः पक्षे फलानां सस्यादीनामुत्पत्तिः १५ जीवन्मुक्ताः प० मौक्तिकानि १६ स्वस्य अतिघनरसः अत्यन्तं प्रेमरसस्तं विना पक्षे स्वातिनक्षत्रोदकं विना १७ केवलमाकाशसंचारिणः १८ पाक्षिणः १९ विपत्तिम् २० कुशलैः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्नीतं किमिहाऽस्ति किं सुचरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ १ ॥

सा रम्या नगरी महान् स नृपतिः सामन्तचक्रं[1] च त-
त्पार्श्वे तस्य च सा विदग्धपरिषत्ता[2]श्चन्द्रबिम्बाऽऽननाः ।
उन्मत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ता[3]ः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥ २ ॥

यत्राऽनेके क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राऽप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।
इत्थं चेमौ रजनिदिवसौ दोलयन् द्वाविवाऽक्षौ[4]
कालः काल्या भुवनफलके[5] क्रीडति प्राणिसारैः[6] ॥ ३ ॥

अशनं[7] मे वसनं[8] मे जाया मे बन्धुवर्गो मे ।
इति मेमेकुर्वाणं कालवृको[9] हन्ति पुरुषाऽजम्[10] ॥ ४ ॥

ब्रह्मा विष्णुदिने याति विष्णू रुद्रस्य वासरे ।
ईश्वरस्य तथा सोऽपि कः कालं लङ्घितुं क्षमः ॥ ५ ॥

अप्सु प्लवन्ते[11] पाषाणा मानुषा घ्नन्ति राक्षसान् ।
कपयः कर्म कुर्वन्ति कालस्य कुटिला[12] गतिः ॥ ६ ॥

क्षमा ।

श्रीः ॥ क्षमा[13]शस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वन्हिः स्वयमेवोपशाम्यति ॥ १ ॥

आजन्मसिद्धं कौटिल्यं खलस्य च हलस्य[14] च ।
सोढुं तयोर्मुखाऽक्षेपमलमेकैव सा क्षमा[15] ॥ २ ॥

---

१ माण्डलिकराजमण्डलम् २ चतुरसभा ३ स्तुतिपाठकाः ४ पाशौ ५ भुवनमेव फलकः शारीपटस्तस्मिन् ६ प्राणिन एव साराः 'सोंगट्या' इति लो० । ७ भोजनम् ८ वस्त्रम् ९ काल एव वृकः 'लांडगा' इति लो० । १० पुरुष एव अजः (बोकड) तम् ११ तरन्ति १२ वक्रा १३ शान्तिः १४ 'नागर' इति कर्णा० १५ पृथ्वी शान्तिश्च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नरस्याऽऽभरणं रूपं रूपस्याऽऽभरणं गुणः ।
गुणस्याऽऽभरणं ज्ञानं ज्ञानस्याऽऽभरणं क्षमा ॥ ३ ॥
क्षमाबलमशक्तानां शक्तानां भूषणं क्षमा ।
क्षमा वशीकृतिर्लोके क्षमया किं न सिध्यति ॥ ४ ॥

क्रोधनिन्दा ।

श्रीः ॥ क्रोधान्धकूपपतिताः खादन्ति स्ववपूंष्यपि ।
हन्तातस्तं कथं त्यक्तुं विलम्बः क्रियतां बुधैः ॥ १ ॥
दुर्वासःप्रभृतीनां च ब्रह्मतत्त्वविदामपि ।
क्रोधस्यैव प्रसादेन नानाविपदभूत्खलु ॥ २ ॥
शरन्मध्यान्हकालेपि क्रोधान्धः स्वतनूमपि ।
यन्न जानाति तत्रान्यज्ञानवार्तैव का भवेत् ॥ ३ ॥
[१]क कुम्भीपाक एवायं कोपरूपेण देहिनाम् ।
त्रैलोक्येपि विपत्यर्थमवतीर्णो भवार्णवे ॥ ४ ॥
क्रोधमुग्धधियां नैव सुखं कालत्रयेपि च ।
दृष्टं कदाप्युलूकानां क्रीडनं फुल्लपङ्कजे ॥ ५ ॥

क्षुधा ।

श्रीः ॥ आदौ रूपविनाशिनी कृशकरी कामांऽकुरच्छेदिनी
पुत्राऽमित्र[१]कलत्र[२]भेदनकरी गर्वांकुरच्छेदिनी ।
कामं मन्दकरी तपःक्षयकरी धर्मस्य निर्मूलनी ।
सा मां संप्रति सर्वरोगजननी प्राणापहन्त्री क्षुधा ॥ १ ॥
शय्या वस्त्रं चन्दनं चारु[३] हास्यं वीणा वाणी दृश्यते या च नारी।
न भ्राजन्ते क्षुत्पिपासातुराणां सर्वाऽऽरम्भास्तण्डुलाः प्रस्थमूलाः २
नाऽस्ति क्षुधासमं दुःखं नाऽस्ति रोगः क्षुधासमः ।
नाऽस्त्याहारसमं सौख्यं नाऽस्ति क्रोधसमो रिपुः ॥ ३ ॥

---

१ शत्रुः २ कुटुम्बम् ३ सुन्दरम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वभावः ।

सर्वस्य हि परीक्ष्यन्ते स्वाभावा नेतरे गुणाः ।
अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते ॥ १ ॥

न धर्मशास्त्रं पठतीति कारणं नचाऽपि वेदाऽध्ययनं दुरात्मनः।
स्वभाव एवाऽत्र तथाऽतिरिच्यते यथा प्रकृत्या मधुरं गवां पयः २

निम्नोन्नतं वक्ष्यति को जलानां विचित्रभावं मृगपक्षिणां च ।
माधुर्यमिक्षौ कटुतां मरीचे स्वभावतः सर्वमिदं हि सिद्धम् ॥ ३ ॥

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतेः संघः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याऽङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ ४ ॥

जीवितसाफल्यम् ।

श्रीः ॥ यस्य जीवन्ति धर्मेण पुत्रमित्राणि बान्धवाः।
सफलं जीवितं तस्य नाऽत्मार्थे को हि जीवति ॥ १ ॥

वाणी रसवती यस्य भार्या पुत्रवती सती ।
लक्ष्मीदानवती यस्य सफलं तस्य जीवितम् ॥ २ ॥

दीपवर्णनम् ।

श्रीः ॥ रक्षपात्रगतं स्नेहं प्रदीपंश्रीविवर्धनम् ।
प्रयास्यन्ति विना तेन भस्मत्वं ये भवद्गुणाः ॥ १ ॥

रे रे दीप तिरस्कृताऽखिलतमःस्तोमाऽरिवर्गस्य ते
रात्रौ गूढनिजाङ्गपातिशलभाऽऽघातेन किं पौरुषम् ।
तत्कर्माऽऽचर येन तावकयशो भूयात्प्रभाते पुन-
र्न स्नेहो न च सा दशा इह परं ज्योतिः परं स्थास्यति २

१ अतिक्रम्य । २ अतिक्रम्य वर्तते । ३ नीचोच्चम् । ४ तीक्ष्णताम् । ५ कृषि-मसरिरिवाचरति । ६ सर्पः । ७ माला । ८ अमृतम् । ९ विजृम्भते । १० शोभा । ११ मूत्राणि । १२ ' ढेंळे ' इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीपोऽर्जुन इवाऽऽभाति पतङ्गजनितापदः[1] ।
किं च राम इवाऽऽभाति समुच्छिन्नदशाननः[2] ॥ ३ ॥

व्यापारिणः ।

श्रीः ॥ आदौ सत्ययुगे बलिस्तदनु च त्रेतायुगे राघवो
रामः सत्यपराक्रमोऽथ भगवान् धर्मस्तथा द्वापरे ।
दाता कोऽपि न चाऽस्ति संप्रति कलौ जीवन्ति केनाऽर्थिनः
इत्येवं कृतनिश्चयेन विधिना व्यापारिणो निर्मिताः ॥ १ ॥

परोपकृतिः ।

श्रीः ॥ नीरसान्यपि[3] रोचन्ते कार्पासस्य फलानि मे
येषां गुणमयं जन्म परेषां गुह्यगुप्तये ॥ १ ॥
परोपकारशून्यस्य धिङ्मनुष्यस्य जीवितम् ।
यावन्तः पशवस्तेषां चर्माप्युपकरिष्यति ॥ २ ॥
धनानि जीवितं चैव पराऽर्थे प्राज्ञ उत्सृजेत् ।
तन्निमित्तो वरं त्यागो विनाशे नियते सति ॥ ३ ॥

भवन्ति नम्रास्तरवः फलोद्गमैर्नवाऽम्बुभिर्भूरिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥ ४ ॥
श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः खलु सज्जनानां परोपकारैर्न तु चन्दनेन ॥ ५ ॥

पद्माऽऽकरं दिनकरो विकचं करोति
चन्द्रो विकासयति कैरवचक्रवालम् ।

---

१ पतङ्गः शलभः तं प्रति जनिता आपद् येन. आपं चैव हलन्तानामित्युक्तेः शाप् पक्षे पतंगः सूर्यस्तस्माज्जातिर्जन्म यस्य स कर्णस्तं प्रति तापदः । २ समुच्छिन्नं खण्डं दशायाः वस्त्र्याः आननं येन पक्षे समुच्छिन्न उन्मूलितो दशाननो रावणो येन । ३ शुष्काणि । ४ सू[illegible] ५ [illegible] ६ [illegible] । ७ कासारम् ८ कुमुदमण्डलम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाऽभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृताऽभियोगाः ॥ ६ ॥

तृणं चाऽहं वरं मन्ये नरादनुपकारिणः ।
घासो भूत्वा पशून् पाति भीरून्[1] पाति रणाऽङ्गणे ॥ ७ ॥

परोपकृति[2]कैवल्ये[3] तोलयित्वा[4] जनार्दनः ।
गुर्वीमुपकृतिं मत्वा ह्यवतारान्[6] दशाऽग्रहीत्[7] ॥ ८ ॥

ब्रह्मलिखितम् ।

श्रीः ॥ पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूकेन[9] विलोक्यते यदि दिवा सूर्यस्य किं दूषणम् ।
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यद्धात्रा निजभालपट्टलिखितं तन्मार्जितुं[10] कः क्षमः[11] ॥ १ ॥

सः सुन्दरस्तद्वनिता कुरूपा या सुन्दरी सा पतिरूपहीना ।
यत्रोभयं तत्र दरिद्रता च विधेर्विचित्राणि विचेष्टितानि ॥ २ ॥

इतरकर्मफलानि यदृच्छया[12] विलिखितानि सहे चतुरानन ।
अरसिकेषु कवित्वनिवेदनं शिरसि मा लिख मा लिख मा लिख ३

स हि गगन[13]विहारी कल्मषध्वंसकारी[14]
दशशतकरधारी ज्योतिषां[15] मध्यचारी ।
विधुरपि विधियोगाद्ग्रस्यते राहुणाऽसौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥ ४ ॥

---

१ भीतान् भयशीलान् वा. २ परोपकारः ३ मोक्षः ४ उभयोस्तुलनां कृत्वा ५ भारवतीम् ६ मत्स्यादीन् ७ जग्राह ८ 'नेपती' इति लोके ९ दिवाभीतेन १० शोधयितुम् ११ समर्थः १२ स्वेच्छया १३ आकाशसंचारी १४ अन्धकारनाशकर्ता १५ नक्षत्राणाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिलोकेशः[1] शार्ङ्गी शबरशरैर्लक्ष्यत्वमगम-
द्विधाता[3] लोकानामलभत शिरःकृन्तनविधिम्[4] ।
प्रयातौ तौ राहोर्दिनकरशशाङ्कौ कवलतां[5]
प्रभुर्नम्रः शम्भुः शिरसि लिखितं लङ्घयति कः ॥ ६ ॥
हरिणाऽपि हरेणाऽपि ब्रह्मणा त्रिदशैरपि[6] ।
ललाटलिखिता रेखा न शक्या परिमार्जितुम् ॥ ७ ॥

वेश्यागर्हणम् ।

श्रीः ॥ वेश्याऽसौ[7] मदनज्वाला रूपेन्धनसमेधिता[8] ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ १ ॥
कष्टं जीवति गणिका गणकोऽपि च राजसेवको वैद्यः ।
दिवसे दिवसे मरणं परस्य यच्चित्तरञ्जनं वृत्तिः ॥ २ ॥
एता हसन्ति च रुदन्ति च वित्तहेतो-
र्विश्वासयन्ति पुरुषं न च विश्वसन्ति ।
तस्मान्नरेण कुलशीलसमन्वितेन
वेश्याः श्मशानघटिका[9] इव वर्जनीयाः ॥ ३ ॥
जात्यन्धाय[10] च दुर्मुखाय च जराजीर्णाऽखिलाऽङ्गाय च
ग्रामीणाय[11] च दुष्कुलाय च गलत्कुष्ठाऽभिभूताय च ।
यच्छन्तीषु[12] मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया[13]
पण्यस्त्रीषु[14] विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥ ४ ॥

---

१ विष्णुः २ शबरो जरानामा भिल्लः प्रभासे परस्परं कलहेनाखिलयादवोपसंहारानन्तरमश्वत्थस्याधस्ताद्वामोरौ दक्षिणं पादं निधाय स्थिते भगवति जरानाम्न भिल्लेन दूरतो भगवच्चरणं दृष्ट्वा मृगमुखभ्रमाद्भगवत्पादो बाणेन विद्ध इति भागवतम् ३ ब्रह्मा ४ शिरः कर्तनम् ५ ग्रासताम् ६ देवैः ७ वरांगना ८ रूपमेवेन्धनं काष्ठं तेन सम्यक्प्रदीप्ता. ९ श्मशानस्थिताघटिकाः घट्यो 'घडा' इति यावत् एता यथा अस्पृश्यास्तथैव ता वर्जनीया इति भावः १० जन्मान्धाय ११ ग्राम्याय १२ अर्पयन्तीषु १३ लक्ष्मीलेशाशया १४ गणिकासु ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हारहीरकहिरण्यभूषणैस्तोषमेति गणिका[1]धनैषिणी ।
प्रेमकोमलकटाक्षवीक्षितैरेव जीवति कुलाऽङ्गनाजनः ॥ ५ ॥

तावत्कुलस्त्रीमर्यादा यावल्लज्जाव[2]गुण्ठनम् ।
हृते तस्मिन् कुलस्त्रीभ्यो वरं वेश्याऽङ्गनाजनः ॥ ६ ॥

धनाऽऽशाकैतव[3]स्नेहो वित्तै[4]श्चित्ततोषणम् ।
एकमप्यस्ति नाऽस्मासु कथं वेश्यासमा वयम् ॥ ७ ॥

मद्यपानगर्हणम् ।

श्रीः॥चित्ते भ्रान्तिर्जायते मद्यपानाद् भ्रान्ते चित्ते पापचर्या[5]मुपैति ।
पापं कृत्वा दुर्गतिं[6] यान्ति मूढास्तस्मान्मद्यं नैव पेयं न पेयम् ॥१॥

मत्तो हिनस्ति सर्वं मिथ्या प्रलपति हि विकलया बुद्ध्या ।
मातरमपि कामयते साऽत्रङ्गं मद्यपानमत्तः सन् ॥ २ ॥

एकतश्चतुरो वेदा ब्रह्मचर्यं यथैकतः ।
एकतः सर्वपापानि मद्यपानं तथैकतः ॥ ३ ॥

मद्यपस्य कुतः सत्यं दया मांसाऽशिनः कुतः
कामिनश्च कुतो विद्या निर्धनस्य कुतः क्रिया ॥४॥

वैकल्यं[9] धरणीपातमयथोचितजल्पनम्[10] ।
सन्निपातस्य[11] चिन्हानि[12] मद्यं सर्वाणि दर्शयेत् ॥५॥

अघटितघटना ।

श्रीः ॥ अम्बुजमम्बुनि जातं नहि दृष्टं जातमम्बुजादम्बु ।
अधुना तद्विपरीतं चरणसरोजाद्विनिर्गतागङ्गा ॥ १ ॥

जाता लता हि शैले जातु लतायां न जायते शैलः ।
अधुना तद्विपरीतं कनकलतायां[13] गिरिद्वयं[14] जातम् ॥ २ ॥

१ धनेच्छावती २ लज्जाया अवगुण्ठनं संवरणम् 'घुंगट' इति लोके ३ कपटस्नेहः ४ असत्यगोष्ठीभिः ५ पापाचरणम् ६ नरकम् ७ नाशयति ८ इच्छति ९ विकलत्वम् १० अयुक्तप्रलापः ११ त्रिदोषस्य १२ लक्षणानि. १३ सुवर्णलतायां तत्तुल्यकामिन्याम् १४ पर्वततुल्यं स्तनद्वयमिति भावः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कमले कमलोत्पत्तिः श्रूयते न च दृश्यते ।
बाले तव मुखाऽम्भोजे दृष्टमिन्दीवरद्वयम्[1] ॥ ३ ॥

न केनाऽपि श्रुतं दृष्टं वारिणा वारि शुष्यति ।
अहो गोदावरी धारा भवसिन्धुर्विशुष्यति ॥ ४ ॥

मूकाऽऽरब्धं कमपि बधिराः श्लोकमाकर्णयन्ति
श्रद्धालुस्तं[3] विलिखति कुणिः[4] श्लाघया वीक्षतेऽन्धः ।
अभ्यारोहत्यहह सहसा पंगुरप्यद्रिशृङ्गं
सान्द्राऽऽलस्याः शिशुमरणतो मन्दमायान्ति वन्ध्याः ५

एष वन्ध्यासुतो याति खपुष्पकृतशेखरः[6] ।
मृगतृष्णाऽम्भसि[7] स्नातः शशशृङ्गधनुर्धरः[8] ॥ ६ ॥

प्रवासः ।

श्रीः ॥ अहो नु कष्टः सततं प्रवासस्ततोऽतिकष्टः परगेहवासः[9] ।
कष्टाऽधिका नीचजनस्य सेवा ततोऽतिकष्टा धनहीनता च ॥१॥

तीर्थानामवलोकनं परिचयः सर्वत्र वित्ताऽर्जनं
नानाऽऽश्चर्य[10]निरीक्षणं चतुरता बुद्धेः प्रशस्ता गिरः ।
एते सन्ति गुणः प्रवासविषये दोषोऽस्ति चैको महा-
न्यन्मुग्धामधुराऽधराऽधरसुधापानं विना स्थीयते ॥ २ ॥

देशेदेशे किमपि कुतुकादद्भुतं लोकमानाः[11]
संपाद्यैव द्रविणम्[12]तुलं[13] सद्म[14] भूयोऽप्यवाप्य[15] ।
संयुज्यन्ते सुचिरविरहोत्कण्ठिताभिः सतीभिः
सौख्यं धन्याः किमपि दधते सर्वसंपत्समृद्धाः ॥ ३ ॥

---

१ इन्दीवरसदृशं नेत्र युगलम् २ उदकेन ३ श्रद्धावान् ४ विकलपाणिः ५ शिखरम् ६ खमाकाशं तस्य पुष्पेण कृतः शेखरः शिरोभूषणं येन ७ मरीचि-कोदकेन कृतमज्जनः ८ शशशृंगकृतधनुर्धारी ९ परगृहवासः १० आश्चर्यम् । ११ वीक्षमाणाः १२ द्रव्यम् १३ अतुलम् १४ गृहम् १५ पुनः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकिञ्चन्यादतिपरिचयाज्जायया[1]पेक्ष्यमाणो[2]
भूपालानामननुसरणाद्धिभ्यदेवाऽखिलेभ्यः ।
गेहे तिष्ठन् कुमतिरलसः कूपकूर्मैः स[3]धर्मा
किं जानीते भुवनचरितं किं सुखं चोपभुङ्क्ते ॥ ४ ॥

व्यापारान्तरमुत्सृज्य वीक्षमाणो वधूमुखम् ।
यो गृहेष्वेव निद्राति दरिद्राति[4] स दुर्मतिः ॥ ५ ॥

व्याजनिन्दा ।

श्रीः ॥ यच्छ्वशुरोऽभूज्जनकः[5] पत्युर्दा[6]श्याश्च तत्सुता जाया ।
भ्राता भुजंगराजो[7] भक्ता मुक्त्यै भजन्ति तच्चित्रम् ॥ १ ॥

त्रिदोषशमनार्थाय[8] त्वयि मज्जन्ति मानवाः ।
त्वं करोषि चतुर्दोषं[9] कथं गङ्गे न लज्जसि ॥ २ ॥

लावण्यद्रविणव्ययो न गणितः क्लेशो महानर्जितः
स्वच्छन्दं चरतो जनस्य हृदये चिन्ताज्वरो निर्मितः ।
एषाऽपि स्वगुणाऽनुरूपरमणाऽभावाद्वराकी हता
कोऽर्थश्चेतसि वेधसा विनिहितस्तन्वीमिमां तन्वता ॥ ३ ॥

इन्दोर्लक्ष्म[10] त्रिपुरजयिनः कण्ठमूलं मुरारे-
र्दिङ्नागानां[11] मदजलमषीभाञ्जि गण्डस्थलानि ।
अद्याऽप्युर्वीवलयतिलक श्यामलिम्नाऽनुलिप्ता-[12]
न्याभासन्ते वद धवलितं किं यशोभिस्त्वदीयैः ॥ ४ ॥

सर्वदा सर्वदोऽसीति मिथ्या संस्तूयसे जनैः ।
नाऽरयो[13] लेभिरे पृष्ठं न वक्षः[14] परयोषितः ॥ ५ ॥

---

१ दारिद्र्यात् २ अवमानितः ३ सदृशः ४ दरिद्रो भवति ५ पिता जनकराजश्च ६ उपमातुः पृथ्व्याश्च ७ शेषः जारश्च ८ त्रयो दोषाः आध्यात्मिकाधिभौतिकाधिदैविकाः ९ चत्वारो दोषा यस्य तथाविधं पक्षे चतुर्हस्तं विष्णुस्वरूपं करोषीत्यर्थः १० कलंकः ११ दिग्गजानाम् १२ नीलिमा १३ वैरिणः १४ उरःस्थलम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेवकनिन्दा ।

श्रीः ॥ आहारे वडवाऽनल[1]श्च शयने यः कुम्भकर्णायते
संदेशे[2] बधिरः पलायनविधौ सिंहः सृगालो[3] रणे ।
अन्धो वस्तुनिरीक्षणेऽथ गमने खञ्जः[4] पटुः क्रन्दने[5]
भाग्येनैव हि लभ्यते पुनरसौ सर्वोत्तमः सेवकः ॥ १ ॥

प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥ २ ॥

जीवन्तोऽपि मृताः पञ्च व्यासेन परिकीर्तिताः ।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥ ३ ॥

शिरसा धार्यमाणोऽपि सोमः सौम्येन शम्भुना ।
तथाऽपि कृशतां धत्ते कष्टः खलु पराऽऽश्रयः ॥ ४ ॥

वरं वनं वरं भैक्ष्यं[6] वरं भारोपजीवनम्[7] ।
पुंसां विवेकहीनानां सेवया न धनाऽर्जनम् ॥ ५ ॥

सेवया धनमिच्छद्भिः सेवकैः पश्य यत्कृतम् ।
स्वाऽऽर्यत्वं[8] शरीरस्य मूढैस्तदपि हारितम्[9] ॥ ६ ॥

सर्वः कल्पे[10] वयसि यतते लब्धुमर्थान्कुटुम्बी
पश्चात् पुत्रैरुपहितभरः कल्पते[11] विश्रमाय ।
अस्माकं तु प्रतिदिनमियं सादयन्ती प्रतिष्ठां
सेवाकाकुः परिणतिरभूत्स्त्रीषु कष्टोऽधिकारः ॥ ७ ॥

स्वाऽभिप्रायपरोक्षस्य परचित्ताऽनुवर्तिनः ।
स्वयं विक्रीतदेहस्य सेवकस्य कुतः सुखम् ॥ ८ ॥

चलेषु स्वामिचित्तेषु सुलभे पिशुने[12] जने ।

---

१ वाडवाग्निः २ वार्ताहरणे ३ 'कोल्हा' इति लोके. ४ पादविकलः ५ रोदने ६ भिक्षा ७ भारवाहकत्वेनोपजीवनम् ८ स्वाधीनत्वम् ९ नाशितम् १० प्रथमे ११ योग्यो भवति १२ सूचके।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि जीवन्त्यहो चित्र क्षणमप्युपजीविनः ॥ ९ ॥
सेवाश्ववृत्तिर्यैरुक्ता न तैः सम्यगुदाहतम् ।
स्वच्छन्दचारी कुत्र श्वा विक्रीतासुः क सेवकः ॥ १० ॥
मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च सदा दूरतस्त्वप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाऽभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ११ ॥
द्वयं जहाति सेवकः सुखं च मानमेव च ।
यदर्थमर्थमीहते तदेव तस्य हीयते ॥ १२ ॥

भिक्षुकगुणाः ।

श्रीः ॥ उच्चैरध्ययनं पुरातनाकथाः स्त्रीभिः सहाऽऽलापनं
तासामर्भकलालनं पतिनुतिस्तत्पाकमिथ्यास्तुतिः ।
आदेशस्य कराऽवलम्बनविधिः पाण्डित्यलेखक्रिया
होरागारुडमन्त्रतन्त्रकविधिर्भिक्षोर्गुणा द्वादश ॥ १ ॥
प्रातःक्षालितलोचनाः करतले चञ्चत्पवित्रांकुरा-
स्तत्तत्स्थाननिवेशितोर्ध्वतिलकाश्चैलान्तबद्धाऽक्षताः ।
को जातश्च मृतोऽथ वा मृततिथिः कस्याऽऽलये वर्तते
चेत्थं हर्षशतैर्युताः प्रतिदिनं धावन्त्यहो भिक्षुकाः ॥ २ ॥
अग्रेयो भुक्तिमतां प्रयोगसमये मन्त्रेषु पृष्ठं गतः
पाकाऽगारगतस्तु पाचकमनस्तोषाय वाचस्पतिः ।
उच्चायां निरतो रतोऽर्भकगणे पिण्डेषु दत्ताऽऽदरो
नानाश्राद्धगणैकचालितमना भट्टोत्तमो राजते ॥ ३ ॥

---

१ सेवकाः २ विक्रीताः असवः प्राणा येन सः ३ बहुभाषकः ४ 'धीट' इति लो० ५ असमंजस ६ भयशीलः ७ 'दांडगा' इ० ८ इच्छाति ९ पठनम् १० शिशुः ११ स्तुतिः १२ प्रश्नकथनम् १३ मस्तके १४ अग्रगण्यः १५ भोक्तृणाम् १६ बृहस्पतिः १७ दक्षिणायाम् अयं तु वैदिकानां सांकेतिकः शब्दः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाग्वर्णनम् ।

श्रीः ॥ केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नाऽलंकृता मूर्धजाः ।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते ।
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ १ ॥

मातर्नाऽतः परमनुचितं यत्खलानां पुरस्ता-
दस्ताऽऽशङ्कं जठरपिठरीपुर्तये नर्तितासि ।
तत्क्षन्तव्यं सहजसरले वत्सले वाणि कुर्या
प्रायश्चित्तं गुणगणनया गोपवेषस्य विष्णोः ॥ २ ॥

अपि ललितसुगुणवेणिः सांऽलंकाराऽपि या सुवर्णाऽपि ।
रघुतिलकविहीना चेद्वाणी रमणीय नैव कल्याणी ॥ ३ ॥

कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्तिं सूते दुष्कृतं याहिनस्ति ।
तां चाऽप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥ ४ ॥

तव करकमलस्था स्फाटिकीमक्षमालां
नखकिरणविभिन्नां दाडिमीबीजबुद्धया ॥ ५ ॥

---

१ बाहुभूषणानि २ चन्द्रवदुज्ज्वलाः ३ सुगंधतैलादिना संस्कृताः ४ केशाः । ५ सम्यगलंकरोति ६ या असंस्कृतेति पदच्छेदपक्षे समलं मलसहितम् ७ उदरभाण्डम् ८ गोपवेषधारिणः कृष्णस्य ९ ललिता सुन्दरा सुष्टुगुणयुक्ता वेणिः प्रवाहो यस्याः सा, पक्षे ललिताशोभनगंगावनादिसूत्रयुक्ता वेणिः केशपाशो यस्याः १० श्लेषरूपकाद्यलंकृतियुक्ता, पक्षे सौवर्णहीरकाद्यलंकारयुक्ता ११ सुष्टु वर्णाः यस्यां, पक्षे शोभनगौरवर्णा १२ रघुतिलकोरामस्तद्वर्णनविहीना वाणी १३ मंगला, रलयोः सावर्ण्याद्रघुतिलकेनकुंकुमतिलकेनविहीनारमणी स्त्री विधवेत्यर्थः १४ मनोरथान् १५ अपसारयति १६ अलक्ष्मीं 'अवदसे' ति लोके १७ सत्याम् १८ स्फाटिकमयीम् १९ जपमालाम् २० नखानां किरणैर्विभिन्नां मिश्राम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुलं[1]बमनुकर्षन् येन कीरो[2] निषिद्धः
स भवतु मम भू[3]त्यै वाणि ते मन्द[4]हासः ॥ ६ ॥

गाना[5]ब्धेस्तु परं पारं नोपे[6]याय सरस्वती ।
अतो निमज्जनभयात्तुम्बीं वहति वक्षसि ॥ ७ ॥

या कर्षति निजयोगादन्तर्गतजीव[8]नानि स[9]रसानां ।
वाणी सैव गु[10]णवती घटीव यद्वा व[11]धूटीव ॥ ८ ॥

अस्त्यद्याऽपि चतुःसमुद्रपरि[12]खापर्यन्तमुर्वीतलं
वर्तन्तेऽपि च तत्र तत्र रसिका गोष्ठीषु सक्ता नृपाः ।
एकस्तत्र निरादरो भवति चेदन्यो भवेत्साऽऽदरो
वा[13]ग्देवीवदनाम्बुजे वसति चेत्को नाम दीनो जनः॥९॥

तास्तु वाचः सभायोग्या याश्चित्ताऽऽकर्षणक्षमाः ।
स्वेषां परेषां विदुषां द्विषामविदुषामपि ॥ १० ॥

इयं पुण्याब्धिकन्यैव मन्ये वाक्चातुरी छलात् ।
वृणोति विबुधान् हित्वा पुरुषोत्तममेव यत् ॥ ११ ॥

न धनी न बली नापि शूरो न गुणवानपि ।
तथा भाति यथा वक्ता सभायां पिकवद्वने ॥ १२ ॥

यस्य वाण्यस्ति मधुरा तस्यैव सफलं तपः ।
नोचेज्जीवन्ति पशवोप्यनिशं पुष्टिशालिनः ॥ १३ ॥

सालंकारोपि सरसः सगुणोपि पुमानिह ।
प्रबन्ध इव वक्तृत्वं विना नूनं जडो न किम् ॥ १४ ॥

वाचः सौष्ठवमावेक्ष्य सुधाप्रायः सुधाभवत् ।
सुधाधरोपि नोतद्वद्वाग्मी द्विजमुदे यथा ॥ १५ ॥

---

१ प्रतिक्षणम् २ शुकः ३ समृद्धये ४ मन्दहास्यम् ५ गानसमुद्रस्य ६ न प्राप्तवती ७ इक्ष्वाकुफलम् जलतरणार्थं तुम्ब्याः संग्रहं लोकाः कुर्वन्तीति प्रसिद्धम् ८ हृतानि जीवनानि उदकानि च ९ रसिकानां कूपादीनांच १० प्रागल्भ्यादिगुणयुक्ता रज्जुयुक्ता च ११ स्त्री १२ खन्दक इति ख्याते १३ सरस्वती ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाग्मिप्रशंसा ।

श्रोतॄन्मूकयति[2] ब्रुवन् स्थिरतमं[3] कुर्वन्नमीषां मनो
निर्वाष्पः परबाष्पकृत्परदृशामेकाऽऽश्रयो नाऽन्यदृक् ।
यस्त्यक्ताऽङ्गनिकम्पनः प्रचलयन्नित्यं सतां मस्तकं
क्षीरं श्रोतृषु मुख्यमात्मनि गुणं धत्ते स वक्तोत्तमः ॥ १ ॥
तद्वक्ता सदसि ब्रवीतु वचनं यच्छृण्वतां चेतसः
प्रोल्लासं रसपूरणं श्रवणयोरक्ष्णोर्विकासश्रियम् ।
क्षुन्निद्राश्रमदुःखकालगतिहृत् कार्यान्तरप्रस्मृतिं
प्रोत्कण्ठामनिशं श्रुतौ वितनुते शोकं विरामादपि ॥ २ ॥
श्रुतिसिद्धान्तशूरस्य तद्विरुद्धान्निरुन्धतः ।
वल्गितं वावदूकस्य कृतिनः किं न शोभते ॥ ३ ॥
अल्पाऽक्षररमणीयं यः कथयति निश्चितं स खलु वाग्मी ।
बहुवचनमल्पसारं यः कथयति विप्रलापी सः ॥ ४ ॥
शुद्धकांस्यरचिताऽपि लालिता जिह्वया यदि न योजिता भवेत् ।
किं तया करणमस्ति घण्टया जिह्वया ध्वनिमतां हि पूज्यया ॥ ५ ॥

असत्यवादिनिन्दा ।

श्रीः ॥ यशो यस्माद्भस्मीभवति वनवन्हेरिव वनं
निदानं[11] दुःखानां[12] यदवनिरुहाणामिव जलम् ।
न यत्र स्याच्छायाऽऽतप इव तपःसंयमकथा
कथंचित्तन्मिथ्यावचनमभिधत्ते[13] न मतिमान् ॥ १ ॥
जिव्हैकैव सतामुभे फणवतां[14] स्रष्टुश्चतस्रश्च[15] ता-
स्ताः सप्तैव विभावसो[16]र्नियमिताः षट् कार्तिकेयस्य च ।

---

१ वक्ता २ मूकान् करोति ३ अचलं तटस्थमिति यावत् ४ प्रकर्षेणोल्लासं विकासम् ५ रसानां शृंगारादीनां पूरणम् ६ अन्यकार्यविस्मृतिम् ७ वक्तुः ८ ले.ख्री. लंबक इति वा प्रसिद्धया ९ कर्तव्यं न किंचित्कार्यमस्तीति भावः १० दावाग्नेः ११ आदिकारणम् १२ वृक्षाणाम् १३ वक्ति १४ सर्पाणाम् १५ ब्रह्मणः १६ अग्नेः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पौलस्त्यस्य दशाऽभवन् फणिपतेर्जिव्हासहस्रद्वयं
जिव्हालक्षशतैककोटिनियमो नो दुर्जनानां मुखे ॥ २ ॥
असत्यमप्रत्ययमूलकारणं कुवासनासद्मसमृद्धिवारणम् ।
विपन्निदानं परवञ्चनोर्जितं कृताऽपराधं कृतिभिर्विवर्जितम् ३
नाऽसत्यवादिनः सख्यं न पुण्यं न यशो भुवि ।
दृश्यते नाऽपिकल्याणं कालकूटमिवाऽश्नतः ॥ ४ ॥

अविवेकनिन्दापूर्वकविवेकस्तुतिः ।

श्रीः ॥ कदापि साहसं नैव कर्तव्यं पुरुषैर्यतः ।
जीवितस्यापि नाशः स्यात्तस्यैव कृपया किल ॥ १ ॥
स्वल्पं महद्वा यत्कर्म विचार्यैव तदाचरेत् ।
अविचारेण नाचारस्तिरश्चामपि दृश्यते ॥ २ ॥
विवेकस्यैव दास्यस्ताः सकला अपि संपदः ।
निखिलास्तारका यद्वच्छरद्राका कलानिधेः ॥ ३ ॥
अहो विवेकराजस्य कृपयैवाखिला नराः ।
संसारवारांनिधिमप्युत्तरन्त्येव तत्क्षणात् ॥ ४ ॥
अविवेकिनमालोक्य तथा खिद्यति मे मनः ।
कुम्भीपाकादिनरकानुभवैरपि नो यथा ॥ ५ ॥

कृतघ्ननिन्दा ।

श्रीः ॥ व्योमनि शं वा कुरुते चित्रं निर्माति यत्नतः सलिले ।
स्नपयति पवनं सलिलैर्यस्तु खले चरति सत्कारम् ॥ १ ॥
यथा वृष्टिः समुद्रेषु भुक्तस्योपरि भोजनम् ।
एवं प्रीतिः खलैः सार्धमुत्पन्नाऽप्यवसीदति ॥ २ ॥
शोकं मा कुरु कुक्कुर सत्त्वेष्वहमधम इति मुधा साधो ।
कष्टादपि कष्टतरं दृष्ट्वा श्वानं कृतघ्ननामानम् ॥ ३ ॥

---

१ रावणस्य २ शेषस्य ३ अविश्वासः ४ विपत्तेः कारणम् ५ कुचालैः ६ बिरम् । ७ भक्षयतः ८ मुखम् ९ मालिन्यम् १० पूजाम् ११ भषकः १२ व्यर्थम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गर्भवासप्रयुक्तं दुःखम् ।

श्रीः ॥ कृमिभिः[1] क्षतसर्वाङ्गः सौकुमार्यात्प्रतिक्षणम् ।
मूर्छामाप्नोत्युरुक्लेशो[2] गर्भस्थैः क्षुधितैर्भृशम् ॥ १ ॥
कटुतीक्ष्णोष्णलवणक्षाराऽम्लादिभिरुल्बणैः[3] ।
मातृभुक्तैरुपस्पृष्टः सर्वाङ्गोत्थितवेदनः ॥ २ ॥
उल्बेन[4] संवृतस्तस्मिन्नान्त्रैश्च[5] बहिरावृतः ।
आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥ ३ ॥
अकल्पः[6] स्वाङ्गचेष्टायां[7] शकुन्त इव[8] पञ्जरे ।
अनुच्छ्वसन्[9] स्मरन् पूर्वं[10] गर्भे किं नाम विन्दते ॥ ४ ॥
निःसृतो[11]ऽहं करिष्यामि सुकृतानीति चिन्तयन् ।
मेदोऽसृग्दिग्धसर्वाऽङ्गो[12] जरायुपुटसंवृतः[13] ॥ ५ ॥
निष्क्रामन्[14] भृशदुःखाऽऽर्तो[15] रुदन्नुच्चैरधोमुखः[16]
यन्त्रादिव विनिर्मुक्तः पतत्युत्तानशाय्यथ[17] ॥ ६ ॥

स्त्रीस्वभावनिन्दा ।

श्रीः ॥ अनृतं[18] साहसं माया[19] मूर्खत्वमति लोभता ।
अशुचित्वं निर्दयत्वं स्त्रीणां दोषाः स्वभावजाः ॥ १ ॥
स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः[20] प्रियसाहसाः ।
घ्नन्त्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ॥ २ ॥
स्त्रियो हि नाम खल्वेता निसर्गादेव[21] पण्डिताः ।
पुरुषाणां तु पाण्डित्यं शास्त्रैणैवोपदिश्यते ॥ ३ ॥

---

१ कीटकैः । २ महाकष्टयुक्तः । ३ उल्कटैः । ४ जरायुणा 'जार' इति लोके । ५ व्याप्तः । ६ असमर्थः । ७ चलनादिव्यापारे । ८ पक्षीव । ९ उच्छ्वासं त्यक्तुमशक्तः १० प्राचीनं कर्म । ११ गर्भाशयाच्च्युतः । १२ मेदोरक्तलिप्तसर्वाङ्गः । १३ जरायुक्लेशसम्प्राप्तः । १४ बहिर्निःसरन् । १५ निःसरणकालेऽत्यन्तदुःखयुक्तः । १६ उच्चस्वरेण रोदनं कुर्वन् । १७ उत्तानः शेतेऽसौ उत्तानशायी । १८ असत्यम् । १९ कपटम् २० दुःसहाः । २१ स्वभावतः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधायाऽलीकविश्रम्भमङ्गेषु त्यक्तसौहृदाः ।
नवंनवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥ ४ ॥

स्वातन्त्र्यं पितृमन्दिरं च वसतिर्यात्रोत्सवे संगति-
र्गोष्ठी पूरुषसंनिधाननियमो वासो विदेशे तथा ।
संसर्गः सह पुंश्चलीभिरसकृद्वृत्तेर्निजायाः क्षतिः
पत्युर्वार्धकमीर्ष्यितं प्रवसनं नाशस्य हेतुः स्त्रियाः॥ ५ ॥

ज्योत्स्नेव नयनाऽऽनन्दः सुरेव मदकारणम् ।
प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥ ६ ॥

अग्राह्यं हृदयं तथैव वदनं यद्दर्पणाऽन्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणां न विज्ञायते ।
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसितं
नारी नाम विषांकुरैरिव लता दोषैः समं वर्धिता ॥७॥

गुणाऽऽश्रयं कीर्तियुतं च कान्तं पतिं विधेयं सधनं रतिज्ञम् ।
विहाय शीघ्रं वनिता व्रजन्ति नरान्तरं शीलगुणादिहीनम् ॥८॥

समुद्रवीचीव चलस्वभावाः संध्याऽभ्रलेखेव मुहूर्तरागाः ।
स्त्रियो हृताऽर्थाः पुरुषं निरर्थं निष्पीडितालक्तकवत्त्यजन्ति॥९॥

संमोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां
किं नाम वामनयना न समाचरन्ति ॥ १० ॥

नाऽमृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीम् ।
सैवाऽमृतलतारक्ता विरक्ता विषवल्लरी ॥ ११ ॥

---

१ कपटविश्वासम् । २ जारिण्यः । ३ स्वेच्छावृत्तयः । ४ समागमः । ५ प्रवास- । ६ यथामित्रः । ७ चित्ताभिप्रायः । ८ पर्वतस्थसूक्ष्ममार्गवदतिकठिनः । ९ कमलपत्रगत जलबिन्दुवच्चञ्चलम् । १० तरंगः । ११ सायंतनाभ्रमिव क्षणमनुरागिण्यः । १२ निष्पीडितलाक्षारसरहितवस्त्रमिव ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनंकुरितकूर्चकः[1] स तु सितोपलाऽऽढ्यं पयः[2]
स एव धृतकूर्चकः सलवणाऽम्बुनक्रोपमः ।
स एव सितकूर्चकः[3] कथितगुग्गुलोद्वेगकृत्
भवन्ति हरिणीदृशां प्रियतमेषु भावास्त्रयः ॥ १२ ॥

जल्पन्ति सार्धमन्येन[4] पश्यन्त्यन्यं सविभ्रमम् ।
हृदये चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥ १३ ॥

स्त्रीणां द्विगुण आहारो लज्जा चाऽपि चतुर्गुणा ।
साहसं षड्गुणं चैव कामश्चाऽष्टगुणः स्मृतः ॥ १४ ॥

अन्तःक्रूराः सौम्यमुखा अगाधहृदयाः स्त्रियः ।
अन्तर्विषा बहिःसौम्या भक्ष्या विषकृता इव ॥ १५ ॥

स्त्रियो हि मूलं निधनस्य[5] पुंसः स्त्रियो हि मूलं व्यसनस्य[6] पुंसः ।
स्त्रियो हि मूलं नरकस्य पुंसः स्त्रियो हि मूलं कलहस्य पुंसः १६

कामनाम्ना किरातेन[7] विततां[8] मूढचेतसाम् ।
नार्यो नरविहङ्गानामङ्गबन्धनवागुराः[9][10] ॥ १७ ॥

दर्शनाद्धरते चित्तं स्पर्शनाद्धरते धनम् ।
सङ्गमाद्धरते सत्त्वं[11] नारी प्रत्यक्षराक्षसी ॥ १८ ॥

कुलवधूवृत्तम् ।

श्रीः ॥ यस्य भार्या शुचिर्दक्षा[12] भर्तारमनुगामिनी ।
नित्यं मधुरवक्त्री च सा रमा[13] न रमा रमा ॥ १ ॥

नित्यं स्नाता सुगन्धा च नित्यं च प्रियवादिनी ।
अल्पभुङ् मितवक्त्री च देवता सा न मानुषी ॥ २ ॥

---

१ अनुद्गतश्मश्रुः । २ खण्डशर्करायुक्तं दुग्धमिव सुखावहः । ३ सितकूर्चकस्तु स्त्रीणां क्वथितगुग्गुलुवदुद्वेगजनको न कथमपि संतोषजनक इत्यर्थः क्वथितगुग्गुलुक्वाथवदिति वा पाठः । ४ सह । ‘ बरोबर ’ । ५ मरणस्य । ६ दुःखस्य । ७ भिल्लेन । ८ प्रसृताः ९ नरा एव विहंगाः पक्षिणस्तेषाम् । १० पाशाः । ११ बलं । १२ पवित्रा । १३ लक्ष्मीः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

असारभूते संसारे सारभूता नितम्बिनी ।
इबि सांञ्चन्त्य वै शम्भुरर्धाङ्गे पार्वतीं दधौ ॥ ३ ॥

कार्येषु मन्त्री करणेषु दासी भोज्येषु माता शयनेषु रम्भा ।
धर्माऽनुकूला क्षमया धरित्री भार्या च षाड्गुण्यवतीह दुर्लभा ४

पदन्यासो गेहाद्बहिरहिफणाऽऽरोपणसमो
निजोऽऽवासादन्यद्भवनमपरद्वीपतुलितम् ।
वचो लोकाऽलभ्यं कृपणधनतुल्यं मृगदृशः
पुमानन्यः कान्ताद्विधुरिव चतुर्थीसमुदितः ॥ ५ ॥

सा भार्या या प्रियं ब्रूते स पुत्रो यत्र निर्वृतिः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥ ६ ॥

जीवति जीवति नाथे मृते मृता या मुदा युता मुदिते ।
सहजस्नेहरसाला कुलवनिता केन तुल्या स्यात् ॥ ७ ॥

भक्तिः प्रेयसि संश्रितेषु करुणा श्वश्रूषु नम्रं शिरः
प्रीतिर्भ्रातृषु गौरवं गुरुजने क्षान्तिः कृतागस्यपि ।
अम्लाना कुलयोषिता व्रतविधिः सोऽयं विधेयः पुन-
र्मद्भर्तुर्दयिता इति प्रियसखी बुद्धिः सपत्नीष्वपि ॥ ८ ॥

अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता
तत्पादार्पितदृष्टिरासनविधिस्तस्योपचर्या स्वयम् ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति
प्राच्यैः पुत्रि निवेदितः कुलवधूसिद्धान्त धर्माऽऽगमः ॥ ९ ॥

लज्जावशाच्च नतमंथरदृष्टिपातं यैश्चुम्बितं कुलवधूवदनाऽरविन्दम् ।
तेषामनेकपुरुषव्रणिताधरेषु शक्तिः कथं भवति वेशवधूमुखेषु १०

---

१ सर्पः । २ स्वगृहात् । ३ कान्ताविप्रयात् अन्यः पुमान् वरदचतुर्थ्युदितचन्द्र इव दर्शनानर्ह इत्यर्थः । ४ हर्षिते । ५ स्वाभाविकस्नेहभरिता ६ कुलस्त्री । ७ भर्तरि ८ आश्रितेषु । ९ ' आवा ' इति० १० क्षमा । ११ अपराधिनि । १२ प्रफुल्लवदना । १३ ' सवतीषु ' १४ पूजा । १५ त्यजेत् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैव साध्वी सुभक्तश्च सुस्नेहः सरसोज्ज्वलः ।
पाक[1]: संजायते यस्याः करादप्युदरादपि ॥ ११ ॥
दीप[2]दशा कुलयुवती वैदग्ध्ये[3]नैव मलिनता[4]मेति ।
दोषा[5] अपि भूषायै गणिकायाः शशिकलायाश्च ॥ १२ ॥
रूप[6]संपन्नमग्राम्यं[7] प्रेम[8]प्रेष्यं प्रियंवद[9]म् ।
कुलीनमनुकूलं च कलत्रं[10] कुत्र लभ्यते ॥ १३ ॥

असतीचरितम् ।

श्रीः ॥ यस्य भार्या विरूपा च कश्मला[11] कलहप्रिया ।
अधिकाऽधिकभक्षा च सा जरा[12] न जरा जरा ॥ १ ॥

विवादशीलां स्वयमर्थचोरिणीं
पराऽनुकूलां बहुपाकपाकिनीम् ।
आक्रोशिनीं दुर्विषहप्रकोपिनीं
त्यजन्ति भार्यां दशपुत्रमातरम् ॥ २ ॥

भर्ता यद्यपि नीतिशास्त्रनिपुणो विद्वान्कुलीनो युवा
दाता कर्णसमः प्रसिद्धविभवः शृङ्गारदीक्षा[13]गुरुः ।
स्वप्राणाऽधिककल्पिता स्ववनिता स्नेहेन संलालिता
तं कान्तं प्रविहाय सैव युवती जारं पतिं वाञ्छति ॥ ३ ॥

पतिरतीव धनी सुभगो[14]युवा परविलासवतीषु पराङ्मुखः ।
शिशुरलंकुरुते भवनं सदा तदपि सा मुदती रुदती कुतः ॥ ४ ॥

आरोपिता शिलायामश्मेव त्वं भवेति मन्त्रेण ।
मग्नाऽपि [16]परिणयाऽऽपदि जारमुखं वीक्ष्य हसितैव ॥ ५ ॥

---

१ पक्वान्नं । पक्षे बालकः; २ दीपवर्तिः ३ विशेषेण दग्धा विदग्धा तस्या भावो वैदग्ध्यं तेन पक्षे चातुर्येण । ४ सदोषतां मलिनत्वं च । ५ दूषणानि रात्रिश्च ६ सौन्दर्यपूर्णम् । ७ ग्राम्यं न भवतीत्यग्राम्यं सद्व्यवहारचतुरम् ८ प्रेमबहुलम् । ९ मधुरभाषि । १० कुटुम्बम् । ११ अमंगला । १२ वृद्धत्वम् । १३ उपदेष्टा । १४ सुन्दरः अथ च सुष्टु भं नक्षत्रं तस्मिन् गच्छति. कुयोगं त्यक्त्वा भार्यां व्रजति. इदमेव रोदनकारणम् । १५ [illegible] । १६ परिणय[illegible] संकटे ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आः पाकं न करोषि पापिनि कथं पापी त्वदीयः पिता ।
रण्डे जल्पसि किं तवैव जननी रण्डा त्वदीया स्वसा ।
निर्गच्छ त्वरितं गृहाद्बहिरितो नेदं त्वदीयं गृहं
हाहा नाथ ममाऽद्य देहि मरणं जारस्य भाग्योदयः ॥ ६ ॥

पाणौ गृहीताऽपि पुरस्कृताऽपि स्नेहेन नित्यं परिवर्धिताऽपि ।
परोपकाराय भवेदवश्यं वृद्धस्य भार्या करदीपिकेव ॥ ७ ॥

वयं बाल्ये बालांस्तरुणिमनि यूनः परिणता-
वपीच्छामो वृद्धान् परिणयविधौ नः स्थितिरियम् ।
त्वचाऽऽरब्धं जन्मक्षपयितुमनेनैकपतिना
न मे गोत्रेपुत्रि क्वचिदपि सतीलाञ्छनमभूत् ॥ ८ ॥

कार्ये सत्यपि जातु याति न बहिर्नाऽप्यन्यमालोकते
साध्वीरप्यनुकुर्वती गुरुजनं श्वश्रूं च शुश्रूषते ।
विश्रम्भं कुरुते च पत्युरधिकं प्राप्ते निशीथे पुन-
र्निद्राणे[10] सकले जने शशिमुखी निर्याति रन्तुं[11] विटैः[12] ९

एषैव योषितां धन्या शीलं च लभते सुखम् ।
दिवा पतिव्रता भूयो नक्तं च कुलटा यतः ॥ १० ॥

कुलपतनं जनगर्हां बन्धनमपि जीवितस्य संदेहम् ।
अङ्गीकरोति सकलं वनिता परपुरुषसंसक्ता ॥ ११ ॥

ब्रह्मैव सत्यमखिलं नहि किंचिदस्ति
तस्मान्न मे सखि पराऽवरभेदबुद्धिः ॥
जारे तथा निजवरे सदृशोऽनुरागो
व्यर्थं किमर्थमसतीति कदर्थयन्ति ॥ १२ ॥

---

१ भगिनी । २ प्रीत्या तैलेन च । ३ बाल्यावस्थायाम् । ४ तारुण्ये । ५ श्राधंकन्ये ६ इच्छातिविषयान् कुर्मः । ७ कदाचित् । ८ [illegible] । ९ विश्वासम् । १० शयने । ११ क्रीडितुम् । १२ जारैः । १३ भ्रष्टताम् । १४ निन्दाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सखि सुखयत्यवकाशे[1] प्राप्तः प्रेयान् यथा तथा न गृहे ।
वातादवारितादपि भवति गवाक्षाऽनिलः शीतः ॥ १३ ॥

नाऽम्बुजैर्न कुमुदैरुपमेयं[2] स्वैरिणीनयनपङ्कजयुग्मम् ।
नोदये दिनकरस्य नवेन्दोः केवलं तमसि यस्य विकासः ॥ १४ ॥

तुलामारुह्य रविणा वृश्चिके निहितं पदम् ।
त्वया तु शिरसि न्यस्तमयत्नेनैव भोगिनाम्[3] ॥ १५ ॥

आकारेण शशी गिरा च परभृत[4] पारावतश्चुम्बने
हंसश्चङ्क्रमणे[5] समं दयितया रत्यां प्रमत्तो गजः ।
इत्थं भर्तरि मे समस्तयुवतिश्लाघ्येऽपि नो रोचते
मद्भाग्येन विवाहितः पतिरिति स्यान्नैकदोषो यदि ॥ १६ ॥

दृशा किंचित्किंचिच्चलितभुजलीलाविलसितैः
कराऽऽघातैः किंचिन्नखविलिखितैः किंचिदधिकम् ।
स्पृशन्त्यः संबाधे[6] गुरुभिरनभिप्रेक्षितपथे
यथेष्टं चेष्टन्ते[7] स्फुटकुचतटाः पश्य कुलटाः[8] ॥ १७ ॥

पर्यङ्कः स्वास्तरणः पतिरनुकूलो मनोहरं सदनम् ।
तृणमिव लघु मन्यन्ते कामिन्यश्चौर्यरतिलुब्धाः ॥ १८ ॥

दुर्दिवसे[9] घनतिमिरे दुःसंचारासु नगरवीथीषु ।
पत्युर्विदेशगमने परमसुखं जघनचपलायाः ॥ १९ ॥

दृष्टिं हे प्रतिवेशिनि[10] क्षणमिहाऽप्यस्मद्गृहे दास्यसि
प्रायेणाऽस्य शिशोः पिता न विरसाः कौपीरपः[11] पास्यति ।
एकाकिन्यपि यामि तद्वरमितः स्रोतस्तमालाऽऽकुलं
नीरन्ध्राः स्तनमालिखन्तु जठरच्छेदानलग्रन्थयः ॥ २० ॥

---

१ अवसरे । २ उपमातुंयोग्यम् । ३ सर्पाणां कामिनां च । ४ कोकिलः ५ भ्रमणे
६ जनसंमर्दे । ७ व्यापारंकुर्वते । ८ स्वैरिण्यः । ९ दुर्दिने । १० ' शेजारीण ' इ०
११ कूपसंबन्धिनीः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इह वटवृक्षे यक्षः प्रतिवसति दिवाऽपि यत्र भयसङ्का ।
तस्मिन्नभिनववध्वा नीता वीतोदयाः क्षणदाः ॥ २१ ॥
आयातासि विमुञ्च वेपथुभरं दृष्टासि केनापि नो
नीलं चोलमिदं विमुञ्च हरतु स्वेदं निशीथानिलः ।
इत्यन्तर्भयसन्नकण्ठमसकृद्यामीति तल्पंगता
त्रस्यन्ती परिरभ्यते सुकृतिभिः स्वैरं नवस्वैरिणी ॥२२॥

सामान्यता पुत्रप्रशंसा ।

श्रीः ॥ गृहे जानुचरः केल्यां मुग्धस्मितमुखाऽम्बुजः ।
पुत्रः पुण्यवतामेव पात्रीभवति नेत्रयोः ॥ १ ॥
स्वगर्भशुक्तिनिर्भिन्नं सुवृत्तं सुतमौक्तिकम् ।
वंशश्रीतिलकीभूतं मन्दभाग्यस्य दुर्लभम् ॥ २ ॥
वर्धते न चिरं लोके वंशलक्ष्मीरसन्ततिः[3] ।
स्वल्पाऽवशेषितस्नेहवर्तिमालेव दीपिका ॥ ३ ॥
अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति कथ्यते ॥ ४ ॥
आनन्दस्रुतिरात्मनोनयनयोरन्तः सुधाऽभ्यञ्जनं
प्रस्तारः प्रणयस्य मन्मथतरोः पुष्पं प्रसादो रतेः ।
आलानं[4] हृदयद्विपस्य विषयाऽरण्येषु संचारिणो-
र्दंपत्योरिह लभ्यते सुकृततः संसारसारः सुतः ॥ ५ ॥
दिग्वाससं गतव्रीडं जटिलं धूलिधूसरम् ।
पुण्याऽधिका हि पश्यन्ति गङ्गाधरमिवाऽऽत्मजम् ॥ ६ ॥
उरोरुहादुद्गमितैः पयोभिरापूर्य केल्या निजमास्यगर्भम् ।
फूत्कृत्य मातुर्वदने हसन्तं तनूभवं पश्यति कोऽपि धन्यः ७
कृतचङ्क्रममङ्गणेषु किंचित्कणवत्किङ्किणिरिङ्गदंघ्रिपद्मम् ।

१ रात्रयः । २ आनुभ्यां चरतीति जानुचरो रिंगमाण इत्यर्थः । ३ सन्ततिरहिता । ४ बन्धनस्तम्भः । ५ नग्नम् । ६ स्वपुत्रम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि सन्महितं सुतं श्रितं स्यात्तदिदं सद्म हितं भवेत्तदानीम् ॥ ८ ॥
अहं किमम्बा किमभीष्टेतापदे तत्रेति मातुर्धुरि तात पृच्छया ।
प्रलोभ्यतुल्यं भवदन्नमर्भकं मुदा हसन् जिघ्रति मूर्ध्नि पुण्यभाक् ९

निन्द्यते पितृभिस्तैस्तैर्निरपत्यधनः पुमान् ।
अध्वनीनैरति श्रान्तैरवकेशीव पादपः ॥ १० ॥

विषयनिन्दान्तर्गतपुत्रनिन्दा ।

श्रीः ॥ नानाशरीरकष्टैर्धनव्ययैः साध्यते यदा पुत्रः ।
उत्पन्नमात्रपुत्रे जीवितशङ्का गरीयसी तत्र ॥ १ ॥
जीवन्नपि किं मूर्खः प्राज्ञः किं शीलवान् भविता ।
जारश्चोरः पिशुनः पतितो द्यूतप्रियश्चापि ॥ २ ॥
पितृमातृबन्धुघाती मनसः खेदाय जायते पुत्रः ।
चिन्तयति तातनिधनं पुत्रो द्रव्याद्यधीशताहेतोः ॥ ३ ॥
सर्वगुणैरुपपन्नः पुत्रः कस्यापि कुत्रचिद्भवति ।
सोल्पायू रुग्णो वा ह्यनपत्यो वा तथापि खेदाय ॥ ४ ॥
पुत्रात्सद्गतिरिति चेत्तदपि प्रायोस्ति युक्त्यसहम् ।
नापुत्रस्य लोकोस्तीति श्रुत्या को वा प्रभाष्यते लोकः ॥ ५ ॥

विषयनिन्दान्तर्गतसुहृन्निन्दा ।

श्रीः ॥ तावत्सर्वे सुहृदो व्यत्ययतः शत्रवः सर्वे ।
अश्नन्ति चेदनुदिनं बन्दिन इव वर्णयन्ति संतृप्ताः ॥ १ ॥
तच्चेद्द्वित्रिदिनान्तरमभिनन्दन्तः प्रकुप्यन्ति ।
दुर्भरजठरनिमित्तं समुपार्जयितुं प्रवर्तते चित्तम् ॥ २ ॥

सत्पुत्रप्रशंसा ।

श्रीः ॥ एकोऽपि गुणवान् पुत्रो निर्गुणैः किं शतेन तैः ।
एकश्चन्द्रो जगच्चक्षुर्नक्षत्रैः किं प्रयोजनम् ॥ १ ॥

---

१ माता । २ इष्टस्थाने । ३ प्रलोभ्यस्य प्रलोभनार्थं दर्शितस्य वस्तुनोऽनुकरणम् ४ अवघ्राणं करोति । ५ पान्थैः । ६ वन्ध्यः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकेन हि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥ २ ॥

पात्रं न तापयति नैव मलं प्रसूते
स्नेहं न संहरति नैव गुणान् क्षिणोति ।
द्रव्याऽवसानसमये चलतां न धत्ते
सत्पुत्र एव कुलसद्मनि[1] कोऽपि दीपः ॥ ३ ॥

प्रज्ञया वा विसारिण्या[2] यो बलेन धनेन वा ।
धुरं[3] वहति गोत्रस्य जननी तेन पुत्रिणी ॥ ४ ॥

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि[4] संसारे मृतः को वा न जायते ॥ ५ ॥

विद्याविहीना बहवोऽपि पुत्रा कल्पायुषः सन्तु पितुः किमेतैः ।
क्षयिष्णुना[5]ऽपि कलावता[6] वा तस्य प्रमोदः शशिनेव[7] सिन्धोः ६

किं मृष्टं[8] सुतवचनं पुनरपि मृष्टं तदेव सुतवचनम् ।
मृष्टान्मृष्टतरं किं श्रुतिपरिपक्कं तदेव सुतवचनम् ॥ ७ ॥

एकेनाऽपि सुपुत्रेण विद्यायुक्तेन भासते ।
कुलं पुरुषसिंहेन[9] चन्द्रेणेव हि शर्वरी[10] ॥ ८ ॥

अजातमृतमूर्खाणां वरमाद्यौ न चाऽन्तिमः ।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥ ९ ॥

वरं गर्भस्रावो वरमपि च नैवाऽभिगमनं
वरं जातः प्रेतो वरमपि च कन्या विजनिता ।
वरं वन्ध्या भार्या वरमपि च गर्भेषु वसति-
र्नचाऽविद्वान् रूपद्रविणगुणयुक्तोऽपि तनयः ॥ १० ॥

---

१ कुलमेव सद्म गृहं तस्मिन् । २ प्रसरणशीलया । ३ कार्यभारम् । ४ भ्रमणशीले । ५ क्षयशीलेन । ६ कलापूर्णेन । ७ चन्द्रेण । ८ मधुरम् । ९ पुरुषश्रेष्ठेन । १० रात्रिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुपुत्रनिन्दा।

श्रीः ॥ किं तेन जातु जातेन मातृयौवनहारिणा।
आरोहति न यः स्वस्य वंशस्याऽग्रे ध्वजो यथा ॥ १ ॥
किं तया क्रियते धेन्वा या न दोग्ध्री न गर्भिणी।
कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ॥ २ ॥
एकेन शुष्कवृक्षेण दह्यमानेन वन्हिना।
दह्यते तद्वनं सर्वं दुष्पुत्रेण कुलं तथा ॥ ३ ॥
कोटरान्तः स्थितो वन्हिस्तरुमेकं दहेत्खलु।
कुपुत्रस्तु कुले जातः स्वकुलं नाशयत्यहो ॥ ४ ॥
अजातमृतमूर्खेभ्यो मृताऽजातौ सुतौ वरौ।
यतस्तावल्पदुःखाय यावज्जीवं जडो दहेत् ॥ ५ ॥
यस्य पुत्रो न वै विद्वान् न शूरो न च धार्मिकः।
अप्रकाशं कुलं तस्य नष्टचन्द्रेव शर्वरी ॥ ६ ॥
अविनीतः सुतो जातः कथं न दहनात्मकः।
विनीतस्तु सुतो जातः कथं न पुरुषोत्तमः ॥ ७ ॥

राजनीतिराजाश्रयादयः।

श्रीः ॥ राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम्।
राजन्यसति लोकेऽस्मिन्कुतो भार्या कुतो धनम् ॥ १ ॥
पर्जन्य इव भूतानामाधारः पृथिवीपतिः।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ २ ॥
यः कुलाऽभिजनाऽऽचारैरतिशुद्धः प्रतापवान्।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ ३ ॥
कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः।
अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान् ॥ ४ ॥

---

१ कदाचित्। २ यौवननाशकेन। ३ दोहनशीला। ४ 'ढोल' इति लोके। ५ प्रकाशरहितम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुहृदामुपकारकारणाद्द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलम् ॥ ५ ॥
बालोऽपि नाऽवमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ६ ॥
यस्य प्रसादे पद्माऽऽस्ते विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ७ ॥
यस्मिन्नेवाऽधिकं चक्षुरारोहयति पार्थिवः ।
सुतेऽमात्येऽप्युदासीने सलक्ष्म्याऽऽश्रियते जनः ॥ ८ ॥

राजन्दुधुक्षसि[1] यदि क्षितिधेनुमेतां
तेनाऽद्य वत्समिव लोकममुं पुषाण[2] ।
तस्मिंश्च सम्यगनिशं परितुष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ९ ॥

सत्याऽनृता च परुषा[3] प्रियवादिनी च
हिंस्रा[4] दयालुरपि चाऽर्थपरा वदान्या[5] ।
नित्यव्यया प्रचुरनित्यधनाऽऽगमा च
वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥ १० ॥

आज्ञा कीर्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण ११

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वानं[6] स्पृष्टो दहति पावकः ॥ १२ ॥
राजंस्त्वद्दर्शनेनैव गलन्ति त्रीणि तत्क्षणात् ।
रिपोः शस्त्रं कवेर्दैन्यं नीवीबन्धो मृगीदृशाम् ॥ १३ ॥
बहुधा राज्यलाभेन यस्तोषस्तव भूपते ।
बहुधाराज्य[7]लाभेन स तोषो मम भूपते ॥ १४ ॥

---

१ दोग्धुं कर्तुमिच्छसि । २ पोषणं कुरु । ३ कर्कशा । ४ घातुका । ५ दानशौण्डा । ६ होमकर्तारम् । ७ घृतम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजसेवा मनुष्याणामसिधारा[1]ऽवलेहनम् ।
पञ्चाननपरिष्वङ्गो[2] व्याली[3]वदनचुम्बनम् ॥ १५ ॥

इच्छेद्यस्तु सुखं निवस्तुमवनौ[4] गच्छेत्स राज्ञः सभां
कल्याणीं[5] गिरमेव संसदि[6] वदेत्कार्यं विदध्यात्कृती
अक्लेशाद्धनमर्जयेदधिपतेश्चावर्जयेद्वल्लभान्[7]
कुर्वीतोपकृतिं जनस्य जनयेत्कस्याऽपि नाऽपक्रियाम्[8] १६

अयुक्तं युक्तं वा यदभिहित[9]मज्ञेन विभुना
स्तुयादेतन्नित्यं जडमपि गुरुं तस्य विनुयात्[10] ।
निरस्तुर्निस्पृहं[11] कथमपि सभायामभिनये-[12]
त्स्वकार्यं संतुष्टे क्षितिभृति रहस्येव[13] कथयेत् ॥ १७ ॥

सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः[14]
संभावनागुणमवेहि तमीश्वराणाम्[15] ।
किं वाऽभविष्यदरुण[16]स्तमसां वधाय
तं चेत्सहस्रकिरणो[17] धुरि नाऽकरिष्यत् ॥ १८ ॥

आलोकान्त[18]प्रतिहततमोवृत्तिरासां प्रजानां
तुल्योद्योगस्तव च सवितुश्चाऽधिकारो मतो नः ।
तिष्ठत्येकः क्षणमधिपतिर्ज्योतिषां व्योममध्ये
षष्ठे काले त्वमपि लभसे देव विश्रान्तिमन्हः ॥ १९ ॥

भुजङ्गभोगसंक्रान्ता कलत्रं[21] तव मेदिनी ।
अहंकारः परां कोटिमारोहति कुतस्तव ॥ २० ॥

अचिराऽधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।
नवसंरोपणशिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥ २१ ॥

---

१ खड्गधारा २ सिंहालिंगनम् ३ सर्पिणी ४ पृथिव्याम् ५ मनोज्ञाम् ६ सभायाम् ७ प्रियान् ८ अपकारम् ९ उक्तम् १० तद्गुरोः स्तवनं कुर्यात् ११ निस्पृहताम् १२ अभिनयपूर्वकं दर्शयेत् १३ एकान्ते १४ भृत्याः १५ राज्ञाम् १६ सूर्यसारथिः १७ सूर्यः १८ लोकालोकपर्वतपर्यन्तम् [illegible] २१ भार्या ।

CC-0. Prof. Satya Vrat Shastri Collection.

१३

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्रतिबन्धं कार्यं प्रभुरधिगन्तुं सहायवानेव ।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥ २२ ॥

भोगिन[1]: कञ्चुका[2]ऽऽसक्ताः क्रूराः कुटिलगामिनः ।
सुदुष्टा मन्त्रसाध्या[3]श्च राजानः पन्नगा[4] इव ॥ २३ ॥

उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वन् लघून्वर्धय-
न्नत्युच्चान्नमयन्नतान्समुदयन् विश्लेषयन्संहतान् ।
क्रूरान् कण्टकिनो बहिर्निरसयन् म्लानान् पुनः सेचयन्
मालाकार इव प्रपञ्चचतुरो राजा चिरं नन्दति ॥ २४ ॥

अकस्माद्द्वेष्टि यो भक्तं[5] आजन्मपरिसेवितम् ।
न व्यञ्जने रुचिर्यस्य त्याज्यो नृप इवाऽऽतुरः ॥ २५ ॥

राजस्तुतिः ।

संग्रामा[6]ऽङ्गणमागतेन भवता चापे[7] समारोपिते[8]
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनाऽपि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥ १ ॥

अन्तर्विष्णो[9]स्त्रिलोकी निवसति फणिनामीश्वरे[10] सोऽपि शेते
सिन्धोः सोऽप्येकदेशे तमपि चुलकयां कुम्भयोनिश्चकार ।
धत्ते खद्योत[11]लीलामयमपि नभसि श्रीनृसिंहक्षितीन्द्र
त्वत्कीर्तेः कर्णनीलोत्पलमिदमपि च प्रेक्षणीयं विभाति ॥ २ ॥

अपायि[12] मुनिना पुरा पुनरमायि[13] मर्यादया
अतारि[14] कपिना[15] पुरा पुनरदाहि लङ्कारिणा ।
अमन्थि[16] मुरवैरिणा पुनरबन्धि[17] लङ्कारिणा
क नाम वसुधापते तव यशोऽम्बुधिः काम्बुधिः ॥ ३ ॥

---

१ विलासिनः भोगवन्तश्च २ कवचं पक्षे 'कांत' ३ विचारः (मसलत) पक्षे शाबरादिः ४ सर्पा इव ५ सेवकं ओदनं च ६ युद्धभूमिम् ७ धनुषि ८ सज्जीकृते ९ त्रिभुवनोदरे १० शेषे ११ ज्योतिरिंगणः 'काजवा' इति लो० १२ पीतः १३ मितः १४ तीर्णः १५ मारुतिना १६ मथितः १७ बद्धः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणबधिरश्राव्याः किलाऽकीर्तयः[1] ।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा-
न्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि ॥ ४ ॥

द्वारं खड्गिभिरावृतं[2] बहिरपि प्रस्विन्नगण्डैर्गजै-
रन्तः कञ्चुकिभिः[3] स्फुरन्मणिधरैरध्यासिता भूमयः ।
आक्रान्तं महिषीभिरेव[4] शयनं त्वद्विद्विषां मन्दिरे
राजन्सैव चिरंतनप्रणयिनी शून्येऽपि राजस्थितिः ॥ ५ ॥

त्वं द्वित्राणि पदानि गच्छसि महीमुल्लङ्घ्य यान्ति द्विषः[5]
स्त्वं बाणान् दशपञ्च मुञ्चसि परे सर्वाणि शस्त्राण्यपि ।
ते देवीपतयस्[6]त्वदस्त्रनिहतास्त्वं मानुषीणां पति-
र्निन्दा तेषु कथं स्तुतिस्तव कथं श्रीकर्ण निर्णीयताम् ॥ ६ ॥

कीर्तिस्तव क्षितिप याति भुजङ्गगेहे[7]
मातङ्गसंगमकरी[8] च दिगन्तरेषु ।
त्यक्त्वाऽम्बरं[9] व्रजति नन्दनम[10]प्यकम्पं[11]
किं किं करोति न निर्गलतां[12] गता स्त्री ॥ ७ ॥

मदनवर्णनम् ।

श्रीः ॥ शंभुस्वयंभुहरयो हरिणेक्षणानां[13]
येनाऽक्रियन्त सततं गृहकर्मदासाः[14] ।
वाचामगोचरचरित्रविचित्रिताय
तस्मै नमो भगवते कुसुमाऽऽयुधाय[15] ॥ १ ॥

---

१ अन्वयः इयं मिथ्याध्यवसितिः अनेन राज्ञः अकीर्तिरेव नास्तीति सूचितम् २ खड्गधारिभिः गण्डकैश्च ' गेंडे ' इति लो० । ३ सर्पैः द्वारपालैश्च । ४ पट्टाभिषिक्तस्त्रीभिः । ५ वैरिणः । ६ देवाङ्गनास्वामिनः । ७ पाताले जारगृहे च । ८ दिक्करिसमागमकरी अन्त्यजसंगकरी च । ९ वस्त्रं आकाशं च १० इन्द्रवनं पुत्रं च ११ निर्भयम् १२ निष्प्रतिबन्धत्वम् १३ स्त्रीणाम् १४ गृहकर्मकारा दासाः १५ मदनाय ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः ।
यतस्तन्नेत्र[1]संचारसूचितेषु प्रवर्तते ॥ २ ॥

न गम्यो मन्त्राणां न च भवति भैषज्यविषयो[2]
न चाऽपि प्रध्वंसं[3] व्रजति विविधैः शान्तिकशतैः ।
भ्रमाऽऽवेशादङ्गे किमपि विदधद्भङ्ग्यमसमं
स्मराऽपस्मारो[4]ऽयं भ्रमयति दृशं घूर्णयति च ॥ ३ ॥

अनङ्गनाऽबलासङ्गाज्जिता येन जगत्त्रयी ।
सचित्रचरितः कामः सर्वकामप्रदोऽस्तु वः ॥ ४ ॥

कुलगुरुरबलानां केलिदीक्षाप्रबन्धे
परमसुहृदनङ्गो रोहिणीवल्लभस्य ।
अपि कुसुमपृषत्कै[5]र्देवदेवस्य जेता
जयति सुरतलीलानाटिकासूत्रधारः ॥ ५ ॥

अद्याऽपि नूनं हरकोपवह्नि-
स्त्वयि ज्वलत्यौर्व[6] इवाम्बुराशौ[7] ।
त्वमन्यथा मन्मथ मद्विधानां
भस्माऽवशेषः कथमेवमुष्णः ॥ ६ ॥

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं[8] दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि[9] ॥ ७ ॥

स्तोकाऽस्त्रसाधनवता भवता मनोज
स्वैरं[10][12] जगज्जितमनङ्गतयाऽपि सर्वम् ।
स्याच्चेद्भवान् बहुशरः प्रतिलब्धगात्रः
कुर्यास्ततो यदपि कर्म कियन्न जाने ॥ ८ ॥

---

१ नेत्रकटाक्षपातेन सूचितेषु २ औषधोपायसाध्यः ३ नाशम् ४ भूतोन्मादो रोगविशेषः ५ पुष्पबाणैः ६ वडवाग्निः ७ समुद्रे ८ असत्यम् ९ वज्रमिव कठिनान् करोषि १० अल्पानि ११ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकं वस्तु द्विधा कर्तुं बहवः सन्ति धन्विनः ।
धन्वी स मार एवैको द्वयोरैक्यं करोति यः ॥ ९ ॥

न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः ।
तथाऽपि जितमेवाऽऽसीदमुना भुवनत्रयम् ॥ १० ॥

हृदयतृणकुटीरे[1] दीप्यमाने स्मराऽग्ना-
वुचितमनुचितं वा वेत्ति नो पण्डितोऽपि ।
किमु कुवलयनेत्राः सन्ति नो नाकनार्य-
स्त्रिदशपतिरहल्यां[2] तापसीं यः सिषेवे ॥ ११ ॥

शिवशिव हि शिवेन पुष्पधन्वा प्रलयनटेन[3] किमित्यकारि[4] भस्म ।
स हि पुनरुदित[5]श्छलाय[6] लोके स तु मणिमन्त्रमहौषधैरसाध्यः[7] ॥ १२

पान्थोक्तिप्रत्युक्तयः ।

श्रीः ॥ भोः[8] पान्थ पुस्तकधर क्षणमत्र तिष्ठ
वैद्योऽसि किं गणितशास्त्रविशारदोऽसि ।
केनौषधेन मम पश्यति भर्तुरम्बा
किंवाऽऽगमिष्यति पतिः सुचिरप्रवासी ॥ १ ॥

कस्येयं[9] तरुणि प्रपा[10] पथिक नः किं पीयतेऽस्यां पयो[11]
धेनूनामथ माहिषं बधिर रे वारः[12] कथं मङ्गलः ।
सोमो वाऽथ शनैश्चरोऽमृतमिदं[13] तत्तेऽधरे दृश्यते
श्रीमत्पान्थ विलाससुन्दर सखे यद्रोचते तत्पिब ॥ २ ॥

---

१ हृदयमेव तृणकुटीरं तृणगृहम् २ इन्द्रः ३ प्रलयकालिको नर्तकः शिव इति यावत् ४ कृतः ५ उत्पन्नः ६ छलं कर्तुम् ७ अचिकित्स्यः ८ कक्षे पुस्तकधारिणं पान्थं प्रति कस्याश्चित्कामिन्याः स्वाभिप्रायसूचिकोक्तिः औषधप्रश्नेन श्वश्र्वा अन्धत्वं सूचितं प्रोषितस्य पत्युः कदा आगमनं भविष्यतीति प्रश्नेन सोऽपि गृहे नाऽस्तीति सूचितम् ९ कस्येति इयं छलोक्तिः १० पानीयशालिका ११ पयो जलं क्षीरं च १२ अहानि सोमादिवासरश्च १३ उदकं पीयूषं च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामिनीकाय[1]कान्तारे कुचपर्वत[2]दुर्गमे ।
मा संचर मनः[3]पान्थ तत्राऽऽस्ते स्मर[4]तस्करः ॥ ३ ॥

वाणिज्येन[5] गतः स मे गृहपति[6]र्वार्ताऽपि न श्रूयते
प्रातस्तज्जननी प्रसूततनया जामातृगेहं गता ।
बालाऽहं नवयौवना निशि कथं स्थातव्यमस्मिन्गृहे
सायं संप्रति वर्तते पथिक हे स्थानान्तरं गम्यताम् ॥४॥

यामि[7]न्येषा बहुलजलदैर्बद्धभीमाऽन्धकारा[8]
निद्रां यातो मम पतिरसौ क्लेशितः कर्मदुःखैः[9] ।
बाला चाऽहं मनसिजभयात्[10]प्राप्तगाढप्रकम्पा
ग्रामश्चोरैरयमुपहतः पान्थ निद्रां जहीहि ॥ ५ ॥

भवनमिव मदीयं निर्जनः पान्थ पन्थाः
कुसुमशर इवाऽस्मिंस्तस्करा दुर्निवाराः ।
गृहप[11] इव पतङ्गो[12]ऽप्येष यातो दिगन्तान्
मदनसुभग भूयो नैव गन्तुं समीहे ॥ ६ ॥

रे रे पान्थ कुतो भवान्नगरतो वार्ता न चाऽपि श्रुता
बाढं[13] ब्रूहि युवा पयोदसमये[14] हित्वा प्रियां जीवति ।
सत्यं जीवति जीवतीति कथिता वार्ता मयाऽपि श्रुता
विस्तीर्णा पृथिवी जनोऽपि विविधः किं किं न संभाव्यते ७

शून्यं वेश्म चिरायितो[15] गृहपतिर्जाताऽधुना शर्वरी
स्थातुं नोचितमत्र गच्छ निभृतं लोकैरनालक्षितः[16] ।
इत्थं लोलदृशा हासाध्वभिहितो दासीजनेनाऽध्वगः
स्थित्वा किंचिदिव क यामि रजनीप्राप्तेत्युदीर्य[17] स्थितः ८

१ कामिन्याः काय एव दुर्गमो मार्गस्तस्मिन् २ कुचावेव पर्वतौ ताभ्यां दुर्लङ्घ्ये ३ मन एव पान्थ ४ स्मर एव तस्करः तत्राऽस्ते अतो मा संचारं कुर्विति मान-संप्रति बोधः ५ वाणिज्यार्थम् परदेशं गतः ६ भर्ता ७ रात्रिः ८ भयंकरगाढान्धकारा ९ कर्मजन्यैर्दुःखैः श्रान्त इत्यर्थः १० उक्तहेतुभिर्मनसिजातं यद्भयं तस्मात् अथ च कामभयात् ११ गृहस्वामीव १२ सूर्यः १३ सत्यम् १४ वर्षाकाले १५ चिरकालं दूरं गतः १६ अदृष्टः १७ उक्त्वा ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामेऽस्मिन् प्रस्तरप्राये न किंचित्पान्थ विद्यते ।
पयोधरोन्नतिं दृष्ट्वा वस्तुमिच्छसि चेद्वस ॥ ९ ॥
पान्थ मन्दमते किंवा संतापमनुविन्दसि ।
पयोधरं समाशास्व येन शान्तिरवाप्नुयात् ॥ १० ॥
त्वमिव पथिक प्रियो मे विटपिस्तोमेषु गमयति क्लेशान् ।
किमितोऽन्यत्कुशलं मे संप्रति यत्पान्थ जीवामि ॥ ११ ॥
किमिति कृशाऽसि कृशोदरि किं तव परकीयवृत्तान्तैः ।
कथय तथाऽपि मुंदे मम कथयिष्यति पान्थ तव जाया १२
यथोर्ध्वाक्षः पिबत्यम्बु पथिको विरलाऽऽङ्गुलिः ।
तथा प्रपापालिकाऽपि धारां वितनुते तनुम् ॥ १३ ॥
भोः पान्थ त्वरितोऽसि तिष्ठ निमिषं किंचिद्वदामो वयं
मार्गोऽयं पुरतो द्विधा खलु भवेद्ग्रामेन नो गम्यताम् ।
तत्राऽऽस्ते सहकारकोमलतरोर्मूले प्रपापालिका
तस्यालोचनवागुरानिपतितो न त्वं पुनर्यास्यसि॥१४॥

कामातुरः ।

श्रीः!! असुलभा सकलेन्दुमुखी च सा किमपि चेदमनङ्गविचेष्टितम्।
अभिमुखीष्विव वाञ्छितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः१
अपराधी नूनमहं प्रसीद रम्भोरु विरम संरम्भात् ।
सेव्यो जनश्च कुपितः कथं नु दासो निरपराधः ॥ २ ॥
कदा कान्ताऽगारे परिमलमिलत्पुष्पशयने
शयानः श्यामायाः कुचयुगमहं वक्षसि वहन् ।
अये स्निग्धे मुग्धे चपलनयने चन्द्रवदने
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥ ३ ॥

---

१ पाषाणमये २ पयोधराणां मेघानां पक्षे स्तनयोरुन्नतिम् ३ मेघं स्तनं च
४ सम्यक्प्रार्थनां कुरु ५ कान्तः ६ वृक्षसमूहेषु ७ हर्षाय ८ वामभागेन ९ लोचन-
मेव वागुरा मृगबन्धिनी जालमित्यर्थः १० इष्टसिद्धिषु ११ संतापम् १२ कोपात् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परस्त्रीसंभोगनिन्दा ।

श्रीः ॥ परस्त्रीस्मरणेनापि कोऽप्यनर्थागमः क्षणात्
दृष्टौ कुलादिहंतारौ हा दुर्योधनरावणौ ॥ १ ॥
अन्यकान्तामिषान्मन्ये कृतान्तोऽवततार ह ।
नोचेदिन्द्रादिदेवानामपि तद्विपदः कुतः ॥ २ ॥
अपि प्रारब्धदुःखानि प्राणान्तान्यपि देहिनः ।
परं तु नेतरस्त्रीणां यच्छ स्वप्नेपि संस्मृतिम् ॥ ३ ॥
किं जङ्गमेयं मदिरा किंवा विषमहालता ।
यद्वा ज्वालैव वडवानलस्य तरुणीमिषात् ॥ ४ ॥
परनारी महामारी सृष्टाऽकारि यतस्ततः ।
किमित्येष पुनर्मृत्युः सर्वज्ञेनापि निर्मितः ॥ ५ ॥

विषयनिन्दा ।

श्रीः ॥ मूढः कुरुते विषयजकर्दमसंमर्दमर्दनं मिथ्या ।
दुरदृष्टवृष्टिभिरिदं गेहं गेहं पतत्येव ॥ १ ॥
भार्यारूपविहीना मनसः खेदाय जायते पुंसाम् ।
अत्यन्तं रूपवती सा परपुरुषैर्वशीक्रियते ॥ २ ॥
यः कश्चित्परपुरुषो मित्रं भृत्योऽथ वा भिक्षुः ।
पश्यति हि साभिलाषं विवक्षितोदाररूपवतीम् ॥ ३ ॥
यं कंचित्परपुरुषं स्वभर्तुरतिसुन्दरं दृष्ट्वा ।
मृगयति न किं मृगाक्षीमनसैव परस्त्रियं पुरुषः ॥ ४ ॥
एवं सुरूपभार्या भर्ता रूपात्प्रतिक्षणं क्षीणः ।
नो लभते सुखलेशं बलिमिव बलिभुग्बलिष्ठेकः ॥ ५ ॥
वनिता नितान्तमज्ञा स्वाज्ञामुलङ्घ्य वर्तते यदि सा ।
शत्रोरप्यधिकतरा पराभिलाषिण्यसौ किमुत ॥ ६ ॥
योषा सुरूपवेषा यदि भर्तृमनोनुकूलमाचरति ।
पतिदेवता मृता चेत्किं वक्तव्यं तदा हि यः खेदः ॥७॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तारुण्यमदनिन्दा ।

श्रीः ॥ तरुणः प्रायशः सर्वपापसंपादको भवेत् ।
नहि दारुगतो वह्निर्दहेद्दारूणि कुत्रचित् ॥ १ ॥
यौवनाम्भोनिधिं को वा तरेज्ज्ञानप्लवं विना ।
किं कोपशमनं कापि दृष्टं शान्त्युदयं विना ॥ २ ॥
मातरं पितरं भ्रातॄन् गुरूनपि युवा क्षिपेत् ।
अतस्त एव पुरुषा ये धीरास्तरुणा अपि ॥ ३ ॥
तारुण्यमिव सर्वेषां सुयादीनामपि मादकम् ।
मद्यमस्ति तथाप्येतन्नैवात्राविशति स्वयम् ॥ ४ ॥
मन्ये मोहपिशाचस्य स्थानं यौवनदुर्वनम् ।
यत्र कामादयः क्रूरा यातुधानाः सहस्रशः ॥ ५ ॥

विरहिजनोक्तिः ।

श्रीः ॥ चन्द्रश्चण्डकरायते[1] मृदुगतिर्वातोऽपि वज्रायते
माल्यं सूचि[2]कुलायते मलयजाऽऽलेपः[3] स्फुलिङ्गायते[4] ।
रात्रिः कल्पशतायते[5] विधिवशात्प्राणोऽपि भारायते
हा हन्त प्रमदावियोगसमयः संहारकालायते ॥ १ ॥
तारापते कुमुदिनीमनुकूलकान्तां
पादेन पीडयसि कम्पयसि द्विजातीन्[6] ।
विद्वेषमाचरसि किंच वियोगिलोके
नक्तंचरस्य[7] भवतः करुणा कुतः स्यात् ॥ २ ॥
भो रोहिणि त्वमसि रात्रिचरस्य भार्या
एनं निवारय पतिं सखि दुर्निवारम् ।

---

१ चण्डकरः सूर्यस्तद्वदाचरति २ 'सुई' इति लो० ३ चन्दनलेपः ४ अग्निकण इवाचरति ५ शतकल्पमितवाचरति ६ पक्षिणः पक्षे ब्राह्मणान् ७ रात्रिचरस्य पक्षे राक्षसस्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जालान्तरेण मम सद्मनि सन्निविष्टः
श्रोणीतटं स्पृशति किं कुलधर्म एषः ॥ ३ ॥

जटा नेयं वेणीकृतकचकलापो न गरलं[1]
गले कस्तुरीयं शिरसि शशिरेखा न कुसुमम् ।
इयं भूतिर्[2]नाऽङ्गे प्रियविरहजन्मा धवलिमा[3]
पुरारातिभ्रान्त्या[4] कुसुमशर किं मां व्यथयसि ॥ ४ ॥

रे रे निर्दय[5] दुर्निवार मदन प्रोत्फुल्ल[6]पङ्केरुहं
बाणं संवृणु[7] संवृणु त्यज धनुः किं पौरुषं मां प्रति ।
कान्तासंगवियोगदुःखदहनज्वालाऽवलीढं वपुः
शूराणां मृतमारणे न हि पुरा धर्मः प्रयुक्तो बुधैः ॥ ५ ॥

आस्वाद्य निर्विशेषं विरहिवधूनां मृदूनि मांसानि ॥
करकामिषेण मन्ये निष्ठीवति नीरदो[9]ऽस्थीनि ॥ ६ ॥

परिम्लानं पीनस्तनजघनसङ्गादुभयत—
स्तनोर्मध्यस्याऽन्तःपरिमिलनमप्राप्य हरितम्[10]
इदं व्यस्तन्यासं प्रशिथिलभुजाऽऽक्षेपचलनैः
कृशाङ्ग्याः संतापं वदति नलिनीपत्रशयनम्[11] ॥ ७ ॥

आदातुं सकृदीक्षितेऽपि कुसुमे हस्ताऽग्रमालोहितं
लाक्षारञ्जनवार्तयाऽपि सहसा रक्तं तलं पादयोः ।
अङ्गानामनुलेपनस्मरणमप्यत्यन्तखेदाऽऽवहं
हन्ताऽधीरदृशः[12] किमन्यदलका[13]ऽऽमोदोऽपि भारायते ॥ ८ ॥

अयं रेवा[14]कुञ्जः[15] कुसुमशरसेवासमुचितः
समीरोऽयं वेलानवविदलदेलापरिमलः ।

---

१ विषम् २ भस्म ३ पाण्डुरता ४ शिवभ्रान्त्या ५ निष्करुण ६ विकसितम् ७ उपसंहर ८ 'नारा' इति० ९ मेघः निर्गताः रदाः दन्ता यस्य दन्तानामभावाद-स्थिचर्वणासमर्थः संस्त्यजतीति भावः १० हरिद्वर्णम् ११ शय्या १२ चञ्चलदृशः १३ केशरञ्जनचूर्णम् १४ नर्मदा १५ लतागृहम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं प्रावृड् धन्या नवजलदविन्यासचतुरा
पराधीनं चेतः सखि किमपि कर्तुं मृगयते ॥ ९ ॥

अङ्गाऽसङ्गिमृणालकाण्डमयते भृङ्गाऽऽवलीनां रुचं
नासामौक्तिकमिन्द्रनीलसरणिं श्वासाऽनिलाद्गाहते ।
क्षिप्ता सा हिमवालुकाऽपि कुचयोर्धत्ते क्षणं दीप्ततां
तप्ताऽधःपतिताऽम्बुवत्करतले धाराम्बु संलीयते ॥ १० ॥

यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायाऽनुकारी शशी ।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गता—
स्त्वत्साद्दश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ ११ ॥

बकुलमालिकयाऽपि मया न सा तनुरभूषि तदन्तरभीरुणा ।
तदधुना विधिना कथमावयोर्गिरिदरीनगरीशतमन्तरम् ॥ १२ ॥

यस्य कान्ताऽस्ति दूरस्था नवा पीनपयोधरा ।
तस्य तापस्य शान्त्यर्थं न वापी न पयोधराः ॥ १३ ॥

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवितप्रियसुहृत्सार्थः किमुत्सृज्यते ॥ १४ ॥

स्वयमप्राप्तदुःखो यः स दुनोति न विस्मयः ।
त्वं स्मर प्राप्तदाहोऽपि दहसीति किमुच्यते ॥ १५ ॥

हारो नाऽऽरोपितः कण्ठे मया विश्लेषभीरुणा ।
इदानीमन्तरे जाताः पर्वताः सरितो द्रुमाः ॥ १६ ॥

---

१ बिसखण्डम् २ प्राप्नोति ३ भृंगपङ्क्तीनाम् ४ कान्तिम् ५ कर्पूरः ६ तप्तलोह-पतितजलवत् ७ छादितः ८ नवीना ९ पुष्टस्तनी १० 'विहीर' इति लो० ११ नेत्राः १२ कंकणैः १३ नेत्रोदकैः १४ निरन्तरम् १५ उपवेशनं कृतम् १६ निश्चितम् १७ तापयति १८ वियो[illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरमत[1] विरमत सख्यो नलिनीदलतालवृन्तपवनेन ।
हृदयगतोऽयं वन्हिर्झटिति कदाचिज्ज्वलत्येव ॥ १७ ॥
बिभेमि सखि संवीक्ष्य भ्रमरीभूतकीटकम् ।
यद्ध्यानादागते पुंस्त्वे तेन सार्धं रतिः कथम् ॥ १८ ॥
याः पश्यन्ति प्रियं स्वप्ने धन्यास्ताः सखि योषितः ।
अस्माकं तु गते कान्ते गता निद्राऽपि वैरिणी ॥ १९ ॥
यदि प्रिया वियोगेऽपि रुद्यते[2] दीनदीनकम् ।
तदिदं दग्धमरणमुपयोगं क्व यास्यति ॥ २० ॥
दिव्यचक्षुरहं[3] जातः सरागेणापि चक्षुषा ।
इहस्थो येन पश्यामि देशान्तरगतां प्रियाम् ॥ २१ ॥
नूनमयं मे पापः कान्ताविरहो रसायनीभूतः[4] ।
वर्षसहस्राऽभ्यधिकान्नयामि कथमन्यथा दिवसान् ॥ २२ ॥
केशैः केसरमालिकामपि चिरं या बिभ्रती खिद्यते
या गात्रेषु घनं विलेपनमपि न्यस्तं न सोढुं क्षमा ।
दीपस्याऽपि शिखां न वा स्वभवने शक्नोति या वीक्षितुं ।
तापं सा विरहाऽनलस्य महतः सोढुं कथं शक्ष्यति ॥ २३ ॥

अपसरति न चक्षुषो मृगाक्षी
रजनिरियं च न याति नैति निद्रा ॥
प्रहरति मदनोऽपि दुःखितानां
बत बहुशोऽभिमुखीभवन्त्यपायाः ॥ २४ ॥
हृदि विलसितो हारो नाऽयं भुजङ्गमनायकः[5]
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ॥
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्याऽनङ्ग क्रुधा किमु धावसि ॥ २५ ॥

---

१ विरामं कुरुत २ रोदनं क्रियते ३ अतीन्द्रियज्ञानवान् ४ जीवनधारकरूपं धनरूपो जातः ५ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रिडानिर्जितविश्वमूर्छितजनाऽऽघातेन किं पौरुषम् ।
तस्या एव मृगीदृशो मनसिजप्रेंखत्कटाक्षाऽनल-
श्रेणीजर्जरितं मनागपि मनो नाऽद्यापि संधुक्षते ॥२६॥

पादांगुष्ठेन भूमिं किसलय[1]रुचिना सा[2]ऽपदेशं लिखन्ती
भूयोभूयः क्षिपन्ती मयि सितशबले लोचने लोल[3]तारे ।
वक्त्रं ह्री[4]नम्रमीषत्स्फुरदधरपुटं वाक्यगर्भं दधाना
यन्मां नोवाच किंचित्स्थितमपि पुरतो मानसं तद्दु[5]नोति ॥२७॥

व्रीडा[6]योगान्न[7]तमुखतया सन्निधाने गुरूणां
बद्धोत्कम्पस्तनकलशयोर्मन्यु[8]मन्तर्निगृह्य[9] ।
तिष्ठेत्युक्तं किमिव नतया यातमुत्सृज्य वाष्पं
मय्यासन्नश्चकितहरिणीहारिनेत्रत्रिभागः ॥ २८ ॥

निद्राऽर्धमीलितदृशोर्मदमन्थराणि[10]
नाऽप्यर्थवन्ति न च नाम निरर्थकानि ।
अद्याऽपि मे मृगदृशो मधुराणि तस्या
न्यस्ताक्षराणि हृदये किमपि ध्वनन्ति ॥ २९ ॥

मुखं तस्याः स्मितस्मेरं[11] किंचिदञ्चल[12]संवृतम् ।
मदाऽऽलोकनलोलाक्षं स्मृत्वा मन्ये सुधां[13] मुधा[14] ॥ ३० ॥

इदं[15] मशि[16] शिशिरैरन्त[17]स्तापाद्विवर्ण[18]मणीकृतं
निशि निशि भुजन्यस्ताऽपाङ्ग[19]प्रवर्तिभिरश्रुभिः ।

---

१ कोमलपल्लवकान्तिना । २ सव्याजम् । ३ लोला चञ्चला तारा कनीनिका ययोः । ४ लज्जया नम्रम् । ५ संतापयति । ६ लज्जा । ७ नम्रमुखत्वेन । ८ क्रोधं । ९ रुद्ध्वा । १० मन्दानि । ११ स्मितेन हास्येन स्मेरं प्रसन्नम् । १२ वस्त्राञ्चलेन संवृतं अवगुण्ठितम् । १३ अमृतम् । १४ व्यर्थम् । १५ अस्य कनकवलयमित्यनेन संबन्धः । १६ उष्णैः अश्रुभिरित्यनेन संबन्धः । १७ अभ्यन्तरे विरहजन्यतापाद्धेतोः । १८ विवर्णा हीनवर्णा मणयो यस्मिन्नेवंविधं कृतम् । १९ नेत्रप्रान्तः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनतिलुलितज्यांघाताऽङ्कं मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तस्रस्तं पुनः प्रतिसार्यते ॥ ३१ ॥

तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव ।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः॥३२

त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे ।
दिनोऽवसाने छायेव पुरोमूलं वनस्पतेः ॥ ३३ ॥

सखि पतिविरहहुताशः किमिति प्रशमं न याति नयनोदैः ।
शृणु कारणं नितम्बिनि मुञ्चसि नयनोदकं तु सस्नेहम् ॥३४॥

काचिद्विलोलनयना रमणे स्वकीये
दूरंगते सति मनोभवबाणखिन्ना ।
त्यक्तुं शरीरमचिरान्मलयाद्रिवायुं
सौरभ्यशालिनमहो पिबति स्म चित्रम् ॥ ३५ ॥

उपनिषदः परिपीताः गीताऽपि च हन्त मतिपथं नीता ।
तदपि न हा विधुवदना मानससदनाद्बहिर्याति ॥ ३६ ॥

गुरुमध्ये हरिणाक्षी मौक्तिकशकलैर्निहन्तुकामं माम् ।
रदयन्त्रितरसनाग्रं तरलितनयनं निवारयांचक्रे ॥ ३७ ॥

अङ्गानि मे कान्तवियोगवन्हिः
संरक्षतु प्रियतमो हृदि वर्ततेऽसौ ।
इत्याशया शशिमुखी गलदश्रुवारि-
धाराभिरुष्णमभिषिञ्चति हृत्प्रदेशम् ॥ ३८ ॥

---

१ मौर्वीघर्षणजन्यः किणः । २ सुवर्णकङ्कणम् । ३ वारंवारंगलितम् ... । ४ ... । ५ सायंकाले । ६ पत्युर्विरहो वियोग एव हुताशोऽग्निः । ७ नयनोदकैरश्रुभिरिति यावत् । ८ मलयस्य चन्दनेष्वनिशं सर्पनिवासात्तच्छ्वाससंपृक्तस्य वायोः सविषत्वात्तत्पानेन झटिति मे मरणं स्यादिति बुद्ध्या तं पपाविति गूढाभि... । ९ ब्रह्मप्रतिपादकाः श्रुतिशिरोभागाः । १० ... । ११ मुक्ताखण्डैः । १२ दन्ता...

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्तकुसुमाकरं[१] तदनु पूर्णचन्द्रोदयं[२]
निदानम्[३]अविचारयन्[४] दिशतु[५] हन्त मारो[६] भिषक्[७] ।
त्वदीयविरहज्वरो मयि विजृम्भते सांप्रतं
तवाऽधररसायनं तरुणि देहि दिव्यौषधम् ॥ ३९ ॥

वियोगवह्निकुण्डेऽस्मिन् हृदये ते वियोगिनि ।
प्रियसङ्गसुखायैव मुक्ताहारस्[८]तपस्यति ॥ ४० ॥

अहमिह स्थितवत्यपि तावकी त्वमपि तत्र वसन्नपि मामकः ।
न तनुसंगम एव सुसंगमो हृदयसंगम एव सुसंगमः ॥ ४१ ॥

इह नगरे प्रतिरथ्यं[९] भुंजङ्ग[१०]सम्बाध[११]रुद्धसंचारे ।
शृणु सखि साधनमेकं नकुल[१२]प्रतिपालनं श्रेयः ॥ ४२ ॥

स्वच्छं सज्जनचित्तवल्लघुतरं दीनाऽर्तिवच्छीतलं
पुत्राऽऽलिङ्गनवत्तथैव मधुरं बालस्य संजल्पवत्[१३] ।
एलोशीरलवङ्गचन्दनलसत्कर्पूरकस्तूरिका-
पाटल्युत्पलकेतकीसुरभितं पानीयमानीयताम् ॥ ४३ ॥

वक्त्राम्भोजे सरस्वत्य[१४]भिवसति सदा शोण[१५] एवाऽधरस्ते
पाणिः काकुत्स्थवीर्यस्मृतिकरणपटुर्दक्षिणस्ते समुद्रः[१६] ।
वाहिन्यः[१७] पार्श्वमेताः कथमपि भवतो नैव मुञ्चन्त्यभीक्ष्णं
स्वच्छेऽन्तर्मानसेऽस्मिन्कथय नरपते तेऽम्बुपानाऽभिलाषः ॥ ४४ ॥

---

१ वसन्तकुसुमाकरनामकमौषधम् पक्षे वसन्तऋतुः स चासौ कुसुमाकरश्च । २ पूर्णचन्द्रोदयाख्यं रसायनं पक्षे पूर्णो यश्चन्द्रस्तस्योदयम् । ३ रोगोत्पत्तिकारणम् । ४ विचारमकुर्वन् । ५ ददातु । ६ मदनः । ७ वैद्यः । ८ मुक्तस्त्यक्तः आहारो येन पक्षे मुक्तानां मौक्तिकानां हारः । ९ रथ्यायां रथ्यायाम् । १० सर्पा जाराश्च । ११ संमर्दः (दाटी गर्दी) इति लो० । १२ नकुलं 'मुंगुस' पालनं पक्षे न इति पदच्छेदः कुलप्रतिपालनं न श्रेयः अत्र द्वितीयचरणे भुजंगवासोऽनिरुद्ध-संचार इत्यपि पाठः अत्र पाठे सर्पाणां पक्षे जाराणां च निवासः न निरुद्धोऽनिरुद्धः संचारो यस्यैवंविध इति । १३ भाषणवत् । १४ वापी नदीविशेषश्च । १५ आरक्तः नदविशेषश्च । १६ मुद्राभिः सहितः [illegible] । १७ सेना नद्यश्च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणेश विज्ञप्तिरियं मदीया तत्रैव नेया दिवसाः कियन्तः ।
संप्रत्ययोग्यस्थितिरेष देशः करा हिमांशोरपि तापयन्ति ॥४५॥
करा हिमांशोरपि तापयन्तीत्येतत्प्रिये चेतसि नैव शङ्क्यम् ।
वियोगतप्तं हृदयं मदीयं तत्र स्थितां त्वां समुपैति तापः ॥४६॥

कान्तां दृष्ट्वा चरणयुगलक्षालनाय प्रवृत्ता-
मस्मिन् राष्ट्रे श्रियमिति वचः [1]पापटीति प्रयत्नात् ।
देवस्यत्वेति च पुनरसौ वीटि[2]कायाः प्रदाने
जामाता ते जडमतिरयं छा[3]न्दसः किं करोमि ॥ ४७ ॥

क प्रस्थिताऽसि करभोरु [4]घने [5]निशीथे
प्राणाऽधिपो वसति यत्र निजः प्रियो मे ।
एकाकिनी वद कथं न बिभेषि बाले
नन्वस्ति [6]पुंखितशरो मदनः सहायः ॥ ४८ ॥

निःशेषच्युतचन्दनं स्तनतटं [7]निर्मृष्टरागोऽधरो
नेत्रे दूरम[8]नञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूतिबांधवजनस्याऽज्ञातपीडाऽऽगमे
वापीं स्नातुमितो गताऽसि न पुनस्तस्याऽधमस्याऽन्तिकम् ४९

कथमपि सखि क्रीडाकोपाद्व्रजेति मयोदिते
कठिनहृदयस्त्यक्त्वा शय्यां बलाद्गत एव सः ।
इति सरभसध्वस्तप्रेम्णि व्यपेतघृणे स्पृहां
पुनरपि सहव्रीडं [10]चेतः करोति करोमि किम् ॥५०॥

पुराभूदस्माकं प्रथममविभिन्ना तनुरियं
ततो नु त्वं प्रेयानहमपि हताशा प्रियतमा ।
इदानीं नाथस्त्वं वयमपि [12]कलत्रं किमपरं
मयाऽऽप्तं प्राणानां [13]कुलिशकठिनानां फलमिदम् ॥ ५१ ॥

---

१ अतिशयेन पुनः पुनर्वा पठति । २ ताम्बूलस्य । ३ वैदिकः स्वच्छन्दा-नुवर्ती वा । ४ निबिडे । ५ अर्धरात्रे । ६ पुंखितः शरो येन । ७ क्षालितः प्रोञ्छितो रक्तिमा यस्य । ८ अञ्जनरहिते । ९ त्यक्तकरुणे । १० मनः । ११ एका । १२ कुटुम्बिनी । १३ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मर्तव्याऽहं त्वया कान्त न स्मरिष्याम्यहं तव ।
स्मरणं चेतसो धर्मस्तच्चेतो भवता हृतम् ॥ ५२ ॥

स्मर्तव्या वयमिन्दुसुन्दरमुखि प्रस्तावतोऽपि प्रियाः
सत्यं नाथ यदि प्रदास्यति विधिर्जातिस्मरत्वं मम ।
एकस्मिन्नपि जन्मनि प्रियतमे जातिस्मरत्वं कथं
प्राणाः पान्थ समं त्वयैव चलिताः काऽन्याऽपि जन्मैकता ५३

गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।
ममाऽपि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥ ५४ ॥

सहिष्ये विरहं नाथ देह्यदृश्याञ्जनं मम ।
यदाक्तनेत्रां कन्दर्पः प्रहर्तुं मां न शक्ष्यति ॥ ५५ ॥

अनलस्तम्भनविद्यां सुभग भवान्नियतमेव जानाति ।
मन्मथशराग्नितप्ते हृदि मे कथमन्यथा वससि ॥ ५६ ॥

मुग्धा कान्तस्य यात्रोक्तिश्रवणादेव मूर्छिता ।
बुद्धा वक्ति प्रियं दृष्ट्वा किं चिरेणाऽऽगतो भवान् ॥ ५७ ॥

सूर्यास्तवर्णनम् ।

श्रीः ॥ पृथुगगनकबन्धस्कन्धचक्रं किमेत-
त्किमु रुधिरकपालं कालकापालिकस्य ।
कललभरितमन्तः किं नु तार्क्ष्याऽण्डखण्डं
प्रजनयति वितर्कं सान्ध्यमर्कस्य बिम्बम् ॥ १ ॥

अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम् ।
निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका ॥ २ ॥

विलोक्य संगमे रागं पश्चिमायां विवस्वतः ।
कृतं कृष्णं मुखं प्राच्या नहि नार्यो विनेर्ष्यया ॥ ३ ॥

---

१ गोष्ठीप्रसंगेन । प्रवासगमनम् । ३ जागृता । ४ अशिरस्ककलेवरम् । ५ काल एव कापालिको भिक्षुः । ६ गरुडः । ७ अनुरागः प्रीतिस्तद्युक्तं पक्षे रक्तिमायुक्तम् । ८ बहिर्निष्कासयामास । ९ अपेतं गतं वसु द्रविणं किरणाश्च यस्मात् । १० अपरदिगेव गणिका ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सान्ध्यरागरुधिराऽरुणधारान्निष्पपात रविमण्डलमब्धौ ।
क्रूरकालकरवालविलूनं वासरस्य सहसैव शिरो नु ॥ ४ ॥

परिपतति पयोनिधौ पतङ्गः सरसिरुहामुदरेषु मत्तभृङ्गः ।
उपवनतरुकोटरे विहङ्गस्तरुणिजनेषु शनैःशनैरनङ्गः ॥ ५ ॥

कृतोपकारं प्रियबन्धुमर्कमद्राक्ष्म हीनांशुमधःपतन्तम् ।
इतीव मत्वा नलिनीवधूभिर्निमीलितान्यम्बुरुहेक्षणानि ॥ ६ ॥

नो रविर्न च तमो न तमीशो न द्युतिर्ग्रहगणो न च संध्या ।
यादृशी प्रथमतः किल सृष्टेस्तादृशीं नु भुवनं श्रियमूहे ॥ ७ ॥

विश्लेषाऽऽकुलचक्रवाकमिथुनैरुत्पक्ष्मभिः क्रन्दितं
कारुण्यादिव मीलितासु नलिनीष्वस्तं च मित्रे गते ।
शोकेनेव दिगङ्गनाभिरभितः श्यामायमानैर्मुखै-
र्निःश्वासाऽनिलधूम्रवर्तय इवोद्गीर्णास्तमोराजयः ॥८॥

शुचिरिति परितः प्रसिद्धिभाजि प्रकटिततेजसि दुर्जये कृशानौ ।
निजवसुनिकुरम्बमस्तवेलाव्यतिकरवान्निदधे सरोजबन्धुः ॥९॥

अस्तंगतवति सवितरि भर्तरि मधुपं निवेश्य कोशान्ते ।
कमलिन्योऽपि रमन्ते किमत्र चित्रं मृगाक्षीणाम् ॥१०॥

अध्वानं नैकचक्रः प्रभवति भुवनभ्रान्तिदीर्घं विलङ्घ्य
प्रातः प्राप्तुं रथो मे पुनरिति मनसि न्यस्तचिन्ताऽतिभारः ।
संध्याभृष्टावशिष्टस्वकरपरिकरस्पष्टहेमारपङ्क्ति
व्याकृष्याऽवस्थितोऽस्तक्षितिभृति नयतीवैष दिक्चक्रमर्कः ११

यातोऽस्मि पद्मनयने समयो ममैष
सुप्ता मयैव भवती प्रतिबोधनीया ।

---

१ खड्गः । २ छिन्नम् । ३ वियोगाकुलैः । ४ निजकुटुम्बसमूहं किरणसमूहं च । ५ स्थापयामास । ६ सूर्यः । ७ सूर्ये । ८ भृङ्गं मकरन्दं च । ९ संध्यायां भृष्टा उपसंहृतास्ते अवशिष्टा यः स्वकराणां परिकरः समूहस्तद्रूपास्पष्टा हेमनिर्मितानामराणां पङ्क्तिर्यस्मिंस्तत् । १० दिशां चक्रं मण्डलम् [illegible] च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यायनामयमितीव सरोरुहिण्याः ।
सूर्योऽस्तमस्तकनिविष्टकरः करोति ॥ १२ ॥
उदयतटाऽन्तरितमियं प्राची सूचयति दिङ् निशानाथम् ।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥ १३ ॥

तमोवर्णनम् ।

पिदधति तिमिरे समस्तलोकं प्रलयमहाऽब्धिनिभे धृतोच्चनीचे ।
व्यरुचदुडुगणोऽवलक्षरोचिर्बहुविधफेनसमूहतुल्यरूपः ॥ १ ॥

काकोलं कलकण्ठिका कुवलयं कादम्बिनी कर्दमः
कंसाऽरिः कबरी कृपाणलतिका कस्तूरिका कज्जलम् ।
कालिन्दी कषपट्टिका करिघटा कामाऽरिकण्ठस्थली
यस्यैते करदा भवन्ति सखि तद्वन्दे विनिद्रं तमः ॥ २ ॥

लिम्पतीव तमोऽङ्गानि वर्षतीवाऽञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥ ३ ॥

अविज्ञातविशेषस्य सर्वतेजोऽपहारिणः ।
स्वामिनो निर्विवेकस्य तमसश्च किमन्तरम् ॥ ४ ॥

चिन्वद्भीरचिकीर्षितानि घटयद्वेतालगोष्ठीसुखं
तन्वानं शवसाधनोद्धतरसं निर्व्याजवीरात्मनाम् ।
कुर्वत्कामकृशानुतप्तमनसां गुप्ताऽङ्गनासंगमं
दृप्यत्कोकिलकाककण्ठमलिनं ध्वान्तं समुज्जृम्भते ॥ ५ ॥

विरम तिमिर साहसादमुष्माद्यदि रविरस्तमितः स्वतस्ततः किम्
कलयसि न पुरो महामहोभिर्द्युतिनिधिरभ्युदयत्ययं शशाङ्कः ॥ ६ ॥

---

१ विश्वासोत्पादनम् । २ कमलिन्याः । ३ चन्द्रम् । ४ तिरोदधति सति । अन्धकारे । ६ धवलकान्तिः । ७ विषभेदः । ८ मेघपङ्क्तिः । ९ केशपाशः । १० खड्गलतिका । ११ 'कसोटी' ति लोके । १२ गजसमूहः । १३ करप्रदा भवन्ति । १४ कर्तव्यकर्माणि । १५ प्रेतसाधनविधिः । १६ अयथाबलारम्भात् १७ पश्यसि । १८ महद्भिस्तेजोभिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभातवर्णनम् ।

अभूत्प्राची पिङ्गा रसपतिरिव[1] प्राश्य कनकं
गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
क्षणं क्षीणास्तारा नृपतय इवाऽनुद्यमपरा[2]
न दीपा राजन्ते द्रविण[3]रहितानामिव गुणाः ॥ १ ॥

विरलविरलीभूतास्ताराः कलौ सुजना इवा-
ऽप्यपसरति च ध्वान्तं चित्तात्सतामिव दुर्जनः
मन इव मुनेः सर्वत्राऽपि प्रसन्नमभून्नभो
विगलति निशा क्षिप्रं लक्ष्मीरनुद्यमिनामिव ॥ २ ॥

पुरुहूतदिगङ्गना[4] प्रसूता रविमुद्दामसुतं चिरादुपेतम् ।
अलिनो नलिनीदलाद्विमुक्ताः प्रियबाहुद्वयबन्धनान्नवोढाः॥ ३॥

व्रजत्यपरवारिधिं रजतपिण्डपाण्डुः[5] शशी
न भान्ति जलबुद्बुदद्युतिसपत्निकास्तारकाः ।
कुरण्टकविपाण्डुरं दधति धामदीपांकुरा-
श्चकोरनयनाऽरुणा भवति दिक् च सौत्रामणी[6] ॥४॥

दिशिदिशि मृगयन्ते[7] पल्लवग्राममेते[8]
मुहुरपगतनिद्राः सप्तयो[9] हेषितेनं[10] ।
अयमपि च सरोषैः कामिभिः श्रूयमाणो
नदति[11] मधुरतारं ताम्रचूडो[12] विहङ्गः ॥ ५ ॥

यः सैन्यं स्मरपार्थिवस्य विरहिप्रत्यर्थिनां[13]मग्रणी-
र्ज्योत्स्नानिर्झरमुज्झति स्म जगतां यस्तापनिर्वापणम् ।

---

१ पारद इव । २ उद्योगरहिताः । ३ दरिद्राणाम् । ४ प्राचीदिक् । ५ रौप्यगोलकमिवपाण्डुरः । ६ पुन्द्री प्राचीत्यर्थः । ७ शोधयन्ति । ८ पल्लवसमूहम् ९ अश्वाः । १० 'हिंसणे' इति लोके । ११ शब्दं करोति । १२ कुक्कुटः । १३ शत्रूणाम् । १४ ...

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽयं तारकनायकः किमपरं शृङ्गार[1]संजीवनं
जातः पुष्पपरागपाण्डुरजरत्कूष्माण्डपिण्डाकृतिः[2] ॥ ६ ॥

कुमुदवनमपश्रि[3] श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः[4] प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिललितानां हन्त चित्रो विपाकः ॥ ७ ॥

लुलितनयन[5]ताराः क्षाम[6]वक्त्रेन्दुबिम्बा
रजनय इव निद्राक्लान्तनीलोत्पलाक्ष्यः ।
तिमिरमिव दधानाः स्रंसिनः[7] केशपाशा-
न्नवनिपतिगृहेभ्यो[8] यान्त्यमूर्वारवध्वः[9] ॥ ८ ॥

कान्ते जग्मुषि ताम्रचूडरसितं[10] श्रुत्वा प्रबुद्धा त्वरा[11]-
त्किंचिद्वासवदिङ्मुखं[12] प्रविकसद्दृष्ट्वा गवाक्षाऽध्वना ।
संत्रासेन समीरिता प्रियतमप्रेम्णाऽवरुद्धा शनै-
रुत्थानोपनिवेशनानि कुरुते तल्पे मुहुः पांसुला[13] ॥ ९ ॥

निर्यान्त्या[14] रतिवेश्मनः[15] परिणत[16]प्रायां विलोक्य क्षपां[17]
गाढाऽऽलिङ्गनचुम्बनानि बहुशः कृत्वाऽप्यसन्तुष्टया ।
एकं भूमितले निधाय चरणं तल्पे प्रकल्प्या[18]ऽपरं
तन्वङ्ग्या परिवर्तिताङ्गलतया[19] प्रेयांश्चिरं[20] चुम्बितः ॥ १० ॥

पद्मिन्याः सकलां विधाय विकलां[21] ताराऽधिपः संपदं[22]
तत्प्रेयस्युदयोन्मुखे सति रवावुद्विग्नता[23]माश्रितः ।

---

१ शृंगारस्य जीवनौषधम् । २ जीर्णकूष्माण्डपिण्डः । ३ गतशोभम् । ४ घूकः । ५ चञ्चलनयनकनीनिकाः । ६ क्षामं कृशं वक्त्रेन्दुमण्डलं यासां ताः । ७ शिथिलान् । ८ राजगृहेभ्यः । ९ वारस्त्रियः । १० कुक्कुटारावम् । ११ संभ्रमेण । १२ प्राचीमुखम् । १३ स्वैरिणी । १४ निर्गच्छन्त्या । १५ केलिमन्दिरात् । १६ प्रभातप्रायाम् । १७ रात्रिम् । १८ निधाय । १९ परिवर्तिता वलिता अंगलता अंगवल्लिर्यया । २० प्रियतरः । २१ हीनाम् । २२ शोभाम् । २३ खिन्नत्वम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तारा: स्वस्य [1]करैर्विकृष्य सहसा गच्छन्नितोऽस्ताचलं
लग्नाः काश्चन ताः प्रभाकरकरे पश्यन् परिम्लायति ॥ ११ ॥
संश्लिष्टा साऽनुरागं स्वकरपरिचयप्राप्तभूरिप्रसादा
या पूर्वाभुक्तपूर्वा [2]रविकरकलितां तामुदीक्ष्याऽ[3]मृतांशुः ।
निस्तेजाः पश्चिमाऽब्धौ प्रविशति हि सतां दुःसहो मानभङ्गः
किं वक्तव्यं सितांशोः स तु सकल[4]सतां मण्डलस्याऽपि नेता १२

[5]उत्सिक्तः कुसुमासवैः कुमुदिनीं [6]राजप्रियां [7]पुष्पिणी-
मालिङ्गन्निशि निर्भयं परिचयं कुर्वन्पुनः पल्लवैः ।
यावत्पङ्कजसौरभस्वमखिलं गृह्णल्लँघुं प्रस्थित-
स्तावत्[8]कल्य उपस्थिते मरुदयं विष्वग्भयाद्धावति ॥१३॥

मध्याह्नवर्णनम् ।

स्वे स्वे कर्मणि संनियोज्य सुहृदो [1][2]भूमीसुरान्मन्त्रिण-
श्चक्रं निर्भयमारचय्य भगवान् संप्राप्तरागोदयः ।
स्वाऽऽलोकक्षण[3]कांदिशीकमधुनोत्खातुं विचिन्वन्निव
ध्वान्तं क्वाऽपि [4]निलीनमम्बरमणिर्व्योमाऽग्रमारोहति ॥ १ ॥
छायां संश्रयते तलं विटपिनां श्रान्तेव पान्थैः समं
मूलं याति सरोजलस्य जडता ग्लानेव मीनैः सह ।
आचामत्यहिमांशुदीधितिरपस्तप्तेव लोकैः समं
निद्रागर्भगृहं सह प्रविशति क्लान्तेव कान्ताजनैः ॥ २ ॥
[5]उष्णालुः शिशिरे निषीदति तरोर्मूलाऽऽलवाले शिखी
निर्भिद्योपरिकर्णिकारकुसुमान्याशेरते षट्पदाः ।

१ किरणैः २ सूर्यहस्तलग्नाम् ३ चन्द्रः ४ नक्षत्राणां द्विजानां च ५ नायकः ६ मत्तः संपृक्तश्च ७ चन्द्रप्रियां नृपप्रियां च ८ पुष्पयुक्तां रजस्वलां च ९ पंकजसौरभः कमलामोदस्तदेव स्वं धनम् १० सस्वरम् ११ प्रभाते १२ द्विजान् १३ भयद्रुतम् १४ गुप्तम् १५ सूर्यः १६ उष्णकातरः १७ मयूरः १८ भ्रमराः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते
क्रीडावेश्मनिवेशिपञ्जरशुकः क्लान्तो जलं याचते ॥ ३ ॥
पत्रच्छायासु हंसा मुकुलितनयना दीर्घिका पद्मिनानां
सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि ।
बिन्दूत्क्षेपान् पिपासुः परिसरति शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुस्रैः समग्रस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः ॥ ४ ॥
स्कन्धान् सिन्धुरयूथगण्डकपणव्यासक्तदानोदका-
न्सेवन्ते मधुपा महीरुहशिरःपुष्पाणि हित्वा भृशम् ।
लीयन्ते वलभीकुलायकुहरे निष्पन्दमेते खगा
जिह्वालीढवधूमुखो मृगगणश्छायासु विश्राम्यति ॥५ ॥

वसन्तवर्णनम् ।

माकन्दच्युतपुष्परेणुपटलीभृत्ताऽऽलवालोदरे
मन्दस्यन्दिमरन्दपूरभरिते वातोत्थपुष्पप्लवैः ।
खेलन्तो ललितं मधोर्गुणगणान् गायन्ति पुष्पन्धयाः
कान्तानामधरे धयन्ति मधुरं सक्तं मधूलीरसम् ॥ १ ॥
उद्यद्विद्रुमकान्तिभिः किसलयैस्ताम्रां त्विषं बिभ्रतो
भृङ्गाऽऽलीविरुतैः कलैरविशदव्यापारलीलाभृतः ।
घूर्णन्तो मलयानिलाऽऽहतिचलैः शाखासमूहैर्मुहु-
र्भ्रान्तिप्राप्यमधुप्रसङ्गजनितां मत्ता इवाऽमी द्रुमाः ॥ २ ॥

ग्रीष्मवर्णनम् ।

देशे देशे जडिमकुरङ्गास्तेजोभल्लैर्दिनकरभिन्ना ।
धावंधावं प्रहरति राज्ञां धारागेहं शरणमवापुः ॥ १ ॥

---

१ वापी २ किरणैः ३ सूर्यः ४ गजसमूहस्य ५ लिप्तमदोदकान् ६ भृंगाः ७ नीडस्थाने ८ निश्चलम् ९ आम्रः १० समूहः ११ भ्रमराः १२ पिबन्ति १३ मकरन्दम् १४ कवालम् ' पोवळीं ' इति लोके १५ पल्लवैः १६ कम्पमानाः १७ हिमान्येव कुरंगा मृगाः १८ धावित्वा धावित्वा १९ ' कारंजें ' इति प्र० ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रावृड्वर्णनम् ।

यथा रन्ध्रव्योम्नश्चलजलदधूमः स्थगयति
स्फुलिङ्गानां रूपं दधति च यथा कीटमणयः ।
यथा विद्युज्ज्वालोल्लसितपरिपिङ्गाश्च ककुभ-
स्तथा मन्ये लग्नः पथिक तरुखण्डे स्मरदवः ॥ १ ॥

सर्वत्रोद्गतकन्दला वसुमती वृद्धिर्जलानां परा
जातं निष्कमलं जगत्सुमलिनैर्लब्धा घनैरुन्नतिः ।
सर्पन्ति प्रतिमन्दिरं द्विरसनाः सन्त्यक्तमार्गो जनो
वर्षाणां च कलेश्च संप्रति जयत्येकैव राज्यस्थितिः ॥ २ ॥

नैतद्वारिदगर्जितं रतिपतिप्रस्थानढक्कारवो
नैते वारिधराः स्रवन्मदजलास्तत्सिन्धुराः प्रोद्धुराः ।
नैषा विद्युदियं विभाति रुचिरा तच्चन्द्रहासप्रभा
मन्ये मानिनि मानदुर्गमधुना जेतुं किमायात्यसौ ॥ ३ ॥

शरद्वर्णनम् ।

अथोपगूढे शरदा शशाङ्के प्रावृड्ययौ शान्ततडित्कटाक्षा ।
कासां न सौभाग्यगुणोऽङ्गनानां नष्टः परिभ्रष्टपयोधराणाम् [१] ॥ १ ॥

धन्याः शरदि सेवन्ते प्रोल्लसच्चित्रशालिकान् ।
प्रासादान् स्त्रीसखाः पौराः केदारांश्च कृषीवलाः ॥ २ ॥

नमिताः फलभारेण नमिताः शालमञ्जरीः ।
केदारेषु हि पश्यन्तः के दारेषु विनिस्पृहाः ॥ ३ ॥

हेमन्तवर्णनम् ।

हेमन्ते बहुदोषाऽऽढ्ये द्वौ गुणौ सर्वसंमतौ ।
अयत्नशीतलं वारि सुरतं स्वेदवर्जितम् ॥ १ ॥

अलं हिमानीपरिदीर्णगात्रः [२] समापितः फाल्गुनसंगमेन [३] ।
अत्यन्तमाकांक्षितकृष्णवर्त्मा भीष्मो महात्माऽजनि माघतुल्यः ॥ २ ॥

---

१ पयोधराः मेघाः स्तनाश्च । २ हिमान्याहिमसहत्यापरिदीर्णं गात्रं यस्मिन्नु भीष्म पक्षे हिमानी इतिच्छेदः । ३ अर्जुनः मासश्च

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेमन्ते पथिकजनाः प्रियाविमुक्ता लोकानां गृहबहिरङ्गणे शयानाः ।
कंदर्पाऽऽकुलमनसां निशासु तेषां शीतं किं लगति जगत्प्रकम्पकारि ॥
हेमन्ते हिमकरबिम्बचारुमुख्या रामाया मृदुभुजपञ्जरे शयानाः ।
ये कालं परमसुखं नयन्ति तेषां शीतं किं लगति जगत्प्रकम्पकारि ४

अद्य शीतं वरीवर्ति सरीसर्ति समीरणः ।
अपत्नीको मरीमर्ति तरीतर्ति कुचोष्मवान् ॥ ५ ॥
हसन्तीं च हसन्तीं च हसन्तीं वामलोचनाम् ।
हेमन्ते ये न सेवन्ते ते नरा दुःखभागिनः ॥ ६ ॥

समस्यापूरणम् ।

श्रीः ॥ [1]चेतोहरा युवतयः[2] स्वमनोऽनुकूलाः ।
सद्बान्धवाः प्रणतिनम्रगिरश्च भृत्याः ।
गर्जन्ति दन्तिनिवहा[3]स्तरला[4]स्तुरङ्गाः ।
[5]संमीलने नयनयोर्नहि किंचिदस्ति ॥ १ ॥

अयि खलु विषमः[6] पुराकृतानां भवति हि जन्तुषु कर्मणां विपाकः[7] ।
हरशिरसि शिरांसि यानि रेजुः शिवशिवतानि लुठन्ति गृध्रपादैः २

सहस्रशीर्षापुरुषः सहस्राऽक्षः सहस्रपात् ।
चलितश्चकितश्छन्नः प्रयाणे तव भूपते ॥ ३ ॥
वागर्थाविव संपृक्तौ शतकोटिप्रविस्तरम् ।
तुरासाहं[9] पुरोधाय नेमुः सर्वे सुराः शिवौ[10] ॥ ४ ॥
असमाने समानत्वं भविता कलहे मम ।
इति मत्वा ध्रुवं मानी मृगारिसिंहः पलायते ॥ ५ ॥

---

(१) संमीलने नयनयोरिति चतुर्थपादः समस्या (२) हरशिरसीत्युत्तरार्धं समस्या. (३) चलित इत्युत्तरार्धं समस्या. (४) नेमुरिति चतुर्थपादः आद्यपादत्रय समस्यापूरणं. (५) मृगारिसिंह इति चतुर्थपादः समस्या.

१ चेतोहरा मनोहारिण्यः २ युवतयस्तरुण्यः ३ दन्तिनिवहा गजसमूहाः ४ तरलाश्चञ्चलाः ५ संमीलने निमीलने. ६ विषमः क्लेशदः ७ विपाकः परिणामः ८ इदं क्रियाविशेषणम् ९ तुरासाहमिन्द्रम् १० शिवौ पार्वतीशंकरौ.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दामोदरकराऽऽघातविह्वलीकृतचेतसा ।
दृष्टं चाणूरमल्लेन शतचन्द्रं नभःस्थलम् ॥ ६ ॥

भीष्म[1]ग्रीष्मर्तुसंतप्तशून्यरथ्यान्तरस्थयोः ।
अन्योन्या[2]ऽऽलापसुखिनोर्यूनोश्चन्द्रायते रविः ॥ ७ ॥

सीतासमागमोत्कण्ठा कर्णान्ताऽऽकृष्टधन्वनः ।
राघवस्य शरा[3]ऽङ्गारैः समुद्रादग्निरुत्थितः ॥ ८ ॥

घटो जन्मस्थानं[4] मृगपरिजनो[5] भूर्जवसनं
वने वासः कन्दैरशनमपि दुःस्थं वपुरिदम् ।
अगस्तिः पाथोधिं[6] यदकृत[7] कराऽऽम्भोजकुहरे
क्रियासिद्धिः[8] सत्त्वे[9] वसति महतां नोपकरणे[10] ॥ ९ ॥

अस्माकं जलजीविनां[11] जलमिदं सद्वाजिराजिव्रजैः[12]
पातव्यं पररक्तरक्तमनसां तृप्तिः पतीनां क्षयः ।
मत्त्वैवं किल राजराजनृपते त्वज्जैत्रयात्रोत्सवे[13]
मत्स्यी रोदिति मक्षिका च हसति ध्यायन्ति[14] वैरिस्त्रियः ॥ १० ॥

स्फुरिते जठरे विष्णोर्नवनीतभुजः शिशोः ।
मक्षिका पादघातेन कम्पितं भुवनत्रयम् ॥ ११ ॥

रामाऽभिषेके मदविह्वलाया हस्ताच्च्युतो हेमघटस्तरुण्याः ।
सोपानमार्गे प्रकरोति शब्दं ठंठंठठंठंठठठंठंठठंठः ॥ १२ ॥

---

(६) शतचन्द्रमिति च० समस्या. (७) यूनोश्चन्द्रायते रविरिति च० स० (८) समुद्रादग्निरुत्थित इति च स० (९) क्रियासिद्धिः सत्त्वे इति चतु० स० (१०) मत्स्यीरोदितीति चतुर्थपादः समस्या. (११) मक्षिकापादघातेनेति उत्तरार्धं समस्या. (१२) ठंठंठठमिति च० स०

१ भीष्मो दारुणः २ अन्योन्यभाषणेन जाताल्हादयोः ३ शरा एवाङ्गाराः ४ उत्पत्तिस्थानम् ५ मृगा एव परिजनः ६ समुद्रम् ७ अकरोत् ८ कार्यसिद्धिः ९ बले १० सामग्र्याम् ११ जलैकजीवितानाम् १२ तुरंगपङ्क्तिसमूहैः १३ विजययात्रोत्सवे १४ चिन्त...

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

समभ्यय सकचग्रह[1]मास्यं[2] चुम्बति[3] प्रियतमे[4] हठवृत्त्या[5] ।
कूजितं[6] भवति मानधनाया[7] हूंहुंहूंहुंहुंहुंहूंहुंहुंहूंहूं ॥ १३ ॥

श्रुत्वा सागरबन्धनं[8] दशशिरा[9]: सर्वैर्मुखैरेकदा
तूर्णं[10] पृच्छति वार्तिकान्[11]सचकितो भीत्या परं संभ्रमात् ।
बद्धः सत्यमपांनिधिर्जलनिधिः कीलालधिस्तोयधिः ।
पाथोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥ १४ ॥

अम्बा[12] कुप्यति तात मूर्ध्नि[13] विधृता गङ्गेयमुत्सृज्यतां[14]
विद्वन् षण्मुख का गतिर्मम चिरं मूर्ध्नि स्थिताया वद ।
कोपावेश[15]वशादशेषवदनैः[16] प्रत्युत्तरं दत्तवा—
नम्भोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥१५॥

सर्वस्य द्वे सुमतिकुमती संपदापत्तिहेतू
एको गोत्रे प्रभवति पुमान्यः कुटुम्बं बिभर्ति ।
वृद्धो यूना सह परिचयात्त्यज्यते कामिनीभिः
स्त्री पुंवच्च प्रभवति यदा तद्धि गेहं विनष्टम् ॥ १६ ॥

आषाढी[17] कार्तिकी माघी वचा शुण्ठी हरीतकी ।
गयायां पिण्डदानेन पुण्या श्लेष्महराऽनृणी ॥ १७ ॥

---

(१३) हूंहुंहूमि० च० स० (१४) अपांनिधिरित्यादि समस्या. (१५) अम्भोधिरित्यादिचतुर्थपादः समस्या (१६) सर्वस्यद्वे, एकगोत्रे, वृद्धोयूना, स्त्रीपुंवच्च, इति चत्वारि पाणिनेः सूत्राणि समस्या चतुर्षु पादेषु (१७) पुण्या-श्लेष्महराऽनृणीति चतुर्थपादः समस्या.

१ केशग्रहसहितम् २ मुखम् ३ चुम्बनं कुर्वतिसति ४ कान्ते ५ बलात्कारेण ६ कण्ठे अव्यक्तशब्दः ७ मान एव धनं यस्याः मानिन्या इत्यर्थः ८ सेतुबन्धं ९ रावणः १० झटिति. ११ वृत्तान्तज्ञापकान् १२ माता १३ मस्तके १४ त्यज्यताम् १५ क्रोधपरत्वेन १६ षड्भिर्मुखैरित्यर्थः १७ आषाढीकार्तिकीमाघी एकादशी पुण्या वचाशुंठीहरीतकी श्लेष्महरा गयायां पिण्डदानेन अनृणी पितृऋणात्मुक्त इति योजना.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काचिद्दिनार्धसमये रविरश्मितप्तां
नीलांशुकाञ्चलनिलीनमुखेन्दुबिम्बाम् ।
तां तादृशीं समनुवीक्ष्य कविर्जगाद
राहुर्दिवा ग्रसति पर्व विना किलेन्दुम् ॥ १८ ॥

प्रहेलिका ।

अपदो दूरगामी च साऽक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥ १ ॥

वने जाता वने त्यक्ता वने तिष्ठति नित्यशः ।
पण्यस्त्री न तु सा वेश्या यो जानाति स पण्डितः ॥ २ ॥

गोपालो नैव गोपालस्त्रिशूली नैव शंकरः ।
अपि चक्री स नो विष्णुर्यो जानाति स पण्डितः ॥ ३ ॥

"विजिताऽऽत्मभवद्वेषिगुरुपादहतो जनः ।
हिमोऽपहाऽमित्रधरैर्व्याप्तं व्योमाऽभिनन्दति ॥ ४ ॥

तरुण्याऽऽलिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः ॥ ५ ॥

(१८) राहुर्दिवा ग्रसतीति चतुर्थपादः समस्या (१) संदेशपत्रम् 'लाखोटा' इति प्राकृते उत्तरं (२) नौका नागवल्लीचेत्युत्तरम् (३) वृषभः (साण्ड) इत्युत्तरम् (४) सूर्यकिरणतप्तो जनो मेघच्छन्नमाकाशमभिनन्दतीति तात्पर्यार्थः (५) कुम्भः (घागर) इत्युत्तरम् ।

१ मध्याह्ने २ सूर्यकिरणसंतप्ताम् ३ नीलवस्त्राञ्चलपिहितमुखचन्द्राम् ४ स्वर्भानुः ५ अरण्ये काष्ठरूपेणोत्पन्ना ६ उदके ७ मूल्यं दत्वा भोग्या स्त्री । गणिका यथा द्रव्यदानेन भोग्या तथेयमपीत्यर्थः ८ धेनूनां पतित्वात्पालकः ९ तप्तत्रिशूलांकितत्वात्तच्चिन्हवान् १० तप्तचक्रांकितत्वात्तच्चिन्हवान् ११ विना गरुडेन जित इन्द्रस्तदात्मभवोऽर्जुनस्तद्द्वेषी कर्णस्तस्य गुरुः पिता सूर्यस्तस्य पादैः किरणैस्तप्तः (अमृताहरणसमये गरुडेनेन्द्रो जित इति पुराणेषु प्रसिद्धम्) १२ हिमापहोऽग्निस्तस्य शत्रुभूतमुदकं तद्धरैर्मेघैः १३ तरुण्या आलिंगितः (स्त्रियो हि कटिनिहितं कुम्भं हस्तेन बध्नन्तीति प्रसिद्धम्) १४ कटिनिहितत्वात्तद्वनितम्बस्थितः १५ गुरूणां श्वशुरादीनां सन्निधावपि (कट्यां कलशं निधाय स्त्रीषु गच्छन्तीषु सतीषु कुम्भः कलकलध्वनिं करोतीति प्रसिद्धम्) १६ शब्दं करोति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काचिन्मृगाक्षी प्रियविप्रयोगे गन्तुं निशापारमपारयन्ती ।
उद्गातुमादाय करेण वीणामुद्वीक्ष्यमालोक्य शनैरहासीत् ॥ ६ ॥

आपाण्डुपीनकठिनं वर्तुलं सुमनोहरम् ।
करैराकृष्यतेऽत्यर्थं किं वृद्धैरपि सस्पृहम् ॥ ७ ॥

दुर्वारवीर्य सरुषि त्वयि का प्रसुप्ता
श्यामा सपत्नहृदये सुपयोधरा च
तुष्टे पुनः प्रणतशत्रुसरोजसूर्ये
सैवाऽऽद्यवर्णरहिता वद नाम का स्यात् ॥ ८ ॥

सदारिमध्यापि न वैरियुक्ता नितान्तरक्ताऽपि सितैव नित्यम् ।
यथोक्तवादिन्यपि नैव दूतिका का नाम कान्तेति निवेदयाऽऽशु

अवलोक्य स्तनौ वध्वा गुञ्जाफलविभूषितौ ।
निःश्वस्य रोदिति क्लिष्टा कुतो व्याधकुटुम्बिनी ॥ १० ॥
गीत्वा किमपि व्याधः शृङ्गं जग्राह तरुणहरिणस्य ।
तमथ समीक्ष्योद्यतकरमेणीमपि लज्जिता व्याधी ॥ ११ ॥

---

(६) गीतप्रियोऽयं मृगो यदि मत्कृतं गीतमाकर्णायतु चन्द्राग्निःसरत्तदा चन्द्रो निष्कलंको भूत्वा मन्मुखसाम्यं लभेत नैतदुचितं यतः प्रियविप्रयोगे संतापकरोऽयं हिमांशुर्मच्छत्रुरिति धिया वीणामहासीत् (७) उ० पक्वबिल्वफलं कुचयुगलं च. नासिकाचूर्णनिक्षेपणार्थं वृद्धैरपि बिल्वफलं ध्रियते इति प्रसिद्धिः (८) उ० शस्त्री. आद्यवर्णरहिता स्त्री. हे दुर्वारवीर्य त्वयि सरुषि सति सपत्नहृदये का शस्त्री. आद्यवर्णरहिता स्त्री. हे दुर्वारवीर्य त्वयि सरुषि सति सपत्नहृदये का प्रसुप्ता शस्त्री. प्रणतशत्रुसरोजसूर्ये त्वयि तुष्टे सति सपत्नहृदये प्रसुप्ता सैवाद्यवर्णरहिता का स्त्री. (९) उ० सारिका. (१०) काचिच्छबरस्त्री स्नुषायाः स्तनौ गुञ्जाफलविभूषितौ दृष्ट्वा मत्पुत्र एतस्यामनुरक्तः क्षीणतां गतो गजान्विनिहत्य तद्गण्डस्थलमुक्ताहारैः स्तनौ विभूषयितुं नालम् अतोऽनायासलभ्यैर्गुञ्जाफलैर्विभूषयति अतः पराक्रमहीनैतदार्जिताधीनवृत्तेः सर्वस्याऽपि कुटुम्बस्य जीवितसंदेहः स्यात् अतो व्याधकुटुम्बिनी दुःखान्निःश्वस्य रोदिति. (११) शृंगं जग्राह उद्यतकरं त हरिणं तां च एणीं उद्यतकरां समीक्ष्य व्याधस्त्री लज्जिता ।

१ श्यामवर्णा लोहमयत्वात् अन्यत्र षोडश वार्षिकी. २ सन्तुष्टयः जलं धरती ति सुपयोधरा लोहनिर्मिते शस्त्रे पानीयं दीयते इति प्रसिद्धिः पक्षे सुस्तनी ३ रिकारो मध्ये यस्याः ४ सकारेण इता युक्ता ५ ककारः अन्ते यस्याः सारिका 'साळुंकी' प्रसिद्धा 'सोगटी' ति या प्रसिद्धा ६ अद्भुतम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वस्वापहरो न दस्युकुलजः खट्वाङ्गभृन्नेश्वरो
दोषाऽनिष्टकरो न धर्मनिरतः कीलालपो नाऽसुरः ।
नॄणां पृष्ठपलायनो न पिशुनः शीघ्रंगमो नो हयः ।
शश्वद्रात्रिचरो न राक्षसगणः कोऽयं सखि ब्रूहि मे ॥ १२॥

वृक्षाऽग्रवासी न च पक्षिराजस्त्रिनेत्रधारी न च शूलपाणिः ।
त्वग्वस्त्रधारी न च सिद्धयोगी जलं च बिभ्रन्न घटो न मेघः ।

एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः ।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः ॥ १४ ॥

अस्थि नाऽस्ति शिरो नाऽस्ति बाहुरस्ति निरंगुलिः ।
नाऽस्ति पादद्वयं गाढमङ्गमालिङ्गति स्वयम् ॥ १५ ॥

नरनारीसमुत्पन्ना सा स्त्री देहविवर्जिता ।
असुखी कुरुते शब्दं जातमात्रा विनश्यति ॥ १६ ॥

दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः ।
गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति ॥ १७ ॥

न तस्याऽऽदिर्न तस्याऽन्तो मध्ये यस्तस्य तिष्ठति ।
तवाऽप्यस्ति ममाऽप्यस्ति यदि जानासि तद्वद ॥ १८ ॥

इत्यन्वयः महीतसुखितस्त्वं याचकस्य मे शिरोदानं देहीति व्याधः शृगं जग्राह अथ तं हरिणं शिरोदानायोद्यतकरं समीक्ष्य तज्जायां हरिणीमपि पतिभक्त्या निजशिरोदानाय उद्यतकरां समीक्ष्य अयं हरिणो दाता तत्पत्न्यपि दात्री इति हेतोर्वरमेते पशवो न वयं मनुष्या इति लज्जितेत्यभिप्रायः (१२) उत्तरं मत्कुणः 'ढेंकूण' इति लोके (१३) उ०नारिकेरफलम् 'नारळ' इति लोके (१४) उ० सूचिका (सुई, (१५) उ० कञ्चुकः (अंगरखा) (१६) उ० छोटिका 'चुटकी' ति लोके नरभार्यो अंगुष्ठमध्यमांगुली (१७) उत्तरं—उपानद् जोडा (१८) उ०—नयनं (डोळा)

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

छेकापन्हुतिः ।

श्रीः ॥ मधुरस्वना धृतोर्णा[1] मण्याभरणा सुशोभना सुदती[2] ।
मत्स्कन्धोचितदण्डा भिक्षो दयिताऽस्ति किं न मे वीणा ॥ १ ॥

रागी[3] भिनत्ति निद्रां तल्पं न जहाति निष्ठुरं दशति ।
चतुरे किं प्राणेशो न हि न हि सखि मत्कुणव्रातः ॥ २ ॥

वदन्ती जारवृत्तान्तं पत्यौ धूर्ता सखीधिया ।
पतिं बुद्ध्वा सखि ततः प्रबुद्धाऽस्मीत्यपूरयत् ॥ ३ ॥

सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चम् ।
नागरिकः किमु मिलितो न हि नहि सखि हैमनः[4] पवनः ॥ ४ ॥

समये पयोधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठिताऽसि बाले न हि न हि सखि पिच्छिलः[5] पन्था ॥ ५ ॥

या पाणिग्रहलालिता[6] सुसरला तन्वी सुवंशोद्भवा ।
गौरी स्पर्शसुखाऽवहा गुणवती नित्यं मनोहारिणी ।
सा केनाऽपि हृता तया विरहितो गन्तुं न शक्तोऽस्म्यहं ।
रे भिक्षो तव कामिनी न हि न हि प्राणप्रिया यष्टिका ॥ ६ ॥

आदौ गृहीतपाणिः पश्चादारूढजघनकटिभागा ।
नखमुखलालनसुखदा सा किं रामाऽस्ति नैव भोः पामा[7] ॥ ७ ॥

रुचिरस्वरवर्णपदा रसभाववती जगन्मनोहरति ।
तत्किं तरुणी न हि न हि वाणी बाणस्य मधुरशीलस्य ॥ ८ ॥

तन्वी चारुपयोधरा सुवदना श्यामा मनोहारिणी ।
नीता निष्करुणेन केनचिदहो देशान्तरादागता ।

---

१ धृतोर्णादिदशा पक्षे धृतोर्णावस्त्रा २ शोभनादन्तायस्याः सा पक्षे हस्ति-दन्तनिर्मितालंकारवती ३ अनुरक्तः पक्षे रक्तवर्णः ४ हेमन्तसंबन्धी ५ पंकिलः 'बुळबुळित' इति लोके ६ पाणिग्रहो विवाहः पक्षे पाणौ धारणेन लालिता ७ कुष्ठं वेणुश्च ८ कण्डूः खरूज इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्सङ्गोचितया तया रहितया किं जीवनाऽपेक्षया
भिक्षो ते दयिताऽस्ति किं न हि न हि प्राणप्रिया तुम्बिका ९

आयाता[2]गुरु[3]तः प्रयत्नबलतः प्राप्ता[4]सुमेरु[5]प्रभां
संगोप्येव रहो विधातुमुचितं यत्सङ्गसंशीलनम् ।
प्रौढो[6] यद्गुणचारिमासतुरसी[7]मय्येव लभ्येत चे-
द्भाग्यं भिक्षुकि वल्लभो न हि न हि श्रीजप्तिर्माला मम १०

कूटश्लोकाः ।

श्रीः ॥ विषं भुङ्क्ष्व महाराज स्वजनैः परिवारितः ।
विना केन[10] विना नाभ्यां[11] कृष्णाजिनमकण्टकम्[12][13] ॥ १ ॥

अहि[14]रिपुपतिकान्तातातसंबद्धकान्ता-
हरतनयनिहन्तृप्राणदातृध्वजस्य ।
सखिसुतसुतकान्तातातसंपूज्यकान्ता-
पितृशिरसि पतन्ती जान्हवी नः पुनातु ॥ २ ॥

---

१ समीपे स्थातुं योग्यया पक्षे अंकमारोढुं योग्यया. २ आगमनशीलः पक्षे प्राप्ता च ३ इदं प्रयत्नविशेषणं पक्षे गुरोः सकाशात् ४ प्रापणशीलः पक्षे प्राप्तवती ५ स्वर्णपर्वतप्रभां गौरामित्यर्थः पक्षे शोभनो मेरुर्मालोपरिस्थमणिस्तत्प्रभाम् ६ यस्यगुणानां चारिमा पक्षे गुणस्य=सूत्रस्य चारुत्वं ७ मय्येव रसी पक्षेतुलसीमयी रलयोः सावर्ण्यात् श्रीयुक्ता जपः जपस्य माला ९ विगतं षकारो यस्मात् १० केन विना ककाररहितम् ११ नाभ्यां विना नकारद्वयरहितम् १२ कृष्णाजिनम् अत्र ककारषकारणकारनकाराणां निष्कासने ऋ आ जि अं इति स्थिते उभयत्र संधौ कृते राज्यम् १३ शत्रुरहितम् १४ अहिः सर्पस्तद्रिपुर्गरुडस्तत्पतिर्विष्णुस्तत्कान्ता लक्ष्मीस्तत्तातः समुद्रः सम्यक् बद्धो येनैतादृशो रामस्तत्कान्ता जानकी तस्या हरो हर्ता रावणस्तत्तनय इन्द्रजित्तन्निहन्ता लक्ष्मणस्तत्प्राणदाता हनूमान् स ध्वजे यस्यैतादृशोऽर्जुनस्तस्य सखा कृष्णस्तत्सुतो मदनस्तत्सुतः प्रद्युम्नस्तत्कान्ता उषा तत्तातो बाणासुरस्तस्य सम्यक् पूज्यः शिवस्तत्कान्ता पार्वती तत्पिता हिमालयस्तच्छिरसि पतन्ती [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्जुनस्य इमे बाणा नेमे बाणाः शिखण्डिनः ।
सीदन्ति मम गात्राणि [1]माघमासे गवा इव ॥ ३ ॥

वायु[2]मित्रसुतबन्धुवाहनाऽराति भूषणशिरोऽवलम्बिनी ।
तज्जवैरिभगिनीपतेः सखा पातु मां कमललोचनो हरिः ॥ ४ ॥

कं[3]ति ते कबरीभारः सु[4]मनःसंगात्प्रियेऽतिनीलत्वात् ।
भं[5]वति च कं[6]लापवत्त्वान्निर्जरसेव्यः कथं न स्यात् ॥५॥

अं[7]तनुज्वरपीडिताऽसि बाले तव सौख्याय मतो ममोपवासः ।
रंसमर्पय वैद्यनाथ नाऽहं भवदावेदितलङ्घने समर्था ॥ ६ ॥

यामि विधौवभ्युदिते पुनरेष्यामीति यदुदितं भवता ।
जानात्युदन्तमेतं नेदन्तत्वेन मुग्धवधूः ॥ ७ ॥

पानीयं पातुमिच्छामि त्वत्तः कमललोचने ।
यदि दास्यसि नेच्छामि नो दास्यसि पिबाम्यहम् ॥८॥

यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।
अहं कथं द्वितीया स्याद्द्वितीया स्यामहं कथम् ॥ ९ ॥

समरे हेमरेखाऽङ्कं बाणं मुञ्चति राघवे ।
स रावणोऽपि मुमुचे मध्ये रीतिर्धरं शरम् ॥ १० ॥

---

१ 'माघमा कर्कटी प्रोक्ता तदपत्यानि सेगवा' इत्युक्तेः कर्कट्या अपत्यानि यथा जन्मसमये तस्या अंगानि विदार्य बहिर्यान्ति तद्वदिमे बाणा ममांगानि विदारयन्तीत्यर्थः २ वायुमित्रमग्निस्तत्सुतः षण्मुखस्तद्बन्धुर्गजाननस्तद्वाहनं मूषकस्तदारातिस्सर्पस्तद्भूषणः शिवस्तच्छिरोऽवलम्बिनीगङ्गा तज्जो भीष्मस्तद्वैरी शिखण्डी तद्भगिनी द्रौपदी तस्याः पतिरर्जुनस्तस्य सखा कृष्णः ३ क इव ब्रह्मेवाचरति कति आचर क्विप् ४ सुमनसां पुष्पाणामन्यत्र देवानां संगात् ५ भ इव विष्णुरिवाचरति भति ६ भव इव शिव इवाचरति भवति. ७ कलापो भूषणं तद्वत्त्वात् पक्षे कलापश्चन्द्रस्तद्वत्त्वात् ८ जरारहितैस्तरुणैः सेव्यः पक्षे निर्जरैर्देवैः सेव्यः ९ महान् पक्षे कामः १० लंघनं समीपस्थितिश्च ११ भेषजं प्रीतिश्च १२ उपवासे उल्लंघने च १३ देवे चन्द्रे च १४ वृत्तान्तं उकारान्तं च १५ इदं तत्त्वेन सत्यत्वेन तत्त्वेनेति भिन्नं पदं इदन्तत्वेन इकारान्तत्वेन च १६ दासी असीति पदच्छेदः १७ सहधर्मिणी १८ मध्यभागे रीतिः पित्तलं तद्विशिष्टं अथ च मध्ये रीकारविशिष्टं शरं शरीरमित्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिलार्पित[1]पदद्वन्द्वा नासाऽर्पित[2]करद्वया ।
अभूद्वधक्तस्तनी नारी कथमेतद्भविष्यति ॥ ११ ॥

सुवर्णस्य[3] सुवर्णस्य[4] सुवर्णस्य[5] च जानकि ।
प्रेषिता तव रामेण सुवर्णस्य[6] च मुद्रिका ॥ १२ ॥

के[7] शवं[8] पतितं दृष्ट्वा पाण्डवा[9] हर्षनिर्भराः ।
रुरुदुः कौरवाः[10] सर्वे हाहा केशव केशव ॥ १३ ॥

अं[11]कुबेरपुरीविलोकनं न धरा[12]सुनुकरं कदाचन ।
अथ तत्प्रतिकारहेतवेऽद[13]मयन्तीपतिलोचनं भज ॥ १४ ॥

अयि कान्त पश्य[14] मेघं नहि नहि पापं तवाऽस्ति पुण्यायाः
नहि नहि पश्य पयो[15]धरमपसारय कञ्चुकीमुरसः ॥ १५ ॥

निश्चितं ससुरैः[16]कोऽपि न कुलीनः[17] समे मतिः[18] ।
सर्वथा[19]सुरसंबद्धं काव्यं[20] योनाऽभिनन्दति ॥ १६ ॥

येनाऽकारि परा[21]भूतिर्दिननायकसूनवे[22] ।
यद्गोत्रा[23]त्मभवाकान्तं तन्महः[24] श्रेयसेऽस्तु वः ॥ १७ ॥

---

१ 'अधस्ताद्दारुणिशिला.' २ 'नासादारूपरिस्थितम्' ३ हेम्नः ४ शोभनाक्षरस्य ५ शोभनवर्णस्य ६ स्तुत्यस्य ७ के उदके ८ प्रेतम् ९ मत्स्यविशेषाः अत्र द्रोणो हर्षसमन्वित इत्यपि पाठः द्रोणः 'डोंकावळा' इति प्रसिद्धः अत्राद्यः पाठ एव श्रेयान् १० काकाः ११ अनलका विधवेत्यर्थः १२ मंगलकारकम् १३ अनललोचनं शिवम् १४ मेघं अघं पक्षे मे अघमिति छेदः अघं पापं १५ मेघं स्तनं च १६ सुरया सहितः मद्यप इत्यर्थः पक्षे सः सुर इति पदच्छेदः सुरो देवः १७ सत्कुलप्रसूतः पक्षे कौ लीनः १८ समे साधौ अमतिः श्रद्धारहित इति यावत्. पक्षे समे विष्णौ मतिर्यस्य सः तत्पुरुषे कृतीत्यत्र बहुलग्रहणाद्बहुव्रीहावप्यत्र सप्तम्या अलुक् १९ शोभनरसविशिष्टं बद्धं रचितं पक्षे असुरैः सबद्धं युक्तम् २० कविकृति पक्षे शुक्रम् २१ पराजयः परा उत्कृष्टा भूतिरैश्वर्यं च २२ कर्णाय सुग्रीवाय यमाय च २३ गात्रायन्ते ते गोत्रास्तेषामात्मभवा गोपिकास्तासां कान्तं मनोहरम् अथ च गोत्रायाः पृथ्व्या आत्मभवा सीता सा कान्ता यस्य तत् अथ च गोत्रस्य हिमालयस्यात्मभवा पार्वती सा कान्ता यस्य तत् २४ महः श्रीकृष्णाख्यं रामाख्यं शिवाख्यं च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेक[1]सुषिरं वाद्यं[2] कान्तं[3] च ऋषिसंज्ञितम् ।
चक्रिणा[4] च सदाऽऽराध्यं यो जानाति स पण्डितः १८

सुकपरिविन्दः शब्दः सुब्रह्मण्यस्य वाचकः केन ।
स्तनभरनमिता नारी केनोपायेन रञ्जयत्कान्तम् ॥ १९॥

शंकरं[5] पतितं दृष्ट्वा पार्वती[6] हर्षनिर्भरा ।
रुरुदुः पन्नगाः सर्वे हा हा शंकर शंकर ॥ २० ॥

अट्ट[7]शूला जनपदाः शिवशूला द्विजातयः ।
प्रमदाः केशशूलिन्यो भविष्यन्ति कलौ युगे ॥ २१ ॥

अधुना[8] मधुकरपतिना[9] गिलितोऽप्यपकारदम्पती[10] येन ।
त्रातः स पालयेत्त्वां विकार[11]रहितो विनायको लक्ष्म्याः २२

कुन्दकुञ्जममुं पश्य सरसीरुहलोचने ।
अमुना[12] कुन्दकुञ्जेन सखि मे किं प्रयोजनम् ॥ २३ ॥

राजन् कमलपत्राक्ष तत्ते भवतु चाऽक्षयम् ।
आसादयति यद्रूपं करेणुः[13] करणैर्विना ॥ २४ ॥

---

(१९) इयं बहिर्लापिका. अत्र प्रश्नद्वयस्यैकमुत्तरं उपरिविहरणेनेति. आद्ये सुकपरिविन्दशब्दे उ प रि वि इत्येतेषां वर्णानां हरणेन निष्कासनेन स्कन्द इति शब्दः सुब्रह्मण्यस्य षडाननस्य वाचको भवति द्वितीये उपरिविहरणेनेत्यस्य विपरीतरतेनेत्यर्थः ।

१ बिलं २ वकारः आद्यो यस्य. ३ ककारः अन्ते यस्य. ४ सर्पेण । उत्तरं वल्मीकम् ५ शंकरः श्रेष्ठचन्दनः ६ पर्वतवासिनी स्त्री भिल्ली ७ ‘ अट्टमन्नमिति प्रोक्तं शिवो वेद उदाहृतः । केशो भगमिति प्रोक्तं शूलो विक्रय उच्यते ’ ८ अपगतः धकारो यस्मात् तेन ९ मधुकरपतिर्मकरपतिस्तेन १० पकारशून्यो दम्पतीदन्तीत्यर्थः ११ वि इत्यक्षरेण रक्षितः विनायकः नायक इत्यर्थः १२ अमुना मुकाररहितेन १३ करेणुः करणैर्विना क् र् ण् एतत् व्यञ्जनत्रयं विना यद्रूपमासादयति प्राप्नोति तत्तेऽक्षयं भवत्वित्यन्वयः उक्तव्यञ्जनत्रयरहितं अ ए उः इति स्वरत्रयं तत्र अ ए इत्यत्र वृद्धौ ऐ उः इत्यत्र आयादेशे आयुरिति सिद्धम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]स्तन मण्डलमाश्रित्य न खस्य वरयोषिताम् ।
कदाकर्णयते गीतं रमया सह रङ्गराट् ॥ २५ ॥
[2]उपरिगतं हि सवर्णं हृत्वा करतो ददासि रन्तुं मे ।
धन्यः सरोजयुगलं त्यक्त्वा स्तनयुगमथाऽस्पृशत्कृष्णः २६
[3]अच्युतभक्तिवशादिह समभावस्तत्प्रसङ्गेन ।
सारमतेरभ्युदयति रतिरिति नैवाद्भुतं किञ्चित् ॥ २७ ॥
मञ्जुलघौ संभावितगुणे क्वचिन्नापदाधारे ।
अयि सखि तत्रोपपतौ मम चेतो नत्वनीदृशे पत्यौ ॥ २८ ॥
अयि सखि शस्तः सखिवत्पतिरिति किं त्वं न जानासि ।
शस्तोऽति सखिवदुपपति रित्यालि कथं त्वयाऽपि नाऽबोधि।

---

(२८) कापि विदुषितरा नायिका सखीं प्रति वदति अयि सखि तत्र तस्मिन्नुपपतौ मम चेतः अस्तीति शेषः कीदृशे मंजुलघौ मंजुः सुन्दरः सचासौ लघुरिष्टश्चेति विशेषणोभयपदः कर्मधारयः पुनःकी० संभावितगुणे संभाविता गुणाः सौन्दर्यादयो यत्र. क्वचित्कदाचिदपि न आपदाधारे आपद्रहिते इत्यर्थः अनीदृशे उक्तगुणरहिते पत्यौ मम चेतो नास्तीति व्याकरणपक्षे. उपपतौ उप पतिः शब्दे मम मनोस्ति. की० मञ्जुला घिसंज्ञा यस्मिन्. संभावितः 'घेर्ङिती' ति गुणो यस्य । ना इति 'पतस्य आङो नास्त्रिया' मिति सूत्रविहितस्याऽऽधारे आश्रये अनीदृशघिसंज्ञागुणनादेशरहिते केवले, पतिशब्दे. (२९) अयि सखि पतिः सखिवत् शस्तः मित्रवद्विश्वसनीयः इति त्वं किं न जानासि. सखी प्रत्याह ।

१ खस्य मण्डलमाश्रित्य हे कद मेघ न स्तन गर्जितं मा कुरु यतोरंगराट् रंगनायः रमयासह वरयोषितां गीतं आकर्णयते इत्यन्वयः २ कृष्णो राधिकां पृच्छति उपरिगतं सवर्णं समानवर्णं सरोजयुगलं करतो हृत्वा स्वहस्तेन आहृत्य मे रन्तुं ददासि ततो राधया तस्मिन् दातं गृहीते सति उवर्णेन परिगतं युक्तं सवर्णरहितं एतादृश सरोजयुगल उरोजयुगलमेव इति धिया कमलयुगं त्यक्त्वा स्तनयुगलमेव कृष्णोऽस्पृशत्. ३ इह ससारे अच्युतभक्तिवशात् समभावः समत्वं शत्रुमित्रादिषु तत्प्रसंगेन भक्तिप्रसंगेन सारमतेः श्रेष्ठबुद्धेः पुंसः रतिः प्रीतिः अभ्युदयतीति न किंचिदत्राऽसङ्गतं । व्याकरण पक्षे भो अच्युतम अच्युता अहीना मा प्रतिभा यस्य क्तिवशात् क्तिप्रत्ययवशात् स प्रसिद्धो मभावः मकारस्याभावो लोपो भवति इति शेषः तत्प्रसंगेन क्तिप्रत्ययप्रसंगेन रमतेर्धातोः सा रतिः अभ्युदयतीत्यपि माऽभूदर्म क्रीडायामित्यस्माद्धातोः [illegible] रतिरिति रूपं सिध्यति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुवर्णालंकृता कन्या हेमाऽलंकारवर्जिता
सा कन्या विधवा जाता गृहे रोदिति तत्. । १८३
द्वन्द्वोऽहं द्विगुरपि चाऽहं सद्गेहे नित्यमव्ययी
तत्पुरुष कर्म धारय येनाऽहं स्यां बहुव्रीहिः । ॥४०॥
अहं च त्वं च राजेन्द्र लोकनाथावुभावपि ।
बहुव्रीहिरहं राजन् षष्ठीतत्पुरुषो भवान् ॥ ३ ॥४१॥
काचिद्बाला रमणवसतिं प्रेषयन्ती करण्डं ।
सा तन्मूले सभयमलिखद्व्यालमस्योपरिष्टात्
गौरीनाथं पवनतनयं चम्पकं चाऽस्य भावं
पृच्छत्यार्यान् प्रति कथमिदं मल्लिनाथः नन्दति ४२
...सिनीं काञ्चनपट्टिकायां पाटीरपङ्कैर्विरही ... ये कण्ठे ।
...तुः कपोले व्यलिखत् पवर्गं तवर्गमोष्ठे च ... ख कोऽत्र भावः ४३
धा... ...निशं शम्भुम् ।
... पन्नगारातिम् ॥ ४४ ॥
... स बहुधा दी... दीयते वै
...दा धातवां भवति सदृशं रूपमेषां चतुर्णाम् ।

सुष्ठु वर्णेन कान्त्या अलंकृतेति विरोधपरिहार ...
... जारिणीत्यर्थः ३ यत ... स्त्रीपुरुष ...
... स्त्रियो रिति हस्व ...
सर्वज्ञः ... स्त्रयो ...

CC-0. Prof. Satya Vrat Shastri Collection.

...श्लोकाः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

...विंशतिः स्त्रीणां स्नानार्थं शरयूं गता ।
ऽपि पुनरायाता एको व्याघ्रेण भक्षितः ॥ ३० ॥
धन तनयं सशोका पुनर्निशम्याऽऽप्तशरीरभावम् ।
अ... च धावमाना रमा मुदा शङ्करमालिलिङ्ग ॥३१॥
मनःक्षणं जीविकार्थे विक्रीणीते यो नरस्तं च धिग् धिक् ।
अ योऽपशब्दान्नवेत्ति व्यर्थं मन्ये पण्डितं तं च धिग् धिग् ॥
आ...राडाभरणं यदीयं यद्गव्यहव्येडजमाददाह ।
शस्तो ...मणिरादिगन्तात् पायादपायादुरगात्मजार्धः ॥
...नोपमैतस्याः सखे किमिति भाषसे ।
(२८) कापि ...नादिर्वा न तृतीयेति मे मतिः ॥ ३४

तौ मम चेतः अस्ति ...
...ष्टेति विशेषणोभयपदः ...
...न्दर्यादयो यत्र ... अतिशायितामित्रवत् शस्त इति ...
...रो उक्तगुणरहिते पत्यौ मम चेत ... पतिशब्दः शस्तः ... ति शस्तः पत्र...
...ब्दे मम मनोऽस्ति. को० मञ्जुला ... करणो ज्ञेयः नावेशाभा... पति
... यस्मि... संज्ञा अतिसखिशब्द ...

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काचिद्वियोगानलतप्तगात्री प्राणान्समाधारयितुं लिलेख ।
बाह्वोर्भुजङ्गं हृदि राहुबिम्बं नाभौ च कर्पूरमयं महेशम् ॥४०॥

अपः पिबन् प्रपापालीमनुरक्तो विलोकयन् ।
अगस्त्यं चिन्तयामास चतुरः साऽपि सागरान् ॥४१॥

रामं वानरवाहिनीं पुररिपुं राहुं रवेः सारथिं
कुम्भीगर्भसमुद्भवं मुररिपुं मारस्य मौर्वीरवम् ।
तन्वी नूतनपल्लवैर्विरचिते शय्यातले शायिनी
सख्या वीजिततालवृन्तपवना बाला मुहुर्निन्दति ४२

नेतुः प्रयाणोन्मुखतां समीक्ष्य नक्षत्रमुक्तावलिमस्य कण्ठे ।
अधारयत्सा स तु वासराणां संख्यापरोऽभूत्सखि कोऽत्र भावः ४३

त्वद्विरहमसहमाना निन्दति बाला दिवानिशं शम्भुम् ।
राहुमपि रामचन्द्रं रामानुजमपि च पन्नगारातिम् ॥ ४४ ॥

सर्वज्ञः सन् वदसि बहुधा दीयते दीयते वै
दा धातूनां भवति सदृशं रूपमेषां चतुर्णाम् ।

---

(४०) सर्पग्रासभीत्या प्राणाः स्वतो न निर्गमिष्यन्तीत्याशयेन बाह्वोर्भुजंगं लिलेख चन्द्रश्च स्वभागतया श्रुतिसिद्धं मृतानां मनोग्रहीतुमागच्छेदित्याशयेन हृदि राहुं मन्मथत्रासाय शिवं च लिलेखेति भावः (४१) समुद्रानपि करे चुलकयतो मुनेः सामर्थ्यं मम चेत्स्यात्तर्हि झटिति तृट्शान्त्यभावाच्चिरमेनां पश्यामीति पान्थाभिप्रायः यदि सागराः सन्निहिताः स्युस्तदानवरतं जलधारां विसृज्यन्ती चिरमेतद्दर्शनसुखमनुभवेयमिति प्रपापाल्यभिप्रायः (४२) कोकिलरक्षककाकावशेषकत्वाद्रामं मलयाद्यवशेषणाद्वानरवाहिनीं मन्मथावशेषणात्पुररिपुं चन्द्रावशेषणाद्राहुं रवेः शीघ्रमस्ताद्रिप्रापणेन रात्रिसंपादनादनूरुं चन्द्रोत्पादकसमुद्रावशेषणादगस्त्यं मन्मथोत्पादनान्मुररिपुं निन्दतीति भावः कोकिलादीनां कामोद्दीपकत्वं रसशास्त्रे प्रसिद्धम् (४३) नक्षत्रमालाधारणेन नक्षत्रोदयवेलायामागमनं कर्तव्यमिति तया सूच्यते वासरसंख्याकरणेन सप्तविंशतिदिनमध्य एव मयाऽऽगम्यत इति तेन सूचितम् (४४) मन्मथावशेषणाच्छम्भुं चन्द्रावशेषणाद्राहुम् मलयाद्यवशेषणाद्रामचन्द्रं मन्मथजनकत्वाद्बलरामानुजं वायुभक्षिसर्पदर्शनात्पन्नगारातिं गरुडं निन्दितवतीति भावः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वौ दानार्थौ भवति च तथा पालने खण्डने वा
नो जानीमः कथयति भवान् कस्य धातोः प्रयोगम् ॥४५॥
ब्रह्मनान्तमपि क्लीबं मनः सान्तं न पश्यति ।
किं चित्रं लोकजनकं वाक् कान्ता नैत्यकान्तकम् ४६

क्रियागुप्तकारकगुप्तादि ।

प्रातः प्रातः समुत्थाय द्वौ मुनी च कमण्डलू ।
अत्र क्रियापदं वक्तुमवधिर्ब्रह्मणो वयः ॥ १ ॥
ललाटतिलकोपेतः कृष्णः कमललोचनः ।
गोकुलेऽत्र क्रियां वक्तुं यो जानाति स पण्डितः ॥२॥
पम्पासरसि रामेण सस्ने हंसविलासया ।
सीतया किं कृतं सार्धमत्रैवोत्तरमीक्ष्यताम् ॥ ३ ॥
राजन्नव घनश्याम निस्त्रिंशाऽऽकर्ष दुर्जय ।
आकल्पं वसुधामेनां विद्विषो ध्ये रणे बहून् ॥ ४ ॥
कान्तया कान्तसंयोगे किमकारि नवोढया ।
अत्रापि चोत्तरं वक्तुमवधिर्ब्रह्मणो वयः ॥ ५ ॥

---

(४५) त्वं सर्वज्ञः सन् बहुधा वारंवारं दीयते दीयते इति वदसि दीयते इति रूपं चतुर्णामपि दा धातूनां सदृशं भवति तन्मध्ये द्वौ दानार्थौ दाण् दाने डुदाञ् दाने इति. एकः पालने देङ् रक्षणे इति. एकः खण्डने दोऽवखण्डनेइति एतन्मध्ये भवान् कस्य धातोः प्रयोगं कृत्वा वदति तं न जानीमः

(४६) न विद्यते अन्तो यस्य तदनान्तम् अथ च नकारान्तं ब्रह्म अन्तेन सहितं अथ च सकारान्तं सान्तं मनो नान्तं ब्रह्म न पश्यतीति युक्तमेव. ककारोऽन्ते यस्याः अथ च कान्ता रमणी अकस्य दुःखस्यान्तकं नाशकं अथ च ककारान्तं न भवतीत्यकान्तकं स्वार्थे कः स्वयं कान्ता वाक् अकान्तकमपि लोकजनकत्वा-स्कान्तं ब्रह्म नैतीति चित्रमिति भावः

१ प्रात इति क्रिया प्रा पूरणे लट् प्रथमपुरुषद्विवचनम् २ ललाट, लट् बाल्ये, लिट् ३ सस्ने, ष्णा शौचे. कर्मणि लिट्. ४ अव अव रक्षणे. ५ द्य दोऽव-खण्डने. लोट् ६ अत्रापि चतुर्थ्यजाया कर्मणि लुट् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आगतः पाण्डवाः सर्वेऽदुर्यो धनसमीहया ।
तस्मै गांच सुवर्णं च रत्नानि विविधानि च ॥ ६ ॥
दामोदराय पुण्यात्मन्पुष्पमूलफलान्यपि ।
अत्र क्रियापदं गुप्तं मर्यादा दशवार्षिकी ॥ ७ ॥
विराट नगरे राजन् कीचकादुपकीचकम् ।
अत्र क्रियापदं गुप्तं मर्यादा दशवार्षिकी ॥ ८ ॥
कान्तं विना नदीतीरंमदमालोक्य केकिनी ।
अत्र क्रियापदं गुप्तं मर्यादा दशवार्षिकी ॥ ९ ॥
अम्लानपङ्कजा माला कण्ठे रामस्य सीतया ।
मुधा बुधा भ्रमन्त्यत्र प्रत्यक्षेपि क्रियापदे ॥ १० ॥
नार सिंहाऽऽकृतिं वीक्ष्य वने मत्तमतङ्गजः ।
अत्र क्रियापदं गुप्तं मर्यादा दशवार्षिकी ॥ ११ ॥
सन्ध्यावन्दनवेलायां तडागे च द्विजोत्तमैः ।
अत्र क्रियापदं गुप्तं मर्यादा दशवार्षिकी ॥ १२ ॥
गौरीनखरसाहस्यश्रद्धया शशिनं दधौ ।
इहैव गोप्यते कर्ता वर्षेणाऽपि न लभ्यते ॥ १३ ॥
अन्नवस्त्रसुवर्णानि रत्नानि विविधानि च ।
ब्राह्मणेभ्यो नदीतीरे ददाति व्रज सत्वरम् ॥ १४ ॥

---

(६) धनसमीहया धनेच्छया य आगतस्तस्मै सर्वे पाण्डवा गां सुवर्णं विविधानि रत्नानि च अदुरित्यन्वयः (७) हे दामोदर पुष्पमूलफलानि आय आनय इटकिटकटीत्यत्र प्रश्लिष्टस्य इधातोराङ्पूर्वस्य लोटो रूपमिदं. उपसर्गसमभिव्याहारेण आनयनार्थकत्वं. (८) विः पक्षी कीचकाद्वृणोः कीचकान्तरमाट बभ्राम (९) केकिनी मयूरी इरंमदं मेघज्योतिर्विद्युतामिति यावत्. आलोक्य विनानदीति विशेषेण पुनःपुनर्वा शब्दं करोतीत्यर्थः (१०) प्रत्यक्षेपि क्षिप्ता. (११) गजः सिंहस्याकृतिं वीक्ष्य नार न जगाम. ऋ गतौ. कर्तरि लिट् (१२) हे द्विजोत्तम ऐ आगच्छ. (१३) द्वः कामस्तं हन्तीति द्वहा शिवः (१४) हे ब्राह्मण कश्चिद् इभ्यः धनिकः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राक्षसेभ्यः सुतां हृत्वा जनकस्य पुरीं ययौ ।
अत्र कर्तृपदं गुप्तं मर्यादा दशवार्षिकी ॥ १५ ॥

न करोति नाम रोषं न वदति परुषं न हन्त्ययं शत्रून् ।
रञ्जयति महीमखिलां तथाऽपि धीरस्य वीरस्य ॥ १६ ॥

शरदिन्दुकुन्दधवलं नगपतिनिलयं मनोहरं देवम् ।
यैः सुकृतं कृतमनिशं तेषामेव प्रसादयति ॥ १७ ॥

एहि हे रमणि पश्य कौ तुकं धूलिधूसरतनुं दिगम्बरम् ।
सापि तद्वदनपङ्कजं पपौ भ्रातरुक्तमपि किं न बुध्यते ॥ १८ ॥

शीकराऽऽसारसंवाही सरो जवनमारुतः
प्रक्षोभयति पान्थस्त्रीनिःश्वासैरिव मांसलः ॥ १९ ॥

सुभग तवाननपङ्कजदर्शनसंजातनिर्भरप्रीतेः ।
शमयति कुर्वन् दिवसः पुण्यवतः कस्य रमणीयः २०

पूतिपङ्कमयेऽत्यर्थं कासारे दुःखिता अमी ।
दुर्वारा मानसं हंसा गमिष्यन्ति घनाऽऽगमे ॥ २१ ॥

अहं महानसा यातः कल्पितो नरकस्तव
मया मांसादिकं भुक्तं भीमं जानीहि मां वक ॥ २२ ॥

अम्भोरुहमये स्नात्वा वापीपयसि कामिनी ।
ददाति भक्तिसंपन्ना पुष्पं सौभाग्यकाम्यया ॥ २३ ॥

---

(१५) राक्षसानां इभ्यः स्वामी रावणः जनकस्य सुतां हृत्वा पुरीं लंकां ययौ (१६) अयं पुरुषो रोषं न करोति, परुषं कठोरं न वदति. शत्रूंश्च हन्ति. नामेति प्रसिद्धं तथापि अस्य वीरस्य धीः अखिलां महीं रञ्जयति. (१७) यैरनिशं सुकृतं कृतं तेषामेव मनः शारदिन्द्वित्यादिविशेषणविशिष्टं देवं हरं प्रसादयति (१८) हे रमणि एहि कौ पृथिव्यां तुकं बालं धूलीत्यादिविशेषणविशिष्टं पश्य कर्म गुप्तम् (१९) पान्थस्त्रीनिःश्वासैर्मांसलः पुष्ट इवेत्युत्प्रेक्षा. शीकरेत्यादिविशेषणविशिष्टो जवनमारुतः वेगवान् वायुः सरः प्रक्षोभयति. कर्म गुप्तम् (२०) दिवसः शं सुखं कुर्वन् अयति गच्छति. कर्म गुप्तम् (२१) दुष्टं वाः जलं तेन दुर्वारा कलुषितजलवत्त्वेन हेतुनेत्यर्थः हेतुगुप्तं (२२) महानसा महता शकटेन आयातः आगतः नरकोमृत्युः करणगुप्तम् (२३) अम्भोरुहं अये इति पदच्छेदः इः का-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशस्त्यायुक्तमार्गस्य तव संमानितां श्रिताः ।
स्पृहयन्ति न के नाम गुणरत्नालयं प्रभो ॥ २४ ॥
शिलीमुखैस्त्वया वीर दुर्वारैर्निर्जितो रिपुः ।
बिभेत्यत्यन्तमलिनो वनेऽपि कुसुमाऽऽकुले ॥ २५ ॥
या कटाक्षच्छटापातैः पवित्रयति मानवम् ।
ए कान्ते रोपितप्रीतिरस्ति सा कमलालया ॥ २६ ॥
विपद्यमानता सिद्धा सर्वस्यैव निरूष्मणः ।
यथाऽत्र भस्म पङ्क्त्यां च निर्वाणं हन्त्ययं जनः ॥ २७ ॥
तूणेव मधुमासेऽस्मिन् सहकारद्रुमञ्जरी ।
इयमुन्निद्रमुकुलैर्भाति न्यस्तशिलीमुखा ॥ २८ ॥
या नुर्वै जायते लक्ष्म्या सरस्वत्याऽथ वा मता ।
अत्र षष्ठीपदं गुप्तं मर्यादा दशवार्षिकी ॥ २९ ॥
भवानिशंकरोमेशं प्रति पूजापरायणः ।
कर्तृकर्मक्रियागुप्तं मर्यादा दशवार्षिकी ॥ ३० ॥
कमले कमले नित्यं मधूनि पिबतस्तव ।
भविष्यति न संदेहः कुष्ठं दोषाकरोदये ॥ ३१ ॥
सर्वज्ञेन त्वया किंचिन्नास्त्यविज्ञातमीदृशम् ।
मिथ्यावचस्तथा च त्वमसत्यं वेत्सि न क्वचित ॥ ३२ ॥

मस्तस्मै अये कामाय. संप्रदानगु० (२४) प्रशस्त्यै उक्तमार्गस्येति पदच्छेदः
प्रशस्त्यै कल्याणाय. संप्रदानगुप्तम् (२५) अलिनः भ्रमरात्. अपादानगुप्तम् (२६)
ए कृष्णे कान्ते भर्तरि. सप्तमीगुप्तम् (२७) विपदि अमानता इति पदच्छेदः निर्गः
तः ऊष्मा द्रव्यरूपो यस्मात्तस्य अमानता अन्तराभावः शान्तदुष्मरहितमित्यर्थः
सप्तमी गु० (२८) उन्निद्रमुकुला एः इति पदच्छेदः एः कामस्य. (२९) भाका-
न्तिः नुः मनुष्यस्य. (३०) हे कर उमेशं प्रति अनिशं पूजापरायणः भव. (३१)
कं अले इति पदच्छेदः कमिति सुखे. सुखं यथास्यात्तथा पिबतः सम्बुद्धिगुप्तिः
(३२) सर्वज्ञानां [illegible] तत्संबोधनं, संबुद्धिगुप्तिः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषादी भैक्ष्यमश्नाति सदारोगं न मुञ्चति
दृष्टेनाऽपि त्वया वीर शम्भुनाऽरिः समः कृतः ॥३३॥
पिबतस्ते शरावेण वारि कह्लारशीतलम् ।
केनेमे दुर्विदग्धेन हृदये सन्निरोपितौ ॥ ३४ ॥
वटवृक्षो महानेष मार्गमावृत्य तिष्ठति ।
तावत्त्वया न गन्तव्यं यावन्नाऽन्यत्र गच्छति ॥ ३५ ॥
न मयागोरसाभिज्ञं चेतः कस्मात्प्रकुप्यसि ।
अस्थानरुदितैरेतैरलमालोहिते क्षणे ॥ ३६ ॥

अन्तर्लापिका ।

श्रीः ॥ का शंभुकांता किमु चंद्रकान्तं कान्तामुखं किं कुरुते भुजङ्गः।
कः श्रीपतिः का विषमा समस्या गौरीमुखं चुम्बति वासुदेवः १
का लोकमाता किमु देहमुख्यं रतेः किमादौ कुरुते मनुष्यः ।
को दैत्यहन्ता वद वै क्रमेण गौरी मुखं चुम्बति वासुदेवः २
व्रजन्ति पद्मानि कदा विकासं प्रिया गते भर्तरि किं करोति ।
रात्रौ च नित्यं विरहाऽऽकुला का सूर्योदये रोदिति चक्रवाकी ३
संतश्च लुब्धाश्च महर्षिसङ्घा विप्राः कृषिष्ठाः खलु माननीयाः ।
किंकिं समिच्छन्ति तथैव सर्वे नेच्छन्ति किं माधवदाघयानम् ४

---

(३३) विषादी खिन्नः पक्षे विषमत्तीति विषाधी सदा सर्वदा रोगं व्याधिं न मुञ्चति. पक्षे सदारः सस्त्रीकः अगं शैलं न मुञ्चति. (३४) हे एण मृग कल्हारशीतलं वारि उदकं पिबतः ते हृदये केन दुर्विदग्धेन इमौ शरौ सन्निरोपितौ इत्यन्वयः अत्रापि सम्बुद्धिगुप्तिः (३५) वटो बवयोरैक्यात् बटो वृक्षः अच्छभल्लः आवृत्य तिष्ठ. संधिगुप्तमेतत्. (३६) नमे आगोरसाभिज्ञं इतिच्छेदः मे चेतः आगोरसाभिज्ञं अपराधरसाभिज्ञं नेत्यर्थः सन्धिगुप्तमेतत् (१) शंभु कान्ता का उ० गौरी. एवमेव अन्यत्र ऊह्यं. भुजंगो जारः (४) सन्तः मानं, लुब्धाः धनं, महर्षिसंघाः वनं, विप्राः दानं, कृषिष्ठाः धनं, माननीयाः यानं इच्छन्ति. सर्वेपि माधवे वैशाखे दाघः ऊष्मा तस्मिन् यानं गमनं नेच्छन्ति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

को निर्दग्धस्त्रिपुररिपुणा कश्च कर्णस्य हन्ता
नद्याः कूलं विघटयति कः कः परस्त्रीरतश्च ।
कः सन्नद्धो भवति समरे भूषणं किं कुचानां
किं दुःसंगाद्भवति महतां मानपूजापहारः ॥ १० ॥

सीमन्तिनीषु का शान्ता राजा कोऽभूद्गुणोत्तमः ।
विद्वद्भिः का सदा वन्द्या अत्रैवोक्तं न बुध्यते ॥११॥

कंसप्रधानकृष्णः काशीतलवाहिनी गङ्गा ।
केदारपोषणरताः कंबलवन्तं न बाधते शीतम् ॥ १२ ॥

युधिष्ठिरः कस्य पुत्रो गङ्गा वहति कीदृशी ।
हंसस्य शोभा का वाऽस्ति धर्मस्य त्वरिता गतिः ॥१३॥

लङ्काभूपनिशाचरो रघुपतिं युद्धे कथं दृष्टवान्
दीनं पाति पितेव यः पशुपतिः कस्तस्य वाहः प्रियः ।
केनाऽपूर्वफलं नरैः सुकृतिभिः कस्मिन् स्थले भुज्यते
जारा ये भुवि तान् प्रशास्ति कतमो ह्येषामिहैवोत्तरम्॥१४॥

का पाण्डुपत्नी गृहभूषणं किं को रामशत्रुः किमगस्त्यजन्म ।
कः सूर्यपुत्रो विपरीतपृच्छा कुंतीसुतो रावणकुम्भकर्णः १५

करोति शोभामलके स्त्रियः कोऽदृश्यो न कांता विधिनाच कोक्ता।
अङ्गे तु कस्मिन् दहनः पुरारेः सिन्दूरबिन्दुर्विधवाललाटे १६

भोजनान्ते च किं पेयं जयन्तः कस्य वै सुतः ।
कथं विष्णुपदं प्रोक्तं तक्रं शक्रस्य दुर्लभम् ॥ १७ ॥

---

१० त्रिपुररिपुणा को निर्दग्धः मारः मदनः एवमग्रेपि. दुःसंगात् महतां किं मानपूजापहारः मानपूजयोः अपहारः नाशः (११) सीमन्तिनीषु का शान्ता-सीता एवमग्रेपि चरणाद्यन्ताक्षरयोर्मेलनेनोत्तरम् (१२) कृष्णः कं पुरुषं प्रधान मारितवान्-कंसं एवमग्रेपि (१३) चतुर्थपादस्यपदत्रयेण प्रश्नत्रयस्योत्तरं (१४) अत्र पादाद्याक्षरद्वयाविपर्यासेन उत्तरं यथालंकाभूपे इत्यत्र कालमि-त्यादि उत्तरार्धे केनेत्यस्य सुखेनेत्यर्थः (१५) अत्र चतुर्थपादस्थैः पञ्चभिःपदै-रुत्तरं रावणेन सहितः कुम्भकर्णः इयं विपरीतपृच्छा (१६) चतुर्थपादस्यसिन्दू-रबिन्दुरित्यादि पदचतुष्टयेन प्रश्नचतुष्टयस्योत्तरम् (१७) तक्रमित्यादि पदत्रयेण प्रश्नत्रयस्योत्तरम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कः खे चरति का रम्या का जप्या किं विभूषणम् ।
को वन्द्यः कीदृशी लङ्का वीरमर्कटकम्पिता ॥ ५ ॥

के भूषयन्ति स्तनमण्डलानि कीदृश्युमा चन्द्रमसः कुतः श्रीः ।
किमाह सीता दशकण्ठनीता हा राम हा देवर तात मातः ६

रवेः कवेः किं समरस्यसारं कृषेर्भयं किं किमुशन्ति भृङ्गाः ।
खलाद्भयं विष्णुपदं च केषां भागीरथीतीरसमाश्रितानाम् ७

किं कुर्वन्त्युषसि द्विजाः प्रतिदिनं के माननीयाः प्रभोः
का वा साहसिकी निशासु सततं द्यौः कीदृशी वर्तते ।
कुत्राऽऽस्ते मधु नारिकेरजफले कैः स्यात्पिपासाशमः
संध्यावंदनमाचरन्ति विबुधानारीभान्तर्जलैः ॥ ८ ॥

किं तृष्णाकारि कीदृग्रथचरणमहो रौति कः काऽब्धिकाञ्चिः
कोऽपस्मारी भुजङ्गे किमु कलिशमनं त्वार्यसंबोधनं किम् ।
का सुन्दर्यामपीन्दुः कथमचलभृतः का च सम्बुद्धिरग्रे—
र्बीजं किं काऽवनीजारमणमतिहरा हेमसारङ्गलीला ॥ ९ ॥

---

५ खे कः चरति. विः पक्षी. रम्या रमा. जप्या ऋक्. विभूषणं कटकं. वन्द्यः पिता. लंका-वीरमर्कटैर्हनुमदादिभिः कम्पिता नाशितेत्यर्थः (६) हाराः स्तन मण्डलानि भूषयन्ति. उमा-महारिवरता. तमातः रात्रितः (अयं प्रयोगो विचारणीयः) सीता किमाह हाराम, हादेवर, हातात हामातः (७) रवेः सारं-भा कान्तिः कवेः सारं गीः समरस्य सारं-रथी. योद्धा कृषेः भयं ईतिः अनावृष्ट्यादिः भृंगाः किं उशन्ति इच्छन्ति-रसं. खलाद्भयं केषां-आश्रितानां । विष्णुपदं केषां-भागीरथीतीर समाश्रितानाम् (८) उषसि द्विजाः प्रतिदिनं । किं कुर्वन्ति-संध्यावन्दनं. एवमग्रेप्यूह्यम्. (९) किं तृष्णाकारि-हेम रथचरणं सारं अराभिः सहितं. को रौति गली प्रशस्तकण्ठः रौति गायति. अब्धिकाञ्चिः इला पृथ्वी. अपस्मारी-लाली लालावान्. भुजंगे किं-गरं विषं. कलिशमनं साम सान्त्वं 'नह' इति लोके. आर्यसंबोधनं-हे. सुन्दर्यां का हेला लीला. इन्दुः कथं मली मलवान् कलंकीति यावत् अचलभृतः सम्बुद्धिः-साग अगैर्वृक्षैः सहित. अग्रेर्बीजं र. अवनिजा सीता तद्रमणो रामस्तन्मतिहरा-हेमसारंगलीला हेम्नः सुवर्णस्य सारंगो मृगस्तस्य लीला.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

के वा वर्षासु न स्युर्बिसमिव हरिणा किं विदीर्णं नखाग्रै-
र्विन्ध्याद्रेः को विसर्पन् विघटयति तरून्नर्मदावारिपूरः २८

अस्य कांता तिथिःकांत्या के सेवन्ते न सेवकैः ।
को मोहयति लोकांस्त्रीन् धामामा मीनकेतनः ॥ २९ ॥

बहिर्लापिका ।

श्रीः ॥ किमिच्छति नरः काश्यां भूपानां को रणे हितः
को वन्द्यः सर्वदेवानां दीयतामेकमुत्तरम् ॥ १ ॥

विराजराजपुत्रारेर्यन्नाम चतुरक्षरम् ।
अर्धं वसतु शत्रूणामुत्तरं तव मन्दिरे ॥ २ ॥

कः खे भाति हतो निशाचरपतिः केनाऽम्बुधौ मज्जति
कः कीदृक् तरुणीविलासगमनं किं कार्यते सज्जनैः ।

---

(२८) कश्चिद्राजानं प्रति कवेरुक्तिरियं पुंसः सम्बोधनं—नः, करिणां रुचः शोभाः के विदधति—मदाः, अग्नेर्द्विषत्—वारि, रिपूणां शून्या का-पूः नगरी, नर-करोति संबोधनं नरकं असुरं कः अवधीत्—अः विष्णुः, रामकं रमणीयं किं-नर्म. वर्षासु के न स्युः-दावाः, बिसमिव हरिणा किं विदीर्णं-रिपूरः हिरण्यकशिपोरुरः स्थलं. विन्ध्याद्रेः को विसर्पंस्तरून्विघटयति-नर्मदावारिपूरः (२९) मा लक्ष्मीः, अमा अमावास्या, अमाः अभाग्याः, मीनकेतनः मदनः । (१) उ० मृत्युञ्जयः अत्र पूर्वार्धस्थप्रश्नत्रयस्य पदत्रयेणोत्तरम् उत्तरार्धस्थप्रश्नस्य एकपदेनोत्तरम् (२) वयः पक्षिणस्तेषां राजा गरुडस्तद्राजा विष्णुस्तत्पुत्रो मदनस्तच्छत्रुः शिवस्तस्य चतुरक्षरं नाम—मृत्युञ्जय इति. तदर्धं मृत्युरिति तव शत्रूणां मन्दिरे उत्तरमर्धं जय इति तव मन्दिरे वस[illegible] राजानं प्रत्याशीर्वादः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रं किं नृपतेः किमर्जुनधनुः को रामरामाहरो
मत्प्रश्नोत्तरमध्यमाऽक्षरपदं यत्तत्तवाशीर्वचः ॥ ३ ॥

प्राप्ते वसंतसमये वद किं तरूणां किं क्षीयते विरहिणामुरगः किमेति
किं कुर्वते मधुलिहो मधुपानमत्ताःकीदृग्वनं मृगगणास्त्वरितं त्यजंति

भागीरथी कथम्भूता कामिनी प्राह किं प्रियम् ।
एकमेवोत्तरं देहि शास्त्रलौकिकभाषया ॥ ५ ॥
बुधः कीदृग्वचो ब्रूते को रोगी कश्च नास्तिकः ।
कीदृक् चन्द्रं नमस्यन्ति किं सूत्रं पाणिनेर्वद ॥ ६ ॥

किं त्राणं जगतां न पश्यति च कः के देवताविद्विषः
किं दातुः करभूषणं निरुदरः कः किं पिधानं दृशाम् ।
के खे खेलनमाचरन्ति सुदृशां किं चारुताभूषणं
बुद्ध्या ब्रूहि विचार्य सूक्ष्ममतिभिस्त्वेकं द्वयोरुत्तमम् ॥ ७ ॥

---

(३) प्रश्नोत्तराणि—

प्र	हे	शः
रा	मे	पः,
भे	ना	कः,
मं	थ	रं,
रु	चि	रं,
सा	रं	गः
गां	डी	वं,
रा	व	णः

एतदुत्तरमध्यमाक्षरघटितं वाक्यं (हे मे नाथ चिरं जीव) इति राजानं प्रत्याशीर्वचनं. सारंगो गजः ।

(४) अत्र दवेन वनवह्निना विकलं व्याकुलमित्यर्थकेन (दवविकलम्) इति समुदितान्त्योत्तरं प्रथमाद्यक्षराणामन्त्याक्षरेण योजने पूर्वेषां चतुर्णां प्रश्नानामुत्तराणि भवन्ति. यथा प्रथमे किं भवतीति प्रश्ने दलमिति. एवमेवोत्तरत्र वबि इत्यत्र बवयोः सावर्ण्यात् (बलं, बिलं) इति कलं अव्यक्तमधुरं इति (५) 'मलापहा' इत्युत्तरम् (६) अर्थवदधातुरप्रत्ययःप्रातिपदिकं, बुधः कीदृग्वचोब्रूते अर्थवत् एवमग्रेपि (७) कन्त्रः अत्रं इन्द्रियहीनश्च दानवाः दानवारि च दानोदकमित्यर्थः । नमः राहुः अनयकाश्च । नह: [illegible] एतानि चत्वारि उत्तराणि प्रत्येकं प्रश्नद्वयस्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गता मा किं स्थानं पथि सह तया का स्थितवती
नृपे गत्येवं पृष्टा सखि चतुरदूती स्थितवती
विलोक्याऽलंकारं निजमथ च शाकं नरपतिं
निराकाङ्क्षं चक्रे कथय कथमेतत्प्रभवति ॥ ८ ॥
गतक्लेशाऽऽयासा विमलमनसः कुत्र मुनय–
स्तपस्यन्ति स्वस्याः सुररिपुरिपोः का च दयिता ।
कविप्रेयः किं स्यान्नवलघुयुतैरष्टगुरुभि–
र्बुधावृत्तं वर्णैः स्फुटघटितबन्धं कथयत ॥ ९ ॥
उरसि मुरभिदः का गाढमालिङ्गिताऽऽस्ते
सरसिजमकरन्दाऽऽमोदिता नन्दने का ।
गिरिसमलघुवर्णैरर्णवाख्यातिसंख्यै–
र्गुरुभिरपि कृता का छन्दसां वृत्तिरस्ति ॥ १० ॥
नीचेषु यावनी वाणी का कः स्याच्छुभदो जने ।
शंभोरावरणं किं कं भजन्ते व्याधयो जनम् ॥ ११ ॥

---

(८) कश्चिद्राजा कां चिन्नायिकां स्वगृहमानयत्. ततश्च तद्भर्तारमागतं दृष्ट्वा तां स्वगृहं प्रापयितुं दूतीमाज्ञापयति स्म. सा च दूती तां स्वगृहं प्रापय्य पुना राज निकट आगत्य स्थितवती तां प्रत्याह राजा सा किं स्वस्थानं गता ? गतवत्या तया सह पथि मार्गे का स्थितवती. एवं राज्ञा पृष्टा चतुरा दूती स्थितवती सती निजमलंकारं 'पोहोची' ति भाषाप्रसिद्धं तथा शाकं 'मेथी' ति भाषाप्रसिद्धं शाकविशेषं च अवलोक्य तावन्मात्रेणैव नरपतिं निराकांक्षमुत्तरविषये आकांक्षारहितं चक्रे एतदलंकारशाकावलोकनं कथं प्रभवति राज्ञो नैराकांक्ष्यसंपादने कथं समर्थं भवतीति कथयेति कविप्रश्नः अत्र प्रथमप्रश्नस्य प्राप्तेत्यर्थकं पोहोचीति भाषयोत्तरं. द्वितीयप्रश्नस्य तु अहमासमित्यर्थकं भाषया मेथीत्युत्तरमिति तात्पर्यम् बोध्यम् (९) मुनयः कुत्र तपस्यन्तीति प्रश्ने शिखरिणि पर्वत इत्युत्तरं सुराणां रिपुर्हिरण्यकशिपुस्तस्य रिपुर्विष्णुस्तस्य दयिता केति प्रश्ने ई लक्ष्मीरित्युत्तरम् कविप्रेयः कवीनां प्रियवृत्तं किमिति प्रश्ने शिखरिणीत्युत्तरम् (१०) मुरभिदः विष्णोरुरसि आलिंगिता मा लक्ष्मीः, अलिनी भ्रमरी, मालिनी. इति त्रीण्युत्तराणि क्रमेण (११) अंब, लाभः, अजिनम्, अवेलाभोजिनं, इति चतुर्णाम् प्रश्नानां चत्वारि उत्तराणि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

को नयति जगदशेषं क्षयमथ बिभराम्बभूव कं विष्णुः ।
नीचः कुत्र सगर्वः पाणिनिसूत्रं च कीदृक्षम् ॥ १२ ॥

न श्लाघते खलः कस्मै सुप्तिङन्तं किमुच्यते ।
लादेशानां नवानां च तिङां किं नाम कथ्यताम् ॥ १३ ॥

सततं श्लाघते कस्मै नीचो भुवि किमुत्तमं ।
कर्तर्येपि रुचादीनां धातूनां किं पदं भवेत् ॥ १४ ॥

कः कर्णाऽरिपिता गिरीन्द्रतनया कस्य प्रिया कस्य तुक्
को जानाति परेङ्गितं विषमशुः कुत्रोद्भूत्कामिनाम् ।
भार्या कस्य विदेहजा तुदति का भौमेन्हि निन्द्यश्च कः-
स्तत्प्रत्युत्तरमध्यमाऽक्षरपदं सर्वार्थसंपत्करम् ॥ १५ ॥

लावण्यं क्व नु योषितां नभसि के संचारमातन्वते ।
केषामुच्चतरा भवन्ति निनदाः क्व क्रीडतो दम्पती ।
केषु स्वं प्रकटीचकार भगवान् सीतापतिः पौरुषं
तत्प्रश्नोत्तरमध्यवर्णघटितो देवोऽस्तु वः श्रेयसे ॥ १६ ॥

कः स्यादम्बुदयाचको युवतयः कं कामयन्ते पतिं
लज्जा केन निवार्यतेऽतिनिकटे दासे कथं यावनी ।

---

(१२) यमः, अगं पर्वतं, धने, यमीमन्यने. इति चत्वारि उत्तराणि क्रमेण ज्ञेयानि (१३) परस्मै, पदं, परस्मैपदं इति त्रीण्युत्तराणि । (१४) आत्मने, पदं, आत्मनेपदं इति त्रीण्युत्तराणि ।

(१५) उत्तराणिः—
वा स वः
ह र स्य.
ह स्व स्य.
म ति मान्
म न सि
रा म स्य.
कु स्तु तिः
भ भ्यं नः

एतन्मध्यमाक्षरैः संजातं पदं वाक्यं (सरस्वति नमस्तुभ्यमिति) अत्र तुकागमो ह्रस्वस्य पिति-कृतितुगिति सूत्रेण विहितः अत्र विषमाः पञ्च वाणा यस्यैव विषमशुः कामः ।

(१६) उ० वपुषि अब्जजाः भेरीणां एकान्ते रक्षस्सु इति पञ्च प्रश्नोत्तराणि तन्मध्यवर्णघटितः पुण्डरीकाक्षः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषा दर्शयतेति वस्तुनि महाराष्ट्री कथं वा भवे-
दाद्यन्ताक्षरयोगलोपरचनाचातुर्यतः पूर्यताम् ॥ १७ ॥

वदेह सुमते मतेर्विलसितेन पृच्छाम्यहं
कुतूहलवशात्परं कपटनाटनाम्नैव तु ॥
स्मराकुलितया स्त्रिया रहसि संगतोपि ध्रुवं
युवा परमसुन्दरः किमिति दूरतो वर्जितः ॥ १८ ॥

सूर्यान्योक्तयः ।

श्रीः ॥ रवेरेवोदयः श्लाघ्यः कोऽन्येषामुदयग्रहः ।
न तमांसि न तेजांसि यस्मिन्नभ्युदिते सति ॥ १ ॥
खद्योतो द्योतते तावद्यावन्नोदयते शशी ।
उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमाः ॥ २ ॥

तस्यैवाऽभ्युदयो भूयाद्भानोर्यस्योदये सति ।
विकासभाजो जायन्ते गुणिनः कमलाकराः ॥ ३ ॥
करान् प्रसार्य रविणा दक्षिणाशावलम्बिना ।
न केवलमनेनाऽऽत्मा दिवसोऽपि लघूकृतः ॥ ४ ॥

न मीलनाय पद्मानामुदयायाऽऽत्मतेजसाम् ॥
तमसामवकाशाय व्रजत्यस्तममौ रविः ॥ ५ ॥
करस्फोटोम्बरत्यागस्तेजोहानिः सरागता ।
वारुणीसंगताऽवस्था भानुनाऽप्यनुभूयते ॥ ६ ॥

---

(१७) दाखवातससारंथः। अत्रप्रथमप्रश्नोत्तरं सारंगः चातकः तत्रान्त्याक्षरलोपपूर्वकंमाद्याक्षरयोगे ससारं ब्रह्मलमिति द्वितीयप्रश्नोत्तरं एव सर्वत्रोह्यम्
(१८) दृष्टं रतं यस्य सः रतसामर्थ्याभावाद्वर्जित इत्यर्थः।

१ ज्योतिरिंगणः (काजवा इति लोके) २ सूर्ये. ३ किरणान्· पक्षे हस्तान् ४ दक्षिणदिक् पक्षे दक्षिणायाः आशाः स्पृहा ५ आकाशं पक्षे वस्त्रं ६ वरुणदिक् पक्षे मद्यविशेषः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]यत्पादाः शिरसा न केन विधृताः पृथ्वीभृतां[2] मध्यत-
स्तस्मिन्भास्वति[3] राहुणा कवलिते[4] लोकत्रयीचक्षुषि ।
खद्योतैः स्फुरितं तमोभिरुदितं ताराभिरुज्जृम्भितं
घूकैरुत्थितमाः किमत्र करवै किं किं न कैश्चेष्टितम् ॥ ७ ॥

पूर्वाह्णे प्रतिबोध्य पङ्कजवनान्युत्सार्य नैशं तमः
कृत्वा चन्द्रमसं प्रकाशरहितं निस्तेजसं तेजसा ॥
मध्याह्ने सरितां पयः प्रविततैरापीय दीप्तैः करैः
सायाह्ने रविरस्तमेति विवशः किं नाम शोच्यं भवेत् ॥८॥

क्षपां क्षोणीकृत्य प्रसभमुपहृत्याऽम्बु सरितां
प्रताप्योर्वीं कृत्स्नां तरुगहनमुच्छोष्य सकलम् ।
क्व संप्रत्युष्णांशुर्गत इति तदन्वेषणपरा-
स्तडिद्दीपाऽऽलोकैर्दिशि दिशि चरन्तीह जलदाः ॥ ९ ॥

देवो हरिर्वहतु वक्षसि कौस्तुभं त-
मन्यैव काचन पुनर्द्युमणेः प्रतिष्ठा ।
तत्पादसंगतितरङ्गितसौरभाणि
धत्ते स एव शिरसा सरसीरुहाणि ॥ १० ॥

उद्यन्त्वमूनि सुबहूनि महांसि लोके
चन्द्रोऽप्यलं भुवनमण्डलमण्डनाय ॥
सूर्यादृते न समुदेति न चास्तमेति ।
येनोदितेन दिनमस्तमितेन रात्रिः ॥ ११ ॥

येनोन्मथ्य तमांसि मांसलघनस्पर्धीनि सर्वं जग-
च्चक्षुष्मत्परमार्थतः कृतमिदं देवेन तिग्मत्विषा ।

---

१ किरणाः चरणाश्च २ शोभानां राज्ञां च ३ सूर्ये ४ ग्रस्ते ५ दिगन्तेः ६ उन्नद्धानि कृत्वा ७ निशासंबन्धि ८ रात्रिम् ९ कथां कृत्वा १० प्रदिदेश दीपस्तस्याऽऽलोकाः प्रकाशास्तैः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन्नस्तमिते विवस्वति कियान् क्रूरो जनो दुर्जनो
यद्धत्ते धृतिं शशाङ्कशकलालोके प्रदीपेऽथवा ॥ १२ ॥

यातः पूषा भवति महते नोपतापाय यस्मा-
त्कालेनास्तं क इव न गतो याति यास्यन्ति चान्ये।
एतावत्तु व्यथयति यदालोकबाह्यैस्तमोभि-
स्तस्मिन्नेव प्रकृतिमहति व्योम्नि लब्धोऽवकाशः॥ १३ ॥

चन्द्रवर्णनम्।

श्रीः ॥ आलोकवन्तः सन्त्येव भूयांसो भास्करादयः।
चन्द्रमा एव तु श्रावद्रावकर्मणि कर्मठः ॥ १ ॥

नक्षत्राणि बहूनि सन्ति परितः पूर्णोदयान्यम्बरे
किं तैः शान्तिमुपैति दीर्घतिमिरं किं वार्धिरुज्जृम्भते।
किं स्यादार्तचकोरपारणविधिर्भ्रातः सुधादीधिते
तन्नूनं भुवनैकतापशमनः श्लाघ्यस्तवैवोदयः ॥ २ ॥

निष्पीडितो यद्यपि दैवयोगान्निशाकरश्चाऽपि विधुंतुदेन।
तथाऽपि पीयूषविशेषवर्षी सुधाकरः कैरवकाननेषु ॥ ३ ॥

वक्रोऽस्तु बाल्ये तदनु प्रवृद्धः कलङ्कवानस्तु जडोऽस्तु चन्द्रः।
महेशमौलौ च पदं दधातु जायेत वन्द्यो विविधोपकारात् ॥४॥

तारागणाश्चन्द्रमसं भजन्ते न जातु नाथं नलिनाऽऽकराणाम्।
एतावता तस्य किमस्ति हानिर्ज्ञाता तयोरन्तरमेष लोकः ॥५॥

किमत्रेर्नो पुत्रः किमु न हरचूडामणिरसौ
न किं हन्ति ध्वान्तं जगदुपरि किं वा न वसति।
यदेतस्यान्तःस्था विलसति लघुर्लक्ष्मकणिका
विधातुर्दोषोऽयं न तु गुणनिधेस्तस्य किमपि ॥ ६ ॥

---

१ प्रकाशवन्तः २ बहवः ३ पाषाणः समर्थः ५ मयूखः ६ राहुणा ७ कुमुदवनेषु ८ नलिनाऽऽकराणां नाथं सूर्यम् ९ अन्तःकाले १० लाञ्छनम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मारस्य मित्रमसि किं च सुधामयूख
शंभावपि प्रणयितां प्रकटीकरोषि ।
विश्वासपात्रमसि यद्द्विषतोस्तयोर-
प्येतत्तव प्रकृतिशुद्धतनोश्चरित्रम् ॥ ७ ॥

यस्योदयेनैव दिशां प्रसादस्तापाऽपनोदोऽपि जगत्त्रयस्य ।
चकोरचञ्चूपुटपारणे तु चन्द्रस्य तस्याऽस्ति कियान्प्रयासः ८

ध्मांता कालतलाऽनलैः कवलिता कण्ठस्थहालाहलै--
राक्रीडाऽथ जटाऽटवीविलुठितैराशीविषाणां गणैः ॥
छन्ना भस्मभिराहताऽस्थिपटलैः क्लिन्नाऽऽर्द्रचर्माम्बरैः
स्वीयां मुञ्चति माधुरीं हरशिरोरत्नं किमिन्दोः कला ॥९॥

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ॥
नेत्राऽऽनन्देन चन्द्रेण माहेन्द्रीदिगलंकृता ॥ १० ॥

पश्योदेति वियोगिनीदिनमणिश्चण्डीशचूडामणि--
स्तारामौक्तिकहारनायकमणिः शृङ्गाररक्षामणिः ॥
मौढाऽनङ्गभुजङ्गमस्तकमणिः कन्दर्पसीमन्तिनी--
काञ्चीमध्यमणिश्चकोरपरिषच्चिन्तामणिश्चन्द्रमाः ॥ ११॥

आकाशवापीसितपुण्डरीकं शाणोपलं मन्मथसायकानाम् ॥
पश्योदितं सादरमायताक्षि संध्याऽङ्गनाकन्दुकमिन्दुबिम्बम् १२

ओंकारो मदनद्विजस्य गगनक्रोडैकदंष्ट्राऽङ्कुर-
स्तारामौक्तिकशुक्तिरन्धतमसस्तम्बेरमस्यांऽङ्कुशः ॥

---

१ मदनस्य २ प्रीतिम् ३ वपिता 'फुंकली' ४ जटारूपा या अटवी अरण्यं तस्मिन् विलुठितैः ५ सर्पाणाम् ६ क्लेदयुक्ता ७ विरहिणीकपोलवत्पाण्डुरेण ८ प्राची दिक् ९ विरहिणीनां सूर्यवत्तापकः १० आकाश एव वापी तस्याः श्वेत कमलम् ११ शाणपाषाणः शस्त्रादितीक्ष्णीकरणार्हः पाषाण इति : साहाण, इति लोके १२ वराह.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृङ्गाराऽर्गलकुंश्चिका विरहिणीमर्मच्छिदा कर्तरी
सायं वारवधूनखक्षतमियं चान्द्री कला राजते ॥ १३ ॥
कृष्णवर्णहृदयं सितदीप्तिं दुर्धियः किल कलङ्किनमाहुः ।
कृष्णवर्णसमुदीरणमात्रादेव यद्गलति दृश्यकलङ्कः ॥ १४ ॥
कलानिधिरवेरयं समुपलभ्य रूपं स्वयं
दिनाऽन्तसमयेऽस्पृशत्सपदि पद्मिनीं रागवान् ।
धवाऽन्यकरसङ्गमान्मुकुलितेति पूर्वाऽऽकृति
समीक्ष्य जहसुः प्रियाँ ध्रुवमभूदतः पाण्डुरः ॥ १५ ॥
दैवाद्यद्यपि तुल्योऽभूद्भूतेशस्य परिग्रहः ।
तथाऽपि किं कपालानि तुलां यान्ति कलानिधेः १६
अहो नक्षत्रराजस्य साऽभिमानं विचेष्टितम् ।
परिक्षीणस्य वक्रत्वं संपूर्णस्य सुवृत्तता ॥ १७ ॥
हरमुकुटे सुरतटिनी निकटस्थितिलाभतो द्विजेन्द्रेण ।
अपि गरलं फणिफूत्कृतिरीक्षणतीक्ष्णाऽऽशुशुक्षणिः क्षान्तः ॥ १८ ॥
शिरसा धार्यमाणोऽपि सोमः सौम्येन शंभुना ।
तथाऽपि कृशतां धत्ते कष्टः खलु पराऽऽश्रयः ॥ १९ ॥
नयनमसि जनार्दनस्य शंभोर्मुकुटमणिः सुदृशां त्वमादिदेवः ।
त्यजसि न मृगमात्रमेकमिन्दो चिरमिह येन कलङ्किनं वदन्ति २०
वरमेका कला रम्या ययाऽधःक्रियते भवैः ।
बह्वीभिरपि किं ताभिः कलङ्को यासु दृश्यते ॥ २१ ॥
क्षीणः क्षीणः समीपत्वं पूर्णः पूर्णोऽतिदूरताम् ।
उपैति मित्रांद्यश्चन्द्रो युक्तं तन्मलिनात्मनः ॥ २२ ॥

---

१ उद्घाटनसाधनम् 'किल्ली' इति लोके २ अवेः सुखात् ३ पतिः ४ पूर्ववदाकृतिः स्वरूपं यस्य तथाविधं प्रथमं पद्मिनीदर्शनेन विकसाकृतिं पश्चात्तन्मुकुलीभावेन निराशतया विकारापगमेन स्वरूपावस्थितिं प्राप्तमित्यर्थः ५ वैवर्ण्यः ६ कपालास्थीनि ७ तृतीयनेत्रस्थितस्तीक्ष्णाग्निः ८ षोडशोभागः चतुःषष्टिकलानामन्यतमा च ९ रुद्रः संसारश्च १० सूर्यात् पक्षे स्निग्धात् ११ कलंकिनः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्ले पक्षे शीतरश्मिर्बलीयान्न प्राधान्यं तारकायास्तु दृष्टम् ।
अक्रस्या युक्ते विद्यमनेऽपिकान्ते
न प्राधान्यं योषितां क्वापि दृष्टम् ॥२३॥

उच्चैः स्थानकृतोदयैर्बहुविधैर्ज्योतिर्भिरुद्यत्प्रभैः ।
शुक्राद्यैः किममीभिरत्र वितथां प्रौढिं दधानैरपि ।
यावल्लोकतमोऽपहेन भवता लक्ष्मीर्न विस्तार्यते
तावच्चन्द्र कथं प्रयाति परमां वृद्धिं स रत्नाकरः ॥२४॥

आस्ते विधुःपरमनिर्वृत एव मौलौ
शंभोरिति त्रिजगतीजनचित्तवृत्तिः ।
अन्तर्निगूढनयनाऽनलदाहदुःखं
जानाति कः परमुते वत शीतरश्मेः ॥२५॥

दोषाकरोऽपि कुटिलोऽपि कलङ्कितोऽपि
मित्रावसानसमये विहितोदयोऽपि ।
चन्द्रस्तथाऽपि हरवल्लभतामुपैति
नैवाऽऽश्रितेषु महतां गुणदोषशङ्का ॥ २६ ॥

आननानि हरिणीनयनानामद्भुतानि च समीक्ष्य जगत्याम् ।
लज्जयैव घनमण्डललीनो मन्दमन्दमहदेन्दुरुदेति ॥ २७॥

वीथीषुवीथीषु विलासिनीनां मुखानि संवीक्ष्य शुचिस्मितानि ।
जालेषु जालेषु करं प्रसार्य लावण्यभिक्षामटतीव चन्द्रः ॥ २८ ॥

कपाले मार्जारः पय इति करान् लेढि शशिन-
स्तरुच्छिद्रप्रोतान् विसमिति करी संकलयति ।
रतान्ते तल्पस्थं हरति वनिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विभ्रमयति ॥ २९ ॥

निजकरनिकरसमृद्ध्या धवलय भुवनानि पार्वणशशाङ्क ।
सुचिरं हन्त न सहते विधिरिह सुष्टु स्थितं कमपि ॥ ३० ॥

---

१ नक्षत्रैः २ गुप्तः ३ दोषा रात्रिस्तस्याः आकरः पक्षे दोषाणां आकरः खनिरि-त्यर्थः ४ सूर्यास्तसमये पक्षे मित्रव्यसनकाले ५ शिवप्रियताम् ६ सौन्दर्यस्य भिक्षां याचनाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्जातोसि पयोनिधौ हरजटाजूटे प्रसिद्धोसि य-
द्विश्वस्योदरदीपकोसि विधिना सृष्टोसि यद्धामृतैः
भ्रातः शीतमयूख सर्वमधुना म्लानीकृतं यत्त्वया ।
राजीवं यदपास्य कैरवकुलं नीतं प्रकाशास्पदम् ॥ ३१ ॥

मेघाऽन्योक्तयः ।

श्रीः ॥ गर्जन्नम्बु ददाति तच्च कणिकारूपेण यत्र क्वचि—
द्वर्षाकालमपेक्ष्य दानसमये कार्ष्ण्यं[1] विधत्ते मुखे ।
पश्चात्पाण्डुरतामुपैति लघुतामप्येति भूयस्ततः
श्रीमद्रामनृपालशेखरविभो दाता कियान्वारिदः ॥ १ ॥

मुञ्च मुञ्च सलिलं दयानिधे नास्ति नास्ति समयो विलम्बने ।
अद्य चातककुले मृते पुनर्वारि वारिधर किं करिष्यसि ॥ २ ॥

वितर वारिद वारि दवातुरे[2] चिरपिपासितचातकपोतके ।
प्रचलिते मरुति[3] क्षणमन्यथा क्व च भवान्क्व पयः क्व च चातकः ३

त्वमेव चातकाऽऽधार इति केषां न गोचरः ।
किमम्भोद वदाऽस्माकं कार्पण्योक्तिं प्रतीक्षसे ॥ ४ ॥

एकस्य तस्य मन्ये धन्यामभ्युन्नतिं जलधरस्य ।
विश्वं सशैलकाननमाननमवलोकते यस्य ॥ ५ ॥

प्रावृषेण्यस्य[4] मालिन्यं[5] दोषः कोऽभीष्टवर्षिणः ।
शारदाऽभ्रस्य शुभ्रत्वं वद कुत्रोपयुज्यते ॥ ६ ॥

जलधर जलभरनिकरैरपहर परितापमुद्धतं जगतः ।
नोचेदपसर दूरं हिमकरकरदर्शनं वितर ॥ ७ ॥

चातकः स्वाऽनुमानेन जलं प्रार्थयतेऽम्बुदात् ।
स स्वौदारतया सर्वां प्लावयत्यम्बुना महीम् ॥ ८ ॥

---

१ कृष्णताम् २ दावानलपीडिते ३ वायौ ४ प्रावृट्कालिकस्य ५ मलिनताम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैलेयेषु शिलातलेषु च गिरेः शृङ्गेषु गर्तेषु च
श्रीखण्डेषु विभीतकेषु च तथा पूर्णेषु रिक्तेषु च ।
स्निग्धेन ध्वनिनाऽखिलेऽपि जगतीचक्रे समं वर्षतो
वन्दे वारिद सार्वभौम भवतो विश्वोपकारि व्रतम् ॥९॥

अयि जलद न दास्यसि कतिचित्त्वं चातकाय जलकणिकाः ।
तदयमचिरेण भविता सलिलाञ्जलिदानयोग्यस्ते ॥ १० ॥

आसन् यावन्ति याञ्चासु चातकाऽश्रूणि चाऽम्बुद ।
तावन्तोऽपि त्वया मेघ न मुक्ता वारिबिन्दवः ॥ ११ ॥

अमुं कालक्षेपं त्यज जलद गम्भीरमधुरैः
किमेभिर्निर्घोषैः सृज झटिति झांकारि सलिलम् ।
अये पश्याऽवस्थामकरुणसमीरव्यतिकर—
ज्वलद्दावज्वालावलिजटिलमूर्तेर्विटपिनः ॥ १२ ॥

शोषं गते सरसि शैवलमञ्जरीणा-
मन्तःस्थितैर्विलुठति तापविशीर्णदेहः ।
अत्राऽन्तरे यदि न वारिद वारिपूरै-
राप्लावयेस्तदनु किं मृतमण्डनेन ॥ १३ ॥

आपो विमुक्ताः क्वचिदाप एव क्वचिन्न किंचिद्गरलं क्वचिच्च ।
यस्मिन् विमुक्ताः प्रभवन्ति मुक्ताः पयोद तस्मिन्विमुखः कुतस्त्वम् ।

दवदहनजटालज्वालजालाऽऽहतानां
परिगलितलतानां म्लायतां भूरुहाणाम् ।
अयि जलधर शैलश्रेणि शृङ्गेषु तोयं
वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥ १५ ॥

शृण्वन् पुरः परुषगर्जितमस्य हन्त
रे पान्थ विह्वलमना न मनागपि स्याः ।
विश्वाऽर्तिवारणसमर्पितजीवनोऽयं
नाऽऽकर्णितः किमु सखे भवताऽम्बुवाहः ॥ १६ ॥

---

१ व्योमोल्लिखितैर्भीमघर्घराकृतिः [illegible] ५ मत्स्यविशेषः ६ शोभया ७ दावाग्नि ८ म्लानिं प्राप्नुवताम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोपेक्षा न च दाक्षिण्यं न प्रीतिर्न च सङ्गतिः।
तथाऽपि हरते तापं लोकानामुन्नतो घनः॥ १७॥

धीरै[1]र्ध्वनिभिरलं ते नीरद मे मासिको गर्भः।
उन्मद[2]वारणबुद्ध्या मध्येजठरं समुच्छल[3]ति॥ १८॥

नाऽहं जलद कदाचिच्चातक इव जीवनं याचे।
अहमस्मि नील[4]कण्ठस्तुष्येऽहं शब्दमात्रेण॥ १९॥

जलदः समुद्र[5]सेवामाचरति समग्रभुवनभरणाय।
कुरुते ताम[6]पि हन्तमतिरात्म[7]म्भरि[8]रनिशमौर्वाग्नि[9]ः॥ २०॥

नीहाराकरसारसागरसरित्कासारतीराश्रमं
त्यक्त्वा तोयद चातकेन महती सेवा समालम्बिता।
तस्मै तत्फलितं समुज्झसि शिलासंताडनं मस्तके
गाढं गर्जसि वज्रमुज्झसि तडिल्लेखाभिरातर्जसि॥ २१॥

अन्योपि चन्दनतरोर्महनीयमूर्तेः
सेकार्थमुत्सहति तद्गुणबद्धतृष्णः।
शाखोटकस्य पुनरस्य महाशयोय-
मम्भोद एव शरणं बत निर्गुणस्य॥ २२॥

अये हेलावेलाकुलितकुलशैले जलनिधौ
कुतो वारामोघं बत जलद मोघं वितरसि।
समन्तादुत्तालज्वलदनलकीलाकवलन-
क्लमोपेतानेतानुपचर पयोभिर्विटपिनः॥ २३॥

आश्वास्य पर्वतकुलं तपनोपतप्तं
दुर्दावबह्निविधुराणि च काननानि।
नानानदीनदशतानि च पूरयित्वा
रिक्तोसि यज्जलद सैव तवोत्तमश्रीः॥ २४॥

---

१ गम्भीरशब्दैः २ मत्तहस्तिबुद्ध्या ३ उद्गानं करोति ४ मयूरः ५ समुद्र-सेवाम् ६ मन्दमतिः ७ स्वोदरपूरकः ८ [illegible] ९ वाडवाग्निः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालातिक्रमणं कुरुष्व नितरां विस्फूर्जितैस्त्रासय
स्फारैर्भीषय गर्जितैरतितरां कार्यं मुखे दर्शय ।
अस्यानन्यगतेः पयोदमनसो जिज्ञासया चातक-
स्याधेहि त्वमिहाखिलं तदपि न त्वत्तः परं याचते २५

तवैव प्राविण्यं जलद जगदानन्दकमिदं
यदम्भःपालीराहरसि खलु सत्त्राज्जलनिधेः ।
निसर्गात्क्षारास्तानयसि च कथंचिन्मधुरता-
मथासामासारैर्युगपदुपकर्तासि जगतः ॥ २६ ॥

यदम्बुकणमादाय प्राप्तोपि जलदोन्नतिम् ।
तस्योपर्यम्बुधेर्गर्जन्मलिनस्योचितं च ते ॥ २७ ॥

त्वयि वर्षति पर्जन्ये सर्वे पल्लविता द्रुमाः
अस्माकमर्कवृक्षाणां पूर्वपत्रेषु संशयः ॥ २८ ॥

वाय्वन्योक्तयः ।

श्रीः ॥ हेमाम्भोरुहपत्तने परिमलस्तेनो वसन्तानिल-
स्तत्रत्यैरिव यामिकैर्मधुकरैरारब्धकोलाहलः ।
निर्यातस्त्वरया व्रजन्निपतितः श्रीखण्डपङ्कद्रवै-
र्लिप्तः केरलकामिनी कुचतटे खञ्जः शनैर्गच्छति ॥ १ ॥

लतां पुष्पवतीं स्पृष्ट्वा सुस्नातश्च महार्णवे
पुनस्तत्स्पर्शभीत्येव वायुर्याति शनैःशनैः ॥ २ ॥

वायुरेव महाभूतं वदन्तु निखिला जनाः ।
आयुरेव भूतानामिति मन्यामहे वयम् ॥ ३ ॥

अलिपटलैरनुयातां सहृदयहृदयज्वरं विलुम्पन्तीम्
मृगमदपरिमललहरीं समीर किं पामरेषु रे किरसि ॥४॥

---

१ द्वारपालैः २ इतीति शेषः महाभूतमिति ३ वायुरित्यत्र वाशब्दस्यैवकारार्थत्वादेभूतानामायुरेवेति भावः
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये जात्या लघवः सदैव गणनां याता न ये कुत्रचित्
पद्भ्यामेव विमर्दिताः प्रतिदिनं भूमौ विलीनाश्चिरम् ।
उत्क्षिप्ताश्चपलाशयेन मरुता पश्याऽन्तरिक्षे सखे
तुङ्गानामुपरि स्थितिं क्षितिभृतां कुर्वन्त्यमी पांसवः ॥ ५ ॥
हंहो दग्धसमीर सर्पति भवत्यस्मिन्वने शाखिनां
शाखाघर्षणजः सकोपि सुचिरं जज्वाल दावानलः ।
येनादाहि पलायमानहरिणं भस्मीभवद्भूरुहं
शुष्यन्निर्झरमुत्पतत्खगकुलं चेष्टद्भुजङ्गं वनम् ॥ ६ ॥
कोयं भ्रान्तिप्रकारस्तव पवनपदं लोकपादाहतानां
तेजस्विव्रातसेव्ये नभसि नयसि यत्पांशुपूरं प्रतिष्ठाम् ।
अस्मिन्नुत्थाप्यमाने जननयनपथोपद्रवस्तावदास्तां
केनोपायेन सह्यो वपुषि कलुषतादोष एषस्त्वदैव ॥ ७ ॥
अहह चण्डसमीरण दारुणं किमिदमाचरितं चरितं त्वया ।
यदिह चातकचञ्चुपुटोदरे पतति वारि तदेव निवारितम् ॥८॥

सिंहान्योक्तयः ।

श्रीः ॥ क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भदलनग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ १ ॥
स्वल्पस्नायुवसाऽवशेषमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधः शान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वाऽनुरूपं फलम् ॥ २ ॥
सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥ ३ ॥

---

१ क्षुधया कृशः २ क्षीणतेजाः ३ तेजसो…

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोऽहमसहायोऽहं कृशोऽहमपरिच्छदः ।
स्वप्नेऽप्येवंविधा चिन्ता मृगेन्द्रस्य न जायते ॥ ४ ॥
मृगेन्द्रं वा मृगारिं वा सुखं व्याहरतां जनः ।
तस्योभयमपि श्लाघ्यं क्रीडादलितदन्तिनः ॥ ५ ॥
मृगेभ्यो रक्ष्यते क्षेत्रं नरैस्तृणमयैरपि ।
सिंहाऽऽक्रान्तं पुनर्मूढ न हयैर्न च दन्तिभिः ॥ ६ ॥
हरिरलसविलोचनः सहेलं बकमवलोक्य पुनर्जगाम निद्राम् ।
अधिगतरतिविक्रमाऽस्तभीतिर्न तु वनिताऽस्य विलोकनं चकार ७
एकाकिनि वनवासिन्यराजलक्ष्मण्यनीतिशास्त्रज्ञे ।
सत्त्वोच्छ्रिते मृगपतौ राजेति गिरः परिणमन्ति ॥ ८ ॥
नाऽस्योच्छ्रायवती तनुर्न दशनौ नो दीर्घदीर्घः करैः
सत्यं वारण नैष केसरिशिशुस्त्वाडम्बरैः स्पर्धते ।
तेजोबीजमजेयमस्य हृदये न्यस्तं पुनर्वेधसी
तादृक् तादृशमेव येन सुतरां भोज्यं पशुं मन्यते ॥ ९ ॥
येनाऽनर्गलबालकेलिकलितप्रत्यग्रकादम्बिनी ।
धाराधोरणिधौतधातुषु पुरा शैलेषु लीलायितम् ।
सोऽयं शृङ्गनिपातभग्नचरणः स्फारस्फुरत्फेरवी–
फुत्कारैः कुपितोऽद्य खादति मुहुः पाणी मृगग्रामणीः ॥ १० ॥
अनिशं मतङ्गजानां बृंहितमाकर्ण्यते यथा विपिने ।
मन्ये तथा न जीवति गजेन्द्रपलकवलनः सिंहः ॥ ११ ॥
एकेनाऽपि सुपुत्रेण सिंही स्वपिति निर्भयम् ।
सहैव दशभिः पुत्रैर्भारं वहति रासभी ॥ १२ ॥
किमपेक्ष्य फलं पयोधरान्ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सह ते नाऽन्यसमुन्नतिं यथा ॥ १३ ॥

---

१ परिवारहीनः २ राजचिन्हरहिते ३ बलोन्नते ४ शुण्डादण्डैः ५ नूतनमेघमाला ६ जम्बूकी ७ परिगर्जितम् ८ हस्तिमांसमासक्तः ९ गर्दभी १० शब्दान् कुर्वतः ११ स्वभावः १२ उत्कर्षम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तुङ्गशैलशिखरस्थितपादपस्य
काकोऽपि पक्वफलमालभते सपक्षः ।
सिंहो बली गजविदारणदारुणोऽपि
सीदत्यहो तरुतले खलु हीनपक्षः ॥ १४ ॥

जीर्णोऽपि क्रमहीनोऽपि कृशोऽपि यदि केसरी ।
तथाऽपि यूथनाथस्य शङ्काऽऽतङ्काय कल्पते ॥ १५ ॥

खनन्नाखुबिलं सिंहः पाषाणशकलाऽऽकुलम् ।
प्राप्नोति नखभङ्गं वा फलं वा मौषिकं लभेत् ॥ १६ ॥

एणः क्रीडति मूषिकश्च खनति द्वीपी च गर्वायते
क्रोष्टा क्रन्दति वल्गते च शशको वेगादुरुर्धावति ।
निःशङ्कं करिपोतकस्तरुलतामुन्मोटते लीलया
हंहो सिंह विना त्वयाऽद्य विपिने कीदृग् दशा वर्तते ॥ १७ ॥

यस्याऽवन्ध्यरुषः प्रतापवसतेर्नादेन धैर्यद्रुहा
शुष्यन्ति स्म मदप्रवाहसरितः सद्योऽपि दिग्दन्तिनाम् ।
दैवात्कष्टदशावशं गतवतः सिंहस्य तस्याऽधुना
कर्षन्त्येव करेण केसरसटाभारं जरत्कुञ्जराः ॥ १८ ॥

नाऽभिषेको न संस्कारः सिंहस्य क्रियते वने ।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥ १९ ॥

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्याऽऽस्पदमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन्मृगपतिः ॥ २० ॥

न यत्र स्थेमानं दधुरतिभयभ्रान्तनयना
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ।

---

१ पराक्रमरहितः । [illegible] ५ स्थितिम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

त्पिनीस्य मयोदरस्य बहुभिर्ग्रासैः पलालैरपि।

Digitized by Arya Samaj Foundation Chennai and eGangotri

लुठन्मुक्ताहारे भवति परलोकं गतवतो
हरेरद्य द्वारे शिवशिव शिवानां कलकलः ॥ २१ ॥

वेतण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना ।
हरिणा हरिणाऽऽलीषु कथ्यतां कः पराक्रमः ॥ २२ ॥

यद्यपि च दैवयोगात्सिंहः पतितोऽतिदुस्तरे कूपे ।
तदपि हि वाञ्छतिसततं करिकुम्भविदारणं मनसि ॥ २३ ॥

जठरज्वलनज्वलताप्यपगतशङ्कं समागतापि पुरः ।
करिणामरिणा हरिणा हरिणाली हन्यतां न कथम् ॥२४॥

पिब स्तन्यं पोत त्वमिह मददन्तावलधिया
दृगन्ता ब्राधत्से किमिति हरिदन्तेषु परुषान् ।
त्रयाणां लोकानामपि हृदयतापं परिहरं-
न्नयं धीरंधीरं ध्वनति नवनीरो जलधरः ॥ २५ ॥

गजान्योक्तयः ।

श्रीः ॥ दानाऽर्थिनो मधुकरा यदि कर्णतालै-
र्दूरीकृताः करिवरेण मदाऽन्धबुद्ध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने वसन्ति ॥ १ ॥

नीवारप्रसवाऽग्रमुष्टिकवलैर्यो वर्धितः शैशवे
पीतं येन सरोजपत्रपुटके होमाऽवशेषं पयः ।
तं पश्चान्मदमन्थराऽलिवलयव्यालिप्तगण्डं गजं
साऽनन्दं सभयं च पश्यति मुहुर्दूरे स्थितस्तापसः ॥ २॥

कर्णे चामरचारुचञ्चुकलिका कण्ठे मणीनां गणः
सिन्दूरप्रकरः शिरः परिसरे पार्श्वांतिके किङ्किणी ।

---

१ सिंहस्य २ क्रोष्ट्रीनाम् ३ मत्तगजानाम् ४ वैरिणा ५ मृगपंक्तिषु
६ दानोदकार्थिनः ७ [illegible] पूर्णधान्यानि ।

CC-0. Prof. Satya Vrat Shastri Collection.

हा कष्टं कथमस्य पृष्ठशिखरे गोणी समारोप्यते
[illegible]

Digitized by Arya Samaj Foundation Chennai and eGangotri

लब्धश्चेन्नृपवाहनेन करिणा बद्धेन भूपाविधि-
स्तत्किं भूधरधूलिधूसरतनुर्मान्यो न वन्यो गजः ॥ ३ ॥
केलिं कुरुष्व परिभुङ्क्ष्व सरोरुहाणि
गाहस्व शैलतटनिर्झरिणी पयांसि
भावानुरक्तकरिणीकरलालिताऽङ्ग
मातङ्ग मुञ्च मृगराजरणाऽभिलाषम् ॥ ४ ॥

पीतं यत्र हिमं पयः कवलिता यस्मिन्मृणालांऽकुरा-
स्तापाऽऽर्त्तेन निमज्य यत्र सरसो मध्ये विमुक्तः श्रमः।
धिक् तस्यैव जलानि पङ्किलयतः पाथोजानि मंथतः
कूलान्युत्खनतः करीन्द्र भवतो लज्जाऽपि नो जागरा ॥ ५ ॥

रेवावारिणि वारणेन विपुले राजीवराजीरजः-
पुञ्जाऽऽपिञ्जरितोर्मिणि प्रविगलद्दानाऽम्बुगन्धोत्कटे।
धौतं येन मृगादिरक्तमसकृद्दन्ताऽन्तरालस्थितं
कौपं सोऽपि पपौ गजो हतविधेः को गोचरे नाऽऽगतः ॥६॥

तापो नाऽपगतस्तृषा न च कृशा धौता न धुली तनो-
र्न स्वच्छन्दमकारि कन्दकवला का नाम केलीकथा।
दूरोत्क्षिप्तकरेण हन्त करिणा स्पृष्टा न वा पद्मिनी
प्राऽऽरब्धो मधुपैरकारणमहो झङ्कारकोलाहलः ॥ ७ ॥

लुलाये गोमायौ मृगपरिषदि श्वापदकुले
करिष्यन्कार्पण्यं किमिह महिमानं गमयसि।
निमग्नः पङ्केऽस्मिन्ननुभव करीन्द्राऽधिपदशा-
मभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः ॥ ८ ॥

नाऽभूवन् भुवि यस्य कुत्रचिदपि स्पर्धाकराः कुञ्जराः
सिंहेनाऽपि न लङ्घिता किमपरं यस्योद्धता प्राग्गतिः।

---

१ क्रीडाम् २ मज्जनं कुरु ३ तटानि ४ नर्मदाजले ५ कूपसंबन्धि
६ महिषे ७ मृगधूर्तके।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लुठन्मुक्ताहारे भवति परलोकं गतवतो
हरेरद्य द्वारे शिवशिव शिवानां कलकलः ॥ २१ ॥

वेतण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना ।
हरिणा हरिणाऽऽलीषु कथ्यतां कः पराक्रमः ॥ २२ ॥

यद्यपि च दैवयोगात्सिंहः पतितोऽतिदुस्तरे कूपे ।
तदपि हि वाञ्छति सततं करिकुम्भविदारणं मनसि ॥ २३ ॥

जठरज्वलनज्वलताप्यपगतशङ्कं समागतापि पुरः ।
करिणामरिणा हरिणा हरिणाली हन्यतां न कथम् ॥ २४ ॥

पिब स्तन्यं पोत त्वमिह मददन्तावलधिया
दृगन्ता न्याधत्से किमिति हरिदन्तेषु परुषान् ।
त्रयाणां लोकानामपि हृदयतापं परिहरं-
स्त्वयं धीरंधीरं ध्वनति नवनीरो जलधरः ॥ २५ ॥

गजान्योक्तयः ।

श्रीः ॥ दानाऽर्थिनो मधुकरा यदि कर्णतालै-
र्दूरीकृताः करिवरेण मदाऽन्धबुद्ध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने वसन्ति ॥ १ ॥

नीवारप्रसवाऽग्रमुष्टिकवलैर्यो वर्धितः शैशवे
पीतं येन सरोजपत्रपुटके होमाऽवशेषं पयः ।
तं पश्चान्मदमन्थराऽलिवलयव्यालिप्तगण्डं गजं
साऽनन्दं सभयं च पश्यति मुहुर्दूरे स्थितस्तापसः ॥ २ ॥

कर्णे चामरचारुचञ्चुकलिका कण्ठे मणीनां गणः
सिन्दूरप्रकरः शिरः परिसरे पार्श्वांतिके किङ्किणी ।

१ सिंहस्य २ करिणीनाम् ३ मत्तगजानाम् ४ वैरिणा ५ मृगपंक्तिषु ६ दानोदकार्थिनः ७ प्रफुल्लकमलवने ८ तृणधान्यानि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लब्धश्चेन्नृपवाहनेन करिणा बद्धेन भूपाविधि-
स्तत्किं भूधरधूलिधूसरतनुर्मान्यो न वन्यो गजः ॥ ३ ॥

केलिं[1] कुरुष्व परिभुङ्क्ष्व सरोरुहाणि
गाहस्व[2] शैलतटनिर्झरिणी पयांसि
भावानुरक्तकरिणीकरलालिताऽङ्ग
मातङ्ग मुञ्च मृगराजरणाऽभिलाषम् ॥ ४ ॥

पीतं यत्र हिमं पयः कवलिता यस्मिन्मृणालांऽकुरा-
स्तापाऽऽर्त्तेन निमज्य यत्र सरसो मध्ये विमुक्तः श्रमः ।
धिक् तस्यैव जलानि पङ्किलयतः पाथोजानि मंथतः
कूलान्युत्खनतः[3] करीन्द्र भवतो लज्जाऽपि नो जागरा ॥ ५ ॥

रेवावारिणि[4] वारणेन विपुले राजीवराजीरजः-
पुञ्जाऽऽपिञ्जरितोर्मिणि प्रविगलद्दानाऽम्बुगन्धोत्कटे ।
धौतं येन मृगादिरक्तमसकृद्दन्ताऽन्तरालस्थितं
कौपं[5] सेऽपि पपौ गजो हतविधेः को गोचरे नाऽऽगतः ॥६॥

तापो नाऽपगतस्तृषा न च कृशा धौता न धुली तनो-
र्न स्वच्छन्दमकारि कन्दकवला का नाम केलीकथा ।
दूरोत्क्षिप्तकरेण हन्त करिणा स्पृष्टा न वा पद्मिनी
प्राऽऽरब्धो मधुपैरकारणमहो झङ्कारकोलाहलः ॥ ७ ॥

लुलाये[6] गोमायौ[7] मृगपरिषदि श्वापदकुले
करिष्यन्कार्पण्यं किमिह महिमानं गमयसि ।
निमग्नः पङ्केऽस्मिन्ननुभव करीन्द्राऽधिपदशा-
मभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः ॥ ८ ॥

नाऽभूवन् भुवि यस्य कुत्रचिदपि स्पर्धाकराः कुञ्जराः
सिंहेनाऽपि न लङ्घिता किमपरं यस्योद्धता प्राग्गतिः ।

---

१ क्रीडाम् २ मज्जनं कुरु ३ तटानि ४ नर्मदोदके ५ कूपसंबन्धि
६ महिषे ७ मृगधूर्तके

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कष्टं सोऽपि कदर्थ्यते कविवरः स्फाराऽऽरवैः फेरवै-
रापातालगभीरपङ्कपटलीमग्नोऽद्य भग्नोद्यमः ॥ ९ ॥

भो भोः करीन्द्र दिवसानि कियन्ति ताव-
दस्मिन्मरौ समतिवाहय कुत्रचित्त्वम् ।
रेवाजलैर्निजकरेणुकरप्रयुक्तै-
र्भूयः शमं गमयिताऽसि निदाघदाहम् ॥ १० ॥

न गृह्णाति ग्रासं न च कमलकिंजल्किनि जले
न पङ्कैर्वाऽऽल्हादं व्रजति बिसभङ्गार्धशबलैः ।
ललन्तीं प्रेमार्द्रामपि विषहते नाऽन्यकरिणीं
स्मरन्दावभ्रष्टां हृदयदयितां वारणपतिः ॥ ११ ॥

पादाघातविचूर्णिता वसुमती त्रासाऽकुलाः पक्षिणः
पङ्काङ्कानि सरांसि गण्डकषणक्षोदक्षताः शाखिनः ।
प्राप्यैतत्करिपोतकैर्विधिवशाच्छार्दूलशून्यं वनं
तत्तन्नाम कृतं विशृंखलधिया वक्तुं न यत्पार्यते ॥ १२ ॥

गले पाशस्तीव्रश्चरणयुगले गाढनिगडो
दृढं स्कन्धे बद्धः शिरसि सृणिपातः खरतरः ।
नरः स्कन्धारूढो बत रमणयोग्येऽपि विषये
न जानीमोऽत्यर्थं द्विरद वद कस्मात्तव मदः ॥ १३ ॥

कौपे पयसि लघीयसि तापेन करः प्रसारितः करिणा ।
सोऽपि न पयसा लिप्तो लाघवमात्मा परं नीतः ॥ १४ ॥

कौपं वारि विलोक्य वारणपते किं विस्मितेनाऽस्यते
प्रायो भाजनमस्य संप्रति भवांस्तत्पीयतामादरात् ।
उन्मज्जच्छफरीपुलिन्दललनापीनस्तनास्फालन-
स्फारीभूतमहोर्मिनिर्मलजला दूरेऽधुना नर्मदा ॥ १५ ॥

१ विकृक्रियते २ हतप्रयत्नः ३ मरुदेशो ४ पापय ५ 'अंबू' इति लो० ६ अंकुशपातः ७ पाश्चमू ८ शर्करी ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नो मन्ये दृढबन्धनात्क्षतमिदं नैवाऽङ्कुशाऽऽघातनं
स्कन्धाऽऽरोहणताडनात्परिभवं नैवाऽन्यदेशागमम् ।
चिन्तां मे जनयन्ति चेतसि यथा स्मृत्वा स्वयूथ्या वने ।
सिंहत्रासितभीतभीरुकलभाः यास्यन्ति कस्याऽऽश्रयम् ॥ १६ ॥

पत्युर्यत्पतिताऽविशेषकवलग्रासेन वृत्तिः कृता
पीतं यच्च कराऽवगाहकलुषं तत्पीतशेषं पयः ।
प्राणान्पूर्वतरं विहाय तदिदं प्राप्तं करिण्या फलं
यद्बन्धव्रणकातरस्य करिणः क्लिष्टं न दृष्टं मुखम् ॥ १७ ॥

यदि मत्तोऽसि मतङ्गज किममीभिरसारसरलतरुदलनैः ।
हरिमनुसर खरनखरं व्यपनेष्यति ते स करटकण्डूतिम् ॥ १८ ॥

कलभ तवाऽन्तिकमागतमलिमेनं मा कदाप्यवज्ञासीः ।
अपि दानसुन्दराणां द्विपवर्याणामयं शिरोधार्यः ॥ १९ ॥

गिरिगह्वरेषु गुरुगर्वगुम्फितो गजराजपोत न कदाऽपि संचर ।
यदि बुध्यते हरिशिशुः स्तनंधयो भविता करेणुपरिशेषिता मही २०

लीलामुकुलितनयनं किं सुखशयनं समातनुषे ।
परिणामविषमहरिणा करिनायक वर्धते वैरम् ॥ २१ ॥

मृगान्योक्तयः ।

श्रीः ॥ दूर्वाऽङ्कुरतृणाऽऽहारा धन्यास्तात वने मृगाः ।
विभवोन्मत्तचित्तानां न पश्यन्ति मुखानि यत् ॥ १ ॥

एणीगणेषु गुरुगर्वनिमीलिताक्षः
किं कृष्णसार खलु खेलसि काननेऽस्मिन् ।
सीमामिमां कलय भिन्नकरीन्द्रकुम्भ-
मुक्तामयीं हरिविहारवसुन्धरायाः ॥ २ ॥

---

१ अत्र कर्तृत्वेन यूथ्यानामेवान्वयः २ करिशावकाः ३ सिंहं ४ हरिणी संघेषु ५ जानीहि ६ सिंहविहारस्थानस्य

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयि कुरङ्गि तपोवनविभ्रमादुपगताऽसि किरातपुरीमिमाम् ।
इह न पश्यसि दारय मारय ग्रस पिबेति शुकानपि जल्पतः ३
तृणमुखमपि न खलु त्वां त्यजन्ति हे हरिण वैरिणः शबराः।
यशसैव जीवितमिदं त्यज योजितशृङ्गसंग्रामः ॥ ४ ॥
छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुरां
पर्यन्ताऽग्निशिखाकलापजटिलान्निःसृत्य दूरं वनात् ।
व्याधानां शरगोचरादतिजवेनोत्प्लुत्य धावन्मृगः
कूपान्तः पतितः करोति विमुखे किं वा विधौ पौरुषम् ५
इह किं कुरङ्गशावक केदारे कलममञ्जरीं त्यजसि ।
तृणधन्वा तृणबाणस्तृणघटितः सपटपुरुषोऽयम् ॥ ६ ॥
त्यक्तं जन्मवनं तृणांऽकुरवती मातेव मुक्ताऽस्थली
विश्रान्तिस्थितिहेतवो न गणिता बन्धूपमाः पादपाः ।
बालाऽपत्यवियोगकातरमुखी त्यक्ताऽर्धमार्गे मृगी
मृग्यन्तःपदवीं तथाऽप्यकरुणाव्याधा न मुञ्चंति माम् ॥७॥
वसन्त्यरण्येषु चरन्ति दूर्वा पिबन्ति तोयान्यपरिग्रहाणि ।
तथाऽपि वध्या हरिणा नराणां को लोकमाराधयितुं समर्थः ८
रोमन्थमारचय मन्थरमेत्य निद्रां मुञ्च श्रमं तदनु संचर रे यथेच्छम्।
दूरे स पामरजनो मुनयः किलैते-
निष्कारणं हरिणपोत बिभेषि कस्मात् ॥ ९ ॥
यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून्मृषा
नैषां गर्वगिरः शृणोषि न च तान्प्रत्याशया धावसि ।
काले बालतृणानि खादसि परं निद्रासि निद्राऽऽगमे
तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः ॥१०॥
नाऽत्र व्याधशराः पतन्ति परितो नैवाऽत्र दावानलो
नाऽप्युच्चावचभीतिरस्ति कुहचिन्नो वागुरा भंगुराः ।

---

१. हरिणि २ तपोवनभ्रान्त्या ३ मरालनिभी ४ उड्डीय ५ चर्वितस्य पुनश्चर्वणं 'रंवथ' इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्यालोक्य कुरङ्गकेन विहितो नक्षत्रनाथाऽऽश्रयो
नो जानाति यदत्र दास्यति विधिः स्वर्भानुदन्तव्रणम् ॥११॥
अग्रे व्याधः करधृतशरः पार्श्वतो जालमाला
पृष्ठे वन्हिर्दहति नितरां सन्निधौ सारमेयाः ।
एणी गर्भादलसगमना बालकैरुद्धपादा
चिन्ताऽऽविष्टा वदति हि मृगं किं करोमि क्व यामि ॥ १२ ॥
मध्ये ज्या त्रुटिता शरासनमहो भग्नं दवाग्नेर्भया-
न्निर्यातः शबरः शुना सह गतो दग्धाश्च पाशास्ततः
मेघस्तत्र समागतो विधिवशात्तेनाऽतिशान्तं वनं
श्रीकृष्णस्य कृपालवो यदि भवेत्कः कं निहन्तुं क्षमः ॥१३॥

करभान्योक्तयः ।

श्रीः ॥ वपुर्विषमसंस्थानं कर्णज्वरकरो रवः ।
करभस्याऽशुगत्यैव छादिता दोषसंहतिः ॥ १ ॥
कुमुदशबलैः फुल्लाम्भोजैः सरोभिरलंकृता
मरकतमणिश्यामां शष्पैर्विहाय वनस्थलीम् ।
स्मरति करभो यद्वृक्षाणां चरन्मरुधन्वनां
परिचयरतिः सा दुर्वारा न सा गुणवैरिता ॥ २ ॥
करभदयिते योऽसौ पीलुस्त्वया मधुलुब्धया
व्यपगतघनच्छायस्त्यक्तो न सादरमीक्षितः
चलकिसलयाः सोऽपीदानीं प्ररूढनवाऽङ्कुरः
करभदयितावृन्दैरन्यैः सुखं परिभुज्यते ॥ ३ ॥
चिन्तां मुञ्च गृहाण पल्लवमिदं प्लक्षस्य शालस्य वा
गाङ्गस्याऽस्य जलस्य चन्द्रवपुषो गण्डूषमेकं पिब ।

---

१ ध्वानः २ उष्ट्रस्य ३ धान्यमर्दनेन ४ शालतृणैः ५ पीलुवृक्षः ६ पल्लवाः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवन्द्रक्ष्यसि ताः पुनः करभ हे दासेरकीया भुवो
रम्याः पीलुशमीकरीरबदरीकूजत्कपोताऽऽकुलाः ॥ ४॥
रूक्षं वपुर्न च विलोचनहारिरूपं
न श्रोत्रयोः सुखदमारटितं कदाऽपि ।
इत्थं न साधु तव किंचिदितं च साधु
तुच्छे रतिः करभ कण्टकिनि द्रुमे यत् ॥ ५ ॥
दुष्प्रापमम्बु पवनः परुषोऽतितापी
छायाभृतो न तरवः फलभारनम्राः ।
इत्थं सखे करभ वच्मि भवन्तमुच्चैः
का संगतिः खलु मरौ रमणीयतायाः ॥ ६ ॥
करभदयिते यत्तत्पीनं सुदुर्लभमेकदा
मधुवनगतं तस्याऽलाभे विरौपि किमुत्सुका ।
कुरुपरिचितैः पीलोः पत्रैर्धृतिं मरुगोचरै-
र्जगति सकले कस्याऽवाप्तिः सुखस्य निरन्तरम् ॥ ७ ॥

रासभान्योक्तिः ।

श्रीः ॥ रेरे रासभ वस्त्रभारवहनात्कुग्रासमश्नासि किं
राजाऽश्वाऽवसथं प्रयाहि चणकाऽभ्यूषान् सुखं भक्षय ।
सर्वान्पुच्छवतो हया इति विदन्त्यत्राऽधिकारे स्थिता
राजा तैरुपदिष्टमेव मनुते सत्यं तटस्थाः परे ॥ १ ॥

वृषभान्योक्तयः ।

श्रीः ॥ नाऽस्य भारग्रहे शक्तिर्न च वाहगुणः क्वचित् ॥
देवाऽगारे बलीवर्दस्तथाऽप्यश्नाति भोजनम् ॥ १ ॥
धनसि सीदति सैकतवर्त्मनि प्रचुरभारभरक्षपितोदके ॥
गुरुभरोद्धरणोद्धुरकन्धरं स्मरति सारथिरेष धुरंधरम् ॥ २ ॥

---

१ 'नेपती' इति पाठः २ नदेम ३ अश्वशाला ४ भपक्वचणकान् यद्वा चणकाः प्रतिद्धाः अभ्यूषाः पोलिकाः तान् ५ वशासीनाः ६ शकटे ७ वालुकामयमार्गे ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्गे कर्दमदुर्गमे जलभृते गर्ताशतैराकुले
खिन्ने शाकटिके भरेऽतिविषमे दूरंगते रोधसि ।
शब्देनैतदहं ब्रवीमि महता कृत्वोच्छ्रितां तर्जनी-
मीदृक्षे विषमे विहाय धवलं वोढुं क्षमः को धुरम् ॥ ३ ॥
केषांचिद्धवलश्चिरं निवसितश्चित्ते परेषां पुन-
र्नीलो वा कपिलोऽथ वा वरवपो रक्तोऽथ वा मेचकः ।
ग्रामीणैरवधीरितोऽपि शिथिलस्कन्धोऽप्यनुच्चैःश्रवाः
स्वान्ते मे परतन्त्रतुन्दिलतनुर्जागर्त्ययं कर्बुरः ॥ ४ ॥
न खनति खुरैः क्षोणीपृष्ठं न खादति सादरं
प्रकृतिपरुषं प्रेक्ष्याऽप्यग्रे न कुप्यति गोवरः ।
वहति च धुरं धुर्यादन्यादनुद्धतकन्धरो
जगति गुणिनः कार्यौदार्यात्परानतिशेरते ॥ ५ ॥

हंसान्योक्तयः ।

श्रीः ॥ कंसारिचरणोद्भूतसिन्धुकल्लोललालितम् ।
मन्ये हंस मनो नीरे कुल्यानां रमते न ते ॥ १ ॥
अम्भोजिनीवनविलासविहारमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ २ ॥
अपसरणमेव शरणं मौनं वा तत्र राजहंसस्य ।
कटुरटति निकटवर्ती वाचालष्टिट्टिभो यत्र ॥ ३ ॥
वाताऽऽन्दोलितपङ्कजस्थितरजःपुञ्जाऽङ्गरागोज्ज्वलो
यः शृण्वन्कलकूजितं मधुलिहां संजातहर्षः पुरा ।
कान्ताचञ्चुपुटाऽपवर्जितबिसग्रासग्रहेऽप्यक्षमः
सोऽयं संप्रति हंसको मरुगतः कौपं पयो याचते ॥ ४ ॥

१ श्वभ्रम् । २ शाकटस्वामिनि । ३ कृष्णः । ४ कृत्रिमसारितां । ५ चातुर्यम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तरौ तीरोद्भूते क्वचिदपि दलाऽऽच्छादिततनुः
पतद्धारासारां गमय विषमां प्रावृषमिमाम् ।
निवृत्तायां तस्यां सरसि सरसोत्फुल्लनलिने
स एव त्वं हंसः पुनरपि विलासास्त इह ते ॥ ५ ॥

रे राजहंस किमिति त्वमिहाऽऽगतोऽसि
योऽसौ वकः स इह हंस इति प्रतीतः ।
तद्गम्यतामनुपदेन पुनः स्वभूमौ
यावद्वदन्ति न बकं खलु मूढलोकाः ॥ ६ ॥

यो दिव्याऽम्बुजलोलमत्तमधुपप्रोद्गीतरम्यं सर-
स्त्यक्त्वा मानसमल्पवारिणि रतिं बध्नाति कैदारिके ।
तस्याऽलीकमुखाऽऽशया परिभवक्षेत्रीकृतस्याऽधुना
हंसस्योपरि टिट्टिभो यदि पदं धत्तेऽत्र को विस्मयः ॥ ७ ॥

कस्त्वं लोहितलोचनाऽऽस्यचरणो हंसः कुतो मानसात्
किं तत्राऽस्ति सुवर्णपङ्कजवनान्यम्भः सुधासन्निभम् ।
रत्नानां निचयाः प्रवाललतिका वैदूर्यरोहः क्वचि-
च्छम्बूका नहि सन्ति नेति च बकैराकर्ण्य हीहीकृतम् ८

य संतापमपाकरोति जगतां यश्चोपकारक्षमः
सर्वेषाममृतात्मकेन वपुषा प्रीणाति नेत्राणि यः ।
तस्याऽप्युन्नतिमम्बुदस्य सहसे यन्न त्वमेतावता
वर्णेनैव परं मराल धवलः कृष्णश्चरित्रैरसि ॥ ९ ॥

हंसोऽध्वगश्रममपोहयितुं दिनान्ते
कारण्डकाकबककोककुलं प्रविष्टः ।
मूकोऽयमित्युपहसन्ति लुनन्ति पक्षा-
न्नीचाऽऽश्रयो हि महतामपमानहेतुः ॥ १० ॥

CC-0. Prof. Satya Vrat Shastri Collection.
१ रक्तं । २ जलशुक्तयः । ३ हंस ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि नाम दैवगत्या जगदसरोजं सदैव संजातम्।
अवकरनिकरं विकिरति तत्किं कृकवाकुरिव हंसः ॥ ११ ॥

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम्।
रमते न मरालस्य मानसं मानसं विना ॥ १२ ॥

पुरा सरसि मानसे विकचसारसालिस्खल-
त्परागसुरभीकृते पयसि यस्य यातं वयः।
स पल्वलजलेऽधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्तताम् ॥ १३ ॥

नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्।
विश्वस्मिन्नधुनाऽन्यः कुलव्रतं पालयिष्यति कः ॥ १४ ॥

ये वर्धिताः कनकपङ्कजरेणुमध्ये
मन्दाकिनीविमलनीरतरङ्गभङ्गैः।
ते सांप्रतं विधिवशात्खलु राजहंसाः
शैवालजालजटिलं जलमाश्रयन्ति ॥ १५ ॥

हे पक्षिन्नागतस्त्वं कुत इह सरसस्तत्कियद् भो विशालं
किं मद्धाम्नोपि बाढं तदपि शठ महापाप मा ब्रूहि मिथ्या।
इत्थं कूपोदरस्थः शपति तटगतं दर्दुरो राजहंसं
नीचः प्रायः सगर्वो भवति हि विषया यैः परेषां न दृष्टाः ॥ १६ ॥

पीतं येन पुरा पुरन्दरपुरे रम्भोरुकेलिस्खल-
न्मन्दारांकुरकर्णपूरसुरभिस्वर्गापगायाः पयः।
सोयं भारववारि पामरवधूपादार्पणप्रोच्छल-
त्पङ्कातङ्कितभेकभिन्नमघृणो हंसः समासंसते ॥ १७ ॥

वहति बहलगर्वं क्षीरनीरप्रपन्न-
प्रणयविघटनेन क्ष्मातलेऽयं मरालः।

---

१ संकरसंचयं 'केर' इतिलोके। २ ताम्रचूडः। ३ मानससरोवरम्। ४ अल्पजलाशयजले। ५ दर्दुरव्याप्ते।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निपुणमतिमहान्तं टङ्कणं हेम मन्ये
विघटितघटनं यः स्वाङ्गदानात्करोति ॥ १८ ॥

नद्यो नीचगता दुरापपयसः कूपाः पयोराशयः
क्षारा दुष्टवकोटसंकटतटोद्देशास्तडागादयः ।
इत्थं भूतलमाकलय्य सकलानम्भोनिवेशानिति
त्वां भो मानस संस्मरन्पुनरसौ हंसः समभ्यागतः १९

भ्रमरान्योक्तयः ।

श्रीः ॥ अलिरयं नलिनीदलमध्यगः कमलिनीमकरन्दमदाऽलसः
विधिवशात्परदेशमुपागतः कुटजपुष्परसं बहु मन्यते ॥ १ ॥

मधुकर तव करनिकरैः किं किं क्रान्तं वनं न कुसुमानाम् ।
तद्वद सरसिजकमले लब्धं किंचिद्यदन्यतस्तत्किम् ॥ २ ॥

गौरीं चम्पककलिकामपहाय भ्रान्तदुर्बुद्धे ।
शाल्मलिकुसुमदलेषु स्वैरं गुञ्जन्न लज्जसे मधुप ॥ ३ ॥

भ्रमन्वनान्ते नवमञ्जरीषु न षट्पदो गन्धफलीमजिघ्रत् ।
सा किं न रम्या स च किं न रन्ता बलीयसी केवलमीश्वरेच्छा ४

भ्रमर भ्रमता दिगन्तराणि क्वचिदासादितमीक्षितं श्रुतं वा ।
वद सत्यमपास्य पक्षपातं यदि जातीकुसुमाऽनुकारि पुष्पम् ५

अभिनवनलिनीविनोदलुब्धो मुकुलितकैरविणीवियोगभीरुः ।
भ्रमति मधुकरोऽयमन्तराले श्रयति न पङ्कजिनीं कुमुद्वतीं वा ६

नो मल्लीमयमीहते न भजते मत्तेभकुम्भस्थलीं
वासन्तीं सहते न चन्दनवनीमालम्बते न क्वचित् ।
जातीमेव हृदीश्वरीमिव महाऽनन्दैककन्दाऽङ्कुरां
ध्यायन्निर्वृतिमेति षट्पदयुवा योगीव वीतभ्रमः ॥ ७ ॥

---

१ पीतवर्णाम् । २ 'काटेशेवरी' इतिलोके । ३ चम्पककलिकाम् । ४ इच्छां करोति । ५ माधवीलताम् । ६ गतभ्रमः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

केतकीकुसुमं भृङ्गः खण्ड्यमानोपि सेवते ॥
दोषाः किं नाम कुर्वन्ति गुणाऽपहृतचेतसः ॥ ८ ॥

मर्दनमवलोक्य निष्फलमनित्यतां बन्धुजीवकुसुमानाम ॥
वनमुपगम्य भ्रमरः संप्रति जातो दयासक्तः ॥ ९ ॥

फुल्लेषु यः कमलिनी कमलोदरेषु
चूतेषु यो विलसितः कलिकाऽन्तरस्थः ॥
पश्याऽद्य तस्य मधुपस्य शरद्व्यपाये
कृच्छ्रेण वेणुविवरे दिवसाः प्रयान्ति ॥ १० ॥

अनुसरति करिकपोलं भ्रमरः श्रवणेन ताड्यमानोऽपि ॥
गणयति न तिरस्कारं यद्दानाऽन्धविलोचनो नीचः ॥११॥

गन्धैराढ्या भुवनविदिता केतकी स्वर्णवर्णा
पुष्पभ्रान्त्या क्षुदितमधुपः पुष्पमध्ये पपात ॥
अन्धीभूतस्तदनु रजसा कण्टकैश्छिन्नपक्षः
स्थातुं गन्तुं क्षणमपि सखे नैव शक्तो द्विरेफः ॥ १२ ॥

किं क्वाऽपि मलयाचलैर्विटपिनो निर्दह्य भस्मीकृताः
किंस्विद्देवगजेन पङ्कजवनं निष्कन्दमुन्मीलितम् ॥
किं वा हन्त कृतान्तकेसरिभयात्त्यक्तो मदः कुञ्जरै–
र्येनाऽस्मिन्विरसे करीरकुसुमे हा भृङ्ग विश्राम्यसि॥१३॥

गन्धाढ्यां नवमल्लिकां मधुकरस्त्यक्त्वा गतो यूथिकां
तां त्यक्त्वाऽथ गतः स चन्दनवनं पश्चात्सरोजं गतः ॥
बद्धस्तत्र निशाकरेण सहसा रोदित्यसौ मन्दधीः
संतोषेण विना पराभवपदं प्राप्नोति सर्वो जनः ॥ १४ ॥

मधुकरगणश्चूतं त्यक्त्वा गतो नवमल्लिकां
पुनरपि गतो रक्ताऽशोकं कदम्बवनं ततः ॥

---

१ गुणाकृष्टान्तःकरणस्य । २ मदनबाणाख्यं पुष्पम् । ३ कृतान्तः कालः स एव केसरी सिंहः । ४ 'अहं' इतिलोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदपि सुचिरं स्थित्वा तेभ्यः प्रयाति सरोरुहं
परिचितजनद्वेषी लोको नवंनवमीहते ॥ १५ ॥

यस्याः संगमवाञ्छया न गणिता वाप्यो विनिद्रोत्पला
यामालिङ्ग्य समुत्सुकेन मनसा यातः परां निर्वृतिम् ॥
भग्नां तामवलोक्य चन्दनलतां भृङ्गेण यज्जीव्यते
धैर्यं नाम तदस्तु तस्य न पुनः स्नेहाऽनुरूपं कृतम् ॥ १६ ॥

अपसर मधुकर दूरं परिमलबहुलेऽपि केतकीकुसुमे ॥
इह नहि मधुलवलाभो भवति परं धूलिधूसरं वदनम् १७

दूरादुज्झति चम्पकं न च भजत्यम्भोजराजीरजो
नो जिघ्रत्यपि पाटलापरिमलं धत्ते न चूते रतिम् ।
मन्दारे यदनादरो विचिकिलोपान्तेन संतृप्यते
तन्मये क्वचिदङ्गभृङ्गतरुणेनाऽऽस्वादिता मालती ॥ १८ ॥

ये वर्धिताः करिकपोलमदेन भृङ्गाः
प्रोत्फुल्लपङ्कजरजःसुरभीकृताङ्गाः ।
ते सांप्रतं प्रतिदिनं क्षपयन्ति कालं
निम्बेषु चाऽर्ककुसुमेषु च दैवयोगात् ॥ १९ ॥

कृत्वाऽपि कोशपानं भ्रमरयुवा पुरत एककमलिन्याः ।
अभिलषति बकुलकलिकां मधुलिहि मलिने कुतः सत्यम् २०

इह सरसि सहर्षं मञ्जु गुञ्जाऽभिरामं
मधुकर कुरु केलिं सार्धमम्भोजिनीभिः ।
अनुपमममकरन्दाऽऽमोददत्तप्रमोदा
त्यजति बत न निद्रां मालती यावदेषा ॥ २१ ॥

येनाऽऽमोदिनि केसरस्य मुकुले पीतं मधु स्वेच्छया
नीता येन निशाः शशाङ्कधवलाः पद्मोदरे शारदीः ।

CC-0. Prof. Satya Vrat Shastri Collection.

१ दूरं गच्छ । २ मधुरम् । ३ रवं कुरु । ४ शारत्सम्बन्धिनीः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रान्तं येन मदप्रवाहमलिने गण्डस्थले दन्तिनां
सोऽयं भृङ्गयुवा करीरविटपे बध्नाति तुष्टिं कुतः ॥ २२ ॥

येनाऽमन्द[1]मरन्दे दल[2]दरविन्दे दिनान्य[3]नायिषत ।
कुटजे खलु तेनेहा[4] तेने[5] हा मधुकरेण कथम् ॥ २३ ॥

[6]अमरतरुकुसुमसौरभ[7]सेवनसंपूर्णकामस्य ।
पुष्पान्तरसेवेयं भ्रमरस्य विडम्बना महती ॥ २४ ॥

[8]सरजस्कां पाण्डुवर्णां कण्टकप्रकरा[9]ऽङ्किताम् ।
केतकीं सेवसे हन्त कथं रोलम्ब[10] निस्त्रप[11] ॥ २५ ॥

अन्यासु ताव[12]दुपमर्दसहासु भृङ्ग
लोलं[13] विनोदय मनः सुमनोलतासु ।
बालाम[14]जातरजसं कलिकामकाले[15]
व्यर्थं कदर्थयसि[16] किं नवमल्लिकायाः ॥ २६ ॥

माकन्दद्रुममञ्जरी मधुमदामोदैकमेदस्विना
येनालम्भि पयोजनीषु मुकुलक्रीडाविनोदोत्सवः ।
सोयं संप्रति पर्यटन् मरुभुवि ग्रीष्मातपैस्तापिते
दुर्दैवात्समयं नयत्यविरतो भृङ्गोऽर्कपुष्पोदरे ॥ २७ ॥

कोकिलान्योक्तयः ।

श्रीः ॥ अस्यां सखे बधिरलोकनिवासभूमौ
किं कूजितेन किल कोकिल कोमलेन ।
एते हि दैवहतकास्तदभिन्नवर्णं[17]
त्वां काकमेव कलयन्ति कलाऽनभिज्ञाः ॥ १ ॥

---

१ प्रचुरपुष्परसे । २ विकसितकमले । ३ नीतानि । ४ इच्छा । ५ विस्तारिता कृतेति यावत् । ६ कल्पवृक्षः । ७ सौगन्ध्यम् । ८ रजोयुक्ताम् । ९ समूहः । १० भ्रमर । ११ निर्लज्ज । १२ उपमर्दं सहन्ते ताः । १३ सतृष्णं लुब्धमिति यावत् । १४ अनुत्पन्नपरागाम् । १५ [illegible] काले । १६ दूषयसि । १७ काकसमानवर्णम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रे रे कोकिल मा भज मौनं किंचिदुदञ्चय पञ्चमरागम्
नो चेत्त्वामिह को जानीते काककदम्बकपिहिते चूते ॥२॥
समुद्गिरसि किं वाचः पुंस्कोकिल सुकोमलाः ।
श्वभ्रेऽस्मिन् जडपाषाणगुरुनिर्घोषभैरवे ॥ ३ ॥
कोकिलकलमालापैरलमलमालोकसे रसालं किम् ।
शरनिकरभरितशरधिः शबरः संरतीह परिसरे सधनुः ॥४॥
अविश्वसन्धूर्तधुरन्धरोऽपि नरः पुरस्त्री पुरतोऽन्ध एव ।
अशेषशिक्षाकुशलोऽपि काकः प्रतार्यते किं न पिकाऽङ्गनाभिः५
तवैतद्वाचि माधुर्यं जाने कोकिल कृत्रिमम् ।
प्रपोषितो यैस्तानेव जातपक्षो जहासि यत् ॥ ६ ॥
येनाऽऽनन्दमये वसन्तसमये सौरभ्यहेलामिल-
द्भृङ्गालीमुखरे रसालशिखरे नीताः पुरा वासराः ।
आः कालस्य वशेन कोकिलयुवा सोऽप्यद्य सर्वादिशः
खेलद्वायसचंचुघातविदलन्मूर्धा मुहुर्धावति ॥ ७ ॥
क्वचिज्झिल्लीनादः क्वचिदतुलकाकोलकलहः
क्वचित्कङ्काऽऽरावः क्वचिदपि कपीनां कलकलः ।
क्वचिद्घोरः फेरुध्वनिरयमहो दैवघटना-
त्कथं कारं तारं रसति चकितः कोकिलयुवा ॥ ८ ॥
यस्याऽऽकर्ण्य वचः सुधाकवलितं वाचंयमानामपि
व्यग्राणि व्यथयन्ति मन्मथकथाश्चेतांसि चैत्रोत्सवे ।
रे रे काकवराक सोऽकममुना पुंस्कोकिलेनाऽधुना
स्पर्धाबन्धमुपेयुषस्तव तु किं लज्जाऽपि नो जागरा ९
रे बाल कोकिल करीरमरुस्थलीषु
किं दुर्विदग्धमधुरध्वनिमातनोषि ।

---

१ 'माता' इतिलोके । २ संचरति । ३ आसमताद्भागे । ४ वञ्च्यते । ५ कोकिलाभिः । ६ त्यजसि । ७ काकोलो द्रोणकाकः 'डोमकावळा' इतिलोके । ८ जम्बुकध्वनिः । ९ अद्यु[illegible] । १० [illegible] । ११ मानिनाम् । १२ सह ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यः स कोऽपि सहकारतरुप्रदेशो
राजन्ति यत्र तव विभ्रमभाषितानि ॥ १० ॥

रसालशिखराऽऽसीनाः शतं सन्तु पतत्रिणः ।
तन्मञ्जरीरसाऽऽमोदविन्दुरेव कुहूमुखः ॥ ११ ॥

तत्कि स्मरसि न भुक्तं यत्पिक रे काकमन्दिरे पूर्वम् ।
सहकारकुसुमकाले हठेन कुरुषेऽधुना रावम् ॥ १२ ॥

दात्यूहाः सरसं रसन्तु सुभगं गायतु केकीभृतः
कादम्बाः कलमाकलपन्तु मधुरं कूजन्तु कोयष्टयः ।
दैवाद्यावदसौ रसालविटपिच्छायामनासादयन्
निर्विण्णः कुटजेषु कोकिलयुवा संजातमौनव्रतः ॥ १३ ॥

तावत्कोकिल विरसान् यापय दिवसान् वनान्तरे निवसन् ।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ॥ १४ ॥

एकस्त्वं गहनेऽस्मिन्कोकिल न कलं कदाचिदपि कुर्याः ।
साजात्यशङ्कयाऽमी न त्वां निघ्नन्तु निर्दयाः काकाः १५

चातकान्योक्तयः ।

श्रीः ॥ रे रे चातक सावधानमनसा मित्र क्षणं श्रूयता–
मम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ १ ॥

एक एव खगो मानी चिरं जीवतु चातकः ।
म्रियते वा पिपासायां याचते वा पुरन्दरम् ॥ २ ॥

चातकस्य खलु चञ्चुसंपुटे नो पतन्ति किल वारिबिन्दवः ।
सागरीकृतमहीतलस्य किं दोष एव जलदस्य दीयते ॥ ३ ॥

---

१ आम्रः । २ कोकिल । ३ कालकण्टकः 'जलकाक' इतिप्रसिद्धः । ४ मयूराः
५ कलहंसाः । ६ [illegible] । ७ विटपिः । ८ नय ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यं सत्यं मुनेर्वाक्यं नाऽदत्तमुपतिष्ठति ।
अम्बुभिः पूरिता पृथ्वी चातकस्य मरुस्थली ॥ ४ ॥

बीजैरंकुरितं लताभिरुदितं वल्लीभिरुज्जृम्भितं
कन्दैः कन्दलितं जनैः प्रमुदितं धाराधरे वर्षति ।
भ्रातश्चातक पातकं किमपि ते सम्यङ् न जानीमहे
येनाऽस्मिन्न पतन्ति चञ्चुपुटके छिन्नाः पयोबिन्दवः ॥ ५ ॥

चातक धूमसमूहं दृष्ट्वा मा धाव वारिधरबुद्ध्या ।
इह हि भविष्यति भवतो नयनयुगादेव वारिणां पूरः ६

रक्ताऽब्जपुञ्जरजसाऽरुणितान् विमुच्य
स्वच्छान्सुधासमरसानपि वारिराशीन् ।
यच्चातकः पिबति वारिधरोदबिन्दून्
मन्ये तदानतिभयाच्छिरसोऽभिमानी ॥ ७ ॥

कूपे पानमधोमुखं भवति मे नद्यो वराक्यः स्त्रियः
सामान्यं बकटिट्टिभैः सह सरस्येवं समालोकयन् ।
शुष्यत्तालुगलोपि कम्पिततनुः श्रुत्वा गभीरध्वनिं
धैर्यादुद्धृतकन्धरो जलधर त्वां याचते चातकः ॥ ८ ॥

गर्जितबधिरीकृतककुभा किमनेन कृतं हि घनेन ।
इयती चातकचञ्चुपुटी सापि भृता नैव जलेन ॥ ९ ॥

अन्येऽपि सन्ति बत तामरसाऽवतंसा
हंसाऽवलीवलयिनो जलसन्निवेशाः ।
कोऽप्याग्रहो गुरुरयं बत चातकस्य
पौरन्दरीं यदभिवाञ्छति वारिधाराम् ॥ १० ॥

अन्ये ते जलदायिनो जलधरास्तृष्णां विनिघ्नन्ति ये
भ्रातश्चातक किं वृथा विरुदितैः खिन्नोऽसि विश्राम्यताम् ।

१ नमनभयात् । २ ऐन्द्रीं मघोत्पन्नामित्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेघः शारद एव काशधवलः पानीयरिक्तोदरो
गर्जत्येव हि केवलं भृशतरं नो बिन्दुमप्युज्झति ॥ ११ ॥

धिग्वारिदं परिहृताऽन्यजलाशयस्य
यश्चातकस्य कुरुते न तृषाप्रशान्तिम् ।
धिक् चातकं तमपि योऽर्थितयाऽस्तलज्ज-
स्तं तादृशं च समुपैति पिपासितोऽपि ॥ १२ ॥

मयूरान्योक्तयः ।

श्रीः ॥ एतस्मिन्मलयाचले बहुविधैः किं तैरकिंचित्करैः
काकोलूककपोतकोकिलकुलैरेकोऽपि पार्श्वस्थितः ।
केकी कूजति चेत्तदा विघटितव्यालावलीबन्धनः
सेव्यः स्यादिह सर्वलोकमनसामानन्दनश्चन्दनः ॥ १ ॥

नाहं जलधर भवतश्चातक इव जीवनं याचे ।
अहमस्मि नीलकण्ठो तव खलु तुष्यामि शब्दमात्रेण ॥ २ ॥

अस्मान् विचित्रवपुषस्तव पृष्ठलग्नान्
कस्माद्विमुञ्चति भवान् यदि वा विमुञ्च ।
रे नीलकण्ठ गुरुहानिरियं तवैव
मौलौ पुनः क्षितिभृतो भविता स्थितिर्नः ॥ ३ ॥

यत्नादपि कः पश्यति शिखिनामाहारनिर्गमस्थानम् ।
यदि जलदनिनदमुदितास्त एव मूढा न नृत्येयुः ॥ ४ ॥

शुकान्योक्तयः ।

श्रीः ॥ शुक तव पठनं व्यसनं न गुणः किन्तु स गुणाऽऽभासः
आमजनि येनाऽऽमरणं शरणं ते पञ्जरे वासः ॥ १ ॥

---

१ काशपुष्पवत्पाण्डुरः । २ परिहृतास्त्यक्ता अन्ये जलाशयाः समुद्रादय
येन । ३ गतलज्जः निर्लज्ज इत्यर्थः । ४ मयूरः । ५ विघटितं व्यालावलीनां बन्धनं
यस्य । ६ गुदद्वारं । ७ [illegible] ८ [illegible] । ९ मरणपर्यन्तम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ।
शुकपञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥ २ ॥

माणिक्यद्रवलिप्तमौक्तिकतुलां बिभ्रन्ति नो दाडिमी-
बीजान्येष निरीक्षते न रमते हैमेऽप्यहो पञ्जरे ।
तत्तादृग्वनवाससम्मदमहामोदैकमेदस्विनी
वृत्तिर्मे गलिताऽनया हतगिरेत्येवं शुकः शोचति ॥ ३ ॥

इदमपटु कपाटं जर्जरः पञ्जरोऽयं
विरमति न गृहेऽस्मिन् क्रूरमार्जारयात्रा ।
शुकमुकुलितजिह्व स्थीयतां किं वचोभि-
स्तव वचनविनोदेनाऽऽदरः पामराणाम् ॥ ४ ॥

अमुष्मिन्नुद्याने विहगखल एष प्रतिकलं
विलोलः काकोलः[1] क्वणति खलु यावत्कटुतरम् ।
सखे तावत्कीर द्रढय हृदि वाचं च सकलां
न मौनेन न्यूनो भवति गुणभाजां गुणगणः ॥ ५ ॥

किंशुके शुक मा तिष्ठ चिरं भाविफलेच्छया ।
बाह्यरङ्गप्रसङ्गेन के के नाऽनेन वञ्चिताः ॥ ६ ॥

पालाशकुसुमभ्रान्त्या शुकतुण्डे पतत्यलिः ।
सोपि जम्बूफलभ्रान्त्या तमलिं धर्तुमिच्छति ॥ ७ ॥

सुभाषितस्याध्ययनानुरक्तं
शुकं वराकाः प्रहसन्ति काकाः ।
तमेव संसत्सु गिरं किरन्तं
दृष्ट्वा भवन्ति त्रपया नतास्याः ॥ ८ ॥

द्राक्षां प्रदेहि मधु वा वदने विधेहि
देहे विधेहि किमु वा करलालनानि ।

१ द्रोणकाकः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातिस्वभावचपलः पुनरेष कीर-
स्तत्रैव यास्यति कृशोदरि मुक्तबन्धः ॥ ९ ॥

याते यातमधःस्थिते स्थितमुपर्यालोकिते लोकितं
यद्यद्राजशुकोयमाकलयते शुद्धान्तहस्ते स्थितः ।
तत्सर्वं मणिभित्तिमेत्य भवता छायाशुकाङ्गीकृतं
तस्मिन्कर्णसुधां वितन्वति गिरं तूष्णीं किमु स्थीयते ॥१०॥

येनाजस्रं क्षितिपरमणीपाणिपद्मोपनीता-
श्चञ्चद्द्राक्षामधुरिमगुणाः सावहेलं निरस्ताः ।
सोयं दैवादहह गमने याचते केलिकीरो
भिल्लीलोकान्मधुरवचनैः सादरं तिन्दुकानि ॥ ११ ॥

अये कीर श्रेणीपरिदृढ वृथा वासरशतं
किमर्थं त्वं व्यर्थं क्षपयसि पलाशे रभसतः ।
यदा पुष्पारम्भे मुखमलिनिमा किंशुकतरो-
स्तदैवेदं ज्ञातं फलपरिचयो दुर्लभतरः ॥ १२ ॥

वासः काञ्चनपिञ्जरे नृपकराम्भोजैस्तनूमार्जनं
भक्ष्यं स्वादुरसालदाडिमफलं पेयं सुधाभं पयः ।
पाठः संसदि रामनाम सततं धीरस्य कीरस्य मे
हाहा हन्त तथापि जन्म विटपिक्रोडं मनो धावति १३

बकान्योक्तयः ।

श्रीः ॥ नालेनेव स्थित्वा पादेनैकेन कुञ्चितग्रीवम् ।
जनयति कुमुदभ्रान्तिं वृद्धबको बालमत्स्यानाम् ॥ १ ॥

नैर्मल्यं वपुषस्तवाऽस्ति वसतिः पद्माकरे जायते
मन्दं याहि मनोरमां वद गिरं मौनं न संपादय ।
धन्यस्त्वं बकराज हंसपदवीं प्राप्तोऽसि किं तैर्गुणै-
र्नीरक्षीरविभागनिपुणशक्तिः कथं लभ्यते ॥ २ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातिस्तस्य न मानसे न शुचिभिर्वृत्तिर्मृणालाऽङ्कुरै-
र्न ब्रह्मोद्वहनेन निर्मलयशः प्राप्ता न वाचः कलाः ।
जीवत्सत्त्वधनेन बाह्यधवलो भ्राम्यन् सगर्वं पुन-
र्मिथ्यैवोन्नतकन्धरः शठबको हंसैः सह स्पर्धते ॥ ३ ॥

उभौ पक्षौ श्वेतौ वियति भुवि चाऽव्याहतगतिः
सदा मीनान् भुङ्क्ते वसति सकलस्थाणुशिरसि ।
बके सर्वश्चान्द्रो गुणसमुदयः किंचिदधिको
गुणाः स्थाने मान्या न तु नरवर स्थानरहिताः ॥ ४ ॥

न भ्रूप्रस्फुरणं न चञ्चुचलनं नो चूलिकाकम्पनं
न ग्रीवाचलनं मनागपि न यत्पक्षद्वयोत्क्षेपणम् ।
नासाग्रे क्षणमेकपादनिवसत्काष्ठैकनिष्ठः परं
यावल्लुण्ठति पीनमीननिवहस्तावद्बकस्तापसः ॥ ५ ॥

रे रे शिष्ट बकोट नाकतटिनीतीरे तपस्विव्रतं
ध्यानेनानिमिषोपभोगमनसा युक्तं करोषीदृशम् ।
एवं यत्किल मानसस्य पदवीं काङ्क्षस्ययुक्तं हि त-
न्नीरक्षीरविवेकनिर्मलधियो हंसस्य नान्यस्य सा ॥ ६ ॥

खद्योतान्योक्तयः ।

श्रीः ॥ जर्जरतृणाऽग्रमदहन् सर्षपकणवत्प्रकाशयन्नूनम्
कीटत्वमात्मनस्त्वं खद्योत व्यापयस्यनलौ ॥ १ ॥

इन्दुः प्रयास्यति विनङ्क्ष्यति तारकश्रीः
स्थास्यन्ति लीढतिमिरा न मणिप्रदीपाः ।
अन्धंतमसमग्रमपि कीटमणे भविष्य-
त्युन्मेषमेष्यति भवानपि दूरमेतत् ॥ २ ॥

---

१ जन्म २ शुभ्रैः ३ जीवनम् ४ ब्रह्मणः उद्वहनेन वाहनतया पुरे ... ५ जीवन्तो ... ६ मत्स्यान् ... ७ तरुशैलादयः शिवश्च ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अ[1]दृष्टव्यापारं गतवति दिनानामधिपतौ
यश[2]:शेषीभूते शशिनि गत[3]धाम्नि ग्रहगणे ।
तथा ध्वान्तं जातं जगदुपगते मेघसमये
यथाऽमी गण्यन्ते तमसि पटवः कीटमणयः ॥ ३ ॥

घनसन्तमसमलीमसदशदिशि निशि यद्विराजसि तदन्यत् ।
कीटमणे दिनमधुना तरणिकराऽन्तरितसितकिरणम् ॥ ४ ॥

काकान्योक्तयः ।

श्रीः ॥ गात्रं ते मलिनं तथा श्रवणयोरुद्वेगकृत्कें[4]कृतं
भक्ष्यं सर्वमपि स्वभावचपलं दुश्चेष्टितं ते सदा ।
एतैर्वायस सङ्गतोऽस्य विनयैर्दोषैरमीभिः परं
यत्सर्वत्र कुटुम्बवत्सलमतिस्तेनैव धन्यो भवान् ॥ १ ॥

आमरणादपि विरुतं कुर्वाणाः स्पर्धया सह मयूरैः ।
किं जानन्ति वराकाः काकाः केकारवं कर्तुम् ॥ २ ॥

वयं काका वयं काका जल्पन्तीति प्रगे[5] द्विकाः[6] ।
तिमिरारिस्तमोहन्यादिति शङ्कितमानसाः ॥ ३ ॥

तुल्यवर्णच्छदः कृष्णः कोकिलैः सह संगतः ।
केन विज्ञायते काकः स्वयं यदि न भाषते ॥ ४ ॥

तत्काक त्वयि युक्ताः कटुवाग्वैवर्ण्यधूर्तताऽशुचिताः ।
यदि विष्ठाकृमिपुष्टे तत्र न दोषा हि तच्चित्रम् ॥ ५ ॥

रूक्षस्याऽमधुरस्य चाऽतिमलिनच्छायस्य धृष्टस्य च
क्षुद्रस्य क्षतकारिणोऽतिचपलस्याऽऽह्लादविच्छेदिनः ।
येयं निम्बफलेषु काक भवतस्तिक्तेषु नैसर्गिकी
प्रीतिस्तत्सदृशं विधेर्विलसितं निष्पन्नमेतच्चिरात् ॥ ६ ॥

---

१ दर्शनव्यापाररहितं यथा स्यात्तथा यद्वा स्थानमिति शेषः २ यशोमात्राव-शिष्टे ३ गततेजसि ४ 'काकृकाकृ' शब्दः ५ प्रातःकाले ६ द्वौ ककारौ नास्ति विद्येते येषां ते।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधिरेव विशेषगर्हणीयः करट त्वं रट कस्तवाऽपराधः ।
सहकारतरौ चकार यस्ते सहवासं सरलेन कोकिलेन ॥ ७ ॥

कृष्णं वपुर्वहतु चुम्बतु सत्फलानि
रम्येषु संवसतु चूतवनान्तरेषु ॥
पुंस्कोकिलस्य चरितानि करोतु कामं
काकः कलध्वनिविधौ स तु काक एव ॥ ८ ॥

किं केकीव शिखण्डमण्डिततनुः किं कीरवत्पाठकः
किं वा हंस इवाऽङ्गनागतिगुरुः शारीव किं सुस्वरः ।
किं वा हन्त शकुन्तबालपिकवत्कर्णाऽमृतं स्यन्दते
काकः केन गुणेन काञ्चनमये व्यापारितः पञ्जरे ॥ ९ ॥

अहो मोहो वराकस्य काकस्य यदसौ पुरः ।
सरीसर्ति नरीनर्ति यदयं शिखिहंसयोः ॥ १० ॥

कर्णाऽरुंतुदमन्तरेण रणितं गाहस्व काक स्वयं
कामन्दं मकरन्दशालिनमिह त्वां मन्महे कोकिलम् ।
धन्यानि स्थलवैभवेन कतिचिद्वस्तूनि कस्तूरिकां
नेपालक्षितिपालभालपतिते पङ्केन शङ्केत कः ॥ ११ ॥

समुद्रान्योक्तयः ।

श्रीः ॥ आस्तां तावदहो समुद्रमहिमा दूरेऽपि कर्णप्रिय-
स्तीरे यस्य पिपासयैव मरणं प्राप्नोति शीघ्रं जनः ।
तस्मादम्बुनिधेर्वरं लघुतरः कूपोऽथ वा वापिका
यत्र स्वात्मकरद्वयेन सलिलं पेपीयते स्वेच्छया ॥ १ ॥

प्रबलतरतरङ्गैर्दूरमुत्सारितोऽपि
प्रथयति तव. कीर्तिं दक्षिणाऽऽवर्तशंखः ।

---

१ निम्बः २ काक ३ रट शब्दं कुरु ४ पक्षिविशेषः 'साळुंखी मेना' इति ख्यातः ५ दक्षिणभागे आवर्तो यस्य एतादृशः शङ्खः ।

CC-0. Prof. Satya Vrat Shastri Collection.

परिकलय[1] पयोधे पद्मनाभाऽर्घयोग्यं[2]।
तव निकटनिषण्णैः क्षुल्लकैः[3] श्लाघ्यता का ॥ २ ॥

नाऽवज्ञा[4] नाऽप्यवैदग्ध्य[5]मुदधेर्महिमैव सः।
यत्तीरपङ्कमग्नानि महारत्नानि शेरते ॥ ३ ॥

यद्यपि बद्धः शैलैर्यदपि च [6]गिरिमथनमुषितसर्वस्वः।
तदपि च [7]विभीतभूधररक्षायां दीक्षितो जलधिः ॥ ४ ॥

यद्यपि स्वच्छभावेन दर्शयत्युदधिर्मणीन्।
तथाऽपि जानुदघ्नो[8]ऽयमिति चेतसि मा कृथाः ॥ ५ ॥

रत्नैरापूरितस्याऽपि मदलेशोऽपि नाऽम्बुधेः।
मुक्ताः कतिपयः प्राप्य मातङ्गा मदविह्वलाः ॥ ६ ॥

अधः करोषि यद्रत्नं मूर्ध्ना धारयसे तृणम्।
दोषस्तवैव जलधे रत्नं रत्नं तृणं तृणम् ॥ ७ ॥

वातोल्लासितकल्लोल[9] धिक् ते सागरगर्जनम्।
यस्य तीरे तृषाक्रान्तः पान्थः पृच्छति वापिकाम् ॥ ८ ॥

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनः शिखरिपत्त्रिणः[10] शेरते।
इतोऽपि वडवानलः सह समस्तसंवर्तकै[11]-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ ९ ॥

साकं ग्रावगणै[12]र्लुठन्ति मणयो बालार्कबिम्बोपमा
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः।

---

१ जानीहि २ विष्णुपूजायोग्यम् ३ क्षुद्रशंखैः ४ अवमानः ५ अचतुरत्वम् ६ गिरिमथनेन हृतं सर्वस्वं चतुर्दशरत्नात्मकं धनं यस्य ७ विशेषेण भीता भूधरो मैनाकस्तद्रक्षायां रक्षणे इन्द्राद्भीतो मैनाको जलधिं प्रविष्ट इति प्रसिद्धम् ८ जानुप्रमाणः ९ वायुना उल्लासिताः उत्पादिताः कल्लोला महोर्मयो यस्य १० शिखरिणः पर्वतास्त एव [illegible] ११ संवर्तकैर्मेघैः १२ पाषाणसमूहैः।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं वीक्ष्य तवाऽविवेकमथ च प्रौढिं परामुन्नतेः
किं निन्दाम्यथवा स्तवीमि कथय क्षीरार्णव त्वामहम् ॥ १० ॥

किं खलु रत्नैरेतैः किं खलु रत्नायितेन वपुषा ते ।
सलिलमपि यन्न तावकमर्णव वदनं प्रयाति तृषितानाम् ॥ ११ ॥

मा कुरु गुरुतागर्वं लघुरन्यो नाऽस्ति सागर त्वत्तः ।
जलसंग्रहमन्यस्मात्त्वयि सति कुर्वन्ति पोतस्थाः ॥१२ ॥

पर्वतान्योक्तयः ।

श्रीः ॥ विन्ध्यमन्दरसुमेरुभूभृतां यत्नातिस्तुहिनपर्वतोऽभवत् ।
ईश्वरश्वशुरताप्रभावतस्तद्ध्रुवं जगति जृम्भते यशः ॥ १ ॥

ये संतोषसुखप्रबोधमनसस्तेषामभिन्ना मुदो
येऽप्यन्ये धनलोभसंकुलधियस्तेषां तु दूरे नृणाम् ।
इत्थं कस्य कृते कृतः स विधिना तादृक्पदं संपदां
स्वाऽऽत्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ २ ॥

आचक्ष्महे नव किमद्यतनामवस्थां
तच्चाऽद्य विन्ध्यशिखरस्य मनोहरस्य ।
यत्रैव सप्तमुनयस्तपसा निषेदुः
सोऽयं विलासवसतिः [2]पिशिताशनानाम् ॥ ३ ॥

किं तेन हेमगिरिणा रजताद्रिणा वा
यत्र स्थिता हि तरवस्तरवस्त एव
मन्यामहे मलयमेव यदाश्रयेण
शाखोटनिम्बकुटजा अपि चंदना स्युः ॥ ४ ॥

शक्रादरक्षि यदि पक्षयुगं तथाऽपि
मैनाक सन्ति तव नेह गतागतानि ।

---

१ नौकास्थिताः नाविका इत्यर्थः २ राक्षसानां ३ मेरुणा ४ कैलासेन
५ 'लसोढा' इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निःसत्त्वता च निस्त्रपता च किंतु
पाथोनिधौ निरुपमा भवताऽर्जिता च ॥ ५ ॥

अगस्त्यान्योक्ती ।

श्रीः ॥ कम्पन्ते गिरयः पुरंदरभिया मैनाकमुख्याः पुनः
क्रन्दन्त्यम्बुधराः स्फुरन्ति वडवावक्त्रोद्गता वह्नयः ।
भोः कुम्भोद्भव मुच्यतां जलनिधिः स्वस्त्यस्तु ते सांप्रतं
निद्रालुश्लथबाहुवल्लिकमलाऽऽश्लेषो हरिः सीदति ॥ १ ॥

अल्पीयसैव पयसा यत्कुम्भः पूर्यते प्रसिद्धं तत् ।
ब्राह्मं तेजः पश्यत कुम्भोद्भूतः पपौ वार्धिम् ॥ २ ॥

नद्यन्योक्तयः ।

श्रीः॥ यद्यपि दिशि दिशि सरितः परितः परिपूरिताऽम्भसः सन्ति
तदपि पुरन्दरतरुणीसंगतिसुखदायिनी गङ्गा ॥ १ ॥

छायां प्रकुर्वन्ति नमन्ति पुष्पैः फलानि यच्छन्ति तटद्रुमा ये ।
उन्मूल्य तानेव नदी प्रयाति तरङ्गिणां किं प्रतिपन्नमस्ति २

कतिपयदिवसस्थायी पूरो दूरोन्नतोऽपि भविता ते ।
तटिनि तटद्रुमपातनपातकमेकं चिरस्थायि ॥ ३ ॥

कुरु गम्भीराशयतां कल्लोलैर्जनय लोकविभ्रान्तिम् ।
वीतपयोधरलक्ष्मीः कस्य न चरणैर्विलङ्घ्यासि ॥ ४ ॥

तटिनि चिराय विचारय विन्ध्यभुवस्तव पवित्रायाः ।
शुष्यन्त्या अपि युक्तं किं खलु रथ्योदकाऽऽदानम् ॥ ५ ॥

---

१ निर्बलत्वम् २ निर्लज्जत्वम् ३ इन्द्रभयेन ४ ब्राह्मणसामर्थ्यम् ५ समुद्रम् ६ इन्द्रस्त्रीणां रम्भोर्वश्यादीनां समागमसुखदात्री ७ पुष्पैः सह फलानि ८ ददाति ९ तरंगवत्प्रकृष्टभावानाम् १० अंगीकृतम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तडागान्योक्तयः ।

श्रीः ॥ क्रौञ्चः क्रीडतु कूर्दतां च कुररः कङ्कः परिष्वज्यतां
मद्गुर्वाश्यतु सारसश्च रसतु मोड्डीयतां टिट्टिभः ।
भेकाः सन्तु बका वसन्तु चरतु स्वच्छन्दमाटिस्तटे
इंहो पद्मसरः कुतः कतिपयैर्हंसैर्विना श्रीस्तव ॥ १ ॥

अयमवसरः सरस्ते सलिलैरुपकर्तुमर्थिनामनिशम् ।
तदिदमतिसुलभमम्भो भविता जलपूर्णजलधराऽभ्युदये ॥ २ ॥

रे पद्माकर यावदस्ति भवतो मेध्यं पयः पूरितं
तावच्चक्रचकोरकङ्ककुररश्रेणीं समुल्लासय ।
पश्चात्त्वं समटङ्ककोटचटुलत्रोटीपुटव्याहति—
त्रुटच्चत्कर्पटकर्परव्यतिकरैर्निन्दास्पदं यास्यसि ॥ ३ ॥

याते मय्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थ सन्ततिरसौ संतापमालाऽऽकुला ॥
एवं यस्य निरन्तराऽधिपटलैर्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसोधिग्वारिधीनां जनुः ॥ ४ ॥

आपेदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गारसालमुकुलानि समाश्रयन्ति ।
संकोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥ ५ ॥

इयत्यां सम्पतावपि च सलिलानां त्वमधुना
न तृष्णामार्तानां हरसि यदि कांसार सहसा ॥
निदाघे चण्डांशौ किरति परितोऽङ्गारनिकरं
कृशीभूतः केषामहह परिहर्ताऽसि खलु ताम् ॥ ६ ॥

---

१ शब्दं करोतु २ जलकाकः 'पाणकावळा' ३ गच्छतु पूजयतु वा ४ सूर्यः ५ गमिष्यति ६ मनोव्यथापरंपराभिः ७ मार्गे यत्सरस्तस्य ८ आकाशमार्गम् ९ प्राप्नुवन्ति स्म १० हे सरः ११ ग्रीष्मे १२ सूर्ये ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कमलान्योक्तयः ।

श्रीः ॥ रे पद्मिनीदल तवाऽत्र मया चरित्रं
दृष्टं विचित्रमिव यद्विदितं ध्रुवं तत् ।
यैरेव शुद्धसलिलैः परिपालितस्त्वं
तेभ्यः पृथग्व्यवसि पङ्कभवोऽसि यस्मात् ॥ १ ॥

पङ्कज जलेषु वासः प्रीतिर्मधुपेषु कण्टकैः संगः ।
यद्यपि तदपि तवैतच्चित्रं मित्रोदये हर्षः ॥ २ ॥

कुसुमं कोशातक्या विकसति रात्रौ दिवा च कूष्माण्ड्याः ।
अलिकुलनिचये रुचिरं किंतु यशः कुमुदकमलयोरेव ॥ ३ ॥

वरमश्रीकता लोके नाऽसमानसमानता ।
इतीव कुमुदोद्भेदे कमलैर्मुकुलायितम् ॥ ४ ॥

नालस्य प्रसरो जलेष्वपि कृताऽऽवासस्य कोशे रुचि-
र्दण्डे कर्कशता मुखेऽतिमृदुता मित्रे महान् प्रश्रयः ।
आमूलं गुणसंग्रहव्यसनिता द्वेषश्च दोषाकरे
यस्यैषा स्थितिरम्बुजस्य वसतिर्युक्तैव तत्र श्रियः ॥ ५ ॥

प्रसारितकरे मित्रे जगदुद्द्योतकारिणि ।
किं न कैरव लज्जा ते कुर्वतः कोशसंवृतिम् ॥ ६ ॥

लक्ष्मीसंपर्कजातोऽयं दोषः पद्मस्य निश्चितम् ।
यदेतद्गुणसंदोहधाम्नि चन्द्रे पराङ्मुखम् ॥ ७ ॥

रत्नाकरतनुजनुषि द्विजराजे राजति श्रियो मित्रे ।
अमृतकरे च कलावति पद्मिनि वासाकुलीभवति ॥ ८ ॥

उदितवति द्विजराजे कस्य न हृदयं मुदं परां धत्ते ।
संकुचसि कमल यदयं हरहर वामो विधिर्भवतः ॥ ९ ॥

---

१ कर्दमोत्पन्नः २ डलयोः सावर्ण्यात् जडेषु वासः ३ भ्रमरेषु पक्षे मद्यपेषु
४ खलुदर्दैः दुष्टैश्च ५ [illegible] ६ [illegible] च ७ कोशसंवरणम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य नाऽभूवन् भंगुरा गुणाः ॥ १ ॥

अपि दलदरविन्दस्यन्दमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः[1] ।
दिशि दिशि निरपेक्षस्तावकीनं वितन्वन्
परिमलमयमन्यो बान्धवो गन्धवाहः ॥ ११ ॥

स्वच्छन्दं दलदरविन्द ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः
आमोदानथ हरिदंतराणि[2] नेतुं
नैवाऽन्यो जगति समीरणात्प्रवीणः ॥ १२ ॥

समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसनं
निवासः पद्मायाः[4] सुरहृदयहारी परिमलः ।
गुणैरेतैरन्यैरपि च ललितस्याऽम्बुज तव
द्विजोत्तंसे[5] हंसे यदि रतिरतीवोन्नतिरियम् ॥ १३ ॥

नीरान्निर्मलतोजनिर्मधुरता रामा मुखस्पर्धिनी
वासो यस्य हरेः करे परिमलो गीर्वाणचेतोहरः[6] ।
सर्वस्वं तदहो महाकविगिरां कामस्य चाऽम्भोरुह
त्वं चेत्प्रीतिमुरीकरोषि[7] मधुपे किं त्वां प्रति ब्रूमहे ॥ १४ ॥

पद्मिनि किमिति क्रीडसिमधुपैर्लज्जालवोऽपि न हि किं ते ।
हर हर विस्मृत्योक्तं क नु लज्जा सवितृरक्तायाः[8] ॥ १५ ॥

कूपान्योक्तयः ।

श्रीः ॥ चित्रं न तद्यदयमम्बुधिरम्बुदौघ
सिन्धुप्रवाहपरिपूर्णतया महीयान् ।

---

१ भ्रमराः २ दिगन्तराणि ३ वायोः ४ लक्ष्म्याः ५ पक्षिश्रेष्ठे ६ देवमनोहरः ७ अङ्गीकरोषि ८ [illegible] CC-0. Prof. Satya Vrat Shastri Collection. [illegible] तस्मिन् रक्तायाः पितृगामिन्या इत्यभिप्रायः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं स्वर्थिनामुपकरोषि यदल्पकूप
निष्पीड्य कुक्षियुगलं हि महत्त्वमेतत् ॥ १ ॥
भीमश्याम[1]प्रतनुवदनक्रूरपातालकुक्षि-
क्रोड श्रान्तोपहितविभवस्याऽथ किं ते ब्रवीमि ।
येन त्वत्तः समभिलषितं वाञ्छितु क्षुद्रकूप
क्लाम्यन्मूर्तेर्भवति सहसा कस्य नाऽधोमुखत्वम् ॥ २ ॥
[2]सगुणैः सेवितोपान्तो विनतैः प्रार्थदर्शनः ।
नीचोऽपि कूपः सत्पात्रैर्जीवनार्थं[3] समाश्रितः ॥ ३ ॥
यद्यपि बहुगुणगम्यं जीवनमेतस्य कूपमुख्यस्य ।
जयति तथाऽपि विवेको दानं पात्राऽनुमानेन ॥ ४ ॥
नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदाऽपि कुथाः ।
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीताऽसि ॥ ५ ॥

दावानलान्योक्तयः ।

श्रीः ॥ यस्यां महत्त्वभाजो भवन्ति गुणिनोऽमितां धनुर्दण्डाः
दहनस्तां वंशालिं को वनवन्हे विवेकस्ते ॥ १ ॥
हे दावाऽनल शैलाऽग्रवासिनः साधुशाखिनः ।
मुग्ध व्यर्थं त्वया दग्धाः प्रेरितेन प्रभञ्जनैः ॥ २ ॥
दुर्दैवप्रभवप्रभञ्जनजवादुद्धतभूमीरुहा-
नेतान्सत्त्वगुणाश्रयानकरुणः शुष्यन् किमुन्माद्यसि ।
ब्रूमस्त्वां वनहव्यवाह यदमीदग्धार्धदग्धा अपि
द्रष्टव्यास्तव मूर्छनाद्विलयिनो नामाऽपि न ज्ञायते ॥ ३ ॥
विध्वस्ता मृगपक्षिणो विधुरतां नीता स्थलीदेवता
धूमैरन्तरिताः स्वभावमलिनैराशा मही तापिता ॥

---

१ भीमं भयंकरं श्यामं अन्धकारयुक्तत्वात्प्रतनुसंकुचितं मुखं यस्य २ रज्जु ग्रहितैः ३ उदकार्थम् ४ अत्यन्तम् ५ निम्नः ६ रसयुक्तं हृदयं यस्य ७ अक्षयम ८ वगुपात्रम् ९ वायुभिः १० बलात्कारः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भस्मीकृत्य सुपुष्पपल्लवफलैर्नम्रान्महापादपा-
नुद्वृत्तेन दवानलेन विपिनं वल्मीकशेषं कृतम् ॥ ४ ॥

रत्नान्योक्तयः ।

यस्य वज्रमणेर्भेदे भिद्यन्ते लोहसूचयः ॥
करोति तत्र किं नाम नारी नखविलेखनम् ॥ १ ॥
सोमकान्तो मणिः स्वच्छः सूर्यकान्तस्तथा न किम् ।
उद्गारे तु विशेषोऽस्ति तयोरमृतवन्ह्ययः ॥ २ ॥
स्फटिकस्य गुणो योऽसौ स एवाऽऽयाति दोषताम् ।
धत्ते स्वच्छतया छायां यतो मलवतामपि ॥ ३ ॥
सुधाकरकरस्पर्शाद्बहिर्द्रवसि सर्वतः ।
चन्द्रकान्तमणे तेन मृदुत्वं लोकविश्रुतम् ॥ ४ ॥
वपुःपरीणाहगुणेन तेभ्यो यशस्विनः किं मणयो भवन्ति ।
तथाऽपि चूडासु महीपतीनां त एव खेलन्ति न गण्डशैलाः ५
त्यज निजगुणाऽभिमानं मरकतपतितोऽसि पामरे वणिजि
काचमणेरपि मौल्यं लभसे यत्तदपि ते श्रेयः ॥ ६ ॥
भ्रष्टं नृपतिकिरीटाद्भूमौ पतितं तिरोहितं रजसा ।
विधिविलसितेन रत्नं जनचरणविडम्बनं सहते ॥ ७ ॥
आघ्रातं परिचुम्बितं परि मुहुर्लीढं पुनश्चर्वितं
त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां मा कृथाः ।
हे सद्रत्न तवैतदेव कुशलं यद्वानरेणाऽऽदरा-
दन्तःसारविलोकनव्यसनिना चूर्णीकृतं नाऽश्मना ॥८॥

शंखान्योक्तयः ।

श्रीः ॥ कीटगृहं कुटिलोऽन्तःकठिनः क्षीराऽम्बुसंभवः शून्यः
शंखः श्रीपतिनिकटे केन गुणेन स्थितिं लेभे ॥ १ ॥

---

१ (बारुळ) २ हीरकमणे ३ विशालता ४ 'पाच' इति लोके ५ नीच ६ छादितं ७ दैवदुर्विपाकेन ८ हनुमता ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तातः क्षीरनिधिः स्वसा[1] जलधिजा[2] भ्राता सुरेशद्रुमः
सौजन्यं सह कौस्तुभेन शुचिता यस्य द्विजेशादपि ।
धिक्कर्माणि स एव कम्बुरधुना पाँखण्ड[3]कान्ताकरे
विश्रान्तः प्रतिवासरं प्रतिगृहं भैक्ष्येण कुक्षिंभरिः ॥ २ ॥

क्व वाऽम्भोधौ जन्म क्व च वपुरिदं कुन्दधवलं[4]
क्व चाऽऽवासस्थानं कृतमहह विष्णोः करतलम् ।
क्व नीचानामास्ये परिणतिरियं चुम्बनविधा-
वितीवायं शंखः करुणकरुणं रोदिति मुहुः ॥ ३ ॥

सामान्यवृक्षान्योक्तयः ।

श्रीः ॥ किं जातोऽसि चतुष्पथे घनतरं छन्नोऽसि किं छायया
छन्नश्चेत्फलितोऽसि किं फलभरैराढ्योऽसि किं सन्नतः ।
हे सद्वृक्ष सहस्व संप्रति सखे शाखाशिखाकर्षण-
क्षोभाऽऽमोटनभञ्जनानि जनतः स्वैरेव दुश्चेष्टितैः ॥ १ ॥

छायासुप्तमृगः शकुन्तनिवहैर्विष्ठावलिप्तच्छदः
कीटैरावृतकोटरः कपिकुलैः स्कन्धे कृतप्रश्रयः ।
विश्रब्धं मधुपैर्निपीतकुसुमः श्लाघ्यः स एकस्तरु-
र्यत्राऽङ्गीकृतसत्वसंप्लवभरे भग्नाऽऽपदोऽन्ये द्रुमाः ॥ २ ॥

शाखाशतचितवियतः सन्ति कियन्तो न कानने तरवः ।
परिमलभरमिलदलिकुलदलितदलाः शाखिनो विरलाः ॥ ३ ॥

इहोद्याने संप्रत्यहह परिशिष्टाः क्रमवशा-
दमी वल्मीकास्ते[5] भुजगकुललीलावसतयः ।
गतास्ते विस्तीर्णस्तबकभरसौरभ्यलहरी-
परीतव्योमानः[6] प्रकृतिगुरवः[7] केऽपि तरवः ॥ ४ ॥

---

१ भगिनी २ लक्ष्मीः ३ 'जंगम' इति लोके ४ कुन्दपुष्पवच्छुभ्रम् ५ चल्हाटा इतिलोके ६ व्याप्तम् ७ स्वभावतो महान्तः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीव्रो निदाघसमयो बहुपथिकजनश्च मा[1]रवः पन्थाः।
मार्गस्थिततरुरेकः कियतां संतापमपहरति ॥ ५ ॥

प्र[2]त्यग्रैः पत्रनिचयैस्तरुर्यैरेव शोभितः।
जहाति जीर्णांस्तानेव किं वा चित्रं कु[3]जन्मनः ॥ ६ ॥

रो[4]लम्बैर्न वि[5]लम्बितं विघटितं धूमाऽऽकुलैः कोकिलै-
र्मायूरैश्चलितं पुरैव रभसा[6]त्कीरैरधीरैर्गतम्।
एके[7]नाऽपि सपल्लवेन तरुणा दावानलोप[8]प्लवः
सोढः केन विपत्सु मुञ्चति जनो मूर्ध्नाऽपि यो लालितः ७

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।
धन्यामहीरुहा येभ्यो निराशा यान्ति नाऽर्थिनः ॥ ८ ॥

छायावन्तो गतव्यालाः स्वारोहाः फलदायिनः।
मार्गद्रुमा महान्तश्च परेषामेव भूतये ॥ ९ ॥

भुक्त्वा स्वादुफलं कृतं च शयनं शाखाऽग्रजैः पल्लवै-
स्तवच्छायापरिशीतलं सुसलिलं पीतं व्यपेतश्रमैः।
विश्रान्ताः सुचिरं परं सुमनसः प्रीतिः किमत्रोच्यते
त्वं सन्मार्गतरुर्वयं च पथिका यामः पुनर्दर्शनम् ॥ १० ॥

भुक्तानि यैस्तव फलानि पं[9]चेलिमानि
क्रोडास्थितैरहह वीतभयैः प्रसुप्तम्।
ते पक्षिणो जलरयेण विकृष्यमाणं
पश्यन्ति पादप भवन्तममी तटस्थाः ॥ ११ ॥

शाखोटशाल्मलिपलाशकरीरकाद्याः
शृण्वन्तु पुण्यनिलयो यदसौ वसन्तः।

१ मरुदेशसम्बन्धी २ नूतनैः ३ कुः पृथ्वी तस्याः जन्म यस्य पक्षे कुत्सितं जन्म यस्य ४ भ्रमरैः ५ विलम्बो न कृतः ६ शुकैः ७ पलायितानां मध्ये एकेनाऽपि तरुणा[illegible] दावानलोपप्लवः केन सोढ इति काकुः ८ उपद्रवः ९ पक्वानि।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

युष्मभ्यमर्पयति पल्लवपुष्पलक्ष्मीं
सौरभ्यसंभवविधिस्तु विधेरधीनः ॥ १२ ॥

पान्थाऽऽधार इति द्विजाऽऽश्रय इति श्लाघ्यस्तरूणामिति
स्निग्धच्छाय इति प्रियोद्दश इति स्थानं गुणानामिति
पर्यालोच्य महातरो तव घनच्छायां वयं संश्रिता-
स्तत्त्वत्कोटरवासिनो द्विरसना दूरी करिष्यन्ति नः ॥१३॥

हिमसमयो वनवन्हिर्जवनः पवनस्तडिल्लताऽभिभवः ।
हंत सहन्ते यावत्तावद्द्रुम कुरु परोपकृतिम् ॥ १४ ॥

मूलं स्थूलमतीव बन्धनदृढं शाखाः शतं मांसला
वासो दुर्गमहीधरे तरुपते कुत्राऽस्ति भीतिस्तव ।
एकः किंतु मनागयं जनयति स्वान्ते ममाऽधिज्वरं
ज्वालालीवलयीभवन्नकरुणो दावानलो घस्मरः ॥१५ ॥

धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च ॥
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमस्ते ॥ १६ ॥

अथ वृक्षविशेषान्योक्तयः ।

तत्र पूर्वं कल्पवृक्षान्योक्तयः ।

श्रीः ॥ कल्पद्रुमोऽपि कालेन भवेद्यदि फलप्रदः ॥
को विशेषस्तदा तस्य वन्यैरन्यैर्महीरुहैः ॥ १ ॥

स्वर्णैः स्कन्धपरिग्रहो मरकतैरुल्लासिताः पल्लवा
मुक्ताभिस्तवकश्रियो मधुलिहां वृन्दानि नीलोत्पलैः ।
संकल्पाऽनुविधायि यस्य फलितं कस्तस्य धत्ते तुलां
धिग्जातु द्रुमसत्कथासु यदयं कल्पद्रुमोऽपि द्रुमः ॥ २ ॥

---

१ सर्पाः पक्षे पिशुनाः । २ ग्रहः । ३ दानशौण्डानां गुरवे ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

औदार्यं भुवनत्रयेऽपि विदितं सम्[1]भूतिरम्भोनिधे-
[2]र्वासो [3]नन्दनकानने परि[4]मलो गीर्वाणचेतोहरः ।
एवं दातृगुणोत्करः सुरतरोः सर्वोऽपि लोकोत्तरः
स्यादर्थिप्रवराऽर्थितार्पणविधावेको विवेको यदि ॥ ३ ॥
परिमलसुरभितनभसो बहवः कनकाद्रिपरिसरे तरवः ।
तदपि सुराणां चेतसि निरूपितमिह पारिजातेन ॥ ४॥

चन्दनान्योक्तयः ।

लोकानन्दन चन्दन द्रुमसखे नाऽस्मिन्वने स्थीयतां
दु[5]र्वंशैः परुषैरसारहृदयैराक्रान्तमेतद्वनम् ।
ते ह्यन्योन्यनिघर्षजातदहनज्वालाऽवलीसंकुला
न स्वान्येव [6]कुलानि केवलमिदं सर्वं दहेयुर्वनम् ॥ १ ॥
सन्त्येव [7]गलिताऽकाशा महीयांसो महीरुहः ।
तथाऽपि [8]जनताचित्ताऽऽनन्दनश्चन्दनद्रुमः ॥ २ ॥
कान्ताकेलिं कलयतु तरुः कोपि कश्चित्प्रसूना-
मत्यानन्दं जनयतु फलैः कोऽपि लोकान् [9]धिनोतु ।
धन्यं मन्ये मलयजमहो यः प्रभूतोपतापं
सं[10]सारस्य द्रुतमपनयत्यात्मदेहव्ययेन ॥ ३ ॥
भ्रातश्चन्दन किं ब्रवीमि विकटस्फूर्जत्फणाभीषणा
गन्धस्याऽपि महाविषाः फणभृतो गुप्त्यै पदे ये कृताः ।
दैवात्पुष्पफलान्वितो यदि भवांस्तत्राऽभविष्यत्सदा
नो जाने किमकल्पयिष्यदधिकं रक्षार्थमस्याऽऽत्मनः ॥४॥
यद्यपि चन्दनविटपी विधिना फलकुसुमवर्जितो विहितः ।
निजवपुषैव परेषां तथाऽपि संतापमपनयति ॥ ५ ॥

---

१ संभवः २ वसतिः ३ इन्द्रवने ४ आमोदः ५ दुष्टवेणुभिः ६ यूथानि ७ गलितं ग्रस्तं आकाशं यैः ८ जनसमूहः ९ प्रीणयतु १० संसारे स्थितस्य जनस्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूलं भुजङ्गैः शिखरं विहङ्गैः शाखाः प्लवङ्गैः कुसुमानि भृङ्गैः ॥
नाऽस्त्येव तच्चन्दनपादपस्य यन्नाऽऽश्रितं सत्वभरैः समन्तात् ६

अयि मलयजमहिमाऽयं कस्य गिरामस्तु विषयस्ते ।
उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः ॥ ७ ॥

पाटीर तव पटीयान्कः परिपाटीमिमामुरीकर्तुम् ।
यत्पिंषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् ॥ ८ ॥

यैस्त्वं गुणगणवानपि सतां द्विजिव्हैरसेव्यतां नीतः ।
तानपि वहसि पटीरज किं कथयामस्त्वदीयमौन्नत्यम् ॥ ९ ॥

अगुर्वन्योक्ती ।

अगुरुरिति वदतु लोको गौरवमत्रैव पुनरहं मन्ये ।
दर्शितगुणैव वृत्तिर्यस्य जने जनितदाहेऽपि ॥ १ ॥
आरामाऽऽभरणस्य पल्लवचयैरापीततिग्मत्विषः
पाथोदप्रशमं नयाऽगुरुतरोरेतस्य दावज्वरम् ।
ब्रूमस्त्वामुपकारकातरगतप्रायाः पयःसंपदो
दग्धोऽप्येष तरुर्दिशः परिमलैरापूर्य निर्वास्यति ॥ २ ॥

चम्पकान्योक्तयः ।

अन्तः प्रतप्तमरुसैकतदह्यमान--
मूलस्य चम्पकतरोः क्व विकाशचिन्ता ।
प्रायो भवत्यनुचितस्थितिदेशभाजां
श्रेयः स्वजीवपरिपालनमात्रमेव ॥ १ ॥
उद्यानपाल कलशाऽम्बुनिषेचनाना-
मेतस्य चम्पकतरोरयमेव कालः ।

१ वानरैः २ चन्दन ३ अतिशये न पटुः समर्थः ४ रीतिम् ५ अंगीकर्तुम् ६ पेषणं कुर्वताम् ७ सर्पैः ८ नाम्ना अथ च लघुः ९ उद्यानभूषणस्य ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन्निदाघनिहते घनवारिणा वा
संवर्धिते तव वृथाभवथोपयोगः ॥ २ ॥

सा॰ारणतरुबुद्ध्या न मया बद्धस्तवाऽऽलवालोऽपि ।
लज्जयसि मामिदानीं चम्पक भुवनाऽधिवासिभिः कुसुमैः ॥३॥

केनाऽत्र चम्पकतरो बत रोपितोऽसि
कुग्रामपामरजनाऽन्तिकवाटिकायाम् ।
यत्र प्रवृद्धवनशाकविवृद्धिलोभा-
द्गो भग्नवाटघटनोचितपल्लवोऽसि ॥ ४ ॥

यद्यपि खदिराऽरण्ये गुप्तो वसते हि चम्पको वृक्षः ।
तदपि च परिमलमतुलं दिशिदिशि कथयेत्समीरणस्तस्य ॥ ५॥

अशोकान्योक्तयः ।

किं ते नम्रतया किमुन्नततया किं वा घनच्छायया
किं वा पल्लवलीलया किमनया वा शोक पुष्पश्रिया ।
यत्त्वन्मूलनिषण्णखिन्नपथिकस्तोमः स्तुवन्नन्वहं
न स्वादूनि मृदूनि खादति फलान्याकण्ठमुत्कण्ठितः १

मृदूनां स्वादूनां लघुरपि फलानां न विभव-
स्तवाऽशोकस्तोकः स्तबकमहिमा सोऽप्य[3]सुरभिः ।
यदेतन्नोतन्वीकरचरणलावण्यसुभगं
प्रवालं बालं स्यात्तरुषु स कलङ्कः किमपरः ॥ २ ॥

रक्तै[4]स्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणै-
स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्तास्तथा मामपि ।
[6]कान्तापादतलाऽऽहतिस्तव मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ॥ ३ ॥

१ समूहः २ अल्पः ३ सुगन्धरहितः ४ रक्तवर्णः अनुरक्तश्च ५ भ्रमरा बाणाश्च ६ कान्तापादघातः 'पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति बकुलो मुखसीधुसिक्तः । आलिङ्गितः कुरबकः कुरुते विकासमालोकितास्तिलक उत्कलिको विभाति ...॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मालत्यन्योक्तयः ।

किं मालतीकुसुम ताम्यसि निष्ठुरेण
केनाऽपि यत्किल विलूनमितो लताग्राद् ।
लोकोत्तरेण विलसद्गुणगौरवेण
कोनाऽमुना शिरसि नाम करिष्यति त्वाम् ॥ १ ॥

म्रदीयस्त्वाऽऽधिक्यान्न भवति विमर्दक्षममिदं
न चाऽन्येभ्यो रूपं भवति कुसुमेभ्योऽधिकतरम् ।
प्रसूनं मालत्यास्तदपि हृदयाऽऽह्लादकरणं
प्रवीणैरामोदैर्भवति जगतो मौलिनिलयम् ॥ २ ॥

भवति हृदयहारी कोऽपि कस्याऽपि हेतु-
र्न खलु गुणविशेषः प्रेमबन्धप्रयोगे ।
किसलयितवनान्ते कोकिलाऽऽलापरम्ये
विकसति न वसन्ते मालती कोऽत्र हेतुः ॥ ३ ॥

कुसुमस्तबकानम्राः सन्त्येव परितो लताः ।
तथाऽपि भ्रमरभ्रान्तिं हरत्येकैव मालती ॥ ४ ॥

गुञ्जति मञ्जुमिलिन्दे मालति मा मौनमुपयासीः ।
शिरसा वदान्यगुरवः सादरमेनं वहन्ति सुरतरवः ॥ ५ ॥

किं मालति म्लायसि यद्यविद्यो श्चुचुम्ब तुम्बीकुसुमं षडंघ्रिः ।
पदैश्चतुर्भिर्हि पुनः पशुश्चेत्स षड्भिरध्यर्धपशुः कथं नो ॥ ६ ॥

मालतीकुसुमे भाति गुञ्जन्मत्तमधुव्रतः ।
प्रयाणे पञ्चबाणस्य शंखमापूरयन्निव ॥ ७ ॥

---

१ संतापं भजासि २ छिन्नम् ३ मार्दवाधिक्यात् ४ क्षिप्याते ५ मूकः ६ इक्ष्वाकुकुसुमम् ७ षट्पदः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मल्लिकान्योक्तिः ।

न च गन्धवहेन[1] चुम्बिता न च पीता मधुपेन मञ्जरी ।
पिहितैव[2] कठोरशाखया परिणामस्य[3] जगाम गोचरम् ॥

केतक्यन्योक्ती ।

पत्राणि कण्टकशतैः परिवेष्टितानि
वार्ताऽपि नाऽस्ति मधुनो रजसान्धकारः ।
आमोदमात्ररसिकेन मधुव्रतेन
नाऽऽलोकितानि तव केतकि दूषणानि ॥ १ ॥

एतासु केतकिलतासु विकासिनीषु
सौभाग्यमद्भुततरं भवती बिभर्ति ।
यत्कण्टकैर्व्यथितमात्मवपुर्नजानं
स्त्वामेव सेवितुमुपक्रमते द्विरेफः ॥ २ ॥

पाटलान्योक्तिः ।

पाटलया वनमध्ये कुसुमितया मोहितस्तथा भ्रमरः ।
सैवेयमिति यथाभूत्प्रतीतिरस्याऽन्यदीयपुष्पेऽपि ॥ १ ॥

सहकारान्योक्तयः[4] ।

न तादृक्कर्पूरे न च मलयजे[5] नो मृगमदे[6]
फले वा पुष्पे वा तव मिलति यादृक् परिमलः ।
परं त्वेको दोषस्त्वयि खलु रसाले यदधिकः
पिके वा काके वा लघुगुरुविशेषं न मनुषे ॥ १ ॥

उत्तंसकौतुकरसेन विलासिनीभि—
र्लूनानि यस्य नखरैरपि पल्लवानि ।

---

१ वायुना २ छादिता ३ परिणतिं प्राप्तिस्थर्यः ४ आम्रः ५ चन्दने ६ कस्तूरिकायाम् ७ कर्णभूषणाय

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्यानमण्डनतरोः सहकार स त्व-
मङ्गारकारकरगोचरतां गतोऽसि ॥ २ ॥

कति पल्लविता न पुष्पिता वा तरवः सन्ति समन्ततो वसन्ते ।
जगतो विजये तु पुष्पकेतोः सहकारी सहकार एक एव ॥ ३ ॥

यावत्फलोदयसुखः सहकार जातः
प्रागेव कण्टकचयेन वृतोऽसि तावत् ।
छायाऽपि ते न सुलभा फलमस्तु दूरे
त्वं निष्फलोऽपि हि वरं सुखसेवनीयः ॥ ४ ॥

लोडितमखिलं गहनं परितो दृष्टाश्च विटपिनः सर्वे ।
सहकार न प्रपेदे मधुपेन तवोपमा जगति ॥ ५ ॥

गर्वं मा कुरु शर्करे तव गुणान् जानन्ति राज्ञां गृहे
ये दीना धनवर्जिताश्च कृपणाः स्वप्नेऽपि पश्यन्ति नो ।
आम्रोऽहं मधुकूपकैर्मम फलैस्तृप्ता हि सर्वे जना
हे रण्डे तव किं गुणा मम फलैस्तुल्यं न किंचित्फलम् ॥ ६ ॥

पनसान्योक्तिः ।

गरीयः सौरभ्यं रसपरिचयेनाऽर्हति सुधा
सितामृद्वीकाऽपि प्रथिमनि निमग्नः फलभरः ।
परार्थे कोशश्रीरिति पुलकितः कण्टकमिषा-
दहो ते चारित्रं पनस मनसः कस्य न मुदे ॥ १ ॥

कदल्यन्योक्तिः ।

तालीतरोरनुपकारिफलं फलित्वा
लज्जावशादुचित एव विनाशयोगः ।
एतत्तु चित्रमुपकृत्य फलैः परेभ्यः
प्राणान्निजाञ्झटिति यत्कदली जहाति ॥ १ ॥

१ स्थूलत्वे ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्राक्षान्योक्तिः ।

यद्यपि न भवति हानिः परकीयां चरति रासभे द्राक्षाम् ।
असमञ्जसमिति मत्वा तथाऽपि खलु खिद्यते चेतः ॥ १ ॥
दासेरकस्य दासीयं बदरी यदि रोचते ।
एतावतैव किं द्राक्षा न साक्षादमृतप्रदा ॥ २ ॥

दाडिमान्योक्तिः ।

आ[1] पुष्पप्रसवान्मनोहरतया विश्वास्य विश्वं जनं
हंहो दाडिम तावदेव सहसे वृद्धिं स्वकीयामिह ।
यावन्नैति परोपभोगसहतामेषा ततस्तां तथा
ज्ञात्वा ते हृदयं द्विधा दलति यत्तेनाऽतिवन्द्यो भवान् ॥१॥

नालिकेरान्योक्तिः ।

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नालिकेरा नराणाम् ।
ददति जलमनल्पं स्वादु तज्जीवनान्तं
नहि कृतमुपकारं साधवो विस्मरन्ति ॥ १ ॥

तालान्योक्तिः ।

अध्वन्यध्वनि भूरुहः फलभृतो नम्रानुपेक्ष्याऽऽदरा-
दूरादुन्नतिसंश्रयव्यसनिनः पान्थस्य मुग्धात्मनः ।
यन्मूलं समुपागतस्य मधुरच्छायाफलैः का कथा
शीर्णेनाऽपि हि नोपयोगमगमत्पर्णेन तालद्रुमः ॥ १ ॥

भूर्जान्योक्ती ।

दौर्जन्य[3]मात्मनि परं प्रथितं विधात्रा
भूर्जद्रुमस्य विफलत्वसमर्थनेन

---

१ वङ्गस्य २ पुष्पोदयादारभ्य ३ दुर्जनत्वम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं चर्मभिर्निशितशस्त्रशताऽवकृत्तै—
राशां न पूरयति सोऽर्थिपरंपराणाम् ॥ १ ॥
कुर्वन्तु नाम जनतोपकृतिं प्रसून—
च्छायाफलैरविकलैः सुलभैर्द्रुमास्ते ।
सोढास्तु कर्तनरुजः पररक्षणार्थ—
मेकेन भूर्जतरुणा करुणापरेण ॥ २ ॥

अश्वत्थान्योक्तिः ।

वर्धितैः सेवितैः किं तैः सत्यश्वत्थेऽन्यपादपैः ।
वर्धितो नरकाद्रक्षेत्स्पृष्टोऽरिष्टानि हन्ति यः ॥ १ ॥

न्यग्रोधान्योक्तिः ।

विस्तीर्णो दीर्घशाखाश्रितशकुनिशतः शाखिनामग्रणीस्त्वं
न्यग्रोध क्रोधमन्तः प्रकटयसि न चेद्वच्मि किंचित्तदल्पम् ।
जल्पोऽप्येष त्रपा²कृत्प्रलघुपरिकरा कापि कूष्माण्डवल्ली
पल्लीपृष्ठप्रतिष्ठा हसति हि फलने त्वत्फलर्द्धिं किमन्यत् ॥ १ ॥

मधूकान्योक्तिः ।

तत्तेजस्तरणेर्निदाघसमये तद्वारि मेघाऽऽगमे
तच्छैत्यं शिशिरे मदेकशरणैः सोढं पुरा यैर्द्रुमैः ।
आयातोऽप्यधुना फलस्य समयः कोऽयं विना तैरिति
स्मृत्वा तानि शु³चैव रोदिति गलत्पुष्पैर्मधूकद्रुमः ॥ १ ॥

शाल्मल्यन्योक्तिः ।

हंसाः पद्मवनाऽऽशया मधुलिहः सौरभ्यलाभाशया
पान्थाः स्वादुफलाशया बलि⁴भुजो गृ⁵ध्राश्च मांसाशया ।
दूरादुत्तमपुष्परागनिकरैर्निःसारमिथ्योन्नते
रे रे शाल्मलिपादप प्रतिदिनं के न त्वया वञ्चिताः ॥ १ ॥

---

१ श्रेष्ठः २ [illegible] ३ पङ्केन ४ काकाः ५ 'गिधाड' इति प्रसिद्धाः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निम्बान्योक्तयः ।

निंब किं बहुनोक्तेन निष्फलानि[1] फलानि ते
यानि संजातपाकानि काका निःशेषयन्त्यमी ॥ १ ॥

यस्मादर्थिजनो मनोऽभिलषितं लब्ध्वा मुदा मेदुरः
सार्धं बन्धुजनैश्चकार विविधान्भोगान् विलासोद्धुरः ।
तं दैवेन विवेकशून्यमनसा निर्मूल्य चूतद्रुमं
स्थाने तस्य तु काकलोकवसतिर्[2]निम्बः समारोपितः ॥ २ ॥

यैश्च[3] निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥ ३ ॥

बब्बुलान्योक्तिः ।

गात्रं कण्टकसंकटं प्रविरलच्छाया न चाऽऽयासहृ—
न्निर्गन्धः कुसुमोत्करस्[4]तव फलं न क्षुद्विनाशक्षमम् ।
बब्बूलद्रुममूलमेति न जनस्तत्तावदास्तामहो
अन्येषामपि शाखिनां फलवतां गुप्त्यै[5] वृतिर्जायसे ॥ १ ॥

खदिरान्योक्तिः ।

चन्दने विषधरान्[6]सहामहे वस्तु सुन्दरमगुप्तिमत्कुतः ।
रक्षितुं वद किमात्मसौष्ठवं संचिताः खदिरकण्टकास्त्वया १

किंशुकान्योक्तिः ।

किंशुक[8] किं शुकमुखवत्कुसुमानि विकासयस्यनिशम् ।
यस्यां जनोऽनुरागी सा गीरेतैः कदापि नोच्चार्या ॥ १ ॥

---

१ व्यर्थानि २ काकलोकनिवासः ३ यश्चेति—अचवृश्चतिसिञ्चत्यर्चतीत्य-ध्याहारेण वाक्यानि पूरणीयानि यथा यः निम्बं परशुना वृश्चति छिनत्ति एवमग्रेऽपि ४ पुष्पप्रकरः ५ प्राचीरं–'कुंपण' इतिलोके ६ सर्पान् ७ गुप्तिः रक्षा तद्रहितम् ८ पलाशवृक्ष ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाखोटान्योक्तिः ।

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधुविदितं कस्मादिदं कथ्यते ।
वामेनाऽत्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायाऽपि परोपकारकृतये मार्गस्थितस्याऽपि मे ॥ १ ॥

पील्वन्योक्तिः ।

धन्याः सूक्ष्मफला अपि प्रियतमास्ते पीलुवृक्षाः क्षितौ
क्षुत्क्षीणेन जनेन हि प्रतिदिनं येषां फलं भुज्यते ।
किं तैस्तत्र महाफलैरपि पुनः कल्पद्रुमाद्यैर्द्रुमै-
र्येषां नाम मनागपि श्रमनुदे छायाऽपि न प्राप्यते ॥ १ ॥

करीरान्योक्ती ।

फलं दूरतरेऽप्यास्तां पुष्णासि कुसुमैर्जनान् ।
इतरे तरवो मन्ये करीर तव किंकराः ॥ १ ॥
किं पुष्पैः किं फलैस्तस्य करीरस्य दुरात्मनः ।
येन वृद्धिं समासाद्य न कृतः पत्रसंग्रहः ॥ २ ॥

बिल्वान्योक्तिः ।

आमोदीनि सुमेदुराणि च मृदुस्वादूनि च क्ष्मारुहा-
मुद्यानेषु वनेषु लब्धजनुषां सन्तीतरेषामपि ।
किंतु श्रीफलता तवैव जयिनी मालूर दिङ्मण्डले
यस्यैतानि फलानि यौवनवतीवक्षोजलक्ष्मीगृहाः ॥ १ ॥

इक्ष्वन्योक्ती ।

परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः ।

१ गुडशर्करादिः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न संप्राप्तो वृद्धिं यदि सभृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः ॥ १ ॥

मुखे यद्वैरस्यं वपुरपि पुनर्ग्रन्थिनिचितं
न सन्तप्तः कोऽपि क्षणमपि भजेन्मूलमभितः ।
फलं चैवाऽप्राप्यं वितथरसलिप्सस्य भवत-
स्तदिक्षो नाऽयुक्तं विहितमितरैर्यन्तु दलनम् ॥ २ ॥

कार्पासान्योक्ती ।

श्लाघ्यं कार्पासफलं यस्य गुणैरन्ध्रवन्ति पिहितानि ।
मुक्ताफलानि तरुणीकुचकलशतटेषु विलसन्ति ॥ १ ॥

निष्पेषोऽस्थिचयस्य दुःसहतरः प्राप्तं तुलाऽऽरोहणं
ग्राम्यस्त्रीनखचुम्बनव्यतिकरस्तन्त्रीप्रहारव्यथा ।
मातङ्गोक्षितमण्डवारिकणिकापानं च कूर्चाऽऽहतिः
कार्पासेन पराऽर्थसाधनविधौ किं किं न चाऽङ्गीकृतम् ॥२॥

शणान्योक्तिः ।

भूर्जः परोपकृतये निजकवचविकर्तनं सहते ।
परबन्धनाय तु शणः प्रेक्षध्वमिहाऽन्तरं कीदृक् ॥ १ ॥

कण्टकारिकान्योक्तिः ।

उचितं नाम नारिङ्ग्यां केतक्यामपि कण्टकाः ।
रसगन्धोज्झिते किं ते कण्टकाः कण्टकारिके ॥ १ ॥

---

१ अग्रे २ पर्वव्याप्तं ३ वितथा दलनातिरिक्तसाधनाभावेन निष्फला रसस्य लिप्सा लब्धुमिच्छा यस्मिंस्तस्य ४ मातंगेन अन्त्यजेन उक्षितं सिक्तं यन्मण्डवारि भक्तस्यन्द्रवोदकं तस्याः कणिकायाः पानमतीवाशुचीति भावः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धत्तूरान्योक्ती ।

महेशस्त्वां धत्ते शिरसि रसराजस्य जयिनी
विशुद्धिस्त्वत्संगात्कनकमयमेतात्त्रिभुवनम् ।
तनोति त्वत्सेवां ननु कनकवृक्ष त्वदपरो
न यत्नात्कः कुर्याद्यदि न सुलभीभावमभजः ॥ १ ॥
उन्मत्त धूर्त तरुणेन्दुनिवासयोग्ये
स्थाने पिशाचपतिना विनिवेशितोऽसि ।
किं कैरवाणि विकसन्ति तमः प्रयाति
चन्द्रोपलो द्रवति वार्धिरुपैति वृद्धिम् ॥ २ ॥

ताम्बूलवल्ल्यन्योक्तिः ।

किं वीरुधो भुवि न सन्ति सहस्रसंख्या
यासां दलानि न परोपकृतिं भजन्ति ।
एकैव वल्लिषु विराजति नागवल्ली
या नागरीवदनचन्द्रमलंकरोति ॥ १ ॥

तुम्ब्यन्योक्तिः ।

सर्वास्तुम्ब्यः समकटुरसास्तुम्बिवल्लीप्रसूता—
स्तासां बद्धा अपि कतिपया दुस्तरं तारयन्ति ।
शब्दायन्ते सरसमपराः शुष्ककाष्ठे निषण्णा—
स्तन्मध्येऽन्या ज्वलितहृदयाः शोणितं संपिबन्ति ॥१॥

बकुलान्योक्तिः ।

निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुत्राऽपि निदधे ।

---

१ पारदस्य २ त्वत्संगाज्जातेति शेषः जयिनी उत्कर्षवती रसराजस्य पारद-स्य शुद्धिः एतत्त्रिभुवनं कनकमयं तनोतीत्यन्वयः ३ सुवर्णमयम् ४ धत्तूर ५ शंकरेण ६ चन्द्रकान्तः ७ लता ८ कुम्भा

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदं को जानीते यदयमिह कोणाऽन्तरगतो
जगज्जालं कर्ता कुसुमभरसौरभ्यभरितम् ॥ १ ॥

पद्मिन्यन्योक्ती ।

अयि मकरन्दस्यन्दिनि पद्मिनि मन्ये तवैव सुभगत्वम् ।
पुष्पवतीमपि[1] भवतीं त्यजति न वृद्धः शुचि[2]र्हंसः[3] ॥ १ ॥
कमलिनि मलिनी[4]करोषि चेतः किमिति बकैरवहेलिता[5]ऽनभिज्ञैः[6] ।
परिणतमकरन्दमार्मिका[7]स्ते जगति भवन्तु चिरायुषो मिलिन्दाः[8] २

संकीर्णान्योक्तयः ।

श्रीः ॥ त्वं चेत्संचरसे वृषेण[9] लघुता का नाम दिग्दन्तिनां[10]
व्यालैः कङ्कणकुण्डलानि कुरुषे हानिर्न हेम्नः पुनः ।
मूर्धा चेद्वहसे जडांशु[11]मयशः किं नाम लोकत्रयी
दीपस्याऽम्बुजबान्धवस्य जगतामीशोऽसि किं ब्रूमहे ॥ १ ॥
छिन्त्से ब्रह्मशिरो यदि प्रथयसि[12] प्रेतेषु सख्यं यदि
क्षीबः[13] क्रीडसि मातृभि[14]र्यदि रतिं धत्से श्मशाने यदि ।
सृष्ट्वा संहरसि प्रजा यदि तथाऽप्याधाय भक्त्या मनः
कं सेवे करवाणि किं त्रिजगती शून्या त्वमेवेश्वरः ॥ २ ॥
दामोदर[15]उदराहितभुवनं यो वहति लीलया गरुडः ।
कस्य तरोरुपरिष्टात् खिन्नो[16]ऽसौ श्रान्तिमपनयतु ॥ ३ ॥
अहिरहिरिति संभ्रमपदमितरजने किमपि कातरे भवतु ।
विहगपते[17]राहारः स तु सरलमृणालदलरुचिरः ॥ ४ ॥
युक्तोऽसि भुवनभारे मा वक्रां वितनु कंधरां शेष ।
त्वय्येकस्मिन् दुःखिनि सुखितानि भवन्ति भुवनानि ॥५॥

---

१ पुष्पयुक्तां रजस्वलां च २ श्वेतः पवित्रश्च ३ राजहंसः परमहंसश्च ४ कलुषीकरोषि ५ अवहेलां नीता तिरस्कृतेतियावत् ६ अपण्डितैः ७ मर्मज्ञाः ८ भ्रमराः ९ नन्दिना १० दिग्गजानाम् ११ चन्द्रम् १२ ख्यापयसि १३ मत्तः १४ ब्राह्म्यादिभिः १५ उदरे आहितं स्थापितं भुवनं ब्रह्मांडं येन १६ श्रान्तः १७ गरुडस्य

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शैत्यं नाम गुणस्तवैव तदनु स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां भजन्त्यशुचयः स्पर्शेन यस्याऽपरे ।
किंऽवातः परमुच्यते स्तुतिपदं यज्जीवनं देहिनां
त्वं चेन्नीचपथेन गच्छसि पयः कस्त्वां निषेद्धुं क्षमः ॥६॥

समुद्रस्याऽपत्यं प्रथितमहिमा[1]मुद्रितभुवः
स्वसा मालेयांऽशोस्त्रिनयनशिरोधाम वसतेः ।
मुरारातेर्योषित्सरसिरुहकिंजल्कनिलया
तथापि श्रीः स्त्रीत्वात्प्रकृतिचपलाऽऽलिङ्गति खलान् ७

तापापहे सहृदये रुचिरे प्रबुद्धे
मित्राऽनुरागनिरते धृतसद्गुणौघे ।
स्वाङ्गे प्रदानपरिपूरितषट्पदौघे
युक्तं तवेह कमले कमले स्थितिर्यत् ॥ ८ ॥

जम्भाऽरि[2]रेव जानाति रम्भासंभोगविभ्रमम् ।
घँटीचेटीविटः[3] किं स्विज्जानात्यमरकामिनीम्[4] ॥ ९ ॥

यदेतत्कामिन्याः सुरतविरतौ पल्लवरुचा
करेणाऽऽनीतस्त्वं वससि सह हारेण गुणिना[5] ।
मुहुः कुर्वन् गीतं कुचकलशपीठोपरिलुठ-
न्नये वीणादण्ड प्रकटय फलं कस्य तपसः ॥ १० ॥

सद्वृत्तसद्गुणविचित्रमहार्हकान्ते
कान्ताघनस्तनतटाऽङ्कितचारुमूर्ते ।
आः पामरीकठिनकण्ठविलग्नमङ्ग
हा हार हारितमहो भवता गुणित्वम् ॥ ११ ॥

यत्पूर्वं पवनाऽग्निशस्त्रसलिलैश्चीर्णं[6] तपो दुश्चरं
तस्यैतत्फलमीदृशं परिणतं यज्जातरूपं[7] वपुः ।

---

१ चन्द्रस्य २ इन्द्रः ३ घटदासी घट्टचाहिकादासी तस्याः जारः ४ देवांगनाम् ५ गुणयुक्तेन हारेण ६ आचरितम् ७ सुवर्णरूपम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुग्धाऽपाङ्गकपोलचुम्बनसुखं संगश्च रत्नोत्तमैः
प्राप्तः कुण्डल वाञ्छसे किमपरं यन्मूढ दोलायसे ॥ १२ ॥

मौलौ सन्मणयो गृहं गिरिगुहा त्यागः किलाऽऽत्मांबरचो
निर्यत्नोपनतैश्च वृत्तिरनिलैरेकत्र चर्येदृशी ।
अन्यत्राऽनृजुवर्त्मता द्विरसना वक्त्रे विषं वीक्षणं
सर्वाऽमङ्गलसूचकं कथय भो भोगिन् सुखं किं त्विदम् १३

दुश्चरितैरेव निजैर्भवति दुरात्मा विशङ्कितो नित्यम् ।
दर्शनव्ययमापन्नं पन्नगकुलमाकुलीभवति ॥ १४ ॥

यस्मै ददाति विवरं भूमिः फूत्कारमात्रभीतेव ।
आशीविषः स दैवाद्दौम्बकरण्डे स्थितिं लभते ॥ १५ ॥

भेकैर्न क्वणता सरोषपरुषं यत्कृष्णसर्पाऽऽनने
दातुं कर्णचपेटमुद्धृतभिया हस्तः समुल्लासितः ।
यच्चाऽधोमुखमक्षिणी पिदधता नागेन तूष्णीं स्थितं
तत्सर्वं विषमन्त्रिणो भगवतः कस्याऽपि लीलायितम् ॥ १६ ॥

आपूर्येत पुनः स्फुरच्छफरिकासारोर्मिभिर्वायुभि-
र्भूयोऽपि प्रविजृम्भमाणनलिनं पश्येम तोयाऽऽशयम् ।
इत्याशाशततन्तुबद्धहृदयो नक्तंदिवं दीनधीः
शुष्यत्यातपशोषितस्य सरसस्तीरे जरत्सारसः ॥ १७ ॥

अस्तंगतोऽयमरविन्दवनैकबन्धु-
र्भास्वान्न लङ्घयति कोऽपि विधिप्रणीतम् ।
हे चक्र धैर्यमवलम्ब्य विमुञ्च शोकं
धीरास्तरन्ति विपदं न तु दीनचित्ताः ॥ १८ ॥

---

१ आत्मभोगकञ्चुकस्य 'कांतइतिप्रसिद्धस्य' २ वर्तनम् ३ वक्रमार्गता ४ द्विरावृत्ता रसना रसनाद्वयमित्यर्थः द्विरसने इति वा पाठः प्रथमाद्विवचनम् ५ दन्तनाशम् ६ सर्पः ७ गारुडिकरण्डः ८ मण्डूकैः ९ निर्भयेन ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हंसः प्रयाति शनकैर्यदि यातु तस्य
नैसर्गिकी गतिरियं न हि तत्र चित्रम् ।
गत्या तया जिगमिषुर्बक एव मूढ—
श्चेतो दुनोति सकलस्य जनस्य नूनम् ॥ १९ ॥

उत्तुङ्गमत्तमातङ्ग मस्तकन्यस्तलोचनः ।
आसन्नेऽपि च सारङ्गे[1] न वाञ्छां कुरुते हरिः[2] ॥ २० ॥

यद्यपि चन्दनविटपी विधिना फलकुसुमवर्जितो हि कृतः ।
निजवपुषैव परेषां तथाऽपि संतापमपनयति ॥ २१ ॥

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम् ।
रमते नैव हंसस्य मानसं[3] मानसं विना ॥ २२ ॥

विषभारसहस्रेण गर्वं नाऽऽयाति वासुकिः ।
वृश्चिको बिन्दुमात्रेण ऊर्ध्वं वहति कण्टकम् ॥ २३ ॥

दिव्यं चूतरसं पीत्वा गर्वं नो याति कोकिलः ॥
पीत्वा कर्दमपानीयं भेको रटरटायते ॥ २४ ॥

त्यज किंशुकपुष्पिताभिमानं निजशिरसि भ्रमरोपसेवनेन ।
विकसन्नवमल्लिकावियोगात्कुरुते वह्निधिया त्वयि प्रवेशम्[4] ॥ २५ ॥

काकस्य गात्रं यदि काञ्चनस्य माणिक्यरत्नं यदि चञ्चुदेशे ।
एकैकपक्षे ग्रथितं मणीनां तथाऽपि काको न तु राजहंसः ॥ २६ ॥

सच्छिद्रनिकटे वासो न कर्तव्यः कदाचन ।
घटी पिबति पानीयं ताड्यते झल्लरी यथा ॥ २७ ॥

माकन्दराजपरिरम्भणलालिताऽपि
मल्लीवधूर्मधुपरागवती बभूव ।
दृष्ट्वाऽपि तत्कुटिलतां न जहाति चूतः
प्रायः कुजातिनिवहेषु कुतोऽभिमानः ॥ २८ ॥

---

१ मृगे २ सिंहः ३ मानससरः ४ प्रयनम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आबद्धकृत्रिमसटाजटिलांऽसभित्ति—
रारोपितो मृगपतेः पदवीं यदि श्वा ।
मत्तेभकुम्भतटपाटनलम्पटस्य
नादं करिष्यति कथं हरिणाऽधिपस्य ॥ २९ ॥

कैवर्तकर्कशकरग्रहणच्युतोऽपि
जालान्तरे निपतितः शफरो वराकः ।
दैवात्ततो विगलितो गिलितो बकेन
वक्रे विधौ वद कथं व्यवसायसिद्धिः ॥ ३० ॥

माधुर्यसाराधरितामृतस्य तत्कण्टकित्वं पनसस्य सह्यम् ।
उन्मादिनो मातुलपुत्रकस्य कथं सहामो बत कण्टकित्वम् ॥ ३१ ॥

प्रदीप किमु कुप्यसि प्रलयमारुतप्रज्वल—
त्प्रभापटलपाटलप्रकटपावकव्यक्तये ।
त्वमङ्ग किमु कामिनीकुचतटीपटीपल्लव-
प्रकम्पनपरिस्फुरत्पवनलेशपारं गतः ॥ ३२ ॥

यां कान्ति वहसि परां प्रदीप भद्र
स्वीयाऽसाविति हृदि मा स्म मन्यथास्त्वम् ।
सस्नेहे त्वयि निशि भानुनाऽऽहिताऽसौ
नैवं चेदहनि सति क्व वा गता सा ॥ ३३ ॥

भ्रातर्ग्राम्यकुविन्द कन्दलयता वस्त्राण्यमूनि त्वया
गोणीविभ्रमभाजनानि सुबहून्यात्मा किमायास्यते ।
किं त्वेकं रुचिरं चिरादभिनवं वासस्तदासूत्र्यतां
यन्नोज्झन्ति कुचस्थलात्क्षणमपि क्षोणीभुजां वल्लभाः ॥ ३४ ॥

भ्रातः काञ्चनलेपगोपितबहिस्ताम्राऽऽकृते सर्वतो
माभैषीः कलशे स्थिरोभव चिरं देवालयस्योपरि ॥

---

१ माधुर्यसारेण तुच्छीकृतं अमृतं येन २ धत्तूरफलस्य ३ (हे गांवठी साळ्या) ४ काञ्चनलेपेन गोपिता बाह्या ताम्रा आकृतिर्यस्य ५ 'कळस' इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताम्रत्वं गतमेव काञ्चनमयी कीर्तिः स्थिता तेऽधुना
नान्तस्तत्त्वविचारणप्रणयिनो लोका बहिर्बुद्धयः ॥ ३५ ॥

न यत्र गुणवत्पात्रमेकमप्यस्ति सन्निधौ ।
कस्तत्र भवतः पान्थ कूपेऽम्बुग्रहणाऽऽग्रहः ॥ ३६ ॥

तुल्यं भूभृतिजन्मतुल्यमुभयोर्मूल्यं च तुल्यं वपु—
स्तुल्यं दार्ढ्यमुदग्रटङ्कदलनं तुल्यं च पाषाणयोः ।
एकस्याऽखिलवन्दनाय विधिना देवत्वमारोपितं
तद्वारे विहिता परस्य तु पदाऽऽघाताऽऽस्पदं देहली ॥ ३७ ॥

ऊर्णां नैव दधाति नैष विषयो वाहस्य दोहस्य वा
तृप्तिर्नाऽस्य महोदरस्य बहुभिर्ग्रासैः पलालैरपि ।
हा कष्टं कथमस्य पृष्ठशिखरे गोणी समारोप्यते
को गृह्णाति कपर्दकैरलमिति ग्राम्यैर्गजो हास्यते ॥ ३८ ॥

ग्रासोद्गलितसिक्थस्य करिणः किं गतं भवेत् ।
पिपीलिका तु तेनैव सकुटुम्बोपजीवति ॥ ३९ ॥

बन्धनस्थोऽपिमातङ्गः सहस्रभरणक्षमः
अपि स्वच्छन्दचारी श्वा स्वोदरेणाऽपि दुखितः ॥ ४० ॥

समुपागतवति दैवादवहेलां कुटजमधुकरे मा गाः ।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥ ४१ ॥

उपरिकरवालधाराऽऽकाराः क्रूराभुजङ्गपुंगववत् ।
अंतःसाक्षाद्द्राक्षा दीक्षागुरवो जयन्ति केऽपि जनाः ॥

विश्वास्य मधुरवचनैः साधून् ये वञ्चयन्ति नम्रतमाः।
तानपि दधासि मातः काश्यपि यातस्तवापि च विवेकः ४२

एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिना—
मित्येवं परिचिन्त्य मास्म मनसि व्याधाऽनुतापं कृथाः ॥

१ पर्वते २ दृढता ३ उदग्रा ये टङ्कास्तैर्दलनं ४ गृहद्वाराधोभागः 'पायरी' इति लोके
५ धान्यत्वग्भिः ६ वराटकैः ७ पृथ्वि ८ यमः ९ निष्करुणः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूपानां भवनेषु किंच विमलक्षेत्रेषु गूढाशयाः
साधूनामरयो वसन्ति कति न त्वत्तुल्यकक्षाः खलाः ॥४३॥

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ॥
निखिलरसायनमहितो गन्धेनोग्रेण लशुन इव ॥ ४४ ॥

उपकारमेव तनुते विपद्गतः सद्गुणो महताम् ।
मूर्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥ ४४ ॥

गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदण्डम् ।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः ॥ ४५ ॥

दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरंतनमघं चुलकीकरोति ।
भूतेषु किं च करुणां बहुलीकरोति
संगः सतां किमु न मङ्गलमातनोति ॥ ४६ ॥

अनवरतपरोपकरणव्यग्रीभवदमलचेतसां महताम् ।
आपातपाटवानि स्फुरन्ति वचनानि भेषजानीव ॥४७॥

मृतस्य लिप्सा[1] कृपणस्य दित्सा[3] विमार्गगायाश्च रुचिः स्वकान्ते॥
सर्पस्य शान्तिः कुटिलस्य मैत्री विधातृसृष्टौ नहि दृष्टपूर्वा॥४८॥

उत्तमानामपि स्त्रीणां विश्वासो नैव विद्यते ।
राजप्रियाः कैरविण्यो रमन्ते मधुपैः सह ॥ ४९ ॥

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वं चाऽपि हरते विधिरुच्छृंखलो नृणाम् ॥ ५० ॥

कोटिद्वयस्य लाभेऽपि नतं सद्वंशजं धनुः ।
असद्वंश्यः शरः स्तब्धो लक्षलाभाभिशङ्कया ॥ ५१ ॥

अज्ञतया प्रेम्णा वा चूडामणिमाकलय्य काचमणिम् ।
नृपतिर्वहेत शिरसा तेनाऽसौ नहानर्घ्यमणिः ॥ ५२ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

१ पूज्यः २ लाभः ३ दानेच्छा ४ अमूल्यः

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्तूरिकान्योक्तयः ।

अयि बत गुरुगर्वं मास्म कस्तूरि यासी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यन्तदीनं
स्वजनकममुनैव प्राणहीनं करोषि ॥ १ ॥

अयि त्यक्तासि कस्तूरि पामरैः पङ्कशङ्कया ।
अलं खेदेन भूपालाः किं न सन्ति महीतले ॥ २ ॥

जन्मस्थानं न खलु विमलं वर्णनीयो न वर्णो
दूरे पुंसां वपुषि रचना पङ्कशङ्कां करोति ।
यद्यप्येवं सकलसुरभिद्रव्यगर्वाऽपहारी
को जानीते परिमलगुणः कोऽपि कस्तूरिकायाः ॥ ३ ॥

मिश्रप्रकरणम् ।

श्रीः॥दानाय लक्ष्मीः सुकृताय विद्या चिन्ता परब्रह्मविनिश्चयाय ।
परोपकाराय वचांसि यस्य वन्द्यस्त्रिलोकीतिलकः स एव ॥ १ ॥

निष्कलङ्ककलयैकयाऽपि यः संयुतः स खलु पूज्यते जनैः ।
भद्र पश्य जलजोऽपि धार्यते शंकरेण शिरसा निशाकरः ॥२॥

अन्यमुखे दुर्वादो यः प्रियवदने स एव परिहासः ।
इतरेन्धनजन्मा यो धूमः सोऽगुरुभवो धूपः ॥ ३ ॥

अहो बत महत्कष्टं विपरीतमिदं जगत् ।
येनाऽपत्रपते साधुरसाधुस्तेन तुष्यति ॥ ४ ॥

अदाता पुरुषस्त्यागी धनं संत्यज्य गच्छति ।
दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति ॥ ५ ॥

---

१ त्रिलोक्यां तिलकः भूषणभूतः २ निर्मलविद्यया ३ दुष्टभाषणम् ४ 'थत्रा' इति लोके ५ काष्ठम् ६ लज्जां प्राप्नोति।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दातव्यं भोक्तव्यं सति विभवे संग्रहो न कर्तव्यः ।
पश्येदं मधुकरीणां[1] संचितमर्थं हरन्त्यन्ये ॥ ६ ॥

न तद्भुक्तं न तत्पीतं न तत्सुप्तं न नर्तनम् ।
यन्मांसमाहिषक्षीरललना[2]वाजि[3]वर्जितम् ॥ ७ ॥

करोति निर्मलाऽऽधारस्तुच्छस्याऽपि महार्घताम्[4] ।
अम्बुनो बिन्दुरल्पोऽपि शुक्तौ मुक्ताफलं भवेत् ॥ ८ ॥

स एव धन्यो विपदि यः स्वरूपं न मुञ्चति ।
त्यजत्यर्ककरैस्तप्तं हिमं देहं न शीतताम् ॥ ९ ॥

मासि मासि समा ज्योत्स्ना पक्षयोरुभयोरपि ।
तत्रैकः शुक्लपक्षोऽभूद्यशः पुण्यैरवाप्यते ॥ १० ॥

मत्स्यादयो नु जानन्ति[6] नीरक्षीरविवेचनम् ।
प्रसिद्धिरेव हंसस्य यशः पुण्यैरवाप्यते ॥ ११ ॥

हस्तादपि न दातव्यं गृहादपि न दीयते ।
परोपकरणार्थाय वचने किं दरिद्रता ॥ १२ ॥

पदस्थितस्य पद्मस्य मित्रे वरुणभास्करौ ।
पदच्युतस्य तस्यैव क्लेशदाहकरावुभौ ॥ १३ ॥

वनानि दहतो वन्हेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्याऽस्ति सौहृदम्[7] ॥ १४ ॥

गतः स कालो यत्राऽऽसीद्देवसा[8] कल्पशाखिनाम्[9] ।
उदुम्बरफलेभ्योऽपि स्पृहयामोऽद्य जीवितम् ॥ १६ ॥

भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरस्त्रियः ।
विभवो दानशक्तिश्च नाऽल्पस्य तपसः फलम् ॥ १७ ॥

---

१ मधुमक्षिकाणाम् २ स्त्री ३ अश्वः ४ आश्रयः ५ महामूल्यत्वम् ६ न जानन्तीति काकुः ७ मित्रभावः ८ अवमानः ९ कल्पवृक्षाणाम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरमुन्नतलांगूल[1]त्सदाधू[2]ननभीषणात् ।
सिंहात्पादप्रहारोऽपि न शृगालाऽधिरोहणम् ॥ १८ ॥

अशठमलोभ[3]मजिह्मं[4]त्यागिनमनुरागिणं विशेषज्ञम् ।
यदि नाऽऽश्रयति नरं श्रीः श्रीरेव हि वञ्चि[5]ता तत्र १९

अनुचितकर्माऽऽरम्भः स्वजनविरोधो बलीयसि[6] स्पर्धा[7] ।
प्रमदा[8]जनविश्वासो मृत्युद्वाराणि चत्वारि ॥ २० ॥

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ २१ ॥

त्वं चेन्नीचजनानुरागरभसादस्मासु मन्दाऽऽदरः
का नो मानद मानहानिरियती भूः किं त्वमेकप्रभुः ।
गुञ्जापुञ्जपरंपरापरिचयाद्भिल्लीजनैरुज्झितं
मुक्तादाम न धारयन्ति किमहो कण्ठे कुरङ्गीदृशः ॥ २२ ॥

पञ्चभिः सह गन्तव्यं स्थातव्यं पञ्चभिः सह ।
पञ्चभिः सह वक्तव्यं न दुःखं पञ्चभिः सह ॥ २३

जनिता[9] चोपनेता[10] च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ २४ ॥

त्यजेदेकं कुलस्याऽर्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ २५ ॥

अमृतं दुर्लभं नृणां देवानामुदकं तथा ।
पितॄणां दुर्लभः पुत्रस्तक्रं शक्रस्य दुर्लभम् ॥ २६ ॥

यान्ति न्याय[11]प्रवृत्तस्य [12]तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥ २७ ॥

---

१ पुच्छम् २ कम्पनम् ३ सरलम् ४ दानशीलम् ५ 'ठकली' इति ल्लो० ६ बलवद्विषये ७ विग्रहः ८ स्त्रीषु विश्वासः ९ उत्पादकः १० उपनयन कर्ता ११ न्यायमार्गवर्तमानस्य १२ तिर्यग्जातीयाः पशव इत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्याऽभ्यासो विचारश्च समयोरेव शोभते ।
विवाहश्च विवादश्च समयोरेव शोभते ॥ २८ ॥
लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः ।
जिह्वाग्रे बन्धनं प्राप्तं जिह्वाग्रे मरणं ध्रुवम् ॥ २९ ॥

यस्मिन् देशे न संमानो न प्रीतिर्न च बान्धवाः ।
न च विद्याऽऽगमः कश्चिन्न तत्र दिवसं वसेत् ॥ ३० ॥
वहेदमित्रं स्कन्धेन यावत्कालविपर्ययः ।
अथैवमागते काले भिन्द्याद् घटमिवाऽश्मनि ॥ ३१ ॥

सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः ।
अर्धेन कुरुते कार्यं सर्वनाशो न जायते ॥ ३२ ॥
सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ ३३ ॥

मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च ।
द्विषतां संप्रयोगेण पण्डितोऽप्यवसीदति ॥ ३४ ॥
गतश्रीर्गणकान् द्वेष्टि गताऽऽयुश्च चिकित्सकान् ।
गतश्रीश्च गतायुश्च ब्राह्मणान् द्वेष्टि भारत ॥ ३५ ॥

शनैः पन्थाः शनैः कन्था शनैः पर्वतमस्तके ।
शनैर्विद्या शनैर्वित्तं पञ्चैतानि शनैः शनैः ॥ ३६ ॥
आत्मबुद्धिः सुखायैव गुरुबुद्धिर्विशेषतः ।
परबुद्धिर्विनाशाय स्त्रीबुद्धिः प्रलयावहा ॥ ३७ ॥

सुहृदि निरन्तरचित्ते गुणवति भृत्ये प्रियासु नारीषु ।
स्वामिनि शक्तिसमेते निवेद्य दुःखं जनः सुखी भवति ३८

---

१ हितस्य २ पञ्चसु वाक्येषु अतिवाह्यते, सिद्ध्यति, आरोहति, प्राप्यते वर्धते, इति पञ्चक्रियाध्याहारः एतानि मार्गातिवाहनादीनि अनेन षष्ठेन वाक्येन त्वरयैतानि न भवन्तीति सूचितम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थाऽऽतुराणां न गुरुर्न बन्धुः कामातुराणां न भयं न लज्जा ।
विद्यातुराणां न सुखं न निद्रा क्षुधातुराणां न रुचिर्न वेला ३९

अन्वयागत[1]विद्यानामन्वयागतसंपदाम् ।
विदुषां च प्रभूणां च हृदयं नाऽवलिप्यते[2] ॥ ४० ॥

ज्योतिषं शाकुनं धर्मं प्रायश्चित्तं चिकित्सितम् ।
विना शास्त्रेण यो ब्रूते तमाहुर्ब्रह्मघातकम् ॥ ४१ ॥

मक्षिका मशको वेश्या मूषिको याचकस्तथा ।
ग्रामणीर्गणकश्चैव सप्तैते परभक्षकाः ॥ ४२ ॥

अकृतोपद्रवः कश्चिन्महानपि न पूज्यते ।
अर्चयन्ति नरा नागं न तार्क्ष्यं न गजादिकम् ॥ ४३ ॥

शोभन्ते विद्यया विप्राः क्षत्रिया विजयश्रिया ॥ ४४ ॥
श्रियोऽनुकूलदानेन लज्जया च कुलाऽङ्गनाः[3] ॥ ४५ ॥
गन्तव्या राजसभा द्रष्टव्या राजवल्लभाः पुरुषाः ॥ ४६ ॥
यद्यपि न भवत्यर्थो भवत्यनर्थ[4]प्रतीकारः ॥ ४७ ॥
ब्राह्मणा गणका वेश्याः सारमेयाश्च[5] कुक्कुटाः ॥ ४८ ॥
दृष्ट्वान्येषु कुप्यन्ति न जाने तस्य कारणम् ॥ ४९ ॥

पुत्रपौत्रवधूभृत्यैः संपूर्णमपि सर्वदा ।
भार्याहीनगृहस्थस्य शून्यमेव गृहं मतम् ॥ ५० ॥

एकं दृष्ट्वा शतं दृष्ट्वा दृष्ट्वा पञ्चशतान्यपि ।
अतिलोभो न कर्तव्यश्चक्रं भ्रमति मस्तके ॥ ५१ ॥

नवे वयसि यः शान्तः स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शान्तिः कस्य न जायते ॥ ५२ ॥

अर्था हसन्त्युचितदानविहीनलुब्धं
भूम्यो हसन्ति मम भूमिरिति ब्रुवाणम् ।

---

१ वंशपरम्परागतविद्यानाम् २ सगर्वं न भवति ३ कुलस्त्रियः ४ अरिष्टनिरसनम् ५ श्वानः ।

CC-0. Prof. Satya Vrat Shastri Collection.

 Digitized by Arya Samaj Foundation Chennai and eGangotri

जारा हसन्ति तनयानुपलालयन्तं
मृत्युर्हसत्यवनिपं रणरङ्गभीरुम् ॥ ५३ ॥
ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ ५४ ॥
प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ॥ ५५ ॥
विवाहकाले ऋतुसंप्रयोगे प्राणाऽत्यये सर्वधनाऽपहारे ।
विप्रस्य चार्थेऽप्यनृतं वदेयुः पञ्चाऽनृतान्याहुरपातकानि ५६
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥ ५७ ॥
धिग्गृहं गृहिणीशून्यं धिक्कलत्रमपुत्रकम् ।
धिक्पुत्रमविनीतं च धिग्ज्यौतिषमजातकम् ॥ ५८ ॥
अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च ।
अजापुत्रं बलिं दद्याद्देवो दुर्बलघातकः ॥ ५९ ॥
दुर्मन्त्री राज्यनाशाय ग्रामनाशाय कुञ्जरः ।
शालको गृहनाशाय सर्वनाशाय मातुलः ॥ ६० ॥
जले तैलं खले गुह्यं पात्रे दानं मनागपि ।
प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः ॥ ६१ ॥
हरिं हरीतकीं चैव गायत्रीं च दिनेदिने ।
मोक्षाऽऽरोग्यतपःकामश्चिन्तयेद्भक्षयेज्जपेत् ॥ ६२ ॥
उद्योगः कलहः कण्डूर्द्यूतं मद्यं परस्त्रियः ।
आहारो मैथुनं निद्रा सेवनात्तु विवर्धते ॥ ६३ ॥
पुराकृतकरग्रहा वसनपात्ररक्षाकरी
स्थिता शयनसंनिधौ गुणवती निगूढाऽऽनना ।

---

१ मूर्खः २ पवित्रं ३ गजः ४ स्वल्पं ५ वस्तुमाहात्म्येन ६ करेण ग्रहणं धारणं पक्षे करग्रहः पाणिग्रहः ७ मूत्रनिमित्ता पक्षे पातिव्रत्यदाक्षिण्यादिगुणयुक्ता ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मता जठरपूर्तये भुजशिरःसमारोपिता
मनोहरति घोंगटी युवतिवत्प्रवासे नृणाम् ॥ ६४ ॥

निद्राप्रियो यः स तु कुम्भकर्णो हतः समीके रघुनन्दनेन ।
ततोऽस्यपत्नी विधवा प्रजाता श्रोतुं समायाति कथां पुराणम् ६५

मानरहितः स्वकार्ये साधनसुपटुर्महाजलधिवासी ।
श्रुत्यैकदृष्टगोत्रः प्रियभक्तश्चित्तपावनो भगवान् ॥ ६६ ॥

संतारकं नादि नान्तमन्तर्यस्य स्थितिस्ततः ।
भवेन्नयन ते सख्यं गुणैरेतै रमापतेः ॥ ६७ ॥

स्त्री विनश्यति रूपेण ब्राह्मणो राजसेवया ।
गावो दूरप्रचारेण हिरण्यं लाभलिप्सया ॥ ६८ ॥

दरिद्रता धीरतया विराजते कुरूपता शीतलया विराजते ।
कुभोजनं चोष्णतया विराजते कुवस्त्रता शुभ्रतया विराजते ६९

संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषेणाऽपि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥ ७० ॥

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ ७१ ॥

---

१ स्कन्धम् २ 'पडशी' इति लोके ३ संग्रामे ४ संमानरहितः पक्षे प्रमाणरहितः अमेय इत्यर्थः ५ स्वकीयकार्यसाधने दक्षः पक्षे स्वेषां भक्तानां कार्यकरणे समर्थः ६ कोंकणदेशवास्तव्यः पक्षे विष्णुर्हि जलधिशायीति प्रसिद्धिः ७ श्रुतयो वेदाः संख्यया चत्वारः एकं १ अंकानां वामतो गत्या १४ चतुर्दश- गोत्रवान् पक्षे वेदान्तैकदृष्टं गोत्रं नाम यस्य सः ८ प्रियःभक्तः ओदनः पक्षे भक्ताः यस्य ९ चित्तं पावयतीति चित्तशुद्धिकारकः पक्षे चित्तपावनजातीयः १० सतां तारकं रक्षकं पक्षे सती तारका कनीनिका यस्मिन् ११ अनाद्यनन्तं पक्षे नकारः आदौ अन्ते च यस्य १२ यस्य भगवतः अन्तःस्थितिः सर्वांतर्यामित्वात् पक्षे यस्य मकारस्य अन्तर्मध्ये स्थितिः एतैर्गुणैः रमापतेर्विष्णोः सख्यं सौहृदं भवेत् १३ संघातः १४ धान्यत्वक् १५ [तण्डुलाः?]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतार्थः स्वामिनं द्वेष्टि कृतदारः[1]स्तु मातरम् ।
जाताऽपत्या पतिं द्वेष्टि गतरोगश्चि[2]कित्सकम् ॥ ७२ ॥

नागो भाति मदेन कं[3] जलरुहैः पूर्णेन्दुना शर्वरी
शीलेन प्रमदा जवेन[4] तुरगो नित्योत्सवैर्मन्दिरम् ।
वाणी व्याकरणेन हंसमिथुनैर्नद्यः सभा पण्डितैः
सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं विष्णुना ॥ ७३ ॥

विस्मयः सर्वथा हेयः[5] प्रत्यूहः[6] सर्वकर्मणाम् ।
तस्माद्विस्मयमुत्सृज्य साध्यसिद्धिर्विधीयताम् ॥ ७४ ॥

षट्कर्णो भिद्यते[7] मन्त्र[8]श्चतुष्कर्णः स्थिरो भवेत् ।
द्विकर्णस्य च मन्त्रस्य ब्रह्माऽप्यन्तं[9] न गच्छति ॥ ७५ ॥

भूमिपतावर्थपतौ बाले वृद्धे तपोनिधौ विदुषि ।
योषिति मूर्खे गुरुषु च विदुषा नैवोत्तरं देयम् ॥ ७६ ॥

सद्भावेन जयेन्मित्रं सद्भावेन च बान्धवान् ।
स्त्रीभृत्यान् दानमानाभ्यां दाक्षिण्येनेतरं जनम् ॥ ७७ ॥

यशः पुण्यं कलत्राणि[10] पुत्रोत्पत्तिर्नि[11]धिस्तथा ।
सुकृतादेव लभ्यन्ते न च पार्थ पराक्रमात् ॥ ७८ ॥

राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
लोकास्तमनुवर्तन्ते यथा राजा तथा प्रजाः ॥ ७९ ॥

क्षान्ति[12]तुल्यं तपो नाऽस्ति न तोषात्परमं सुखम् ।
नाऽस्ति तृष्णापरो व्याधिर्न च धर्मो दयापरः ॥ ८० ॥

यत्राऽस्ति लक्ष्मीर्विनयो न तत्र अभ्यागतो यत्र न तत्र लक्ष्मीः ।
उभौ च तौ यत्र न तत्र विद्या नैकत्र सर्वो गुणसन्निपातः[13] ॥ ८१ ॥

---

१ कृता दाराः स्त्री येन सः २ वैद्यम् ३ उदकम् ४ वेगेन ५ त्याज्यः ६ विघ्नरूपः ७ भेदं प्राप्नोति सर्वेषां ज्ञानविषयो भवतीति भावः ८ विचारः 'मसलहत' इति लोके ९ पारम् १० स्त्रियः ११ 'ठेवा' इति लोके १२ क्षमा १३ गुणसमुदायः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैद्या वदन्ति कफपित्तमरुद्विकारान्
ज्योतिर्विदो ग्रहगतिं परिवर्तयन्ति ।
भूताऽभिषङ्ग[1] इति भूतविदो वदन्ति
प्राचीनकर्म बलवन्मुनयो वदन्ति ॥ ८२ ॥

द्वारि प्रविष्टः सहसा ततः किं दृष्टः प्रभुः स्मेरमुखस्ततः किम् ।
कथा श्रुता श्रोत्ररमा ततः किं व्यथा न शान्ता यदि जाठरीया ॥ ८३ ॥

सप्तैतानि न पूर्यन्ते पूर्यमाणान्यनेकशः ।
ब्राह्मणोऽग्निर्यमो राजा पयोधिरुदरं गृहम् ॥ ८४ ॥

संतोषस्त्रिषु कर्तव्यः स्वदारे भोजने धने ।
त्रिषु चैव न कर्तव्यो दाने तपसि पाठने ॥ ८५ ॥

मृगा मृगैः संगमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ॥ ८६ ॥

यः कुन्त[2]पाणिरिह भूप इति प्रसिद्धो
भूखण्डमात्रविभवः परसेवकश्च ।
तस्याऽऽत्मजः सततमिच्छति राजशब्दं
व्रीडे जगज्जननि हन्त निराश्रयाऽसि ॥ ८७ ॥

एकः पञ्च[3]त्वमासाद्य जायते पुनरष्टधा[4] ।
अहो वाणिज्यसंपत्तिः काशीपुरनिवासिनाम् ॥ ८८ ॥

सुपर्ण[5]परिसेवितस्तदनु साधुपूगा[6]ऽन्वितो ।
द्विजा[7]ऽवनमहापटुस्तदनु सार[8]संधानभाक् ।

---

१ भूतबाधा २ भाला इति लोके ३ संख्या मरणं च ४ अष्टमूर्तिः शिव इति भावः ५ सुपर्णेन गरुडेन सेवितः पक्षे सुष्ठु पर्णेन नागवल्लीदलेन सह परिसेवितः ६ साधूनां पूगैः संघैरन्वितः पक्षे साधुः सम्यक् पूगः क्रमुकस्तेनान्वितः । ७ द्विजा द्विजन्मानो ब्राह्मणादयस्तेषामवनं रक्षणं तस्मिन् महासमर्थः पक्षे द्विजाः दन्ताः ८ सारं श्रेष्ठवस्तु मोक्षादि तस्य संधानं संधिं भजतीति पक्षे सारः खदिरसारस्तेन संधानं सम्यङ्मेलनं भजतीति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदैव सुधयाऽशनं भवति यस्य विष्णोः सम-
स्तमाखुरिति सेव्यतां भवति वै यतो रागिता ॥ ८९ ॥
सुकुलजन्मविभूतिरनेकधा प्रियसमागमसौख्यपरंपरा ।
नृपकुले गुरुता विमलं यशो भवति पुण्यतरोः फलमीदृशम् ९०

एहि स्वागतमाविशाऽऽसनमिदं कस्माच्चिराद्दृश्यसे
का वार्ता परिदुर्बलोऽसिनितरां प्रीतोऽस्मि त्वद्दर्शनात् ।
इत्येवं समुपागतं द्विजवरं संभावयन्त्यादरा—
त्तेषां युक्तमशङ्कितेन मनसा गेहेषु गन्तुं सदा ॥ ९१ ॥

प्राप्य चाऽप्युत्तमं जन्म लब्ध्वा चेन्द्रियसौष्ठवम् ।
न वेत्त्यात्महितं यस्तु स भवेदात्मघातकः ॥ ९२ ॥
कल्पान्तवातसंक्षोभलङ्घिताऽशेषभूभृतः ।
स्थैर्यप्रसादमर्यादास्ता एव हि महोदधेः ॥ ९३ ॥

पादसंवाहने वज्री केशसंवाहने फणी ।
अहो भाग्यं पुरन्ध्रीणां दधिसंमथने रविः ॥ ९४ ॥
बोधितोऽपि बहुसूक्तिविस्तरैः किं खलो जगति सज्जनो भवेत् ॥
स्नापितोऽपि बहुशो नदीजलैर्गर्दभः किमु हयो भवेत् क्वचित् ९५
संपत्सरस्वती सत्यं संतानं सदनुग्रहः ॥
सत्ता सुकृतसंभारः सकाराः सप्त दुर्लभाः ॥ ९६ ॥
कृते च रेणुका कृत्या त्रेतायां जानकी तथा ।
द्वापरे द्रौपदी कृत्या कलौ कृत्या गृहे गृहे ॥ ९७ ॥

---

१ सुधया अमृतेन यस्य भोजनं भवति पक्षे सुधया चूर्णेन 'चुना' इति प्रसिद्धेन सदैव यस्य भक्षणं भवति २ यतो विष्णोः अरागिता विषयेष्वप्रीतिर्जायते पक्षे यतः तमाखोः तमाखुपत्रात् रागिता मुखरक्तिमा जायते ३ ऐश्वर्यम् ४ गौरवं 'बजनदारी' इति लोके ५ कथाः ६ इन्द्रियपाटवम् ७ पादस्थमलनिर्हरणार्थं कृतो भर्जितेष्टकाखण्डो 'वज्री' इति लोके कथ्यते पक्षे इन्द्रः ८ दन्तपालिका पक्षे सर्पः ९ मन्था: पक्षे सूर्यः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्वान् संसदि पांक्षिकः परवशो मानी दरिद्रो गृही
वित्ताढ्यः कृपणः सुखी परवशो वृद्धो न तीर्थाऽऽश्रितः ।
राजा दुःसचिवप्रियः कुलभवो मूर्खः पुमान् स्त्रीजितो
वेदान्ती रहितक्रियः किमपरं हास्याऽऽस्पदं भूतले ॥ ९८ ॥

मांसं मृगाणां दशना गजानां मृगद्विषां चर्म फलं द्रुमाणाम् ।
स्त्रीणां स्वरूपं च नृणां हिरण्यमेते गुणा वैरकरा भवन्ति ॥९९॥

आदरेण तथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥ १०० ॥

यस्य चाऽप्रियमन्विच्छेत्कुर्यात्तस्य सदा प्रियम् ।
व्याधो मृगवधं कर्तुं सम्यग्गायति सुस्वरम् ॥ १०१ ॥

न पुत्रात्परमो लाभो न भार्यायाः परं सुखम् ।
न धर्मात्परमं मित्रं नाऽनृतात्पातकं परम् ॥ २

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वचनं चापमानं च मतिमान्न प्रकाशयेत् ॥ ३ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ४ ॥

अभ्रच्छाया खलप्रीतिर्नवसस्यानि योषितः ।
किंचित्कालोपभोग्यानि यौवनानि धनानि च ॥ ५ ॥

परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥ ६ ॥

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।

---

१ सभायाम् २ पक्षधारी. ३ गृहस्थाश्रमी. ४ स्त्रैणः ५ हास्यस्थानम्
६ दान्ताः ७ सिंहव्याघ्रादीनाम्, ८ 'पारधी' इति लोके. ९ सौजन्यम्.
१० मौनम्. ११ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥ ७ ॥

सुपात्रदानाच्च भवेद्धनाऽऽढ्यो धनप्रभावेण करोति पुण्यम् ।
पुण्यप्रभावात्सुरलोकवासी पुनर्धनाऽऽढ्यः पुनरेव भोगी ॥ ८ ॥

कुपात्रदानाच्च भवेद्दरिद्रो दारिद्र्यदोषेण करोति पापम् ।
पापप्रभावान्नरकं प्रयाति पुनर्दरिद्रः पुनरेव पापी ॥ ९ ॥

प्रभुर्विवेकी धनवांश्च दाता विद्वान् विरागी प्रमदा सुशीला ।
तुरंगमः शस्त्रनिपातधीरो भूमण्डलस्याऽऽभरणानि पञ्च ॥ १० ॥

प्राप्य चलानधिकारान् शत्रुषु मित्रेषु बन्धुवर्गेषु ।
नाऽपकृतं नोपकृतं न सत्कृतं किं कृतं तेन ॥ ११ ॥

सत्यभामासमाश्लिष्टः[1] साधुवृन्दावने[2] रतः ।
यशोदया[3] समायुक्तस्त्वां पायात्त्वादृशो हरिः ॥ १२ ॥

वित्तं परिमितमधिकव्ययशीलं पुरुषमाकुलीकुरुते ।
ऊनांऽशुकमिव[4] पीनस्तनजघनायाः कुलीनायाः ॥ १३ ॥

सौवर्णानि सरोजानि निर्मातुं सन्ति शिल्पिनः ।
तत्र सौरभनिर्माणे चतुरश्चतुराननः ॥ १४ ॥

सर्वोद्वेगकरं मृगादनममुं संत्यज्य हा धिक् त्वया
लोकस्याऽनपकारिणं गिरिनदीतीराऽटवीनिर्वृतम् ।
अश्नन्तं तृणमेणशावमदयं व्याध घ्नताऽमुं वृथा
देवो दुर्बलघातकोऽयमिति सा गाथा यथार्थीकृता ॥ १५ ॥

स्वदेशजातस्य नरस्य नूनं गुणाऽधिकस्यापि भवेदवज्ञा[5] ।
निजाङ्गना यद्यपि रूपराशिस्तथाऽपि लोकः परदारसक्तः ॥ १६ ॥

घृतं न श्रूयते कर्णे दधि स्वप्नेऽपि दुर्लभम् ।

---

१ सत्यभामया आलिङ्गितः पक्षे सत्यम्. भा कांतिः मा लक्ष्मीः एतैर्युक्तः २ साधु यद्वृन्दावनं तस्मिन् रतः पक्षे साधूनां वृन्दं समूहस्तस्य अवनं रक्षणं तस्मिन्नासक्तः ३ यशोदयानन्दपत्न्या युतः पक्षे यशः कीर्तिः दया कारुण्यं ताभ्यां युक्तः ४ अल्पं वस्त्रम्. ५ अपमानः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुग्धे दुग्धस्य का वार्ता तक्रं शक्रस्य दुर्लभम् ॥ १७ ॥
को न याति वशं लोके मुखे पिण्डेन पूरितः ।
मृदङ्गो मुखलेपेन करोति मधुरध्वनिम् ॥ १८ ॥

ब्रह्मन्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयतां
स्वल्पं जल्प बृहस्पते जडमते नैषा सभा वज्रिणः ।
वीणां संहर[1] नारदस्तुतिकथाऽऽलापैरलं तुम्बुरो
सीतारल्लक[2]भल्लभग्नहृदयः स्वस्थो न लङ्केश्वरः ॥ १९ ॥

येषां श्रीमद्यशोदासुतपदकमले नाऽस्ति भक्तिर्नराणां
येषामाभीरकन्या[3]प्रियगुणकथने नाऽनुरक्ता रसज्ञा[4] ।
येषां श्रीकृष्णलीलाललितगुणरसे सादरौ नैव कर्णौ
धिक् तान् धिक् तान् धिगेतान् कथयति सततं कीर्तनस्थो मृदङ्ग॰ २०

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति ।
अतः श्वःकरणीयानि कुर्यादद्यैव बुद्धिमान् ॥ २१ ॥
किं चित्रं यदि राजनीतिकुशलो राजा भवेद्धार्मिकः
किं चित्रं यदि वेदशास्त्रनिपुणो विप्रो भवेत्पण्डितः ।
तच्चित्रं यदिरूपयौवनवती साध्वी भवेत्कामिनी
तच्चित्रं यदि निर्दयोऽपि पुरुषः पापं न कुर्यात्कचित् २२

पिता रत्नाऽऽकरो यस्य लक्ष्मीर्यस्य सहोदरी ।
शंखो रोदिति भिक्षार्थी नादत्तमुपतिष्ठति ॥ २३ ॥
लुब्धानां याचकः शत्रुश्चोराणां चन्द्रमा रिपुः ।
जारस्त्रीणां पतिः शत्रुर्मूर्खाणां बोधको रिपुः ॥ २४ ॥

सौमित्रि[5]र्वदति विभीषणाय लङ्कां देहित्वं भुवनपते विनैव कोशम्[6]।
एतद्विमनरघुपतिराह वाक्यमेतद्विक्रीते करिणि किमंकुशे विवादः

---

१ उपसंहारं कुरु. २ सीतायारल्लकः सीमन्तः 'भांग' इति प्रसिद्धः स एव भल्लस्तेन भग्नं हृदयं यस्य. ३ गोपकुमारिका. ४ जिह्वा ५ लक्ष्मणः ६ भाण्डागारम्.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन कुलेन कर्मणा ॥ २६ ॥

अमन्त्रमक्षरं नाऽस्ति नाऽस्ति मूलमनौषधम् ।
अयोग्यः पुरुषो नाऽस्ति योजकस्तत्र दुर्लभः ॥ २७ ॥

परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै ।
विस्मरन्तीह शिष्टत्वं स्वकार्ये समुपस्थिते ॥ २८ ॥

अविवेकिनि भूपाले नश्यन्ति गुणिनां गुणाः ।
हावभावाः पुरन्ध्रीणां भर्तरीव नपुंसके ॥ २९ ॥

निस्सारस्य पदार्थस्य प्रायेणाऽऽडम्बरो महान् ।
न सुवर्णे ध्वनिस्तादृग्यादृक् कांस्ये प्रजायते ॥ ३० ॥

भो भाद्रपक्ष सकलद्विजकल्पवृक्ष
काऽस्मान् विहाय गतवानसि देहि वाचम् ।
डिण्डीरपिण्डपरिपाण्डुरवर्णभाजां
लाभः कथं त्वयि गते घृतपायसानाम् ॥ ३१ ॥

गुणिनां निर्गुणानां च दृश्यते महदन्तरम् ।
हारः[1] कण्ठगतः स्त्रीणां नूपुराणि[2] च पादयोः ॥ ३२ ॥

आकर्ण्य भूपाल यशस्त्वदीयं विधूनयन्तीह[3] न के शिरांसि ।
विश्वम्भराभङ्गभयेन धात्रा नाऽकारि कर्णौ भुजगेश्वरस्य ॥ ३३ ॥

अगाधहृदया भूपाः कूपा इव दुरासदाः ।
घटका[6] गुणिनो[7] नोचेत्कथं लभ्येत जीवनम्[8] ॥ ३४ ॥

अलभ्यं लब्धुकामस्य जनस्य गतिरीदृशी ।
अलभ्येषु मनस्तापः संचिताऽर्थो विनश्यति ॥ ३५ ॥

शत्रुवाक्याऽमृतं श्रुत्वा तेन सौहार्दमार्जवम् ।

---

१ मुक्ताहारः २ 'पैंजण' इति लोके ३ कम्पयन्ति. ४ पृथ्वी. ५ शेषस्य ६ कार्यसाधकाः पक्षे कुम्भाः ७ गुणवन्तः पक्षे रज्जुयुक्ताः ८ जीवनोपायभूतं द्रव्यं पक्षे उदकम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नहि धीरेण कर्तव्यमात्मनः शुभमिच्छता ॥ ३६ ॥

अरण्यं सारङ्गैर्गिरिकुहरगर्भाश्च हरिभि–
र्दिशो दिङ्मातङ्गैः सलिलमुषितं पङ्कजवनैः ।
प्रियाचक्षुर्मध्यस्तनवदनसौन्दर्यविजितैः
सतां माने म्लाने मरणमथ वा दूरगमनम् ॥ ३७ ॥

स्त्रीणां हि साहचर्याद्भवन्ति चेतांसि भर्तृसदृशानि ।
मधुरपि हि मूर्छयते विषविटिपिसमाश्रिता वल्ली ॥३८॥

कलारत्नं गीतं गगनतलरत्नं दिनमणिः
सभारत्नं विद्वान् श्रवणपटुरत्नं हरिकथा ।
निशारत्नं चन्द्रः शयनतलरत्नं शशिमुखी
महीरत्नं श्रीमान् जयति रघुनाथो नृपवरः ॥ ३९ ॥

तीर्थानामवलोकनं परिचयः सर्वेषु वित्ताऽर्जनं
नानाऽऽश्चर्यनिरीक्षणं चतुरता बुद्धेः प्रशस्ता गिरः ।
एते सन्ति गुणाः प्रवासविषये दोषोऽस्ति चैको महान्
यन्मुग्धामधुराधराधरसुधापानं विना स्थीयते ॥ ४० ॥

अध्वा जरा मनुष्याणामनध्वा वाजिनां जरा ।
अमैथुनं जरा स्त्रीणां वस्त्राणामातपो जरा ॥ ४१ ॥

वाजी चारुगतिः शशाङ्कधवलं छत्रं प्रिया पृष्ठतः
प्रोत्तुङ्गस्तनमण्डला च पुरतो भृत्याः पुनः पञ्चमाः ।
ताम्बूलं मधुरं सखा च चतुरः संपद्यते चेत्पथि
प्राहुस्तत्कटकप्रयाणमितरत्प्राणप्रयाणं बुधाः ॥ ४२ ॥

नम्रेभ्यः साधुदानं रिपुजनसुहृदां चोपकारान् कुरु त्वं
सौजन्यं बन्धुवर्गे निजहितमुचितं स्वामिकार्यं यथार्थम् ।

---

१ मृगैः २ सिंहैः ३ दिग्गजैः ४ विषवृक्षाश्रिता ५ लता ६ षोडश-
वार्षिकी ७ अधरोष्ठ ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रोत्रे ते तथ्यमेतत्कथयति सततं लेखनी भाग्यशालि—
न्नोचेन्नष्टेऽधिकारे मम मुखसदृशं तावकाऽऽस्यं भवेद्धि ४३

व्यालाश्रितोऽपि विफलोऽपि सकण्टकोऽपि
वक्रोऽपि पङ्कजनितोऽपि दुरासदोऽपि ।
गन्धेन बन्धुरसि केतक पुष्पजेन
ह्येको गुणः खलु निहन्ति समस्तदोषान् ॥ ४४ ॥

विश्वामित्रपराशरप्रभृतयो वाताऽम्बुपर्णाऽशना—
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं भुंजन्ति ये मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरे ॥ ४५ ॥

धूलिधूसरसर्वाङ्गो विकसद्दन्तकेसरः ।
आस्ते कस्याऽपि धन्यस्य द्वारि दन्ती गृहेऽर्भकः ४६

अकूर्चारम्भोऽपि प्रतिचिबुकदेशं करतलं
प्रतिज्ञायां कुर्वन् युवतिषु दृशं स्निग्धतरलाम्[३] ।
कुमारो हुंकारात्परिषदि समानानगणय-
न्भुजौ वक्षः पश्यन्नववयसि कान्ति वितनुते ॥ ४७ ॥

कीटोऽयं भ्रमरीभवेदविरतध्यानात्तथा चेदहं
रामः स्यां त्रिजटे हताऽस्मि पुरतो दाम्पत्यसौख्यच्युता ।
एवं चेत्कृतकृत्यतैव भविता रामस्तवध्यानतः
सीतात्वं च निहत्य रावणरिपुं गन्ताऽसि रामाऽन्तिकम् ।

राजंस्त्वत्कीर्तिचन्द्रेण तिथयः पूर्णिमाः कृताः ।
मद्गेहान्न बहिर्याति तिथिरेकादशी भयात् ॥ ४९ ॥

धर्मं प्रसङ्गादपि नाऽचरन्ति पापं प्रयत्नेन समाचरन्ति
आश्चर्यमेतद्धि मनुष्यलोकेऽमृतं परित्यज्य विषं पिबन्ति ५०

१ दुष्प्रापः २ न विद्यते कूर्चानां [illegible] ३ चञ्चलाम्
सततम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्येण द्विजमादरेण युवतिं प्रेम्णा शमैर्बान्धवान्।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं शीलेन कुर्याद्वशम् ॥५१॥

अर्थी लाघवमुच्छ्रितो निपतनं कामाऽऽतुरो लाञ्छनं
निःस्वो वञ्चनमुन्मना विकलतां दोषाऽऽकुलः संशयम्।
लुब्धोऽकीर्तिमसङ्गरः परिभवं दुष्टोऽन्यदोषे रतिं
दुर्वागप्रियतां दुरोदरवशः प्राप्नोति कष्टं मुहुः ॥५२॥

नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां रति-
र्दंपत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम्।
लावण्यं वपुषः श्रुतं सुमनसः शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाऽऽश्रमवतां शीलं सतां मण्डनम् ५३

कार्पण्येन यशः क्रुधा गुणचयो दम्भेन सत्यं क्षुधा
मर्यादा व्यसनैर्धनं च विपदा स्थैर्यं प्रमादैर्द्विजः।
पैशुन्येन कुलं मदेन विनयो दुश्चेष्टया पौरुषं
दारिद्र्येण जनाऽऽदरो ममतया चात्मप्रकाशो हतः ५४

स्त्रीणां यौवनमर्थिनामनुगमो राज्ञां प्रतापः सतां
स्वास्थ्यं स्वल्पधनस्य संहतिरसद्वृत्तेश्च वाग्डम्बरः।
स्वाऽऽचारस्य सदर्चनं परिणतेर्विद्याकुलस्यैकता
प्रज्ञाया धनमुन्नतेर्नतिततिः शान्तेर्विवेको बलम् ॥५५॥

अप्रतिबुद्धे श्रोतरि वक्तुर्वाक्यं प्रयाति वैफल्यम्।
नयनविहीने भर्तरि लावण्यमिवेह खञ्जनाक्षीणाम् ॥५६॥

---

१ नीतिशक्तिभिः २ कलंकम् ३ निर्धनः ४ अस्वस्थान्तःकरणः ५ [illegible]प्रसंगः ६ दुर्वचनशीलः ७ द्यूतवशः ८ लज्जा ९ प्रसन्नता १० क्रोधेन ११ गुणसमुदायः १२ मूर्खे १३ खञ्जरीटनयनानाम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥ ५७ ॥
गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थितः ।
प्रासादशिखराऽऽरूढः काकः किं गरुडायते ॥ ५८ ॥
काकः पद्मवने रतिं न कुरुते हंसो न कूपोदके
मूर्खः पण्डितसंगमे न रमते नीचं जनं सेवते ।
कुस्त्री सज्जनसंगमे न रमते नीचं जनं सेवते
या यस्य प्रकृतिः स्वभावजनिता केनाऽपि न त्यज्यते५९
काकः पक्षबलेन भूपतिगृहे ग्रासं यदि प्राप्तवान्
किं वा तस्य महत्त्वमस्य लघुता पश्चाऽननस्याऽऽगता ।
येनाऽऽक्रम्य करीन्द्रगण्डयुगलं निर्भिद्य हेलालवा-
ल्लब्ध्वा ग्रासवरं वैराटकधिया मुक्तागणस्त्यज्यते ॥६०॥
शूरश्च कृतविद्यश्च रूपवत्यश्च योषितः ।
यत्र यत्र गमिष्यन्ति तत्र तत्र कृताऽऽदराः ॥ ६१ ॥
वैष्णवाश्च पिशाचाश्च मत्कुणाश्च पिपीलिकाः ।
अस्मद्दर्शनमात्रेण पलायन्ते दिशो दश ।
काचं मणिं काञ्चनमेकसूत्रे मुग्धा निबध्नन्ति किमत्र चित्रम् ।
विचारवान् पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह॥६२॥
अशनं मे वसनं मे जाया मे बन्धुवर्गो मे ।
इति मेमे कुर्वाणं कालवृको हन्ति पुरुषाऽजम् ॥ ६३ ॥
अगस्त्यतुल्याश्च घृताऽब्धिशोषणे दम्भोलितुल्या वटकाऽद्रिभेदने
शाकाऽवलीकाननवन्हिरूपास्त एव भट्टा इतरे भटाश्च ॥ ६४ ॥
चत्वारो धनदायादा धर्माऽग्निनृपतस्कराः ।
तेषां ज्येष्ठाऽवमानेन त्रयः कुप्यन्ति बान्धवाः ॥ ६५ ॥

---

१ आडम्बरैः २ सिंहस्य ३ कपर्दकबुद्ध्या ४ श्वयुवमघोनामतद्धिते इति सूत्रं ५ अरण्यम् ६ चौराः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धन्या गोकुलकन्या वयमिह मन्यामहे जगति ।
यासां नयनसरोजेष्वञ्जनभूतो निरञ्जनः साक्षात् ॥६६॥

नैरकोपस्थितिं नाम नान्यां मन्यामहे वयम् ।
यद्वेषा दृश्यतेऽमुष्मिन् नरे कोपस्य रे स्थितिः ॥ ६७ ॥

परदाररतिः फलाऽभिसंधिर्बहुदम्भो भगकामना ममत्वम् ।
चरितं मुहुरस्मदीयमेतदपवर्गस्य कथं नु भाजनं स्मः ॥६८॥

वरं बाल्ये मृत्युर्न पुनरधनं यौवनमिदं
वरं भार्या वेश्या न पुनरविनीता कुलवधूः ।
वरं देशत्यागो न पुनरविवेकिप्रभुपुरं
वरं देहत्यागो न पुनरधमाऽगाँरमटनम् ॥ ६९ ॥

कविमतिरिव बहुलोहा सुघटितचक्रा प्रभातवेलेव ।
हरमूर्तिरिव हसन्ती भाति विधूमाऽनलोपेता ॥ ७० ॥

गन्धः सुवर्णे फलमिक्षुदण्डे नाऽकारि पुष्पं खलु चन्दनेषु ।
विद्वान् धनाऽऽढ्यो न तु दीर्घ—
जीवी धातुः पुरा कोऽपि नैबुद्धिदोऽभुत् ॥ ७१ ॥

निजगुणगरिमासुखाकरः स्या—
त्स्वयमनुवर्णयतां सतां न तावत् ।
निजकरकमलेन कामिनीनां
कुचकलशाऽऽकलनेन को विनोदः ॥ ७२ ॥

परैः प्रोक्ता गुणा यस्य निर्गुणोऽपि गुणी भवेत् ।
इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः ॥ ७३ ॥

---

१ नरकप्राप्तिम् २ फलाकांक्षा ३ विषयेच्छा ४ ममता ५ मोक्षस्य ६ बहु लोहं अयः यस्यां पक्षे बहुलाः ऊहास्तर्का यस्याम् कुश्चरिता ७ प्रतीतिशेषः ८ बहु लोहं अयः यस्यां पक्षे बहुलाः ऊहास्तर्का यस्याम् ९ सुष्ठु घटितानि चक्राणि यस्यां पक्षे सुष्ठु घटिताश्चक्राश्चक्रवाकपक्षिमिथुनानि यया १० 'शेगडी' इतिलोके ११ विगतो धूमो यस्मात्सचासौ अनलश्च तेन युक्ता पक्षे विधुश्चन्द्रः उमा गौरी अनलः अग्निस्तैरुपेता शिवमूर्तिरिव भातीत्यर्थः १२ बुद्धिदाता ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षोणीशाऽश्रयिणां परोपकरणाऽभावादवाऽऽप्तश्रियां
कार्पण्यात्सुधियामनध्ययनतो यूनां प्रवासाऽऽश्रयात् ।
ज्ञातॄणां जगदीशभक्तिविरहादायुर्वृथागच्छती-
त्येवं कांस्यसमुद्भवः प्रतिदिनं नादो वदत्युच्चकैः ॥ ७४ ॥

स्यादत्यन्तनिरक्षरः क्षितिपतिः श्रीकारमात्राऽऽश्रया-
न्मन्त्री तत्कथिताऽर्थलेखनपरस्तत्सेवको जायते ।
अध्येता तदगारमेव भजते विद्वांस्तु तं याचते
यावान् यस्य गिरा समं परिचयस्तावान् विदूरे श्रियः ॥ ७५ ॥

गुरुरेकः कविरेकः सदसि मघोनः कलाधरोऽप्येकः ।
अद्भुतमत्र सभायां गुरवः कवयः कलाधराः सर्वे ७६

कमले कमला शेते हरः शेते हिमालये ।
क्षीराऽब्धौ च हरिः शेते मन्ये मत्कुणशङ्कया ॥७७॥

सदवनमसदनुशासनमाश्रितभरणं च राजचिन्हानि ।
अभिषेकः पटबन्धो वालव्यजनं व्रणस्याऽपि ॥ ७८

गुणवतस्तव हार न युज्यते परकलत्रकुचेषु विलुण्ठनम् ।
स्पृशति शीतकरो जघनस्थलीमुचितमस्ति तदेव कलङ्किनः ७९

अतिपरिचयादवज्ञा संततगमनादनादरो भवति ।
मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते ॥ ८० ॥

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवा-
नक्षैश्चाऽपि युधिष्ठिरेण रमता ज्ञातो न दोषो नु किम् ।
रामेणाऽपि वने च हेमहरिणस्याऽसंभवो लक्षितः
प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते ॥ ८१ ॥

को लाभो गुणिसंगमः किमसुखं प्राज्ञेतरैः संगतिः
का हानिः समयच्युतिर्निपुणता का धर्मतत्त्वे रतिः ।

---

१ राजाश्रयवताम् २ धनिनाम् ३ अत्यन्तदूरे ४ इन्द्रस्य ५ चन्द्रः ६ सतां अवनं रक्षणं ७ [illegible] ८ [illegible] ९ चन्द्रः १० कलंकयुक्तस्य ११ मलयपर्वते १२ भिल्लस्त्री १३ रावणः १४ पाशैः १५ मूर्खैः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कः शूरो विजितेन्द्रियः प्रियतमा काऽनुव्रता किं धनं
विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् ॥८२॥
अङ्केत्यङ्गमतस्तङ्कं न वीतक्रतुना हुतम् ।
नाऽदत्तमिति वाक्यार्थात्तङ्कं शक्रस्य दुर्लभम् ॥ ८३ ॥
वरं मौनं कार्यं न च वचनमुक्तं यदनृतं
वरं क्लैब्यं[3] पुंसां न च परकलत्राऽभिगमनम् ।
वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचि-
र्वरं भिक्षाऽऽशित्वं न च परधनाऽऽस्वादनसुखम् ॥८४॥

र्वरं शून्या शाला न च खलु वरो दुष्टवृषभो
वरं वेश्या पत्नी न पुनरविनीता कुलवधूः ।
वरं वासोऽरण्ये न पुनरविवेकाऽधिपपुरे
वरं प्राणत्यागो न पुनरधमानामुपगमः ॥ ८५ ॥
असेवितेश्वरद्वारमदृष्टविरहव्यथम् ।
अनुक्तक्लीबवचनं धन्यं कस्यापि जीवितम् ॥ ८६ ॥

आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसङ्गतं वा ।
प्रायेण भूमिपतयः प्रमदा लताश्च
यः पार्श्वतो वसति तं परिवेष्टयन्ति ॥ ८७ ॥

अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ता भवन्ति योग्या अयोग्याश्च ॥ ८८ ॥
कनकभूषणसंग्रहणोचितो[5] यदि मणिस्त्रपुणि[6] प्रणिधीयते ।
न स विरौति न चापि हि शोभते भवति योजयितुर्वचनीयता ८९
दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः संगात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।

---

१ अयज्ञांगम. २ इन्द्रेण. ३ नपुंसकत्वम्. ४ अयं लोकः पाठभेदात्पुनर्लिखितः
५ सुवर्णालंकारसंग्रहयोग्यः ६ हीरकादिः ७ वङ्ग ' कथील ' इति लो० ८ निन्दा.

CC-0. Prof. Satya Vrat Shastri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

ह्रीर्मद्यादनवेक्षणादपि कृषि स्नेहः प्रवासाश्रया-
न्मैत्री चाऽप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ९०

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम्।
सौजन्यं यदि किं जनैः सुमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ९१

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥९२॥

लज्जागुणौघजननीं जननीमिव स्वा-
मत्यन्तशुद्धहृदयामनुवर्तमानाम्।
तेजस्विनः सुखमसूनपि संत्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ९३ ॥

गृह्णात्येष रिपोः शिरः प्रजविनं कर्षत्यसौ वाजिनं
धृत्वा चर्मधनुः प्रयाति पुरतो नाऽसौ करो दक्षिणः।
द्यूतं चौर्यकथां तथा च शपथं कुर्यान्न वामः करो
दानाऽनुद्यमतां निरीक्ष्य विधिना शौचाऽधिकारी कृतः९४

बहुर्तरहिते रसातल उत्तिष्ठन्ते हि सुमनर्सस्तपसि ।
कान्तारैजनवेगं विषद्य सद्रसफलास्तु विरलाः स्युः १९५

१ कुटला. २ धरिद्रः ३ वेमयन्तम् ४ 'ढाल' इति लोके. ५ शौचकार्ये नियुक्तः ६ तरहिते रसातले रसाले आम्रवृक्षे इत्यर्थः ७ पुष्पाणि 'मोहोर' इति लो० पक्षे शोभनमनसः मुनयः इत्यर्थः ८ माघमासे. पक्षे तपश्चर्यायाम्. ९ कान्तारं आरण्यं दुर्गममार्ग इति यावत् तत्सम्बन्धि एजनवेगं कंपमवेगं विषह्य सहित्वा एद्रसानि फलानि येषां एवंविधाः विरलाः स्युः पक्षे कांता स्त्रिय, रा दृश्यं, जनवेगो ... मर्यादया सद्रसः माक्षरसः स एव फलं येषां एतादृशा विरला; स्युः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य यो दुर्लभो भोगस्तस्य तद्यत्नतः क्षतिः ।
वाप्यां यथोष्ट्रयोगेन यतिः सशिबिकोऽपतत् ॥ ९६ ॥

पतङ्गपाकसमये पतङ्गपतिविक्रमाः ।
पतङ्गस्योदये चेलुः पतङ्गा इव वानराः ॥ ९७ ॥

किं वाच्यं सूर्यशशिनोर्दारिद्र्यं महतां पुरः ।
दिनरात्रिविभागेन परिधत्तो यदम्बरम् ॥ ९८ ॥

मुरारिपदभक्तिश्चेत्तदा माघे रतिं कुरु ।
मुरारिपदभक्तिश्चेत्तदा माऽघे रतिं कुरु ॥ ९९ ॥

शीलभारवती कान्ता पुष्पभारवती लता ।
अर्थभारवती वाणी भजते कामपि श्रियम् ॥ २०० ॥

वार्ता च कौतुकवती विमला च विद्या
लोकोत्तरः परिमलश्च कुरङ्गनाभेः ।
तैलस्य बिन्दुरिव वारिणि दुर्निवार—
मेतत्त्रयं प्रसरति स्वयमेव लोके ॥ १ ॥

यथा नयति कैलास नगं गानसरस्वती ।
तथा नयति कैलासं न गङ्गा न सरस्वती ॥ २ ॥

त्वं नो गोत्रगुरुस्तवेन्दुरधिपस्तस्याऽमृतं त्वत्करे
एनां व्याधशराऽऽहतां प्रणयिनीं तन्वीं पुनर्जीवय ।
इत्युच्चैर्गगने निशाकरमृगे कारुण्यमातन्वतः
शृङ्गाऽग्रादपतन्मृगस्य रुदतोबाष्पाऽम्बुभूमण्डले ॥ ३ ॥

---

१ शालिविशेषस्य परिपाकसमये २ गरुडपराक्रमाः ३ सूर्यस्य ४ शलभाः ५ आकाशं वस्त्रं च ६ मुरारिनामा कविः ७ माघकाव्ये उत्तरार्धस्यार्थः— मुरारिर्विष्णुस्तस्य पदे भक्तिं कर्तुमिच्छसि चेत् अघे पातके प्रीतिं मा कुरु ८ अधि-कस्याम् ९ शोभाम् १० वृत्तान्तः ११ कुतूहलयुक्ता १२ पर्वतम् १३ गायन-विद्या १४ न गंगा न स[illegible] ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कन्याप्रसूतस्य धनुःप्रसंगादङ्गाधिकासादितविक्रमस्य ।
धनंजयाऽऽधीनपराक्रमस्य हिमस्य कर्णस्य च को विशेषः ॥४॥

स एव रसिकोलोके श्रुत्वा काव्यं परैः कृतम् ।
उत्पद्यते च युगपद्वदनेऽक्ष्णोश्च यस्य वाः ॥ ५ ॥

तांबूलस्य गुणाः सन्ति सखे शतसहस्रशः ।
एकोऽपि च महान् दोषो यस्य दानाद्विसर्जनम् ॥ ६ ॥

प्रतिगृहकोणं गुणिनो लूताकीटा इव स्फुरन्ति शतम् ।
तद्भासकः स्वगोभिः को वा रविरिव गुणज्ञोऽस्ति ॥ ७ ॥

सरलप्रियंगुणाऽऽढ्यं लम्बितमालं विचित्रतिलकं च ।
वनमिव वपुस्तवैतत्कथमवनं नृपजनस्याऽस्य ॥ ८ ॥

असौभाग्यं धत्ते परमसुखभोगाऽऽस्पदमयं
विचित्रं तद्गेहं भवति पृथुकार्तस्वरमयम् ।
निविष्टः पल्यङ्के कलयति स कान्तारतरणं

१ कन्याराशौ उत्पन्नस्य पक्षे कुमारिकायां प्रसूतस्य २ धनूराशिसंगमेन अंगेषु शरीरेषु अधिकं आसादितः संपादितः विक्रमो रोमाञ्चोत्पादनादिरूपः पराक्रमो येन पक्षे धनुर्विद्यया अंगदेशेषु संपादितः पराक्रमो येन ३ धनंजयः अग्निः तदधीनः पराक्रमो बलं यस्य पक्षे धनंजयोऽर्जुनः तदधीनपराक्रमः ४ वाः उदकं पक्षे वाः 'वा' इतिलौकिकशब्दः ५ 'कोळी' इति लोके ६ प्रकाशकः ७ स्वेन्द्रियैः स्वकरणैश्च ८ सरलाः वृक्षविशेषाः प्रियंगवश्चैतेषां समाहारस्तेनाढ्यं पूर्णं पक्षे सरलं च तत् प्रियं हृद्यं च गुणैर्गौरवर्णत्वादिभिर्युक्तम् ९ लम्बितस्तमाला यस्मिस्तत् पक्षे लम्बिता माला माल्यं यस्य १० विचित्रा नानाविधास्तिलकाः वृक्षविशेषा यस्मिस्तत् पक्षे विचित्रो विचित्रवर्णस्तिलकः कस्तूरीकुंकुमादिकृतो यस्मिस्तत् ११ हे जननि भवती यत्र यस्मिन् पुरुषे प्रसादं तनुते करोति असौ पुरुषः भाग्यं ऐश्वर्यं धत्ते यत्र कोपं तनुते सः असौभाग्यं सौभाग्याभावं धत्ते एवमयेपि १२ अयं प्रसादविषयः कोपविषयश्च परमसुखभोगानामास्पदं कोपपक्षे परं अत्यंत असुखभोगास्पदं भवतीति शेषः १३ तस्य पूर्वोक्तस्य पुरुषस्य गेहं विविधं चित्रयुक्तं तथा पृथु महत् कार्तस्वरं स्वर्णम् तन्मयं पक्षे चित्ररहितं तथा पृथुकानां बालानां आक्रोशमा प्रयुक्तेन आर्तस्वरेण प्रचुरं १४ स पूर्वोक्तः पुरुषः कान्तायाः रतं रमणं तस्य रणं युद्धं पक्षे कान्तारं दुर्गमारण्यं तत्तरणं कलयति ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसादं कोपं वा जननि भवती यत्र तनुते ॥ ९ ॥

भूपः कूप इवाऽऽभाति नेमज्जनसुखावहः ।
ददाति गुणसंबन्धाद्यथा पात्राऽनुरूपतः ॥ १० ॥

गुणवदगुणवद्वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामा विपत्ते—
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ११ ॥

आनीता नटवन्मया तव पुरः श्रीराम या भूमिका
व्योमाकाशखखाऽम्बराऽब्धिवसवस्त्वत्प्रीतयेऽद्याऽवधि ।
प्रीतो यर्हि निरीक्षणात्त्वमधुना यत्प्रार्थितं देहि मे
नोचेद्ब्रूहि कदाऽपि माऽऽनय पुनर्मामीदृशीं भूमिकाम् १२

रात्रिः शिवा काचन सन्निधत्ते विलोचने जाग्रतमप्रमत्ते ।
समानधर्मा युवयोः सकाशे सखा भविष्यत्यचिरेण कश्चित् १३
साहित्यपाथोनिधिमन्थनोत्थं कर्णाऽमृतं रक्षत हे कवीन्द्राः ।
यत्तस्य दैत्या इव लुण्ठनाय काव्याऽर्थचोराः प्रगुणीभवन्ति १४

शस्त्रं न खलु कर्तव्यमिति पित्रा नियोजितः ।
तदेव शस्त्रं कृतवान् पितुराज्ञा न लङ्घिता ॥ १५ ॥
कांते धावय मे पादाविति भर्त्रा निवेदिता ।
नतया धावितौ पादौ भर्तुराज्ञा न लङ्घिता ॥ १६ ॥

---

१ नमन्तः नम्रा ये जनास्तेषां सुखावहः पक्षे मज्जने 'बुडी मारणें' सुखावहो न भवति नमज्जनसुखावहः २ गुणाः विद्याविनयादिगुणाः पक्षे गुणाः रज्जवः ३ अर्थसमूह. परिणामः ५ वेषाः 'सोंग' इतिलोके ६ अंकानां वामतो गत्या चतुरशीति ८४०००००लक्षाणि भवन्ति चतुरशीतिलक्षयोनिभ्रमणं कृतमित्यत्तात्पर्य्य अतोजन्ममरणपरंपराया मोचयेति भावः ७ अलंकारादिप्रतिपादकशास्त्रसागरमन्थनोद्भवम् ८ कर्णामृतनामको ग्रन्थः ९ न खलु इति प्रथमं पदच्छेदः विरोधपरिहारे नखल नखान् लुनातीति नखलु नखच्छेदकम् १० नतया इत्यत्र तया धावितौ न धावितौ परिहारे नतया नम्रया इति पदच्छेदः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्पेषुमाता[1] पुरुषायमाणा लज्जावती विश्वसृजं विलोक्य ।
नाभीसरोजे नयनं मुरारेर्वामेतरं वारयति स्म चित्रम् ॥१७॥

मालिन्यमब्जशशिनोर्मधुलिट्कलङ्कौ
धत्तो मुखे तु तवदृक्तिलकाञ्जनाभाम् ।
दोषावृतिः क्वचनमेलनतोगुणत्वं
वक्तुर्गुणो हि वचसि भ्रमविप्रलम्भौ ॥ १८ ॥

पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाऽधिष्ठितकालिदासा ।
अद्याऽपि तत्तुल्यकवेरभावादनामिका साऽर्थवती बभूव ॥१९॥

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते ॥ २० ॥

रमणीयः स हि पुरुषो रमणी यत्रैव रज्यति विदग्धा ।
श्लोकः सएव सुभगश्चित्तं सक्तं हि यत्र रसिकस्य ॥ २१ ॥

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥ २२ ॥

श्लेष्माऽगारे वसतिर्जाताऽस्माकं तदत्र मायात ।
आन्दोलनच्छला[11]दिह निवारयन्तीव मौक्तिकानि विटान्[12] २३

अद्यापि दुर्निवारं स्तुति[13]कन्या वहति कौमारम्[14] ।
सद्भ्यो न रोचते साऽसन्तोऽप्यस्यै न रोचन्ते ॥ २४ ॥

---

१ पुष्पेषोर्मदनस्य माता लक्ष्मीः पुरुषायमाणा पुरुषवदाचरन्ती विपरीतरतं कुर्वतीत्यर्थः विश्वसृजं भगवन्नाभिसरोजस्थं ब्रह्माणं विलोक्य लज्जावती सती मुरारेर्दक्षिणं नयनं वारयति स्म यतो भगवन्नेत्रे हि सूर्यचन्द्रात्मके तत्र दक्षिणस्य सूर्यात्मकत्वात्तद्वारणे सरोजं मुकुलितं भवेत् ततश्च ब्रह्मापि सरोजकोशे अन्तर्हितो भवेदिति मनसि कृत्वा तद्वारयामासेति भावः २ मलिनत्वं ३ प्राप्नुतः ४ विसंवादः ५ अन्वर्था [illegible] चतुरा ९ अविश्वस्तं १० प्राणे ११ आन्दोलनमिषात्. १२ जारान् १३ स्तुतिरेव कन्या १४ कुमारिकात्वम्.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते कौ[1] पीनधना[2]स्त एव सकलं धात्रीफलं[3] भुञ्जते ।
तेषां द्वारि नदन्ति वाजिनिवहा[4]स्तैरेव लब्धा क्षितिः ।
तैरेवं समलंकृतं[5] निजकुलं किं वा बहु ब्रूमहे
ये दृष्टाः परमेश्वरेण भवता तुष्टेन रुष्टेन वा ॥ २५ ॥

छत्रमस्तकसमारूढं मृत्युं पश्येज्जनो यदि ।
आहारोऽपि न रोचेत किमुताऽन्या विभूतयः ॥ २६ ॥

अन्धं दरिद्रिणमपि प्रियया विहीनं
वीक्ष्येश्वरे वदति याच वरं त्वमेकम् ।
नेत्रे न नाऽपि वसु नो वनितां स वव्रे[6]
छत्राऽभिराममुतदर्शनमित्युवाच ॥ २७ ॥

मिथिलां[7] हसत्ययोध्यां त्वं सखि परपूरुषाऽनुरक्ताऽसि ।
मिथिलां[8] परिहसति च सा त्वं सखि जनका[9]ऽनुरक्ताऽसि २८

स्रस्ता नाविकधारणी[10]निपतिता[11] मध्येजलं[12] क्षेपणी[13]
पन्थाः पर्वतदुर्गमो घनघनच्छन्नश्च[14] तारापथः[15] ।
हंहो मारुतदुस्तरो जलनिधिः शीर्णा[16] च नौः सांप्रतं
मध्ये मज्जय वा तटं गमय वा हस्ते तवाऽऽस्ते द्वयम् २९

अस्मानवेहि कलमानलमाहतानां
येषां प्रचण्डमुसलैरवदाततैव[17] ।
स्नेहं[18] विमुच्य सहसा खलतां[19] प्रयान्ति
ये स्वल्पपीडनवशान्न वयं तिलास्ते ॥ ३० ॥

---

१ कौ पृथिव्यां २ पीनधनाः पुष्टधनाः पक्षे कौपीनमेव धनं येषां ३ धात्री-फलं पृथ्वीफलं राज्यमित्यर्थः पक्षे आमलकीफलम् ४ वाजिनिवहा अश्वसमूहा वदान्येन हेषितं कुर्वन्तीत्यर्थः पक्षे इति पदच्छेदः गजाश्वसमूहाः ५ सम्यगलंकृतं पक्षे समलं सदोषं कृतम् ६ द्रव्यम् ७ वरयामास ८ जनकपुरी ९ जारः पर-पक्षे परमेश्वरश्च १० पिता विदेहश्च ११ गलिता १२ जलमध्ये १३ 'वल्हें' इति महाराष्ट्रभाषायाम् १४ निबिडघनाच्छादितः १५ अन्तरिक्षम १६ भिन्ना १७ शालिविशेषाणाम् १८ कण्डितानां १९ शुभ्रत्वम् २० तैलं प्रीतिं च २१ दुर्जनत्वं पक्षे 'खळ' 'ढेंप' इति प्रसिद्धतद्रूपत्वम् ।
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपभोक्तुं न जानाति श्रियं प्राप्याऽपि मानवः ।
आकण्ठजलमग्नोऽपि श्वा लिहत्येव जिह्वया ॥ ३१ ॥

अबला यत्र प्रबला शिशुरवनीशो निरक्षरो मन्त्री ।
न हि न हि तत्र धनाऽऽशा जीवित आशाऽपि दुर्लभा भवति ३२

अयश्चणकचर्वणं फणिफणामणेः कर्षणं
करेण गिरितोलनं जलनिधेः पदालङ्घनम्
प्रसुप्तहरिबोधनं निशितखड्गसंस्पर्शनं
कदाचिदखिलं भवेन्न च शठाद्धनस्याऽर्जनम् ॥ ३३ ॥

सर्पस्य रत्ने कृपणस्य वित्ते सत्योः कुचे केसरिणश्च केशे ।
मानोन्नतानां शरणागते च मृतौ भवेदन्यकरप्रचारः ॥ ३४ ॥

शिशुरपि निपुणो गुरोर्गरीयान् नतु वपुषैव महान् महत्प्रतिष्ठः ।
मणिरणुरपि भूषणाय पुंसां न तु पृथुलशिलाविलासहेतुः ३५

तर्कभाषा मुखे यस्य हस्ते यस्य च मञ्जरी ।
मुक्तावली यस्य कण्ठे तस्य वश्या मनोरमा ॥ ३६ ॥

विनाऽपि तातेन विना जनन्या गजाननः शम्भुसुताऽभिधानः ।
विनैव शास्त्रेण विनैव वेदैर्माध्यंदिनानामिव पाठकोऽभूत ३७

श्लोकस्तु श्लोकतां याति यत्र तिष्ठन्ति साधवः ।
लकारो लुप्यते तत्र यत्र तिष्ठन्त्यसाधवः ॥ ३८ ॥

आर्ता देवान्नमस्यन्ति तपः कुर्वन्ति रोगिणः ।
निर्धना दानमिच्छन्ति वृद्धा नारी पतिव्रता ॥ ३९ ॥

श्रुतिर्विभिन्ना स्मृतयश्च भिन्ना नैको मुनिर्यस्य वचः प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ४०

---

१ जीविते आशेतिपदच्छेदः २ लोहं ३ निद्रितसिंहोत्थापनं ४ तीक्ष्णः ५ साध्व्याः ६ सिंहस्य ७ शास्त्रवेत्ता ८ श्रेष्ठः महत्सु प्रतिष्ठा यस्येति व्यधिकरणो बहुव्रीहिः महाप्रतिष्ठ इति वा पाठः सुगमः १० ग्रन्थविशेषः तर्कपूर्वकं भाषणं च एवमेवाग्रिमं बोध्यम् अर्थान्तरं सुगमम् ११ ग्रन्थविशेषः स्त्री च १२ लकारलोपात् शोक एवावतिष्ठते ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

न भटो न विटो न गायको न च वेश्याघटको न चाऽपि वेश्या
कथमत्र लभेमहि प्रतिष्ठामसती वा युवती न मेऽस्ति रामा ४१

वेश्यावेश्मसु सीधुगन्धललना वक्त्रासवाऽऽमोदितै—
र्नीत्वा निर्भरमन्मथोत्सवमुखैरुन्निद्रचन्द्राः क्षपाः ।
सर्वज्ञा इति दीक्षिता इति चिरात्प्राप्ताऽग्निहोत्रा इति
ब्रह्मज्ञा इति तापसा इति दिवा धूर्तैर्जगद्वञ्च्यते ॥ ४२ ॥

अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति ।
सकलरसायनमहितो गन्धेनोग्रेण लशुन इव ॥ ४३ ॥

कस्याऽपि कोऽप्यतिशयोऽस्ति स तेन लोके
ख्यातिं प्रयाति न हि सर्वविदस्तु सर्वे ।
किं केतकी फलति किं पनसः सुपुष्पः
किं नागवल्ल्यपि च पुष्पफलैरुपेता ॥ ४४ ॥

ननान्दा साऽऽनन्दा हसितवदनाऽभूद्गृहिनिका
कृतार्था च श्वश्रूः कुपितदृशि पत्यौ मयि सखि ।
स चेदुच्चैर्ब्रूते कठिनवचनैस्तर्हि सकलाः
करिष्यन्ति प्रायो व्यसनरहितास्ताण्डवविधिम् ॥ ४५ ॥

न केशेषु स्नेहो न च कुचतटीचन्दनरसो
न वा वीटी वक्त्रे न च नयनयोरञ्जनकथा ।
न चाऽल्पोऽप्याकल्पो न च सुवसनं नैव कुसुमं
स्नुषात्वं पापानां फलमधनगेहेषु सुदृशाम् ॥ ४६ ॥

अनुयाताऽनेकजनः परपुरुषैरुह्यतेऽस्य निजदेहः ।
अधिकारस्थः पुरुषः शव इव न शृणोति वीक्षते कुमतिः ४७

किं तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति न यः स्वस्य वंशस्याऽग्रे ध्वजो यथा ॥ ४८ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

१ मद्यम् २ पूज्यः ३ ननद इति लो० ४ नम्रा इत्यर्थः ५ भूषणादिकम्

Digitized by Arya Samaj Foundation Chennai and eGangotri

संग्रहं नाकुलीनस्य सर्पस्येव करोति यः ।
स एव श्लाघ्यते मन्त्री सम्यग्गारुडिको यथा ॥ ४९ ॥

जामाता जठरं जाया जातवेदा जलाशयः ।
पूरिता नैव पूर्यन्ते जकाराः पञ्च दुर्भराः ॥ ५० ॥

जननी जन्मभूमिश्च जान्हवी च जनार्दनः ।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः ॥ ५१ ॥

बिलाद्बहिर्बिलस्यान्तःस्थितमार्जारसर्पयोः ॥
मध्ये चाऽऽखुरिवाऽऽभाति पत्नीद्वययुतो नरः ॥ ५२ ॥

सदा वक्रः सदा क्रूरः सदा पूजामपेक्षते ।
कन्याराशिस्थितो नित्यं जामाता दशमो ग्रहः ॥ ५३ ॥

रूपं जरा हन्ति हि धैर्यमाशा मृत्युः प्राणान् धर्मचर्यामसूया ।
कामो ह्रियं वृत्तमनार्यसेवा क्रोधः श्रियं सर्वमेवाऽभिमानः॥५४॥

ज्यायांसमपि शीलेन विहीनं नैव पूजयेत् ।
अपि शूद्रं च धर्मज्ञं सद्वृत्तमभिपूजयेत् ॥ ५५ ॥

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते जन्तुः ॥ ५६ ॥

तक्षकस्य विषं दन्ते मक्षिकाया विषं शिरः ।
वृश्चिकस्य विषं पुच्छं सर्वाङ्गे दुर्जनो विषम् ॥ ५७ ॥

तृणं ब्रह्मविदः स्वर्गस्तृणं शूरस्य जीवितम् ॥
जिताऽक्षस्य तृणं नारी निस्पृहस्य तृणं जगत् ॥ ५८ ॥

दूतो न संचरति खे न चलेच्च वार्ता
पूर्वं न जल्पितमिदं न च संगमोऽस्ति ।
व्योम्नि स्थितं रविशशिग्रहणं प्रशस्तं
जानाति यो द्विजवरः स कथं न विद्वान् ॥ ५९ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

१ न अकुलीनस्य पक्षे नाकुर्वल्मीकम् २ ज्येष्ठं वरिष्ठमित्यर्थः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

देयं भो अधने धनं सुकृतिभिर्नो संचितं सर्वदा
श्रीकर्णस्य बलेश्च विक्रमपतेरद्याऽपि कीर्तिः स्थिता ।
आश्चर्यं मधुदानभोगरहितं नष्टं चिरात्संचितं
निर्वाणादपि पाणिपादयुगलं घर्षन्त्यहो मक्षिकाः ६०

धनं यदि गतं गतं चरणयुग्मरेणूपमं
धरा यदि गता गता कथय मे किमेतावता ।
इदं पुनररुंतुदं धनिगणैरिदानींतनै—
र्दरिद्रगणनाविधौ यदहमङ्गुलाते धृतः ॥ ६१ ॥

नभोभूषा पूषा कमलवनभूषा मधुकरो
वचोभूषा सत्यं वरविभवभूषा वितरणम् ।
मनोभूषा मैत्री मधुसमयभूषा मनसिजः
सदोभूषा सूक्तिः सकलगुणभूषा च विनयः ॥ ६२ ॥

प्रागल्भ्यहीनस्य नरस्य विद्या शस्त्रं यथा कापुरुषस्य हस्ते ।
न तृप्तिमुत्पादयते शरीरे वृद्धस्य दारा इव दर्शनीयाः ॥ ६३ ॥

मानुष्ये सति दुर्लभा पुरुषता पुंस्त्वे पुनर्विप्रता
विप्रत्वे बहुविद्यताऽतिगुणता विद्यावतोऽर्थज्ञता ।
अर्थज्ञस्य विचित्रवाक्यपटुता तत्राऽपि लोकज्ञता
लोकज्ञस्य समस्तशास्त्रविदुषो धर्मे मतिर्दुर्लभा ॥ ६४ ॥

शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि ।
सर्वदा सर्वयत्नेन पुत्रे शिष्ये हितं वदेत् ॥ ६५ ॥
सा श्रीर्या न मदं कुर्यात्स सुखी तृष्णयोज्झितः
तन्मित्रं यस्य विश्वासः पुरुषः स जितेन्द्रियः ॥ ६६ ॥

सुकुले योजयेत्कन्यां पुत्रं विद्यासु योजयेत् ।
व्यसने योजयेच्छत्रुमिष्टं धर्मेण योजयेत् ॥ ६७ ॥

CC-0. Prof. Satya Vrat Shastri Collection.
१ तिष्ठतीति शेषः २ मर्मस्पृक् ३ सूर्यः ४ सभा ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुलभं वस्तु सर्वस्य न यात्यादरणीयताम् ।
स्वदारपरिहारेण परदाराऽर्थिनो जनाः ॥ ६८ ॥

द्यूते हारितसर्व आद्य इतरो मल्लश्च मद्याऽशनः
षण्ढोऽन्यः परमं दुराशयसखोऽन्यो गोपराट् पञ्च वै ।
एकस्त्रीनिरताश्च पाण्डवगुणान् बिभ्रत्यमी सूनव-
स्तस्मात्पाण्डुगुणं वहामि नितरां तच्चिन्तयाऽनारतम् ६९

अनुसरति करिकपोलं भ्रमरः श्रवणेन ताड्यमानोऽपि ।
गणयति न तिरस्कारं दानान्धविलोचनो नीचः ॥७०॥

अन्तःकटुरपि लघुरपि सद्वृत्तं यः पुमान्न संत्यजति ।
भवति स सद्यो वन्द्यः सर्षप इव सर्वलोकस्य ॥ ७१ ॥

ऊर्जितं सज्जनं दृष्ट्वा द्वेष्टि नीचः पुनः पुनः ।
कवलीकुरुते स्वस्थं विधुं दिवि विधुंतुदः ॥ ७२ ॥

एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम् ।
गतानुगतिको लोको न लोकः पारमार्थिकः ॥ ७३ ॥

कुदेशमासाद्य कुतोऽर्थसंचयः कुपुत्रमासाद्य कुतोजलाञ्जलिः ।
कुगेहिनीं प्राप्य गृहे कुतः सुखं कुशिष्यमध्यापयतःकुतो यशः ७४

क्वचिद्रुष्टः क्वचित्तुष्टो रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयंकरः ॥ ७५ ॥

क्षते प्रहारा निपतन्त्यभीक्ष्णं धनक्षये दीप्यति जाठराग्निः ।
आपत्सु वैराणि समुल्लसन्ति छिद्रेष्वनर्था बहुलीभवन्ति ॥७६॥

गुरुपत्न्यां निशाधीशो ब्राह्मण्यां पाकशासनः ।
गतः पञ्चेषुलक्ष्यत्वं का कथाऽन्यस्य देहिनः ॥ ७७ ॥

गुरोरप्यवलिप्तस्य कार्याऽकार्यमजानतः ।
उत्पथप्रतिपन्नस्य न्याय्यं भवति शासनम् ॥ ७८ ॥

CC-0 Prof. Satya Vrat Shastri Collection

१ निन्द्यम् २ सगर्वस्य ३ उन्मार्गप्रवर्तिनः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौष्ठिककर्मनियुक्तः श्रेष्ठी चिन्तयति चेतसा हृष्टः।
वसुधा वसुसंपूर्णा मयाऽद्य लब्धा किमन्येन ॥ ७९ ॥
ग्रासादपि तदर्धं च कस्मान्नो दीयतेऽर्थिषु।
इच्छाऽनुरूपो विभवः कदा कस्य भविष्यति ॥ ८० ॥
चर्मखण्डं द्विधा भिन्नमपानोद्गारधूपितम्।
ये रमन्ति नरास्तत्र कृमितुल्याः कथं न ते ॥ ८१ ॥
चलं चित्तं चलं वित्तं चले जीवितयौवने।
चलाचलमिदं सर्वं कीर्तिर्यस्य स जीवति ॥ ८२ ॥
राजनि विदुषां मध्ये वरसुरतानां समागमे स्त्रीणाम्।
साध्वसदूषितहृदयो वाक्पटुरपि कातरो भवति ॥ ८३ ॥
यत्राऽऽकृतिस्तत्र गुणा वसन्ति नैतद्धि सम्यक्कविभिः प्रणीतम्।
येनाऽतिचार्वङ्ग्यपि मे हृदिस्था दुनोति गात्रं विरहे प्रियासौ ८४
यस्मिन् रुष्टे भयं नाऽस्ति तुष्टे नैव धनाऽऽगमः।
निग्रहाऽनुग्रहौ न स्तः स रुष्टः किं करिष्यति ॥ ८५ ॥
आलस्योपहता विद्या परहस्तगताः स्त्रियः।
अल्पबीजं हतं क्षेत्रं हतं सैन्यमनायकम् ॥ ८६ ॥
निर्विषेणाऽपि सर्पेण कर्त्तव्या महती फणा।
विषमस्तु न चाप्यस्तु फटाटोपो भयंकरः ॥ ८७ ॥
एक एव पदार्थस्तु त्रिधा भवति वीक्षितः।
कुणपं कामिनी मांसं योगिभिः कामिभिः श्वभिः ॥ ८८ ॥
वैद्यस्तर्कविहीनो निर्लज्जा कुलवधूर्यतिर्मूर्खः।
कटके च प्राहुणिको मस्तकशूलानि चत्वारि ॥ ८९ ॥
अलिरनुसरति परिमलं लक्ष्मीरनुसरति नयगुणसमृद्धिम्।
निम्नमनुसरति सलिलं विधिलिखितं बुद्धिरनुसरति ९०

CC-0. Prof. Satya Vrat Shastri Collection.

१ भवम् २ वाग्मी. ३ धनम्. ४ आगन्तुकः

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजाऽऽश्रयस्तस्करताऽर्घ्वपण्यमाथर्वणं चाऽपि समुद्रयानम् ।
एतानि सिध्यन्ति महाफलानि विपर्यये प्राणहराणि पञ्च ॥९१॥
अन्यानि शास्त्राणि विनोदमात्रं प्राप्तेषु कालेषु न तैश्च किंचित् ।
चिकित्सितज्योतिषमन्त्रवादाः पदेपदे प्रत्ययमावहन्ति ॥ ९२ ॥

अधरस्य मधुरिमाणं कुचकाठिन्यं दृशोस्तथा तैक्ष्ण्यम् ।
कवितायाः परिपाकाननुभवरसिको विजानाति ॥ ९३ ॥
परिच्छिन्नः स्वादोऽमृतगुडमधुक्षौद्रपयसां
कदाचिद्वाऽभ्यासाद्भजति खलु वैरस्यमधिकम् ॥ ९४ ॥
प्रियाबिम्बोष्ठे वा रुचिरकविवाक्येष्वनवधि—
र्नवाऽऽनन्दः कोऽपि स्फुरति तु रसोऽसौ निरुपमः ॥९५॥

संगीतमपि साहित्यं सरस्वत्याः स्तनद्वयम् ।
एकमापातमधुरमन्यदालोचनामृतम् ॥ ९६ ॥
संचिन्त्य संचिन्त्य जगत्समस्तं त्रयः पदार्था हृदयं प्रविष्टाः ।
इक्षोर्विकाराः कृतयः कवीनां मुग्धाङ्गनाऽपाङ्गतरङ्गितानि ९७

नारी परमुखद्रष्ट्री कविरव्यवहारवित् ।
अपथ्यसेवी रोगी च कियद्भिर्नोपहस्यते ॥ ९८ ॥
न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः ।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥ ९९ ॥
उच्चैरुद्घुष्य जेतव्यं मध्यस्थश्चेदपण्डितः ।
पण्डितो यदि तत्रैव पक्षपातोऽधिरोप्यताम् ॥ ३०० ॥
स्तोतारः के भविष्यन्ति मूर्खस्य जगतीतले ।
न स्तौति चेत्स्वयं च स्वं कदा तस्याऽस्तु निर्वृतिः १
वाच्यतां समयोऽतीतः स्पष्टमग्रे भविष्यति ।
इति पाठयतां ग्रन्थे काठिन्यं कुत्र वर्तते ॥ २ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

१ अभ्वव्यवहारः २ आरभमाणानि ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

अगतित्वमतिश्रद्धा ज्ञानाभ्यासेन तृप्तता ।
त्रयः शिष्यगुणा ह्येते मूर्खाचार्यस्य भाग्यजाः ॥ ३ ॥
यदि न क्वाऽपि विद्यायां सर्वथाक्रमते मतिः ।
मान्त्रिकास्तु भविष्यामो योगिनो यतयोऽपि वा ॥ ४ ॥
अविलम्बेन संसिद्धो मान्त्रिकैराप्यते यशः ।
विलम्बे कर्मबाहुल्यं विख्याप्याऽवाप्यते धनम् ॥ ५ ॥
चारान् विचार्य दैवज्ञैर्वक्तव्यं भूभृतां फलम् ।
ग्रहाचारपरिज्ञानं तेषामावश्यकं यतः ॥ ६ ॥
पुत्र इत्येव पितरि कन्यकेत्येव मातरि ।
गर्भप्रश्नेषु कथयन् दैवज्ञो विजयी भवेत् ॥ ७ ॥
आयुःप्रश्ने दीर्घमायुर्वाच्यं मौहूर्तिकैर्द्विजैः ।
जीवन्तो बहु मन्यन्ते मृताः प्रक्ष्यन्ति कं पुनः ॥ ८ ॥
निर्धनानां धनाऽवाप्तिर्धनिनामधिकं धनम् ।
ब्रुवाणाः सर्वथा ग्राह्या लोके ज्यौतिषिकानराः ॥ ९ ॥
अपि सागरपर्यन्ता विचेतव्या वसुंधरा ।
देशोऽप्यरत्निमात्रोऽपि नाऽस्ति दैवज्ञवर्जितः ॥ १० ॥
स्वस्थैरसाध्यरोगैश्च जन्तुभिर्नाऽस्ति किंचन ।
कातरा दीर्घरोगाश्च भिषजां भाग्यहेतवः ॥ ११ ॥
नाऽतिधैर्यं प्रदातव्यं नाऽति भीतिश्च रोगिणाम् ।
नैश्चिन्त्यात्राऽऽदिमे दानं नैराश्यादेव नाऽन्तिमे ॥ १२ ॥
भैषज्यं तु यथाकामं पथ्यं तु कठिनं वदेत् ।
आरोग्यं वैद्यमाहात्म्यादन्यथात्वमपथ्यतः ॥ १३ ॥
निदानं रोगनामानि साध्यासाध्यं चिकित्सितम् ।
सर्वमप्युपदेक्ष्यन्ति रोगिणः सदनेस्त्रियः ॥ १४ ॥
प्रवर्तनार्थमारम्भे मध्ये त्वौषधहेतवे ।
बहुमानार्थमन्ते च जिहीर्षन्ति चिकित्सकाः ॥ १५ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोगस्योपक्रमे सान्त्वं मध्ये किंचिद्धनव्ययः ।
शनैरनादरः शान्तौ स्नातो वैद्यं न पश्यति ॥ १६ ॥
दैवज्ञत्वं मान्त्रिकता भैषज्यं चाटुकौशलम् ।
एकैकमर्थलाभाय द्वित्रियोगास्तु दुर्लभाः ॥ १७ ॥
न कारणमपेक्षन्ते कवयः स्तोतुमुद्यताः ।
किंचिदस्तुवतां तेषां जिह्वा फुरफुरायते ॥ १८ ॥
एकैव कविता पुंसां ग्रामायाऽश्वाय हस्तिने ।
अन्ततोऽन्नाय वस्त्राय ताम्बूलाय च कल्पते ॥ १९ ॥
मातुलस्य बलं माता जामातुर्दुहिता बलम् ।
श्वशुरस्य बलं भार्या स्वयमेवाऽतिथेर्बलम् ॥ २० ॥
भार्ये द्वे पुत्रशालिन्यौ भगिन्यः पतिवर्जिताः ।
अश्रान्तकलहो नाम योगोऽयं गृहमेधिनाम् ॥ २१ ॥
द्वे भार्ये बहवः पुत्रा दारिद्र्यं रोगसंभवः ।
जीर्णौ च मातापितरावेकैकं मरणाऽधिकम् ॥ २२ ॥
अन्तकोऽपि हि जन्तूनामन्तकालमुपेक्षते ।
न कालनियमः कश्चिदुत्तमर्णस्य विद्यते ॥ २३ ॥
न पश्यामो मुखे दंष्ट्रां न पाशं वा कराञ्चले ।
उत्तमर्णमवेक्ष्यैव तथाऽप्युद्विजते जनः ॥ २४ ॥
शत्रौ सान्त्वं प्रतीकारः सर्वरोगेषु भेषजम् ।
मृत्यौ मृत्युंजयध्यानं दारिद्र्ये न तु किंचन ॥ २५ ॥
शक्तिं करोति संचारे शीतोष्णे मर्षयत्यपि ॥
दीपयत्युदरं वह्निं दारिद्र्यं परमौषधम् ॥ २६ ॥
प्रामाण्यबुद्धिः स्तोत्रेषु देवताबुद्धिरात्मनि ।
कीटबुद्धिर्मनुष्येषु नूतनायाः श्रियःफलम् ॥ २७ ॥
क्षणमात्रं ग्रहाऽऽवेशो याममात्रं सुरामदः ।
लक्ष्मीमदस्तु मूर्खाणामादेहमनुवर्तते ॥ २८ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्यापयन्ति शास्त्राणि तृणीकुर्वन्ति पण्डितान् ।
विस्मारयन्ति जातिं स्वां वराटाः पञ्चपाः करे ॥ २९ ॥

कौपीनं भस्मना लेपो दर्भा रुद्राक्षमालिका ।
मौनमेकान्तिका चेति मूर्खसंजीवनानि षट् ॥ ३० ॥

आनन्दबाष्परोमाञ्चौ यस्य स्वेच्छावशंवदौ ।
किं तस्य साधकैरन्यैः किंकराः सर्वपार्थिवाः ॥ ३१ ॥

सदा जपपटो हस्ते मध्येमध्येऽक्षिमीलनम् ।
सर्वं ब्रह्मेति वादश्च सद्यः प्रत्ययहेतवः ॥ ३२ ॥

आमध्याह्नं नदीवासः समाजे देवताऽर्चनम् ।
सततं शुचिवेषश्च एतत्सभ्यस्य जीवनम् ॥ ३३ ॥

तावद्दीर्घं नित्यकर्म यावत्स्याद्द्रष्टृमेलनम् ।
तावत्संक्षिप्यते सर्वं यावद् द्रष्टा न विद्यते ॥ ३४ ॥

यत्र भार्या गिरो वेदा यत्र धर्मोऽर्थसाधनम् ।
यत्तस्य प्रतिभा मानं तस्मै श्रीकलये नमः ॥ ३५ ॥

ददतो युध्यमानस्य पठतः पुलको न चेत् ।
आत्मनश्च परेषां च धिक् त्यागं पौरुषं वचः ॥ ३६ ॥

अर्थानजरामरवत्कामानौषधवदाचरेद्धीमान् ।
तृषितवत्पिबेद्विद्यां मुमूर्षुवदाचरेद्धर्मम् ॥ ३७ ॥

हंसास्सर्वाङ्गशुचयः पद्मेभ्यो बहिरासते ।
अन्तर्विशन्ति मधुपाः श्रीमतां गतिरीदृशी ॥ ३८ ॥

बन्धो मानश्च्युतिरपि हेलासन्मालिकागुणच्छेदः ।
यस्मिन् राजन्यधरप्रीतिर्द्विजखण्डनं च सुरतेभूत् ॥ ३९ ॥

अतिपरिचयादवज्ञा ह्येतद्वाक्यं मृषैव मे भाति ।
अतिपरिचितेऽप्यनादौ संसारेऽस्मिन्न जायतेऽवज्ञा ॥ ४० ॥

द्वेधा भ्रमं तु वेधाश्चक्रे कान्तास्वपि च कनकेषु ।
यदि कान्ता साध्वी यदि कनकं सुवृत्तं भवाब्धिपोतं तद् ४१

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मीयं दधाति पुरतो निम्नोन्नतायां भुवि
स्त्रीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशङ्कया ।
तल्पे किंच मृगत्वचाविरचिते निद्रालिभागैर्निजै-
रन्तः प्रेम भरालसां प्रियतमामङ्के दधानो हरः ॥ ४२ ॥

गतागतकुतूहलं नयनयोरपाङ्गावधि
स्मितं कुलनतभ्रुवामधर एव विश्राम्यति ।
वचः प्रियतमश्रुतेरतिथिरेव कोपक्रमः
कदाचिदपि चेत्तदा मनसि केवलं मज्जति ॥ ४३ ॥

मलयानिलकालकूटयो रमणीकुन्तलभोगिभोगयोः ।
श्वपचात्मभुवोर्निरन्तरा मम जाता परमात्मनि स्थितिः ४४

सुरस्रोतस्विन्याः पुलिनमधितिष्ठन् नयनयो-
र्विधायान्तर्मुद्रामथ सपदि विद्राव्य विषयान् ।
विधूतान्तर्ध्वान्तो मधुर मधुरायां चिति कदा ।
निमग्नः स्यां कस्यां च न नवनभस्याम्बुदरुचिः ॥ ४५ ॥

नवोच्चलितयौवनस्फुरदखर्वगर्वज्वरे ।
मदीयगुरुकार्मुकं गलितसाध्वसं वृश्चति ।
अयं पततु निर्दयं दलितदृप्तभूभृत्कुल-
स्खलद्रुधिरघस्मरो मम परश्वधो भैरवः ॥ ४६ ॥

कियदिदमधिकं मे यद्द्विजायार्थमित्रे ।
कवचमरमणीयं कुण्डले चार्पयामि ।
अकरुणमवकृत्य द्राक्कृपाणेन निर्य-
ग्वहलरुधिरधारं मौलिमावेदयामि ॥ ४७ ॥

यस्योद्दामदिवानिशार्थिविलसद्दानप्रवाहप्रथा-
माकर्ण्यावनिमण्डलागतवियद्वन्दीन्द्रवृन्दाननात् ।

---

१ (४७) एवं [illegible] CC-0. Prof. Satya Vrat Shastri Collection. [illegible]स्य कर्णस्य तदाम-
न्त्रितस्वनान् सभ्यान् प्रत्युक्तिः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

इर्ग्यानिर्भरफुल्लरोमनिकरव्यालग्नदुग्धःस्रव-
त्पीयूषप्रकरैः सुरेन्द्रसुरभिः प्रावृट्पयोदायते ॥ ४८ ॥

साब्धिद्वीपकुलाचलां वसुमतीमाक्रम्य सप्तान्तरां ।
सर्वां द्यामपि सस्मितेन हरिणा मन्दं समालोकिता ।
प्रादुर्भूतपरप्रमोदविदलद्रोमाञ्चितस्तत्क्षण-
व्यानम्रीकृतकन्धरोऽसुरवरो मौलिं पुरो न्यस्तवान् ॥ ४९ ॥

न कपोतभवन्तमण्वपि स्पृशतु श्येनसमुद्भवं भयम् ।
इदमद्य मया तृणीकृतं भवदायुःकुशले कलेवरम् ॥ ५० ॥

रणे दीनान् देवान् दशवदनविद्राव्य वहसि
प्रभावप्रागल्भ्यं त्वयि तु मम कोऽयं परिकरः ।
ललाटोद्यज्ज्वालाकवलितजगज्जालविभवो
भवो मे कोदण्डच्युतविशिखवेगं कलयतु ॥ ५१ ॥

सपदि विलयमेतु राज्यलक्ष्मी-
रुपरि पतन्त्वथ वा कृपाणधाराः ।
अपहरतुतरां शिरः कृतान्तो
मम तु मतिर्न मनागपैति धर्मात् ॥ ५२ ॥

अपि वक्ति गिरांपतिः स्वयं
यदि तासामधिदेवतापि वा ।
अयमस्मि पुरो हयानन-
स्मरणोल्लङ्घितवाङ्मयाम्बुधिः ॥ ५३ ॥

अपि बहुलदहनजालं मूर्ध्नि रिपुर्मे निरन्तरं धमतु
पातयतु वासिधारामहमणुमात्रं न किंचिद्भाषे ॥ ५४ ॥

---

(५०) एषा शिबेः कपोतं श्येनं प्रति चोक्तिः ॥ (५१) एषा दशवदनं प्रति भगवतो रामस्योक्तिः (५२) अधर्मेणापि रिपुर्जेतव्य इति वदन्तं प्रति युधिष्ठिर-स्योक्तिः ॥ (५४) क्षमावत उक्तिरियम् ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिहरतु धरां फणिप्रवीरः सुखमयतां कमठोपि तां विहाय ।
अहमिह पुरुहूतपक्षकोणे निखिलमिदं जगदण्डकं वहामि ५५

प्रमोदभरतुन्दिलप्रमथदत्ततालावली-
विनोदिनि विनायके डमरुडिण्डिमध्वानिनि ।
ललाटतटविस्फुटन्नवकपीटयोनिच्छटो
हटोद्धतजटोद्भटो गतपटो नटो नृत्यति ॥ ५६ ॥

सीहंकारसुरासुरावलिकराकृष्टभ्रमन्मन्दर-
क्षुभ्यत्क्षीरधिवल्गुवीचिवलयश्रीगर्वसर्वंकषाः ।
तृष्णाताम्यदमन्दतापसकुलैः सानन्दमालोकिता
भूमीभूषण भूषयन्ति भुवनाभोगं भवत्कीर्तयः ॥ ५७ ॥

अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वं चापि हरते विधिरुच्छृंखलो नृणाम् ॥ ५८ ॥

निर्माणे यदि मार्मिकोसि नितरामत्यन्तपाकद्रव-
न्मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।
काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे मादृशां
नोचेद्दुष्कृतमात्मनाकृतमिव स्वान्ताद्बहिर्मा कृथाः ५९

वाचा निर्मलया सुधामधुरया यां नाथशिक्षामदा-
स्तां स्वप्नेपि न संस्पृशाम्यहमहंभाववृतो निस्त्रपः ।
इत्यागःशतशालिनं पुनरपि स्वीयेषु मां बिभ्रत-
स्त्वत्तो नास्ति दयानिधिर्यदुपते मत्तो न मत्तोपरः ६०

हीरस्फुरद्रदनशुभ्रिमशोभि किंच
सान्द्रामृतं वदनमेणविलोचनायाः ।
वेधा विधाय पुनरुक्तमिवेन्दुबिम्बं
दूरीकरोति न कथं विदुषां वरेण्यः ॥ ६१ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

(५५) पुरुहूतं प्रत्येषा गरुत्मत उक्तिः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलकाः फणिशावतुल्यशीला
नयनान्ताः परिपुंखितेषु शीलाः ।
चपलोपमिता खलु स्वयं या
बत लोके सुखसाधनं कथं सा ॥ ६२ ॥

वचने तव यत्र माधुरी सा
हृदि पूर्णा करुणा च कोमलेऽभूत् ।
अधुना हरिणाक्षि हा कथं वा
कटु तत्र कठोरताविरासीत् ॥ ६३ ॥

हतकेन मया वनान्तरे वनजाक्षी सहसा विवासिता ।
अधुना मम कुत्र सा सती पतितस्येव वरा सरस्वती ॥६४॥

आ मूलाद्रत्नसानोर्मलयवलयितादा च कूलात्पयोधे-
र्यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु ।
मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ६५

निखिलं जगदेव नश्वरं पुनरस्मिन्नितरां कलेवरम् ।
अथ तस्य कृते कियानयं क्रियते हन्त मया परिश्रमः ॥ ६६ ॥

यदि सा मिथिलेन्द्रनन्दिनी नितरामेव न विद्यते भुवि ।
अथ मे कथमस्ति जीवितं न विना लम्बनमाश्रिता स्थितिः ६७

भवद्द्वारे क्रुध्यज्जयविजयदण्डाहतिदल-
त्किरीटास्ते कीटा इव विधिमहेन्द्रप्रभृतयः ।
वितिष्ठन्ते युष्मन्नयनपरिपातोत्कलिकया
वराकाः के तत्र क्षपितमुरनाकाधिपतयः ॥ ६८ ॥

न धनं न च राज्यसंपदं न हि विद्यामिदमेकमर्थये ।
मयि धेहि मनागपि प्रभो करुणाभङ्गितरङ्गितां दृशम् ॥ ६९ ॥

---

(६४) सीतां परित्यक्तवतो भगवतः श्रीरामभद्रस्येयमुक्तिः ॥
(६५) मदी[illegible] (६७) स्वात्मानं भगवतो रामस्यैषोक्तिः ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृद्वीकारसिता सिता समशिता स्फीतं निपीतं पयः
सत्यं ब्रूहि मदीय जीव भवता भूयो भवे भ्राम्यता ।
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः कचिल्लक्षितः ॥ ७० ॥
कस्मै हन्त फलाय सज्जनगुणग्रामार्जने सज्जसि
स्वात्मोपस्करणाय चेन्मम वचः पथ्यं समाकर्णय ।
ये भावा हृदयं हरन्ति नितरां शोभाभरैः संभृता-
स्तैरेवास्य कलेः कलेवरपुषो दैनंदिनं वर्तनम् ॥ ७१ ॥
सिन्दूरारुणवपुषो देवस्य रदांकुरो गणाधिपतेः ।
संध्याशोणाम्बरगतनवेन्दुलेखायितः पातु ॥ ७२ ॥
खलः कापट्यदोषेण दूरेणैव विसृज्यते ।
अपायशङ्किभिर्लोकैर्विषेणाशीविषो यथा ॥ ७३ ॥
रूपवत्यपि च क्रूरा कामिनी दुःखदायिनी ।
अन्तःकाटवसंपूर्णा सुपक्वेन्द्रवारुणी ॥ ७४ ॥
निखिले निगमकदम्बे लोकेष्वप्येष निर्विवादोर्थः ।
शिव इव गुरुर्गरीयान् गुरुरिवसोयं सदाशिवोपि तथा ७५
अतिमात्रबलेषु चापलं विदधानः कुमतिर्विनश्यति ।
त्रिपुरद्विषि वीरतां वहन्नवलिप्तः कुसुमायुधो यथा॥७६॥
उपकारमेव कुरुते विपद्गतः सद्गुणो नितराम् ।
मूर्च्छां गतो मृतो वा निदर्शनं पारदोत्र रसः ॥ ७७ ॥
अर्थिभिश्छिद्यमानोपि स मुनिर्न व्यकम्पत ।
विनाशेप्युन्नतः स्थैर्यं न जहाति द्रुमो यथा ॥ ७८ ॥
दोर्दण्डद्वयकुण्डलीकृतलसत्कोदण्डचण्डध्वनि-
ध्वस्तोद्दण्डविपक्षमण्डलमथ त्वां वीक्ष्य मध्येरणम् ।
वल्गद्गाण्डिवमुक्तकाण्डवलयज्ज्वालावलीताण्डव-
भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीशः स्मरेत् ७९

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकीभवत्प्रलयकालपयोधिकल्प-
मालोक्य संगरगतं कुरुवीरसैन्यम् ।
सस्मार तल्पमहिपुङ्गवकायकान्तं
निद्रां च योगकलितां भगवान्मुकुन्दः ॥ ८० ॥

सन्त्येवास्मिन् जगति बहवः पक्षिणो रम्यरूपा-
स्तेषां मध्ये मम तु महती वासना चातकेषु ।
यैरध्यक्षैरथ निजसखं नीरदं स्मारयद्भिः
स्मृत्यारूढं किमपि भवति ब्रह्म कृष्णाभिधानम् ॥८१॥

उपकारमस्य साधोर्नैवाहं विस्मरामि जलदस्य ।
दृष्टेन येन सहसा निवेद्यते नवघनश्यामः ॥ ८२ ॥

भवग्रीष्मप्रौढातपनिवहसंतप्तवपुषो
बलादुन्मूल्यद्राङ्निगडमविवेकव्यतिकरम् ।
विशुद्धेऽस्मिन्नात्मामृतसरसि नैराश्यशिशिरे
विगाहन्ते दूरीकृतकलुषजालाः सुकृतिनः ॥ ८३ ॥

धर्मस्यात्मा भागधेयं क्षमायाः सारः सृष्टेर्जीवितं शारदायाः ।
आज्ञा साक्षाद्ब्रह्मणो वेदमूर्तेराकल्पान्तं राजतामेष राजा॥८४॥

अहितापकरणभेषज नरनाथ भवान् करस्थितो यस्य ।
तस्य कुतोऽहिभयं स्यादखिलामपि मेदिनीं चरतः ॥ ८५ ॥

काव्यं सुधा रसज्ञानां कामिनां कामिनी सुधा ।
धनं सुधा सलोभानां शान्तिः संन्यासिनां सुधा ॥ ८६ ॥

अविरतं परकार्यकृतां सतां
मधुरिमाऽतिशयेन वचोमृतम् ।
अपि च मानसमम्बुनिधिर्यशो
विमलशारदचन्द्रिरचन्द्रिका ॥ ८७ ॥

विज्ञत्वं विदुषां गणेषु कवितां सामाजिकानां कुले
माङ्गल्यं [illegible]षु गौरवमथो लोकेषु सर्वेष्वपि ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्वृत्तेऽशनितां नृलोकवलये राजत्वमन्याहृतं
भिन्नत्वं च वहन्नकिंचन जने देव त्वमेको भुवि ॥८८॥
कस्तूरिकातिलकमालि विधाय सायं
स्मेरानना सपदि शीलय सौधमौलिम् ।
प्रौढिं भजन्तु कुमुदानि मुदामुदारा-
मुल्लासयन्तु परितो हरितो मुखानि ॥ ८९ ॥

दीनव्राते दयार्द्रा निखिलरिपुकुले निर्दया किंच मृद्वी
काव्यालापेषु तर्कप्रतिवचनविधौ कर्कशत्वं दधाना ।
लुब्धा धर्मेष्वलुब्धा वसुनि परविपद्दर्शने कान्दिशीका
राजन्नाजन्मरम्या स्फुरति बहुविधा तावकी चित्तवृत्तिः ॥९०॥
वदने विनिवेशिता भुजङ्गी पिशुनानां रसनामिषेण धात्रा ।
अनया कथमन्यथावलीढा नहि जीवन्ति जना मनागमन्त्राः ९१

सुजनाः परोपकारं शूराः शस्त्रं धनं कृपणाः ।
कुलवत्यो मन्दाक्षं प्राणात्यय एव मुञ्चन्ति ॥ ९२ ॥
विश्वाभिरामगुणगौरवगुम्फितानां
रोषोपि निर्मलधियां रमणीय एव ।
लोकंपृणैः परिमलैः परिपूरितस्य
कालागुरोः कठिनतापि नितान्तरम्या ॥ ९३ ॥
सत्पूरुषः खलु हिताचरणैरमन्द-
मानन्दयत्यखिललोकमनुक्त एव ।
आराधितः कथय केन करैरुदारै-
रिन्दुर्विकासयति कैरविणीकुलानि ॥ ९४ ॥
तापत्रयं खलु नृणां हृदि तावदेव
यावन्न ते चलति देव कृपाकटाक्षः ।
प्राचीललाटपरिचुम्बिनि भानुबिम्बे
पङ्केरुहोदरगतानि कुतस्तमांसि ॥ ९५ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहति विपधरान्पटीरजन्मा शिरसि मषीपटलं दधाति दीपः ।
विधुरपि भजते वराङ्कलेपं पिशुनजनं खलु बिभ्रति क्षितीन्द्राः २६

त्वामन्तरात्मनि लसन्तमनन्तमज्ञा-
स्तीर्थेषु हन्त मदनान्तक शोधयन्तः ।
विस्मृत्य कण्ठतटमध्यपरिस्फुरन्तं
चिन्तामणिं क्षितिरजःसु गवेषयन्ति ॥ ९७ ॥

हालाहलं खलु पिपासति कौतुकेन
कालानलं परिचुचुम्बिषति प्रकामम् ।
व्यालाधिपं च यतते परिरब्धुमद्धा
यो दुर्जनं वशयितुं कुरुते मनीषाम् ॥ ९८ ॥

गुणवृद्धीपरे यस्मिन् नैव स्तः प्रत्ययात्मके ।
बुधेषु सदिति ख्यातं तद्ब्रह्म समुपास्महे ॥ ९९ ॥

मन्त्रैर्मीलितमौषधैर्मुकुलितं त्रस्तं सुराणां गणैः
स्रस्तं सान्द्रसुधारसैर्विदलितं गारुत्मतैर्ग्रावभिः ।
वीचिक्षालितकालियाहितपदे स्वर्लोककल्लोलिनि
त्वं तापं तिरयाधुना मम भवव्यालावलीढात्मनः ॥ ४०० ॥

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा मया
मामा संस्पृश पाणिनेति रुदिता गन्तुं प्रवृत्ता ततः ।
नो यावत् परिरभ्य चाटुकशतैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥ ४०१ ॥

उल्लास्य कालकरवालमहाम्बुवाहं
देवेन येन जरठोद्धटगर्जितेन ।
निर्वापितः सकल एव रणे रिपूणां
धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥ २ ॥

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद्यदि पुनर्देवो न जानाति तम् ।
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दीवैष यशांसि गायति मरुद्यस्यैकवाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥ ३ ॥
अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधय-
स्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः ।
आश्चर्येण मुहुर्मुहुस्तुतिमिति प्रस्तौमि यावद्भुव-
स्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः॥४॥
गच्छाम्यच्युतदर्शनेन भवतः किं प्रीतिरुत्पद्यते
किं त्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन् पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः ५
शक्तिर्निस्त्रिंशजेयं तव भुजयुगले नाथ दोषाकरश्री-
र्वक्त्रे पार्श्वे तथैषा प्रतिवसति महाकुट्टिनी खड्गयष्टिः ।
आज्ञेयं सर्वगा ते विलसति च पुनः किं मया वृद्धया ते
प्रोच्यैवेत्थं प्रकोपाच्छशिकरसितया यस्य कीर्त्याप्रयातम् ॥ ६ ॥
तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्तुं विबुधद्विषोपि च न मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोयं विधिः ॥ ७ ॥
आत्ते सीमन्तचिन्हे मरकतिनिहृते हैमताटङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते ।
शोणं विम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन् गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ॥ ८ ॥
रे हस्तदक्षिण मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य गात्रमसि निर्भरगर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते ॥९॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु
रूपं लोकय लोचनद्वय हरेर्गच्छांघ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन्नमाधोक्षजम् ॥ १० ॥

चित्तं प्रसादयति लाघवमादधाति
प्रत्यङ्गमुज्ज्वलयति प्रतिभाविशेषम् ।
दोषानुदस्यति करोति च धातुसाम्य-
मानन्दमर्पयति योगविशेषगम्यम् ॥ ११ ॥

लोकद्वयप्रतिभयैकनिदानमेत-
द्धिक् प्राणिनामृणमहो परिणामघोरम् ।
एकः स एव हि पुमान् परमस्त्रिलोके
क्रुद्धस्य येन धनिकस्य मुखं न दृष्टम् ॥ १२ ॥

ज्ञानमन्त्रसदाचारैर्गौरवं भजते गुरुः ।
तस्माच्छिष्यः क्षमी भूत्वा गुरुवाक्यं न लङ्घयेत् ॥ १३ ॥

पुंखानुपुंखविषयेक्षणतत्परोऽपि
स्वात्मात्रबोधनरुचिं न जहाति योगी ।
संगीततालल्यवाद्यवशंगतापि
मौलिस्थकुम्भपरिरक्षणधीर्नटीव ॥ १४ ॥

शत्रोरपि गुणा ग्राह्या दोषा वाच्या गुरोरपि ।
छत्रच्छेदरथं दृष्ट्वा दूरापाति च राघवः ॥ १५ ॥

मधुरैरलमङ्गनाङ्गसङ्गैरपि संगीतसुधाम्बुधेस्तरङ्गैः ।
अधुना रमते मनोमदीयं परमानन्दघने गतद्वितीये ॥ १६ ॥

रे बालकोकिल कलैरलमुत्पलाक्षि
लोलैरलं तव विलोचनयोर्विलासैः
माकन्दगन्धलहरीभिरपीह वायोः
स्वान्तं मुदेऽत्र रमते शान्तिमेति ॥ १७ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं मन्दमन्दहसितैरसितैरपाङ्गै-
रुन्मीलदिङ्गितवचोमृतपूरभङ्गैः ।
बाले वयं तु निगमान्तमतेन तृप्ता-
श्चेतो न मायिकसुखे विनियोजयामः ॥ १८ ॥

लोक एष विषयानुरञ्जनं दुःखगर्भमपि मन्यते सुखम् ।
आमिषं बडिशगर्भमप्यहो मोहतो ग्रसति यद्वदण्डजः ॥१९॥

जीवातुस्त्रिदशौकसां जलनिधेर्मेदस्करो मानिनी
मानोन्मूलनकारणं कुमुदिनीहासैकवैहासिकः ।
ध्वान्तोच्चाटनमान्त्रिकोम्बरसरःसीमामरालोजग-
न्नेत्रानन्दरसायनं विजयते राकानिशाकामुकः ॥ २० ॥

खेलत्कुण्डलमाकुलाकुलफणीहारं क्वणत्कङ्कणं
श्रेणीनूपुरमेखलं चलकुचं वल्गान्नितम्बस्थलम् ।
अन्योन्यं मणिदण्डिकाहतिचलन्नेत्रारविन्दाञ्चलं
प्रक्रान्तं यमिनो मनोपि हरते हल्लीसकक्रीडितम् ॥२१॥

सोत्कण्ठं नयनैस्त्रिपञ्चभिरपि प्रत्यङ्गमुद्वीक्षिता
संश्लिष्टा दशभिर्भुजैश्च नवयोर्वक्षोजयोः पेशलम् ।
आपीताधरपल्लवे च वदनोल्लासं मुखैःपञ्चभिः
पत्युः प्रीणयते मनोनुरहसि हृष्टा गिरेर्नन्दना ॥ २२ ॥

विहाय संसारमहामरुस्थलीमलीकदेहादिमिलन्मरीचिकाम् ।
कृपातरङ्गाकुलमन्मनोमृगो विगाढुमीश त्वयि गाढमीहते ॥२३॥

अलं हिमानीपरिदीर्णगात्रः समापितः फाल्गुनसंगमेन ।
अत्यन्तमाकांक्षितकृष्णवर्त्मा भीष्मो महात्मा जनिमाघतुल्यः २४

सृष्टः सृष्टिकृता पुरा किल परित्रातुं जगन्मण्डलं
त्वं चण्डातप निर्दयं दहसि यज्ज्वालाजटालैः करैः ।
संरम्भारुणलोचनो रणभुवि प्रस्थातुकामोऽधुना
जानीमो भवता न हन्त विदिता दिल्लीधरावल्लभः २५

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाण्डित्यं परिहृत्य यस्य हि कृते बन्दित्वमालम्बितं
दुष्प्रापं मनसापि यो गुरुतरैः क्लेशैः पदं प्रापितः ।
रूढस्तत्र स चेन्निगीर्य सकलां पूर्वोपकारावलिं
दुष्टः प्रत्यवतिष्ठते तदधुना कस्मै किमाचक्ष्महे ॥ २६ ॥

हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः ।
लेढि जिघ्रति संक्षिप्य करोत्युन्नतमासनम् ॥ २७ ॥

किं वृत्तान्तैः परगृहगतैः किन्तु नाहं समर्थ-
स्तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः ।
देशेदेशे विपणिषु तथा चत्वरे पानगोष्ठ्या-
मुन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः ॥ २८ ॥

श्वासोनुमानवेद्यः शीतान्यङ्गानि निश्चला दृष्टिः ।
तस्याः किंवा पृच्छसि निर्दय तिष्ठत्वसौ हता वार्ता २९

मकरालयस्य कुक्षौ स्थित्वा सदनेऽमृताशिनां च चिरम् ।
संप्रति निर्दोषे ते राजन् वदनाम्बुजे सुधा वसति ॥ ३० ॥

उदुम्बरफलानीव ब्रह्माण्डान्यत्ति यः सदा ।
सर्वगर्वापहः कालस्तस्य के मशका वयम् ॥ ३१ ॥

लोभाद्वराटिकानां विक्रेतुं तक्रमनिशमपयन्त्या ।
लब्धो गोपकिशोर्या मध्येरथ्यं महेन्द्रनीलमणिः ॥ ३२ ॥

निष्णातोपि च वेदान्ते वैराग्यं नैति दुर्जनः ।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥ ३३ ॥

भद्राणि माकुरु विषादमनादरेण
मात्सर्यमन्दमनसां सहसा खलानाम् ।
काव्यारविन्दमकरन्दमधुव्रताना-
मास्येषु धास्यसि सतां विपुलं विलासम् ॥ ४३४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रम्भाशुकसंवादः ।

रम्भोवाच—

मार्गेमार्गे नूतनं चूतखण्डं खण्डेखण्डे कोकिलानां विरावः।
रावेरावे मानिनीमानभङ्गो भङ्गेभङ्गे मन्मथः पञ्चबाणः १

शुकउ०—मार्गेमार्गे जायते साधुसंगः संगेसंगे श्रूयते कृष्णकीर्तिः।
कीर्तौकीर्तौ नस्तदाकारवृत्तिर्वृत्तौवृत्तौ सच्चिदानन्दभासः २

शु० तीर्थेतीर्थे निर्मलं ब्रह्मवृन्दं वृन्देवृन्दे तत्त्वचिन्तानुवादः।
वादेवादे जायते तत्त्वबोधो बोधेबोधे भासते चन्द्रचूडः ३

रं० गेहेगेहे जङ्गमा हेमवल्ली वल्ल्यांवल्ल्यां पार्वणं चन्द्रबिम्बम्।
बिम्बेबिम्बे दृश्यते मीनयुग्मं युग्मेयुग्मे पञ्चबाणप्रचारः ४

शु० स्थानेस्थाने दृश्यते रत्नवेदी वेद्यांवेद्यां सिद्धगन्धर्वगोष्ठी।
गोष्ठ्यांगोष्ठ्यां किन्नरद्वन्द्वगीतं गीतेगीते गीयते रामचन्द्रः ५

रं० पीनस्तनी चन्दनचर्चिताऽङ्गी विलोलनेत्रा तरुणी सुशीला।
नाऽऽलिङ्गिता प्रेमभरेण येन वृथागतं तस्य नरस्य जीवितम्६

शु० अचिन्त्यरूपो भगवान्निरञ्जनो विश्वंभरो ज्ञानमयश्चिदात्मा
विशोधितो येन हृदि क्षणं नो वृथागतं तस्य नरस्य जीवितम्।

रं० कामातुरा पूर्णशशाङ्कवक्त्रा बिम्बाधरा कोमलनालगौरा।
नाऽऽन्दोलिता स्वे हृदये भुजाभ्यां वृथागतं० ॥ ८ ॥

शु० चतुर्भुजश्चक्रधरो गदायुधः पीताम्बरः कौस्तुभमालया लसन्
ध्याने धृतो येन न बोधकाले वृथागतं० ॥ ९ ॥

रं० विचित्रवेषा नवयौवनाढ्या लवङ्गकर्पूरसुवासिदेहा।
नाऽऽलिङ्गिता येन दृढं भुजाभ्यां वृथागतं० ॥ १० ॥

शु० नारायणः पङ्कजलोचनःप्रभुः केयूरवान्कुण्डलमण्डिताऽऽननः
भक्त्यास्तुतो येन समाधितो नो वृथागतं० ॥ ११ ॥

---

१ आम्रवृक्षः २ [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रं० प्रियंवदा चम्पकहेमवर्णा हारावलीमण्डितनाभिदेशा ।
संभोगशीला रमिता न येन वृथा गतं० ॥ १२ ॥
शु० श्रीवत्सलक्ष्माङ्कितहृत्प्रदेशस्तार्क्ष्यध्वजः शार्ङ्गधरः परात्मा॥
न सेवितो येन नृजन्मनाऽपि वृथा गतं० ॥ १३ ॥
रं० चलत्कटी नूपुरमञ्जुघोषा नासाऽग्रमुक्ता नयनाऽभिरामा ।
न सेविता येन भुजङ्गवेणी वृथा गतं० ॥ १४ ॥
शु० विश्वंभरो ज्ञानमयः परेशो जगन्मयोऽनन्तगुणप्रकाशी ।
नाऽऽराधितो नाऽपि धृतो न योगे वृथा गतं० ॥ १५ ॥
रं० ताम्बूलरागैः कुसुमप्रकर्षैः सुगन्धतैलेन च वासितायाः ।
नो मर्दितौ येन कुचौ निशायां वृथा० ॥ १६ ॥
शु० ब्रह्मादिदेवोऽखिलविश्वदेवोऽमोक्षप्रदोऽतीतगुणः प्रशान्तः
धृतो न योगेन हृदि स्वकीये वृथा गतं० ॥ १७ ॥
रं०कस्तुरिकाकुङ्कुमचन्दनैश्च सुचर्चिता याऽगुरुधूपिताम्बरा ।
उरःस्थले नो लुठिता निशायां वृथा० ॥ १८ ॥
शु० आनन्दरूपो निजबोधरूपो दिव्यस्वरूपो बहुनामरूपः ।
तपःसमाधौ कलितो न येन वृथा० ॥ १९ ॥
रं० कठोरपीनस्तनभारनम्रा सुमध्यमा चञ्चलखञ्जनाक्षी ।
हेमन्तकाले रमिता न येन वृथा० ॥ २० ॥
शु० तपोमयो ज्ञानमयो विजन्मा विद्यामयो योगमयः परात्मा ।
चित्ते धृतो नो तपसि स्थितेन वृथा० ॥ २१ ॥
रं० सुलक्षणा मानवती गुणाढ्या प्रसन्नवक्त्रा मृदुभाषिणी या ।
नो चुम्बिता येन सुनाभिदेशे वृथा० ॥ २२ ॥
शु० पत्न्यर्जितं सर्वसुखं विनश्वरं दुःखप्रदं कामिनिभोगसेवितम्
एवं विदित्वा न धृतो हि योगो वृथा० ॥ २३ ॥
रं० विशालवेणी नयनाऽभिरामा कन्दर्पसंपूर्णनिधानरूपा ॥
भुक्ता न येनैव वसन्तकाले वृथा गतं० ॥ २४ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शु० मायाकरण्डी नरकस्य हण्डी तपोविखण्डी सुकृतस्य भण्डी।
नृणां विखण्डी चिरसेविता चेद्वृथा० ॥ २५ ॥
रं० समस्तशृंगारविनोदशीला लीलावती कोकिलकण्ठनाला ।
विलासिता नो नवयौवनेन वृथा० ॥ २६ ॥
शु० समाधिहन्त्री जनमोहयित्री धर्मे कुमन्त्री कपटस्य तन्त्री ।
सत्कर्महन्त्री कलिता च येन वृथा० ॥ २७ ॥
रं० बिल्वस्तनी कोमलिता सुशीला सुगन्धकुन्ता ललिता च गौरा।
नाऽऽश्लेषिता येन च कण्ठदेशे वृथा० ॥ २८ ॥
शु० चिन्ताव्यथा दुःखमयी सदोषा संसारपाशा जनमोहकर्त्री ।
संतापकोशा भजिता च येन वृथा० ॥ २९ ॥
रं० आनन्दकन्दर्पनिधानरूपा झणत्कणत्कङ्कणनूपुराऽऽढ्या ।
नाऽऽस्वादिता येन सुधाऽधरस्था वृथा गतं० ॥ ३० ॥
शु० कापट्यवेषा जनवञ्चिका सा विण्मूत्रदुर्गन्धदरी दुराशा ।
संसेविता येन सदा मलाढ्या वृथा गतं० ॥ ३१ ॥
रं० चन्द्राऽऽनना सुन्दरगौरवर्णा व्यक्तस्तनी भोगविलासदक्षा।
नाऽऽन्दोलिता वै शयनेषु येन वृथा० ॥ ३२ ॥
शु० उन्मत्तवेषा मदिरासुमत्ता पापप्रदा लोकविडम्बनी या ॥
योगच्छला येन विभाजिता च वृथा० ॥ ३३ ॥
रं० आनन्दरूपा तरुणी नताङ्गी सद्धर्मसंसाधानसृष्टिरूपा ॥
कामार्थदा यस्य गृहे न नारी वृथा० ॥ ३४ ॥
शु० अशौच देहा पतितस्वभावा वपुःप्रगल्भा बललोभशीला ।
मृषा वदन्ती कलिता च येन वृथा गतं० ॥ ३५ ॥
रं० क्षामोदरी हंसगतिः प्रमत्ता सौन्दर्यसौभाग्यवती प्रलोला ।
निष्पीडिता यैर्न रतौ यथेच्छं वृथा० ॥ ३६ ॥
शु० संसारसद्भावनिकामा निरस्य घोरा हृदि निर्दयाच ।
विहाय योगं कलिता नरेण वृथा गतं० ॥ ३७ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रं० सुगन्धैः सुपुष्पैः सुशय्या सुकान्ता वसन्तो ऋतुः पूर्णिमा पूर्णचन्द्रः
यदा नास्ति पुंस्त्वं नरस्य प्रभूतं ततः किं ततः किं ततः किं ततः किं ३८
शु० सुरूपं शरीरं नवीनं कलत्रं धनं मेरुतुल्यं वचश्चारुचित्रम् ।
हरेरंघ्रियुग्मे मनश्चेदलग्नं ततः किं० ॥ ३९ ॥
इति रम्भाशुकसंवादे शृंगारज्ञाननिर्णयः ।

राधाकृष्ण संवादः ।

का सुन्दरी वल्लववल्लभासु त्वच्चित्तभित्तौ वद शालभञ्जी ।
त्वं मालतीमण्डितकेशपाशे मच्चित्तभित्तौ किल शालभञ्जी १
पुरातनस्याऽपि च निर्जरत्वे को नाम हेतुर्वद सत्यमेव ।
लावण्यधन्ये वृषभानुकन्ये तवाऽधरोत्थाऽमृतपानमेव ॥२॥
पयोधरे विद्युदभून्मुरारे पयोधरो विद्युति नैव दृष्टः ।
राधे स्थितायां त्वयि विद्युतीह पयोधरद्वन्द्वमिदं व्यलोकि ३
दातुं शरीरं परपूरुषाय नैवोत्सहेऽहं नरकाद्बिभेमि ।
दत्ते शरीरे नरकस्य हन्त्रे का नाम भीतिर्नरकाद्भवत्याः ४
त्वां वल्लवीजारमहर्निशं या सीमन्तिनी गायति किं फलं सा ।
प्राप्नोति राधे व्यभिचारदोषान्मुच्येत्तथाऽसौ भवनागपाशात् ५
निशाऽवसाने तव विप्रयोगात्प्राणा मदीया विकलीभवन्ति ।
राधे वद प्राणपतेर्वियोगे प्राणाः कथं नो विकलीभवेयुः ॥ ६ ॥
निर्भासि चित्ते व्रजसुन्दरीणां कामं विभो लोचनगोचरस्त्वम्
किमत्र चित्रं तव भाति चित्ते कामस्य राधे जनकोऽहमस्मि ७

---

१ गोपस्त्रीषु २ चित्तमेव भित्तिः कुड्यं तस्याम् ३ पुत्तलिका 'पुतली' इति लोके ४ जीर्णस्यापि ५ जरारहितत्वे देवत्वे च ६ अमृतपानेन हि निर्जरत्वं प्रसिद्धम् ७ मेघे ८ स्त्री ९ भवः संसार एव नागपाशस्तस्मात् १० व्याकुला भवन्ति ११ उत्पन्नः वयसि १२ दृग्विषयीभूतः

CC-0. Prof. Satya Vrat Shastri Collection.

जना जगत्यां जगदीश शश्वत्[1]त्वां राधिकाजारमुदाहरन्ति ।
निन्दन्तु लोका यदि वा स्तुवन्तु प्राणेश्वरीं त्वां न परित्यजामि ८
[2]कलानिधिं गोकुल[3]राजमानं श्यामा[4]प्रियं त्वां विधुं[5]मेव मन्ये ।
त्वदुक्तरीत्या विधुशब्दवाच्यं राधाधवं मां न कथं ब्रवीषि ९
भक्तिर्मया सा कतमा विधेया यया प्रसादो भवतो मुरारे ।
मम प्रसादाय विधेहि राधे भक्तिं परामा[6]त्मनिवेदनाख्याम् १०
वि[8]धिं समुल्लङ्घ्य पराङ्गनासु प्रसंगमङ्गीकुरुषे कथं नु ।
[9]विधेर्विधातुर्विधिलङ्घने मे का नाम भीतिर्भण भामिनीह ११
[10]उदीर्यमाणेऽपि च सान्त्व[11]वादे मा[12]नापनोदो नहि राधिकायाः
मनोऽस्तु ते यद्यप[13]राधिकः स्यां स्वप्नेऽपि नैवाऽस्म्यप[14]राधिकोऽहम्
मु[15]क्तिं स[16]मीयुर्भवभीतिभाजो भवत्पदाम्भोजरजो जु[17]षन्तः ।
बद्धस्त्वयाऽहं भुजवल्लरीभ्यां राधे निकुञ्जे मधुमाधवीनाम् १३
आभीरनार्याः करमादधानो न शङ्कसे माधव किं ब्रवीषि ।
पल्लीपतिर्वल्लववल्लभायाः करग्रहे किं विदधीत शङ्काम् १४

अथाश्वधाटीकाव्यम् ।

श्रीः ॥ अङ्काहृतक्षितिजमङ्काऽनभिज्ञशशिशङ्काकराऽऽस्यसुषमं
टङ्कारिचापमनुलङ्काऽऽशरक्षतजमङ्काऽवरूपितशरम् ।

---

१ निरन्तरम् २ कलानां चतुःषष्टिमितानां निधिम् पक्षे कलानां षोडशानां निधिम् ३ गोकुले व्रजे. पक्षे गोकुलैः किरणसमूहैः शोभमानम् ४ श्यामा षोडशवार्षिकी पक्षे श्यामा रात्रिः ५ चन्द्रम्. ६ नवविधभक्तिष्वात्मनिवेदनरूपाभक्तिः पुराणप्रसिद्धा. अत्र तु आत्मनिवेदनं स्वदेहार्पणमित्यर्थः ७ शास्त्रम् ८ ब्रह्मणः ९ कथय. १० उच्चार्यमाणे. ११ प्रेमपरसंभाषणम् १२ अभिमानदूरीकरणम् १३ अपराधयुक्तः स्वार्थे कप्रत्ययः १४ अपगता राधिका यस्मात् सः १५ मोक्षमोचनं च. १६ प्राप्नुयुः १७ सेवमानाः

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं कामदं विहितरङ्काऽवनं दनुजकङ्कालनोदिनमना-
तङ्काय वत्स भज तं कालमेघरुगहंकारहारिवपुषम् ॥ १ ॥
मागा मनस्त्वमनुरागाऽतिभूमिमुपभोगावनामुमनसा
माऽऽगारदारसुतयोगा न किं बत वियोगात्मकाः परिणतौ ।
यागादिजन्यपरभागा अविग्रहविभागार्हशैलतनयं
वेगादुपास्व भवरोगाऽपहं विधृतनागाऽजिनं पुररिपुम् ॥ २ ॥

अङ्केति। हे वत्स त्वं अनातङ्काय आतङ्को भवरोगस्तन्निवृत्त्यर्थं अङ्के आवृता क्षिति जा सीता येनैवंविधं तं रामं भजेत्यन्वयः । कीदृशं तं अङ्को लाञ्छनं तदनभिज्ञो यः शशी तच्छङ्काकरी आस्यसुषमा मुखकान्तिर्यस्यैवंभूतम् । पुनः की० टंकारः प्रत्यञ्चा शब्दस्तद्विशिष्टश्चापो धनुर्यस्य तं । अनु पश्चात् । पुनः की० लङ्कासंबंधिनो ये आशरा राक्षसास्तेषां रक्तकर्दमेन लिप्तः शरो यस्य । पुनः की० कामान् भक्तमनोरथान् ददाति सः एवंभूतम् । पुनः की० विहितं रङ्काणां दीनानामवनं रक्षणं येन तम् । पु० की० दनुजो दुन्दुभिनामा दानवस्तस्य यः कङ्कालः अस्थिपञ्जरस्तं नुदति क्षिपतीत्येवंभूतम् । सुग्री वाय स्वबलं प्रदर्शयितुं वालिहतस्य कस्यचिद्दानवस्यास्थिपञ्जरं रामो वामपदाङ्गुष्ठे न सलीलं चिक्षेपेति रामायणे प्रसिद्धम् । पु० की० नीलमेघस्य कान्तिविषये योऽहंकारः मत्सदृशमन्यन्नीलं नास्तीत्येवं रूपस्तं हरतीत्येवंभूतं वपुः शरीरं यस्य अतिनील- वपुषमित्यर्थः ॥ १ ॥

संप्रति स्वमन उपदिशति । हे मनः त्वं उपभोगान् स्रक्चन्दनादिविषयान् अवाप्तुं प्राप्तुं अनसा रथेन अनुरागातिभूमिं परां काष्ठां मा गा मा गच्छ । ननु किम र्थं मां वारयसीति चेत्तत्राह । मागारदारसुतयोगाः मा लक्ष्मीः अगारं गृहं दारा स्त्री सुताश्च एषां संयोगाः परिणामे वियोगात्मकाः न किं अपि तु तथैव । बतेति खेदे । स्वर्गसुखमपि तथैवेत्याह यागादिना ज्योतिष्टोमादिना उत्पन्ना ये परा उत्कृष्टा भागाः पीयूषाप्सरआदिरूपास्तेऽपि अवसाने वियोगात्मका एवेति पूर्वेण संबन्धः । पर- भागा इति पाठे स्वर्गादयः । तर्हि किमस्माभिः कर्तव्यमित्यपेक्षायामाह पुरारिपुं शिवं वेगाच्छीघ्रमुपास्व भज । कीदृशं पु० अविग्रहविभागार्हशैलतनयं विग्रहेण देहेन यो विभागो भेदस्तमर्हतीति [illegible] तया [illegible] वतीत्येवंविधा शैलतनया

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचा मकरन्दमधुमोचासुधामधुरिमाऽऽचामदक्षरसया
हा चापला न्नरपिशाचानुपासितुमनाचार किं नु यतसे ।
काचाय मा विनट साचाऽऽपदत्र न सुमोचाग्रिमा कमपि तं
प्राचामुपास्यमभियाचाऽपवर्गसुखमाचार्यमाश्रितवटम् ॥ ३॥
खञ्जायितोऽधिमतिगञ्जापरोऽपि बत संजायतेऽत्र धनदः
संजाघटीति गुणपुञ्जायितस्य न तु गुञ्जामितं च कनकम् ।
किं जाग्रती जयसि किं जानती स्वपिषि सिञ्जानन्नूपुरपदे
तञ्जापुरेशि नवकञ्जाक्षि साधु तदिदं जातु वा किमु शिवे ॥ ४॥

गस्य तम् । अत्यन्तानुरागवशादर्धाङ्गीकृतदारामित्यर्थः । पु० की० भव एव रोगस्त-मपहन्तीति तथाभूतम् । पु० की० विधूतं नागस्य अजिनं चर्म येन तं गजकृत्ति-वाससमित्यर्थः ॥ २ ॥

पूर्वश्लोकान्मन इत्यनुसंधेयं हे अनाचार मनः अथ वा जीवसामान्येनायमुपदेशः हे अनाचार जीव । त्वं मकरन्दः पुष्परसः मधु क्षौद्रं मोचा कदलीफलं सुधा अमृतं एतत्सम्बंधि यो मधुरिमा माधुर्यं तस्याचामे भक्षणे दक्षौ रसौ यस्यास्तया विधया तुच्छीकृतमकरन्दादिरसमाधुर्ययेत्यर्थः । एतादृशा वाचा वाण्या । हा इति खेदे । चापलान्मौर्ख्याद्धेतोर्नरपिशाचान्नररूपान् पिशाचान् पिशाचतुल्यानधमानरानित्यर्थः । उपासितुं तन्मनो रञ्जयितुं किं नु यतसे किमर्थं यत्नं करोषि । नन्वापत्परिहाराय तथा करोमीति चेद्यथाकथंचिद्द्रव्यादिलाभेनैतादृशाल्पापत्परिहारेऽपि मरणादिपरंपरारूपमहापदो विद्यमानत्वेनैतस्यां किंचित्करत्वाद्विफलोऽयमुद्यमस्तव उक्तमहापत्परिहारस्तु तेभ्यो नरपिशाचेभ्यो दुर्घट इत्याक्षिप्य सर्वथापत्परिहारोपायमुपदेष्टुमाह । काचाय काचवत्तुच्छं धनादि लब्धुं मा विनट नरपिशाचानामग्रे नृत्यं मा कुर्वित्यर्थः । यतोऽग्रिमा अग्रतः स्थिता सा निरतिशयदुःखप्रदत्वेन प्रसिद्धा आपत् मरणादिरूपा आपत्तिः अत्र अस्मिन्नरपिशाचानुसरणे सति न सुमोचा मोचयितुमशक्येत्यर्थः । तर्हि किं कर्तव्यमित्यपेक्षायामेवं कुर्वित्याह । कमपि अनिर्वचनीयं प्राचां ब्रह्मादीनामुपास्यं आश्रितवटमाचार्यम् श्रीदक्षिणामूर्तिं प्राति अपवर्गसुखमाभियाच प्रार्थय ॥ ३ ॥

CC-0. Prof. Satya Vrat Shastri Collection

अधिमति मतौ खञ्जायितः खञ्जवदाचरितः कुण्ठितमतिः पङ्गुः इत्यर्थः तथैव गञ्जापरोऽपि मदिरागृहासक्तोऽपि नरः धनदः संजायते कुबेरतुल्यधनवान् भवती

Digitized by Arya Samaj Foundation Chennai and eGangotri

आटीकसेऽङ्ग करिघोटीपदातिजुषि वाटीभुवि क्षितिभुजां
चेटीभवंस्तदपि शाटी न ते वपुषि वीटी न चाधिवदनम् ।
कोटीररत्नपरिपाटीभृशाऽरुणितजूटीविधुं तनुलस-
त्पाटीरलिप्तिमिभधाटीजुषं सुरवधूटीनुतां भज शिवाम् ॥५॥

पण्डावदग्रिम पिचण्डाऽवपूर्तिमनु रण्डाविधेयकुटिलो-
द्दण्डाविवेकधनिचण्डालगेहभुवि दण्डाऽऽहतिं किमयसे ।
खण्डाऽमृतद्युतिशिखण्डामुपास्व सुरखण्डार्चिताऽङ्घ्रिकमलां
भण्डासुरद्रुहमचण्डात्मिकां चितिमखण्डां जडात्मसुखदाम् ॥६

त्यर्थः गुणपुञ्जायितस्य गुणनिधेर्नरस्य गुञ्जामितमपि कनकं न संजाघटीति न लभ्यते इत्यर्थः । हे शिवे त्वं जाग्रती सती किं जयसि, जानती त्वं स्वपिषि किम् । तदिदं पूर्वोक्तं साधु शोभनं किमु वा । सिञ्जानौ शब्दायमानौ नूपुरौ ययोरेवं भूते पदे चरणे यस्याः । तंजापुरं 'तंजौर' इतिप्रसिद्धं केचित्तुळजापुरमिति वदन्ति तस्य स्वामिनी । नवीनं यत्कञ्जं कमलं तद्वदक्षिणी यस्याः ॥ ४ ॥

एवं स्वकीयमनसः समाधानं कृत्वाऽन्यमुपदिशति आटीकसे इति । हे अङ्ग त्वं चेटीभवन् दास सन् करिघोटीपदातिजुषि हस्त्यश्वपदातिसेवितायां क्षितिभुजां राज्ञां वाटीभुवि उद्यानभूमौ आटीकसे परिभ्रमणं करोषि तदपि तथापि ते तव वपुषि शाटी शरीरपरिधानार्थं वस्त्रं नास्ति । परं च अधिवदनं वदने वीटी ताम्बूलं नास्ति एवं च व्यर्थभ्रमकारी त्वमतीव मूर्खोऽसीति भावः । तर्हि मया किं कार्यमिति तत्राह । कोटीरो मुकुटस्तस्य या रत्नपरिपाटीमाणिक्यपंक्तिस्तया भृशमत्यन्तमरुणितो रक्तो जूटीविधुः केशपाशसमीपवर्ती भालचन्द्रो यस्यास्तामेवंभूतां तनौ लसन्ती शोभमाना पाटीरलिप्तिश्चन्दनलेपो यस्यास्तां । तथा इभो गजस्तस्य धाटी गतिस्तां भजन्तीं । सुराणां वधूट्यः स्त्रियस्ताभिर्नुतां स्तुतां शिवां पार्वतीं भज ॥ ५ ॥

पण्डेति । हे पण्डावदग्रिम पण्डितश्रेष्ठ पिचण्डस्योदरस्यावपूर्तिर्भरणं तामनुलक्षीकृत्य रण्डानां पांसुलानां विधेया वचनग्राहिण आज्ञापालकास्ते च ते कुटिला वक्रा उद्दण्डा उद्धता अविवेकिनो विवेकशून्या एतादृशा ये धनिनस्त एव चण्डालास्तद्गेहभुवि दण्डाऽऽहतिं दण्डप्रहारं किमयसे प्राप्नोषि उद्धताः पुरुषा गृहमागतं

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गाढा त्वया सपदि राढापुरी वसुनि बाढाऽववद्धरतिना
सोढा तथा तपनगाढाऽऽतपप्रसररूढाऽतिवृष्टिविततिः ।
मूढाऽपि किं फलमगूढा जरैव शिरसोढा कुतो न विनुतो
द्रोढा जनोर्जनितषोढामुखः समिति वोढा स हाटकगिरेः ॥ ७॥

दन्तावलाश्वभृति चिन्तापरोऽसि बत किं तावता वद फलं
हन्ताखिलं क्क च न गन्ता तदेतदथ संतापमञ्चसि परम् ।
त्वं तात भावय दुरन्तारमानवरतं तामसः स्वपिहि मा
संतारकं विनतसंतानकं सपदि तं तावदाश्रय शिवम् ॥ ८॥

याचकं दण्डेन ताडयन्तीति सर्वेषां विदितमेव तस्मात् हे जड पठन्मूर्ख खण्डामृतद्युतिः अर्धचन्द्रः शिखण्डः शिरोभूषणं यस्यास्तां । सुराणां देवानां खण्डः समूहस्तेनार्चितं पूजितं अङ्घ्रिकमलं पादपद्मं यस्यास्तां अखण्डां चित्ति अखण्डचिद्रूपिणीं अचण्डात्मिकां अचण्डः अकोपनः आत्मा स्वभावो मनो वा यस्यास्तां । भण्डासुरद्रुहं भण्डासुरघातिनीमम्बां उपास्व तस्या उपासनां कुर्वित्यर्थः ॥ ६ ॥

गाढेति । वसुनि धने बाढावबद्धरतिना बाढं दृढं अवबद्धा रतिः प्रीतिर्येन तादृशेन त्वया राढापुरी नगरीविशेषः गाढा प्रविष्टा । तथा तपनः सूर्यस्तस्य गाढोऽत्युग्रो य आतपप्रसरस्तेन रूढाप्रकर्षेणोद्भूता सा चासावतिवृष्टिस्तस्या विततिर्विस्तारः सोढा त्वयेति शेषः । षमृहर्षणे । रे मूढ अगूढा व्यक्ता जरैव शिरसा ऊढा धृता एवं कृत्वापि किं फलं त्वयाप्तं न किंचिदपीत्यर्थः अतः क्लेशमात्रफलदमुद्यमं त्यक्त्वा स प्रसिद्धः परमेश्वरस्त्वया कुतः कारणान्न विनुतो विशेषेण स्तुतः । कोऽसावित्यत्राह जनितः षोढामुखः षण्मुखो येन षडाननपितेति यावत् । जनोर्जन्मनः भवस्येति यावत् उपलक्षणमिदं । जन्मप्रभृति मरणान्तदुःखसंघस्य द्रोढा द्रोहकृत् नाशक इत्यर्थः । समिति त्रिपुरवधसंग्रामे हाटकगिरेः स्वर्णपर्वतस्य मेरोरित्यर्थः वोढा वहनकर्ता । त्रिपुरासुरवधकाले त्र्यम्बकः पृथ्वीं रथं ब्रह्माणं सारथिं मेरुं धनुर्विष्णुं शरं चन्द्रार्कौ रथचक्रे कृत्वा त्रिपुरं हतवानिति पुराणेषु प्रसिद्धम् ॥ ७ ॥

दन्तावलेति । रेमदान्ध त्वं गजाश्वभरणचिन्तापरः असि तावता तवेति शेषः किं फलमस्तीति वद कथय । ननु गजाश्वाधिरोहणोपभोगेन मनसः परमाह्लाद एव फलमिति चेत् भ्रान्तोऽसि इत्याह । हन्तेति खेदे तदेतत् गजाश्वप्रभृति सर्वं कृत्वाऽपि

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्दारुलोकततिमन्दारपादपममन्दायमानकरुणं
वृन्दावनोढपशुवृन्दाऽवनं प्रणतवृन्दारकं चरणयोः ॥
नन्दाऽऽदृतं कुशलसन्दायि तत्किमपि कन्दायितं श्रुतिगिरां
कुन्दाभकीर्ति मुचुकुन्दार्चितं हृदि मुकुन्दाह्वयं स्मर महः ९
क्रोधाऽऽकुलो विगतबोधाऽन्वयोऽसदनुरोधाऽनुगो न भव भोः
साधारणी न खलु बाधा भवस्य भुवि गाधा न मोहवसतिः।
वेधा गुरुश्च पटुमेधा विभुर्नहि निषेधाय कर्म वितते-
राधाय तात हृदि राधाविटाऽङ्घ्रियुगमाधारतां व्रज मुदाम् १०

दन्ता गमिष्यति त्वत्तो बलीयांसं प्रतीतिभावः अथ अनन्तरं परं सन्तापं अञ्जसि प्राप्नोषि। तस्मात् हे तात रमा लक्ष्मीः दुरन्ता दुष्परिणामा इति त्वं भावय विचारय। परं चानवरतं सततं तामसः सन् तमोगुणाभिनिविष्टः सन् मा स्वपिहि मा शयीथाः अज्ञानान्धो माभूरित्यर्थः। तर्हि विनतसन्तानकं भक्तकामकल्पद्रुमं तं शिवं तावन्निश्चयेन सपदि सत्वरं आश्रय आश्रयं कुरु तेन तवाखण्डितं कल्याणं स्यादिति भावः॥ ८॥

अथ वा विष्णुभक्तिं कुर्वित्याह वन्दारुलोकेति। वन्दनशीललोकानां या ततिः परम्परा तस्या मन्दारपादपः कल्पवृक्षस्तत्। अमन्दायमानकरुणं अनल्पदयावत्। वृन्दावने व्रजे ऊढा वृद्धिं गता ये पशवो गोमहिष्यादयस्तेषां वृन्दं समूहस्तस्य रक्षकं। प्रणता नम्रा वृन्दारका देवा यस्य तत्। नन्देन गोपेनादृतं सत्कृतं। कुशलं कल्याणं ददाति इत्येवंशीलम्। श्रुतिगिरां वेदवाणीनां कन्दायितं मूलभूतं कुन्दपुष्पवद्धवला कीर्तिर्यस्य तत्। मुचुकुन्दाभिधेन राज्ञा अर्चितं पूजितं मुकुन्दसंज्ञकं मुक्तिदायकं। महस्तेजः। स्मर स्मृतिपथमानय॥ ९॥

उपदेशान्तरमाह। क्रोधेति। भोः पौत्र मदीयं वचनं प्रतिकूलं मत्वा त्वं क्रोधाकुलः क्रोधव्याप्तः विगतः बोधान्वयो ज्ञानानुवृत्तिर्यस्य तथाभूतः सन् असतां दुष्टानामनुरोध आनुकूल्यं तदनुगच्छतीति तथाविधो मा भूः। कुतः भवस्य संसृतेर्बाधा पीडा साधारणी सामान्या न खलु भुवि मोहवसतिः मोहस्थानं गाधा उत्ताना स्वल्पेत्यर्थः न भवति किंच पट्वी समर्था मेधा बुद्धिर्यस्य तथाभूतो वेधाः ब्रह्मा च परं गुरुराचार्यः कर्मविततेः प्राक्तनकर्मविस्ताररूपिणः सुखदुःखर

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नानाविधे जनुषि का नाम सौख्ययुजिरानाकपृष्ठमपि वा
जानासि यद्विषयसूनारुचिर्भवसि दूनाऽऽशयो भृशतरम् ॥
मानाऽतिगो विहितदानाध्वरादिरिह कीनाशभीतिरहितो
मीनायताक्षमधिगानादरं कलय सूनास्त्रजीवनहरम् ॥ ११ ॥

संसारस्य निषेधाय नाशाय विभुः समर्थो न भवति हीति निश्चयेन । अतः हेतात राधाविटो राधिकाजारः श्रीकृष्णस्तस्याऽङ्घ्रियुगं चरणद्वन्द्वं हृदि मनसि आधाय ध्यात्वा मुदा मोक्षसुखानां आधारतां पात्रतां व्रज गच्छ ॥ १० ॥

नानाविधेति । हेतातेत्यनुषञ्जनीयं नानाविधे अनेकप्रकारे नृदेवतिर्यगादिरूपे जनुषि जन्मनि सौख्ययुजिः सौख्ययोगः आनाकपृष्ठं स्वर्गलोकमभिव्याप्यापि का नाऽस्ति स्वर्गादीनामपि क्षयिष्णुत्वेन न काप्यस्तीत्यर्थः । इहेर्ष्याद्वेषादिजन्यक्लेशवत्स्वर्गादिलोकेष्वपि पुण्यतारतम्येन भोगेषूत्कर्षापकर्षयोः सत्त्वेन पुण्यपरिक्षये पतनभयेन चेतोऽप्यधिकतरक्लेशसत्त्वादिति भावः । एतदहमेव कथयामीति मा मन्यस्व किंतु स्वयमेवाग्रे त्वं ज्ञास्यसीत्याह जानासीति । यत् यदा त्वं विषयसूनारुचिः विषयेषु तत्पूर्तये सूनायां रागप्राप्तायां वा रुचिरभिलाषो यस्यैवंविधो भवसि तदा भृशतरमत्यन्तं दूनाशयः क्लेशादिबाहुल्येनोपतप्तान्तःकरणः सन् जानासि । मया बोधितमिहामुत्र सुखाभावं ज्ञास्यसीत्यर्थः । उभयत्र 'वर्तमानसामीप्ये वर्तमानवद्वेति लट् तस्मादुभयत्र निरवधिसुखकामना चेदेवं कुर्वित्याह । मानातिग इति मानं प्रमाणमतीत्य गच्छतीति मानातिगः एतावत एव दानयागादयो मया कर्तव्या इत्येवमियत्तां विहायेत्यर्थः । विहितदानाध्वरादिः कृतदानयजनादिः अत एव कीनाशभीतिरहितो यमभयरहितः सन् मीनायताक्षं मत्स्यसदृशदीर्घनयनं । अधिगानादरं अधि अधिको गानविषये आदरो यस्य तं गानप्रियमित्यर्थः । सूनास्त्रः कुसुमायुधः कामस्तस्य जीवनं हरतीति तथाविधस्तं स्मरहरं सदाशिवमित्यर्थः । भज सेवस्व । इह दानयजनादिजन्यपुण्यबलाद्यमभयनिवृत्त्या चित्तस्वास्थ्येनाक्षय्यानन्दरूपतावाप्ति [illegible]ति भावः ॥ ११ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सापायमेत्य वपुरापातरम्यमनुतापाद्दते सकुतुकं
द्वीपानगाहिषि समीपाऽतिगानकृतभीपातखेदगणनः ॥
भूपानसेविषि सुरूपाकृतेऽहह न तूपागमं सुखलवं
गोपाय मां सपदि गोपालधुर्य तव कोपाय नाऽस्मि विषयः॥ १२

किं बाल न स्फुरति सम्बाधकं भृशविडम्बाऽऽस्पदं परिणतौ
निम्बादितिक्तरससम्बाधमत्र ननु बिम्बाऽधराविलसितम् ॥
लम्बाऽलकां धुतविलम्बादरां घुसृणजम्बालजालविलस—
द्बिम्बामनूनशशिबिम्बाऽऽननां सततमम्बामुपास्व सदयाम्॥ १३

सापायेति । सापायं नाशयुक्तं आपातरम्यं पतनं मर्यादीकृत्य रमणीयं पतने सत्यतीव निन्द्यं ईदृशं वपुः शरीरं एत्य प्राप्य न कृता भियः भयस्य पातस्य च खेदानां गणना येन तादृशोऽहं समीपातिगान् दूरानित्यर्थः द्वीपान् देशविशेषान् गाहिषि धनेच्छया प्रोषितवानस्मि । हे सुरूपाकृते भूपानसेविषि सेवितवानस्मि । एवं कृत्वापि सुखलवं सुखलेशं न तु उपागमं न प्राप्तवानस्मि । अतो हे गोपालधुर्य श्रीकृष्ण सपदि मां गोपाय पाहीत्यर्थः । तव कोपायाहं विषयो नास्मि ममोपरि कोपं मा कुर्वित्यर्थः ॥ १२ ॥

किमिति । हे बाल मूढ अत्रामुष्मिन् लोके बिम्बाधराविलसितं बिम्बं पक्वतुण्डिकेरीफलं तद्वदरुणोऽधरो यासां तासां विलसितं विलासः संबाधकं अत्यन्तं बाधकं तथा भृशविडम्बास्पदं अत्यन्त प्रतारणात्मकं तथा परिणतौ परिपाकावस्थायां निम्बादिवत्तिक्तरससम्बाधं निम्बादिवत्तिक्तरसेन व्याप्तं ईदृशं न स्फुरति किं । अपि तु भासत एवेत्यर्थः । अतस्तदनुरागं परित्यज्य अम्बां पार्वतीं जगन्मातरमित्यर्थः उपास्व भज । कीदृशीं लम्बालकां दीर्घकेशीं । पुनः कीदृशीं धुतविलम्बादरां धुतस्तिरस्कृतो विलम्बो भक्तरक्षणविषयस्तस्मिन् आदरो यया तां । पुनः कीदृशीं घुसृणं कुंकुमं तस्य यज्जम्बालजालं पङ्कजालं तद्वद्विलसद्बिम्बं तत्सदृशओष्ठौ यस्यास्तामारक्तौष्ठीमित्यर्थः । पुनः कीदृशीं अनूनशशिबिम्बाननां पूर्णचन्द्रमण्डलमुखीं तथा सदयाम् ॥ १३ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रम्भादिगाढपरिरम्भाऽऽदरेण सुचिरं भावतोऽत्र यजसे
त्वं भावयस्व किमु शं भाव्यनेन जड सम्भावितक्षयमिदम् ॥
स्तम्भादुदित्वरमहंभावतः कलय जम्भारिसंस्तुतपदं
तं भावुकप्रदमदम्भाकुलो नखरसंभारदारितरिपुम् ॥१४॥

रामार्चिताऽङ्घ्रिरभिरामाऽऽकृतिः कृतविरामा सुपर्वविपदां
कामाऽर्तिहृत्सफलकामा निदेशरतकामादिनिर्जरवधूः ॥
भामा हरस्य नुतभामा जपासदृशभा माननीयचरिता
सा मामवत्वखिलसामादृतस्तुतिरसामान्यमुक्तिसुखदा॥१५॥

रम्भादीति । रम्भादीनां स्वर्वेश्यानां गाढपरिरम्भो गाढालिङ्गनं तस्य आदरेण लोलुपतया सुचिरं बहुकालं भावतः श्रद्धया अत्र इह लोके यजसे ज्योतिष्टोमादीन् करोषि । अनेन क्रतुयजने शं सुखं किं भावि भविष्यति इति त्वं भावयस्व विचारं कुरु । रे जड मूर्ख इदं यागार्जितं स्वर्गसुखं संभावितक्षयं अवश्यं क्षयशीलं तस्मात् अदम्भाकुलः दम्भो गर्वः सोमयाज्यहमिति तेन आकुलो व्याप्तो न भवतीति तथाभूतः सन् अहंभावतः सोऽहं भावेन तदाकारवृत्त्येति भावः । स्तम्भात् उदित्वरं प्रादुर्भूतं नृसिंहमित्यर्थः । तं कलय चिन्तय तस्य ध्यानं कुर्विति यावत् । कीदृशं जम्भारिसंस्तुतपदं जम्भारिणा इन्द्रेण संस्तुतं पदं यस्य । पुनःकीदृशं भावुकप्रदं क्षेमदातारं । पुनःकीदृशं नखरसम्भारदारितरिपुं नखरसंभारेण नखसमूहेन दारितः विदारितः रिपुः हिरण्यकशिपुर्येनैवं भूतम् ॥ १४ ॥

रामेति । रामार्चिताङ्घ्रिः रामवन्दितपदा । अभिरामा मनोहरा आकृतिर्यस्याः । सुपर्वविपदां दैत्यकृतदेवविपत्तीनां कृतविरामा विरामो नाशः । कामार्तिहृत्कामपीडानाशिका । सफलकामा अवन्ध्यमनोरथा । निदेशः आज्ञा तस्मिन् रतास्तत्परा कामादिनिर्जराणां वध्वो रत्यादयो यस्याः सा । हरस्य शिवस्य भामा स्त्री नुतः भामः क्रोध असुरवधकालोत्पन्नो यस्याः सा अत एव जपासदृशा भा कान्तिर्यस्या अरुणेत्यर्थः । माननीयं पूजनीयं चरितं यस्याः सा इदृशी सा प्रसिद्धा देवी भवानीत्यर्थः । मां अवतु रक्षतु । शेषं स्पष्टम् ॥ १५ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

माया तवेयमुरुगायाऽविवेकनिधिमायामिनी किमपि मा-

मायासयत्यकृतजायातनूजधनकायादिदोषकलनम् ।

सा यातना तु निरपाया मता जगति हा यामि कं नु शरणं

मायानिवास परिपाया नवाम्बुधरदायाददेह भगवन् ॥१६॥

हारं ददासि कुचभारं जिघृक्षसि च सारङ्गचञ्चलदृशः

सा रन्तुमिच्छति हि जारं निषेव्य तव का रञ्जनेह घटताम् ।

स्मारं विहाय मदसारम्भरम्यमनुवारं भज श्रुतिगिरां

सारं महेशमविकारं जनुर्विलयपारं प्रयास्यसि सखे १७

---

१ मायेति । हे उरुगाय पुरुष्टुत आयामिनी विस्तारवती तवेयं माया अविद्या अविवेकनिधि अतएवाकृतं न कृतं जाया भार्या तनूजः पुत्रः धनं स्वर्णादि कायो देहः एषां दोषकलनं दोषचिन्तनं येन तं तथाविधं मां किमपि अनिर्वाच्यं यथा स्यात्तथा आयासयति खिन्नं करोति । कीदृशोऽसावायास इत्याह । सा प्रसिद्धा यातना मरणकालजन्या तु निरपाया दुश्चिकित्स्या सर्वैर्मता । हा इति खेदे जगति मरणधर्मविशिष्टे कं नु शरणं यामि सर्वेपि मत्समा मरणधर्माणो न कोपि शरण्य इति भावः । अतो हे मायानिवास नवाम्बुधरो नूतनमेघः तद्दायादो बान्धवस्तत्सदृश इत्यर्थः देहो यस्य । हे भगवन् षड्गुणैश्वर्यसंपन्न परिपायास्त्वं मां पाहीति भावः १६

हारामिति । हेसखे त्वं सारंगचञ्चलदृशः कुरंगाक्ष्याः कुचभारं जिघृक्षसि ग्रहीतुमिच्छसि । अतएव तस्यै हारं मुक्ताहारं ददासि । सा त्वद्दत्तमुक्ताहारविलस-त्कुचकुम्भा जारं निषेव्य अत्यन्तं प्रसाद्य रन्तुमिच्छति । हि इति निश्चये मद्वाक्ये मा संशयं कुर्वित्यर्थः । इह ईदृशे कपटव्यवहारे तव का रञ्जना घटतां नैवेत्यर्थः । तर्हि किं करोमीति चेदेवं कुर्याः आरम्भरम्यं प्रारम्भकाले रमणीयं परिणामे त्वतीव गर्ह्यमित्यर्थः । स्मारं स्मरसम्बन्धिनं मदं विहाय श्रुतिगिरां वेदवाक्यानां सारं अविकारं विकृतिरहितं कालत्रयाबाध्यमित्यर्थः । महेशमनुवारं भज । किं तेन स्यादिति चेच्छृणु । जनुर्विलययोर्जन्ममरणयोः पारं मोक्षं प्रयास्यसि गमिष्यसि १७

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीलाऽलकानयनलीलाविमोहमयकीलालराशिजठरे

वेलातिलङ्घमनुवेलावमज्जिरिह ते लाघवाय नहि किम् ।

को लाभ एष इति कोलायितो जयसि हालासमस्थितवयः

कालाऽहितं शमितहालाहलं सततमालानयाऽऽत्ममनसा ॥१८॥

दावाऽनलार्चिरिव तावानयं तपति हा वाम्यकृत् कलिरहो

को वाऽपरस्त्वदिह भो वासुदेव मम यो वारयेत तमिमम् ।

सेवाविधानभृशहेवाकसिद्धमुनिदेवाऽधुना चरणयो-

र्भावाऽऽनताय शिशुभावाऽऽश्रिताय

वितराऽऽवासतां निजमुदाम् ॥ १९ ॥

नीलालकेति । नीलालकाया नीलकुन्तलाया नयनलीला कटाक्षविसर्पणं स एव मोहस्तन्मयो यः कीलालराशिः समुद्रः संभोगशृंगाररसस्तस्य जठरे मध्ये वेलातिलंघं अतिकालं अनुवेलं वारंवारं अवमज्जिः प्रतिक्षणमवमज्जनं ते तव लाघवाय लघुत्वाय नहि किं अपि तु सर्वथैव लघुत्वजनिका स्यात् क एष लाभो न कोपीत्यर्थः । अमुमेव लाभं मन्यसे चेत्तत्राह हे हालासमास्थितवयः हालासमं मदिरासमं स्थितं वयस्तारुण्यरूपं यस्य यथा हालामादयति ज्ञानावरणं च करोति तथा तारुण्यमपि कोलायितः सूकरवदाचरितो जयसि नृपशुरूपेणोत्कर्षमावहसीति भावः । तर्ह्येवं कुर्वित्याह शमितं हालाहलं विषं येन तं कालस्य मृत्योराहितं द्वेष्टारं मृत्युंजयमितियावत्। सततं आत्ममनसा आलानय बधान सेवनेन मृत्युंजयं वशीकुर्वित्यर्थः ॥ १८ ॥

दावानलेति । तावान् तावत्परिमाणः वाम्यं कौटिल्यं करोतीति वाम्यकृत् अयं कलिः दावानलार्चिरिव दावाग्निज्वालेव तपति संतापयति । हा इति खेदे अहो इत्याश्चर्ये । भो वासुदेव इहामुष्मिन् लोके त्वदपरःत्वत्तोऽन्यस्तमिमं मम कलिं को वारयते न कोपीत्यर्थः । त्वया तु नन्दव्रजे वत्सा गोपाश्च दावानलाद्रक्षिता इति श्रीमद्भागवते प्रसिद्धमेव तस्मात् सेवाविधाने सेवाकरणे भृशं हेवाकाः स्पर्धायुक्ता एवं भूताः सिद्धाः नारदादयो देवर्षयोनिर्विशेषा वा मुनयः कपिलादयः देवा इन्द्रादयः यस्मिस्तथाभूत हे भगवन् चरणयोर्भवत्पदयोर्भावेन शुद्धान्तःकरणेन आनताय

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आशाभरेण निखिलाऽऽशासु धावनमथाऽऽशातकुम्भगिरिवा
क्लेशाऽऽवहं विविधदेशाऽटनं द्रविणलेशाय नाऽपि ववृते
आशाऽतिदामवितुमाशास्व पाणिधृतपाशामनेकजगता-
मीशामुपासितगिरीशामिहाऽङ्ग दिगधीशाऽर्चितांऽघ्रिनलिनाम् २०

एषा जराशिरसि वेषाऽन्यभावकृदशेषाऽऽमयैकवसति-
स्तोषाय सौम्य नहि दोषाऽऽलयाभृशमपोषाऽऽस्पदीकृतगुणा ।
शेषाऽऽयुषः कुरु विशेषाऽर्हमेतदिह शेषाऽहिक्लृप्तधनुषो
रोषाद्यपास्य तनुशोषावहं कलय योषामनङ्गजयिनः ॥ २१ ॥

नम्राय शिशुभावाश्रिताय मह्यमिति शेषः निजमुदां स्वस्वरूपानन्दानां आवासतां वितर देहीत्यर्थः ॥ १९ ॥

आशाभरेणेति । आशाभरेण द्रव्यलिप्साभरेण आशातकुम्भगिरि स्वर्णपर्वतमभिव्याप्य मेरुगिरिपर्यन्तमित्यर्थः निखिलाशासु सर्वासु दिक्षु धावनमटनं तथा च विविधदेशानामटनं क्लेशावहं क्लेशमात्रफलकं जातमिति शेषः । तद्भ्रमणं द्रविणलेशस्यापि न ववृते नाभूत् । अतो हेतोः हे अंग इह लोके आशातिदां आशामतिक्रम्य या ददाति भगवती तामाशास्व उपास्वेतिभावः । कुतः अवितुं दारिद्र्यादिदुःखात्त्रातुं आत्मानं रक्षितुमित्यर्थः । अस्त्यन्यत् स्पष्टम् ॥ २० ॥

एषेति । हे सौम्य वेषान्यभावकृत् वेषस्य कृष्णकेशत्वादिरूपस्य अन्यभावो वैपरीत्यं वलीपलितत्वादिरूपं करोतीति तथा । चपरं, अशेषामयैकवसतिः सर्वरोगाणां मुख्यस्थानम्, अतएव दोषालया अनेकदोषस्थानभूता तथा भृशमधिकं अपोषास्पदीकृताः गुणाः विद्याभ्यासादयो यया एवंभूता एषा जरा शिरसि आगता तोषाय नहि संतोषं जनयितुं न प्रभवीत्यर्थः । तस्मात् तनुशोषावहं शरीरशोषकारिरोषाद्यपास्य क्रोधादीन् हित्वा शेषायुषः अवशिष्टस्यायुषः विशेषार्हं विशेषयोग्यमेतत्कुरु । किंतदित्याह । इहास्मिन् संसारे शेषाहिक्लृप्तधनुषः शेषाख्यपन्नगेन क्लृप्तं धनुर्येन तथाभूतस्यानंगजयिनः कामजेतुः शिवस्येत्यर्थः योषां स्त्रियं भवानीं कलय आश्रयेत्यर्थः ॥ २१ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसारधन्वभुवि किं सारमामृशसि शंसाऽधुना शुभमते
त्वं साधु संतनु हितं साहसेन तु नृशंसाऽऽहृतेन किमहो ।
हंसाऽऽशयस्थमतिहंसात्मभासमथ तं सामभिः परिगृणन्
कंसाऽरिवन्द्यमवतंसायितेन्दुमिह संसाधयार्थमखिलम् २२

गेहाऽऽत्मजद्रविणदेहादिकं जनितमोहाऽनुबन्धमवितुं
भो हानिरापि कियतीहाऽपि सुस्थितिमतीहा न ते निजहिते।
वाहायितोक्षभवदाहाऽपहं सलिलवाहाऽभकण्ठसुषमं
बाहालसन्मृगमनाहार्यसौख्यकरमाहात्म्यमाभज महः ॥२३॥

संसारेति । संसारधन्वभुवि तापादिजनकत्वात् मरुभूमितुल्ये संसारे किं सारं आमृशसि जानासि न किमपीत्यर्थः। जानासि चेदिदं तावदत्र सारमिति शंस कथय। हे शुभमते अधुना त्वं साधु हितं संतनु। आत्महितं कुर्विति भावः। नृशंसाहृते घातुकपुरुषैः स्वीकृतेन साहसेन परधनपरस्त्रीहरणप्राणिवधादिकेन अहो कष्टं किं स्यात् न किंचित्कल्याणं स्यादित्यर्थः तस्मात् हंसाशयस्थं योगिहृदयस्थं अतिहंसात्मभासं सूर्यमतिक्रान्ता आत्मभाः स्वकान्तिर्यस्य तं सूर्यातिशायितेजस-मित्यर्थः कंसारिवन्द्यं विष्णुपूज्यं अवतंसायितेन्दुं चन्द्रशेखरं भगवन्तं सामभिः प्रेमगीतैः सामवेदस्थैर्मन्त्रैर्वा गृणन् कीर्तयन् अखिलमर्थं चतुर्विधपुरुषार्थरूपं संसाधय संपादय॥ २२ ॥

गेहेति । जनितः उत्पादितः मोहानुबन्धः अज्ञानसम्बन्धो येन तादृशं गेहा-त्मजद्रविणदेहादिकं गेहं गृहं, आत्मजः पुत्रः, द्रविणं द्रव्यं, तद्देहादिकं अवितुं रक्षितुं भोः इहापि अस्मिन् लोके कियती किंपरिमाणा हानिः अनेक दुःखसहन-रूपा स्वार्थोन्मूलनरूपा च आपि प्राप्ता । तथापि ते तव निजहिते स्वहिते सुस्थितिमती यातायातनिवृत्तिविषयिणी ईहा इच्छा न भवति इति शेषः । स्वहितं तु ईश्वरभजनं विना न भविष्यतीत्यतस्तदेव कुर्वित्याह । वाहायितोक्षं वाहनीकृतबलीवर्दं भवदाहापहं संसारतापनाशकं तथा सलिलवाहो मेघस्तस्येवाभा कान्तिर्यस्यास्तथाविधा कण्ठसुषमाकण्ठशोभा यस्य तत् बाहायां हस्ते लसन् मृगो यस्य तत् अनाहार्यं त्रिकालाबाध्यं मोक्षाख्यं सुखं यस्य करं उत्पादकं माहात्म्यं यस्य तथाभूतं नीलकण्ठाख्यं महस्तेजो भज ॥ २३ ॥

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वालीयुतश्रवणपालीयुगा ललितचूलीविराजिबकुला
केलीगतानुगमरालीकुला मधुरमालीभिराहतकथा ।
नालीकदृक्कुसुमनालीकपाणिरिह कालीयशासिसहजा
तालीदलाभतनुमाली सदा भवतु काली शुभाय मम सा २४

दक्षाऽध्वरप्रशमदक्षाऽऽग्रहं विबुधपक्षाऽभिपालनपरं
लक्षाऽमृतद्युतिवलक्षात्मकं हृतविपक्षाऽऽत्तविस्मयकथम् ।
लक्षाऽधिरोहिहतलक्षाऽसुरप्रकरमक्षामताश्रयदयं
त्र्यक्षाऽऽह्वयं प्रणतरक्षामणिं प्रणयियक्षाऽधिपं स्मर महः २५

वालीति । सा काली मम शुभाय भवतु । कीदृशी सा वालीयुतश्रवणपाली-युगा वाली केशगुच्छः अथ वा बवयोः सावर्ण्यात् बाली कर्णभूषणविशेषः तया युतं श्रवणपालीयुगं यस्याः सा. । पुनः कीदृशी ललिता रम्या या चूली कर्णमूलं तस्यां विराजमानं बकुलपुष्पं यस्याः सा । तथा केल्या क्रीडया यत् गतं गमनं तदनुगं तदनुगामि मरालीकुलं हंसीसंघो यस्याः । यद्गतिसदृशगतिशाली हंसीसमूहः सेत्यर्थः । तथा आलीभिः सखीभिर्मधुरं यथा स्यात्तथा आदृता कथा यस्याः अलीका अनृता न अलीका नालीका सफलेत्यर्थः तादृशी दृक् यस्याः सा अमोघद र्शनेत्यर्थः । कुसुमसहितं नालीकं इतरपुष्पसहितं कमलं पाणौ यस्याः । तथा कालीयः यमुनाह्रदस्थः कृष्णसर्पस्तं शास्तीति कालीयशासी कृष्णस्तत्सहजा तद्भगिनी यशोदोदरे दुर्गाप्रादुर्भावस्य भागवते प्रसिद्धत्वात् तथा तालीदलस्येवाभा यस्या एतादृशी या तनुस्तया मालते सा श्यामवर्णेत्यर्थः ॥ ३४ ॥

दक्षेति । हे वत्स त्र्यक्षाऽऽह्वयं त्रिलोचनाख्यं महः शिवाख्यं तेजः स्मर चे-तय । कीदृशं तत् दक्षयज्ञध्वंसने दक्षः पटुः आग्रहो यस्य । पुनः कीदृशं लक्षसंख्याका ये अमृतद्युतयश्चन्द्रास्तेषामिव वलक्षो धवल आत्मा देहो यस्य । पुनः कीदृक् हृताः पराजिता ये विपक्षाः शत्रवस्त्रिपुरादयस्तैः आत्तः प्राप्तः विबुधानां देवानां विदुषां वा पक्षस्तत्पालनपरं देवपक्षपातीत्यर्थः । पुनः कीदृशं विस्मयः आश्चर्यमेषां [illegible] कथा यस्य । पुनः कीदृक् लक्षाधिरोहि-

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामनाम्नः स्वपौत्रस्य कामनापूरणोत्सुकः ।
अश्वधाटीं जगन्नाथो विश्वहृद्यामरीरचत् ॥ २६ ॥

इति पण्डितेन्द्रजगन्नाथविरचितमश्वधाटीकाव्यं संपूर्णम् ।

अथ नवरसाः ।

तत्रादौ शृंगारः ।

अथ बालायाः सामान्यतः स्तुतिः ।

श्रीः ॥ दृशा दग्धं मनसिजं[1] जीवयन्ति[2] दृशैव याः ।
विरूपाक्षस्य[3] जयिनीस्ताः स्तुवे वामलोचनाः ॥ १ ॥

एकान्तसुन्दरविधानजडः क्व वेधाः[4]
सर्वाङ्गकान्तिरुचिरं क्व च रूपमस्याः ।
मन्ये महेश्वरभयान्मकरध्वजेन
प्राणार्थिना युवतिरूपमिदं[5] गृहीतम् ॥ २ ॥

अमृतस्येव कुण्डानि रत्नानामिव राशयः ।
रतेरिव निधानानि योषितः केन निर्मिताः ॥ ३ ॥

नन्दिकेश्वराधिरूढं । पुनः कीदृक् हतो लक्षसंख्याकानामसुराणां प्रकरः समूहो येन । पुनः कीदृक् अक्षामतां पुष्टिं आश्रयतीत्यक्षामताश्रया विपुलेति यावत् एतादृशी दया यस्य । पुनः कीदृक् प्रणतानां नम्राणां भक्तानां क्षामणिं पालकमित्यर्थः पुनः कीदृक् प्रणयी प्रणयसपन्नो मित्रमिति यावत् एवंभूतो यक्षाधिपो कुबेरो यस्य तत्तादृशम् ॥ २५ ॥

रामेति रमयतीति रामः विद्याविनयादि गुणैः सर्वेषां मनोरम इत्यन्वर्थं रामइतिनाम यस्य तस्य स्वपुत्रपुत्रस्य कामनापूरणोत्सुको मनोरथपूरणोत्कण्ठितो जगन्नाथाभिधः पण्डितोविश्वत्हृद्यां पण्डितरञ्जनीं अश्वधाटी मरीरचत् रचयामास ।

गुणरत्नर्षिभूयुक्तेप्रजापतिसमाह्वये ॥ शाकेधिमासे भाद्राख्ये गीष्पतौ प्रातिपत्तिथौ । अश्वधाट्या दर्पणाख्या व्याख्या कृष्णेन निर्मिता ॥

CC-0. Prof. Satya Vrat Shastri Collection.

---

१ कामं २ उत्पादयन्ति. ३ शिवस्य. ४ ब्रह्मा. ५ स्त्रीरूपं.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्याः सर्ग[1]विधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाऽऽकरः ॥
वेदाऽभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पु[2]राणो मुनिः ॥ ४ ॥

न देवकन्यका नाऽपि गन्धर्वकुलसंभवा ।
तथाऽप्येषा तपोभङ्गं विधातुं वेधसोऽप्यलम् ॥ ५ ॥

भ्रूचातुर्याऽऽकुञ्चिताक्षाः कटाक्षाः
स्निग्धा वाचो लज्जिताश्चैव हासाः।
लीलामन्दं प्रस्थितं च स्थितं च
स्त्रीणामेतद्भूषणं चाऽऽयुधं च ॥ ६ ॥

अधरे मधुरा सरस्वती ननु कर्णे मणिकर्णिकाप्रवाहः ॥
शिरसि प्रतिभाति चारु वेणी कथमेणीनय[3]ना न तीर्थराजः ७

बाहू द्वौ च मृ[4]णालमास्यकमलं लावण्यलीलाजलं
श्रोणी तीर्थशिला च नेत्रशफरी[5] धम्मिल्लशैवालकम् ॥
कान्तायाः स्तनचक्रवाकयुगलं कन्दर्पबाणाऽनलै-
र्दग्धानामवगाहनाय विधिना रम्यं सरो निर्मितम् ॥ ८ ॥

स्मितेन भावेन च लज्जया भिया[6] पराङ्मुखैरर्धकटाक्षवीक्षणैः ॥
वचोभिरीर्ष्या[7]कलहेन लीलया समस्तभावैः खलुबन्धनं स्त्रियः ९

लीलावतीनां सहजाविलासास्त एव मूर्खस्यहृदि स्फुरन्ति ।
रागो नलिन्यां हि निर्सर्गसिद्धस्तत्र भ्रमत्येव मु[9]धा पं[10]डंघ्रिः १०

कुंकुमपङ्केनाऽङ्कितदेहा गौरपयोधरकम्पितहारा ॥
नूपुरहंसरणत्पदपद्मा कं न वशी कुरुते भुवि रामा ॥११॥

द्रष्टव्येषु किमुत्तमं मृगदृशां प्रेमप्रसन्नं मुखं
घ्रातव्येष्वपि किं तदास्यपवनः श्राव्येषु किं तद्वचः ॥

---

१ उत्पत्तिविधाने २ वृद्धः ३ हरिणलोचना ४ बिसम् ५ मत्स्यी ६ भयेन ७ प्रणयप्रकोपेन ८ स्वभावसिद्धः ९ व्यर्थम् १० भ्रमरः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं स्वाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तत्तनु-
र्ध्येयं किं नवयौवनं सहृदयैः सर्वत्र तद्विभ्रमः ॥ १२ ॥

इयं सुस्तनी मस्तकन्यस्तकुम्भा कुसुम्भाऽरुणं चारु वासोवसाना।
समस्तस्य लोकस्य चेतःप्रवृत्तिं गृहीत्वा घटे न्यस्य यातीव भाति

नेदं मुखं मृगवियुक्तशशाङ्कबिम्बं नेमौ स्तनावमृतपूरितहेमकुम्भौ ॥
नैवालकावलिरियं मदनास्त्रशाला नैवेदमक्षियुगलं निगडं हि यूनां।

वक्त्रं चन्द्रविकासि पङ्कजपरीहासक्षमे लोचने
वर्णः स्वर्णमपाकरिष्णुरलिनां जिष्णुः कचानां चयः ।
वक्षोजाविभकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम् ॥१५॥

गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता ।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ १६ ॥

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः ॥
पाणिभ्यां पद्मरागाभ्यां रेजे रत्नमयीव सा ॥ १७ ॥

नूनं हि ते कविवरा विपरीतबोधा
ये नित्यमाहुरबला इति कामिनीस्ताः ।
याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयोऽपि विजितास्त्वबलाः कथं ताः ॥ १८ ॥

सौधे स्थिता सरभसं निजमुत्तरीयं धर्तुं पुनस्तनतटात्पतितं प्रवृत्ता
वाचं निशम्य नयनं नयनं ममेति किंचित्तदेवमकरोत्स्मितमायताक्षी

इदं परमसुन्दरं तनुपुरं कुरङ्गीदृशां
निवार्य खलु शैशवं स्वयमनेन नीतं बलात् ।

१ वस्त्रम् २ मनोवृत्तिम् ३ शृंखला 'बेडी' इति लोके ४ तुच्छं कुर्वन्
५ जयशीलः ६ मनोहरम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदागमनशङ्कया मकरकेतुना किं कृतं
पयोधरधराधरौ त्रिवलिवाहिनीदुस्तरौ ॥ २० ॥

इयं सुरतरङ्गिणी न पुनरत्र नौसंगमो
भवेत्तरणिमज्जनं पथिक नैव पान्थाऽऽगमः

निधाय हृदये सदा विपुलचारुकुम्भद्वयं
सखे घनघनाऽऽगमे घनरसस्य पारं व्रज ॥ २१ ॥

मीनवती नयनाभ्यां चरणाभ्यां प्रफुल्लकमलवती ।
शैवालिनी च केशैः सुरसेयं सुन्दरी सरसी ॥ २२ ॥

अस्याश्चेद्गतिसौकुमार्यमधुना हंसस्य गर्वैरलं
संल्लापो यदि धार्यतां परभृतैर्वाचंयमत्वव्रतम् ॥
अङ्गानामकठोरता यदि दृषत्प्रायैव सा मालती
कान्तिश्चेत्कमला किमत्र बहुना काषायमालम्ब्यताम् २३

अपाङ्गतरले दृशौ तरलवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
इति स्फुरितमङ्गके मृगदृशां स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥ २४ ॥

निर्मित्सुः सुदतीमजो विरचिते वक्त्रे शशिभ्रान्तितः
कोशीभूतनिजाम्बुजासनमधिष्ठातुं न शक्तो विधिः ।
मध्यं विस्मृतवान् कुचौ च कठिनौ पीनौ नितम्बौ कचान्
वक्रान् निर्मितवान् मतिः स्फुरति हि स्वस्थेनृणां चेतसि २५

अधरे नववीटिकाऽऽनुरागो नयने कज्जलमुज्ज्वलं दुकूलम् ।
इदमाभरणं नितम्बिनीनामितरद्भूषणमङ्गदूषणाय ॥ २६ ॥

---

१ सुराणां तरंगिणी नदीत्यर्थः २ उदकस्य ३ मिथोभाषणम् ४ पा[illegible]ण-रूपा ५ काषायवस्त्रम् ६ नेत्रप्रान्तचञ्चले ७ विलासभरेण मन्थरा मन्दा गतिः ८ निर्मातुमिच्छुः ९ ब्रह्मा १० [illegible] ११ स्वच्छम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आस्यं[1] सहास्यं नयनं सलास्यं सिन्दूरबिन्दूदयशोभिभालम् ।
नवा च वेणी हरिणी दृशश्चेदन्यैरगण्यैरपि भूषणैः किम् ॥२७॥

अथ बालावयववर्णनम् ।

केशवर्णनम् ।

चिकुर[2]प्रकरा जयन्ति ते विदुषी मूर्धनि यान् बिभर्ति सा ।
पशुनाऽप्यपुरस्कृ[3]तेन तत्तुलनामिच्छति चामरेण कः ॥ १ ॥

एणीदृशः पाणिपुटे निरुद्धा वेणी विरेजे शयनोत्थितायाः ।
[4]सरोजकोशादिव निष्पतन्ती श्रेणी[5] घनीभूय मधु[6]व्रतानाम् ॥२॥

अस्या मनोहराऽऽकारकबरीभारनिर्जिताः ।
लज्जयेव वने वासं चक्रुश्चमरबर्हिणः ॥ ३ ॥

मलिना अपि संयमनात्[7]कुटिला अपि सुमनसां[8] समागमतः ।
बाला[9] अपि मुक्तानाम[10]नुषङ्गान्निर्जरत्व[11]मुपयान्ति ॥ ४ ॥

स्तनाऽऽभोगे पतन्भाति कपोलात्कुटिलोऽलकः ।
शशाङ्कबिम्बतो मेरौ लम्बमान इवोरगः ॥ ५ ॥

सीमन्त[12]रचनम् ।

जानुस्थापितदर्पणं परिणमद्ग्रीवं समुद्यद्भुजं
न्यञ्चत्कूर्परमुन्नमद्भुजलसत्कक्षान्तरोद्दत्कुचम् ।
पाणिभ्यां प्रविभज्य केशनिचयं सीमन्तकर्मोद्यता
चेतः कस्य वशीकरोति न बलाद्बाला विलोलेक्षणा ॥ १ ॥

---

१ हासयुक्तं मुखम् २ केशकलापाः ३ पश्चात्कृतेन ४ कमलकुड्मलात् ५ पंक्तिः ६ भ्रमराणाम् ७ बन्धनात् इन्द्रियनिग्रहाच्च ८ पुष्पाणां देवानां च ९ केशाः अर्भकाश्च १० मौक्तिकानां पक्षे जीवन्मुक्तानां ११ जरारहितत्वं पक्षे देवत्वम् १२ केशवेशः 'भांग' इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

केशान् वामकराऽवलम्बितशिखान् भूयोरणत्कङ्कणं
व्याधूयाऽयकनिष्ठिकानखमुखेनाऽऽकुञ्चिताऽन्यांगुलि ।
सीमन्तं विरचय्य तस्य करभेणोन्मृज्य पार्श्वद्वयं
तान्पश्चाद्युगपत्प्रणीयकरयोर्युग्मेन बध्नात्यसौ ॥ २ ॥
आभुग्नांऽगुलिपल्लवौ कचभरे व्यापारयन्ती करौ
बन्धोत्कर्षनिबद्धमानसतया शून्यां दधाना दृशम् ।
बाहूत्क्षेपसमुन्नते कुचतटे पर्यस्तचोलांऽशुका
ह्रीसंकोचितबाहुमूलसुभगं बध्नाति जूटीं वधूः ॥ ३ ॥
यथा यथा यो वलते भुजोऽस्या उदञ्चितः संयमने कचानाम् ।
तथा तथा वल्गति काममेकः स एव वक्षोरुह उत्पलाक्ष्याः ।
स्नेहसंवर्धितान् बालान् दृढं बध्नाति सुन्दरी ।
करुणा हरिणाक्षीणां कुतः कठिनचेतसाम् ॥ ५ ॥
संप्राप्तचिकुरभावः कचनिचयो वा युवा करे लग्नः ।
स्त्रीभिर्दृढं निबध्यो नो चेत्परकल[2]त्रमनुसरति ॥ ६ ॥

अभ्यङ्गारम्भः ।

वक्षोजौ निविडं निरुध्य सिच[3]ये नाऽऽकुञ्च्य मध्यं शनैः
कृत्वा चम्पकतैलसेकमबला संपीड्य मन्दं शिरः
पाणिभ्यां चलकङ्कणोद्यतझणत्कारात्तरोभ्यां करो-
त्यभ्यङ्गं परिपश्यतः सकुतुकं दारन्तरं प्रेयसः ॥ १ ॥
जानुभ्यामुपविश्य पार्ष्णिनिहितश्रोणीभरा प्रोन्नम-
द्दोर्वल्ली नमदुन्नमत्कुचतटी दीव्यन्नखाऽङ्कावलिः ।
पाणिभ्यामवधूय कङ्कणझणत्काराऽवतारोत्तरं
बाला न[4]ह्यति किं निजालकभरं किंवा मदीयं मनः ॥ २ ॥
[5]अश्रान्तं दृढयन्त्रणेन कुचयोरत्यक्तकाठिन्ययो-
राबद्धस्फुटमण्डलोन्नतिमितश्चोलं विमुच्योरसः

१ करपृष्ठेन २ कलत्रं श्रोणिभार्ययोः ३ वस्त्रप्रान्तेन ४ बध्नाति ५ संततम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीवीविच्छुरितं विधाय तमिमं वामस्तनालम्बिनीं
वेणीं पाणिनखाऽञ्चलैः शिथिलयत्याक्रम्य पीठं पदा ॥ ३॥

आवर्त्य कण्ठं सिचयेन सम्यगाबध्य वक्षोरुहकुम्भयुग्मम् ।
काऽसौ कराऽऽलम्बिततैलपात्रा मंदं समासीदति सुन्दरीं ताम् ४

अस्याः पीठोपविष्टाया अभ्यङ्गं वितनोत्यसौ ।
ललच्छ्रोणि चलद्वेणि नटद्गुरुपयोधरम् ॥ ५ ॥

कुङ्कुमादितिलकः ।

बाले ललामलेखेयं भाले [2]भल्लीव राजते ।
चलता चापमाकृष्य न जाने कं हनिष्यति ॥ १ ॥

विराजतेऽस्यास्तिलकोऽयमञ्चितो विकुञ्चितभ्रूलतिकाद्वयान्तरे ।
विजित्य लोकत्रितयं दिवं प्रति स्मरेण बाणो धनुषीव योजितः२

[3]कस्तूरीतिलकं बाले भाले मा कुरु मा कुरु ।
अद्य साम्यं भजामीति जृम्भते शशलाञ्छनः ॥ ३ ॥

श्या[4]मलेनाऽङ्कितं बाले भाले केनाऽपि [5]लक्ष्मणा ।
मुखं तवाऽन्तरासुप्तभृङ्गफुल्लाम्बु जायते ॥ ४ ॥

लोचनफुल्लाम्भोजद्वयलोभाऽऽन्दोलितैकमनाः ।
कस्तूरीतिलकमिषादयमलिकेऽलिः समुल्लसति ॥ ५ ॥

भ्रुवौ ।

स्मरकल्पद्रुमौ बाले तव भाले द्विपत्रकः ।
पत्रयोरनयोश्छाया भ्रुवोर्व्याजादुदञ्चति ॥ १ ॥

---

१ वसनग्रन्थिसंनिहितं कृत्वा २ 'बरची'ति लोके ३ निष्कलङ्कमुखस्य कस्तूरीतिलकेन लाञ्छनवत्त्वाच्चन्द्रः साम्यं भजेदिति भावः ४ श्यामवर्णेन ५ चिन्हेन 'गोंदणें' इति लोके ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेत्रे ।

नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः ।
यतस्तन्नेत्रसंचारसूचितेषु प्रवर्तते ॥ १ ॥
लोचने हरिणगर्वमोचने मा विदूषय नताङ्गि कज्जलैः ।
सायकः सपदि जीवहारकः किं पुनर्हि गरलेन लेपितः २
कामिनीनयनकज्जलपङ्कादुत्थितो मदनमत्तवराहः ।
कामिमानसवनान्तरचारी मूलमुत्खनति मानलतायाः ॥ ३ ॥
निःसीमशोभासौभाग्यं नताङ्ग्या नयनद्वयम् ।
अन्योन्याऽऽलोकनाऽऽनन्दविरहादिव चञ्चलम् ॥ ४ ॥
रामाविलोलनयने किमु मीनबाणौ
नीलोत्पले किमथवा किमु खञ्जरीटौ ।
किंवा जगत्त्रयजयाय कृतिर्न जाने
कन्दर्पभूपरचितानवकार्मणस्य ॥ ५ ॥

कटाक्षः ।

यत्र यत्र वलते शनैःशनैः सुभ्रुवो नयनकोणविभ्रमः ।
तत्र तत्र शतपत्रधोरणी तोरणीभवति पुष्पधन्वनः ॥ १ ॥
यासां कटाक्षविशिखैः स्मरचौरेण ताडिताः ।
हृतचैतन्यसर्वस्वा मुग्धा मुह्यन्ति कामुकाः ॥ २ ॥
सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाऽऽकृष्टमुक्ताः श्रवणपथजुषो नीलपक्ष्माण एते
यावल्लीलावतीनां हृदि न धृतिमुषो दृष्टिबाणाः पतन्ति ३
तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ।
यावदेव न कुरङ्गचक्षुषां ताड्यते चपललोचनाऽञ्चलैः ४

---

१ विषेण २ धैर्यहारिणः ३ पण्डितानाम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभवति मनसि विवेको विदुषामपि शास्त्रसंभवस्तावत् ।
निपतन्ति नेत्रविशिखा यावन्नेन्दीवराक्षीणाम् ॥ ५ ॥

हत्वा लोचनविशिखैर्गत्वा कतिचित्पदानि पद्माक्षी ।
जीवति युवा न वा किं भूयोभूयो विलोकयति ॥ ६ ॥

यान्ती गुरुजनैः सार्धं स्मयमानमुखाम्बुजा ।
तिर्यग्ग्रीवं यदद्राक्षीत्तन्निष्पत्राकरोज्जगत् ॥ ७ ॥

क्वचित्कृष्णाऽर्जुनगुणा क्वचित्कर्णान्तगामिनी ।
अपाङ्गश्रीस्तवाऽऽभाति सुभ्रूर्भारतमीरिव ॥ ८ ॥

रेरे घरट्ट मा रोदीः कं कं न भ्रामयन्त्यमूः ।
कटाक्षवीक्षणादेव कराऽऽकृष्टस्य का कथा ॥ ९ ॥

नासा ।

पुराणबाणत्यागाय नूतनाऽस्त्रकुतूहलात् ।
तन्नासा भाति कामेन तूणीवाऽधोमुखीकृता ॥ १ ॥

नासामौक्तिकम् ।

नासामौक्तिकमबले किमधरबिम्बेन विद्रुमं कुरुषे ।
दृष्ट्वा गुञ्जाबीजं शिवशिव भूयस्तदेव हसितेन ॥ १ ॥

सुधामयोऽपि क्षयरोगशान्त्यै नासाऽग्रमुक्ताफलकच्छलेन ।
अनङ्गसंजीवनदृष्टशक्ति मुखाऽमृतं ते पिबतीव चन्द्रः ॥२॥

कर्णौ ।

सौन्दर्यपात्रे वक्त्रेन्दौ कुरङ्गाऽऽसङ्गभीतया ।
सूचितौ श्रोत्रपाशाभ्यां पाशाविव मृगीदृशा ॥ १ ॥

---

१ वाग्भैः २ व्यथयामास '[illegible]' इ० लो.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपोलौ ।

कपोलपाली तव तन्वि मन्ये लावण्यधन्ये द्विगुणमुत्तराख्याम्
बिभर्ति यस्यां ललिताऽलकायां मनोहरा वैश्रवणस्य लक्ष्मीः १

द्विधा विधाय शीतांशुं कपोलौ कृतवान् विधिः ।
तन्थ्यास्तद्रसनिष्पन्दविन्दवो रदनावलिः ॥ २ ॥

अधरः ।

तवैष विद्रुमच्छायो मरुमार्ग इवाऽधरः ।
करोति कस्य नो बाले पिपासाऽऽकुलितं मनः ॥ १ ॥

त्वं पीयूष दिवोऽपि भूषणमसि द्राक्षे परीक्षेत को
माधुर्यं तव विश्वतोऽपि विदितं माध्वीक माध्वीकता ।
एतत्किं तु मनागरुन्तुदमिव ब्रूमो न चेत्कुप्यसि
यः कान्ताधरपल्लवे मधुरिमा नाऽन्यत्र कुत्राऽपि सः ॥२॥

सर्वेषामेव रत्नानां छेदेऽर्घः परिहीयते ।
दयिताधररत्नं तु व्रणितं यात्यनर्घताम् ॥ ३ ॥

मुखम् ।

यदमरशतैःसिन्धोरन्तः कथं चिदुपाऽर्जितं
सकलमपि तद्धात्रा कान्तामुखे विनिवेशितम् ।
सुरसुमनसः श्वासाऽऽमोदे शशी च कपोलयो-
रमृतमधरे तिर्यग्भूते विषं च विलोचने ॥ १ ॥

---

१ अलकाः केशाः पक्षे कुबेरनगरी. २ वैश्रवणस्य कुबेरस्य पक्षे वै इति पदच्छेदः भगवतस्य फणस्य. ३ प्रवालकान्तिः पक्षे विगता द्रुमच्छाया यस्मात् ४ मरुदेशस्थमार्गः 'मारवाड' इति लो० ५ मर्मस्पृक्. ६ छिद्रे. आले सतीत्यध्याहार्यम् ७ मूल्यम्. ८ संजातसङ्गम्. ९ अमूल्यताम्.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्या मुखस्याऽतिमनोहरस्य कर्तुं न शक्तः सदृशं प्रियायाः ।
अद्याऽपि शीतद्युतिरात्मबिम्बं निर्मायनिर्माय पुनर्भिनत्ति ॥२॥

अनेन रम्भोरु तवाऽऽननेन पीयूषभानोस्तुलया धृतस्य ।
ऊनस्य नूनं परिपूरणाय ताराः स्फुरन्ति प्रतिमानखण्डाः ३

धिक् तस्य मन्दमनसः कुकवेः कवित्वं
यः स्त्रीमुखं तुहिनबिम्बसमं करोति ।
भ्रूभङ्गविभ्रमकटाक्षनिरीक्षणानि
कोपप्रसादहसितानि कुतः शशाङ्के ॥ ४ ॥

प्रविश झटिति गेहं मा बहिस्तिष्ठ कान्ते
ग्रहणसमयवेला वर्तते शीतरश्मेः ।
तव मुखमकलङ्कं वीक्ष्य राहुः स नूनं
ग्रसति तव मुखेन्दुं चन्द्रबिम्बं विहाय ॥ ५ ॥

वासोज्ज्वलाऽऽच्छादितमर्धभागं सौधस्थराधावदनं समीक्ष्य ।
सर्वेऽपि वृन्दावनवासिनस्ते चक्रुश्चतुर्थीव्रतपारणानि ॥ ६ ॥

विश्वामित्रपराशरप्रभृतयो वाताऽम्बुपर्णाशना-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं भुञ्जन्ति ये मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यस्तरेत्सागरम् ॥ ७ ॥

अबले सलिले तपस्यता मुखभावो गमितो न पङ्कजेन ।
कथमादिमवर्णताऽन्त्यजस्य द्विजराजेन कृतोऽर्हनिग्रहस्य ८

१ तुल्य१. २ मुखस्त्वम् मुखसाम्यमित्यर्थः ३ आदौ मवर्णो यस्य तस्य भाव-स्तत्ता न.म् पकारादेः पंकजस्य मकारादित्वं कथमित्यर्थः पक्षे ब्राह्मणत्वम् ४ अन्त्ये अकारो यस्य एतादृशस्य पंकजस्य पक्षे अतिशूद्रस्य ५ चन्द्रेण ब्राह्मणश्रेष्ठेन. ६ कृतः ऊबः

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चलद्भृङ्गमिवाम्भोजमधीरनयनं मुखम् ॥
तदीयं यदि दृश्येत कामः क्रुद्धोऽस्तु किं ततः ॥९॥

ननु नीलाञ्चलसंवृतमाननमाभाति हरिणनयनायाः ॥
प्रतिबिम्बित इव यमुनागभीरनीरान्तरेणाऽङ्कः ॥१०॥

आसाद्यं सलिलभरे सवितारमुपास्य सादरं तपसा ॥
अधुनाऽब्जेन मनाक्तव मानिनि तुलनामुखस्याऽऽप्ता ॥११॥

विलसत्याननं तस्या नासाऽग्रस्थितमौक्तिकम् ॥
आलक्षितबुधाऽऽश्लेषं राकेन्दोरिव मण्डलम् ॥ १२ ॥

सुविरलमौक्तिकतारे धवलांऽशुकचन्द्रिकाचमत्कारे ॥
वदनपरिपूर्णचन्द्रे सुन्दरि राकाऽसि नाऽत्र संदेहः ॥१३॥

कण्ठः ।

मातङ्गकुम्भसंसर्गजातपातकशङ्कया ॥
स्नातीव मुक्ताहारोऽस्याः स्फुरत्कान्तिजले गले ॥ १ ॥

बाहू ।

दयिताबाहुपाशस्य कुतोऽयमपरो विधिः ॥
जीवयत्यर्पितः कण्ठे मारयत्यपवर्जितः ॥ १ ॥

शब्दवद्भिरलंकारैरुपेतमतिकोमलम् ॥
सुवृत्तं काव्यवद्रेजे तस्या बाहुलताद्वयम् ॥ २ ॥

अंगुल्यः ।

सुदीर्घा रागशालिन्यो बहुपर्वमनोहराः ॥
तस्या विरेजुरंगुल्यः कामिनां संकथा इव ॥ १ ॥

---

१ सावकाशपर्यन्तम् २ अन्त्यजः पक्षे गजः ३ त्यक्तः
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तनौ ।

पुष्पेषोरभिषेकहेमकलशौ हारप्रभावाहिनी
चक्राह्वौ मदनोन्मदद्विपपतेः कुम्भौ रतेः कन्दुकौ ॥
कन्दौ बाहुमृणालिकायुगलयोर्लीलालतासत्फले
तस्यौ रत्नसमुद्गकौ वहति सा लावण्यपूर्णौ स्तनौ ॥१॥
मुग्धाङ्गि कठिनौ तन्वि पीनौ सुमुखि दुर्मुखौ ॥
अतएव बहिर्यातौ हृदयत्ते पयोधरौ ॥ २ ॥
स्वयंभूः शम्भुरम्भोजलोचने त्वत्पयोधरः ।
त्वया न कस्य धनस्य चन्द्रचूडो भविष्यति ॥ ३ ॥
अविवेकि कुचद्वन्द्वं हन्तुं नाम जगत्त्रयम् ॥
श्रुतिप्रणयिनोरक्ष्णोरयुक्तं जनमारणम् ॥ ४ ॥
प्रायश्चित्तं न गृह्णीतस्तन्वङ्ग्याः पतितौ स्तनौ ॥
अत एव तयोः स्पर्शे लोकोऽयं शिथिलाऽऽदरः ॥ ५ ॥
दीपो वातभयान्नीतः कामिन्या वसनान्तरे ॥
दृष्ट्वा तु कुचसौन्दर्यं शिरः कम्पयते मुहुः ॥ ६ ॥
पयोधरघनीभावस्तावदम्बरमध्यगः ॥
आश्लेषोपगमस्तत्र यावत्तावत्प्रवर्तते ॥ ७ ॥
बदराऽमलकाऽऽम्रदाडिमानामपहृत्य श्रियमुन्नतौ क्रमेण ।
अधुना हरणे कुचौ यतेते दयिते ते करिशावकुम्भलक्ष्म्याः ॥८॥
जम्बीरश्रियमतिलङ्घ्य लीलयैव व्यानम्रीकृतकमनीयहेमकुम्भौ ।
नीलाऽम्भोरुहनयनेऽधुनाकुचौ ते स्पर्धेते किल कनकाऽचलेन सार्धम् ॥
पट्टविघटितमपि कुचतटमकपटमनसः कुरङ्गनयनायाः ॥
मणिभवनमयूखपटली पटलीनतया न सत्यमालोचि ॥१०॥

---

१ चक्रवाकौ. २ संपुटौ. ३ पापानिष्कासि पक्षे प्रायः कारुण्येन चित्तं स्थाप्यम् ४ पातकिनौ. पक्षे गलितौ ५ पयोधराणां प्रधानो घनीभावः प्राचुर्यम् ६ आकाशमध्यवर्ती ७ आश्लेषोपगमपर्यायः पक्षे सुगमम्.

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपक्षो यदि वक्षोरुहपरिणाहः कुरङ्गनयनायाः ।
आकाशवासतपसः श्रीफल विफलस्तथाऽऽश्रमः ॥ ११ ॥

दिवानिशं वारिणि कण्ठदघ्ने दिवाकराऽऽराधनमाचरन्ती ।
वक्षोजताप्त्यै किमु पक्ष्मलाक्ष्यास्तपश्चरत्यम्बुजपङ्क्तिरेषा ॥ १२ ॥

कुचावस्याः कामद्विपकलभकुम्भाविति परे
वदन्त्यन्ये वक्षःसरसि कमले काञ्चनघटौ ।
ममाऽयं सिद्धान्तः स्फुरति मदनेन त्रिजगतीं
विनिर्जित्य न्युब्जीकृतमिव निजं दुन्दुभियुगम् ॥ १३ ॥

मध्यः ।

वयःप्रकर्षादुपचीयमानस्तनद्वयस्योद्वहनश्रमेण ।
अत्यन्तकार्श्यं वनजायताक्ष्या मध्यो जगामेति ममैष तर्कः ॥ १ ॥

स्फुटमसदवलग्नं तन्वि निश्चिन्वते ते
तदनुपलभमानास्तर्कयन्तोऽपि लोकाः ।
कुचगिरिवरयुग्मं यद्विनाधारमास्ते
तदिह मकरकेतोरिन्द्रजालं प्रतीमः ॥ २ ॥

वलित्रयम् ।

एकमेव वलिं बद्ध्वा जगाम हरिरुन्नतिम् ।
तन्व्या त्रिवलिबन्धेऽपि सैव मध्यस्य नम्रता ॥ १ ॥

रोमावलिः ।

गम्भीरनाभिह्रदसन्निवेशे रराज नीला नवरोमराजिः ।
मुखेन्दुभीतस्तनचक्रवाकचञ्चुच्युता शैवलमञ्जरीव ॥ १ ॥

---

१ कण्ठप्रमाणे २ सूर्याराधनम् ३ पुष्यमाणः ४ मध्यम् ५ गाढदम ६ वलिनामानं दैत्यम् पक्षे वलिम्: उदर...

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्तं मयापदमिदं नवयौवनाय
त्वं सत्वरं क्व चन शैशव साधयेति
कामस्य हस्तलिखिताऽक्षरमालिकेव
रोमावली विजयते जलजेक्षणायाः ॥ २ ॥

पयोधरस्तावदयं समुन्नतो
रसस्य वृष्टिः सविधे भविष्यति ।
अतः समुद्गच्छति नाभिरन्ध्रतो
विसारिरोमालिपिपीलिकाऽऽवलिः ॥ ३ ॥

उत्तुङ्गस्तनपर्वतादवतरद्गङ्गेव हारावली
रोमाली नवनीलनीरजरुचिः सेयं कलिन्दाऽऽत्मजा ।
जातं तीर्थमिदं सुपुण्यजनकं यत्राऽनयोः सङ्गम-
श्चन्द्रो मज्जति लाञ्छनाऽपहृतये नूनं नखाङ्कच्छलात् ॥४॥

नाभिः ।

मन्येसयाप्तलावण्यासारसर्गे मृगीदृशः ।
अपूरयित्वैव गतो नाभिरन्ध्रं चतुर्मुखः ॥ १ ॥

नितम्बः ।

स कथं न स्पृहणीयो विषयरतैस्तान्नितम्बविन्यासः ।
शान्तात्मनाऽपि विहितं विश्वसृजा गौरवं यत्र ॥ १ ॥

अथ जघनम् ।

वपुरनुपमं नाभेरूर्ध्वं विधाय मृगीदृशां
ललितललितैरङ्गन्यासैः पुरा रभसादिव ।
तदनु सहसा खिन्नेनेव प्रजापतिना भृशं
पृथुलपृथुला स्थूलस्थूला कृता जघनस्थली ॥ १ ॥

---

१ रोमावलिरेव पिपीलिकापंक्तिः २ यमुना ३ नखव्रणच्छलेन ४ महान्तमनसा ५ ब्रह्मणा ६ अत्यन्तसुन्दरैः ७ भ्रान्त्येव

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जंघे ।

जङ्घे यदीये संतापं यज्जनस्याऽनुरागिणः ॥
जनयाञ्चक्रतुस्तत्र व्रीडाहेतुर्विलोमता ॥ २ ॥

चरणौ ।

अमूल्यस्य मम स्वर्णतुलाकोटिद्वयं कियत् ॥
इति कोपादिवाऽताम्रं पादयुग्मं मृगीदृशः ॥ १ ॥

नखाः ।

चरणाऽब्जनखश्रेणी राजते हरिणीदृशः ॥
रत्नावलीव लावण्यरत्नाकरसमुद्गता ॥ १ ॥

सखीकर्तृक उपदेशः ।

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ॥
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदिस्थितो हि ननु मे प्राणेश्वरः श्रोष्यति १

सखीं प्रति बालावाक्यम् ।

भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाऽऽननं जायते १
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते
दृष्टेर्निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने ॥ २ ॥
तद्वक्त्राऽभिमुखं मुखं विनमितं दृष्टिः कृता पादयो
स्तस्याऽऽलापकुतूहलाऽऽकुलतरे श्रोत्रे निरुद्धे मया ॥

---

१ सुवर्णस्य विंशतिपलात्मकतुलाकोटिद्वयं अथ च पादाभरणद्वयम् 'तोरडी इति भा०' २ सरलत्वम् [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिभ्यां च तिरस्कृतः सपुलकः स्वेदोद्गमो गण्डयोः
सख्यः किं करवाणि यान्ति शतधा यत्कञ्चुकीसंधयः ॥३॥

सखीकर्तृकमानाऽपनोदः ।

मुग्धे मानं न ते कर्तुं युक्तं प्राणाऽधिके प्रिये ।
धत्ते मत्स्यी कियत्कालं जीवितं जीवनं विना ॥ १ ॥

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवाऽवस्था चेयं विसृज कठिने मानमधुना ॥ २ ॥

सन्त्येवाऽत्र गृहेगृहे युवतयस्ताः पृच्छ गत्वाऽधुना
प्रेयांसः प्रणमन्ति किं तव पुनर्दासो यथा वर्तते ।
आत्मद्रोहिणि दुर्जनप्रलपितं कर्णेऽनिशं मा कृथा-
श्छिन्नस्नेहरसा भवन्ति पुरुषा दुःखाऽनुवृत्त्या पुनः ३

स्निग्धे यत्परुषाऽसि यत्प्रणमति स्तब्धाऽसि यद्रागिणि
द्वेषस्थाऽसि यदुन्मुखे विमुखतां याताऽसि तस्मिन् प्रिये ।
तन्मुग्धे विपरीतकारिणि तव श्रीखण्डचर्चाविषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥ ४ ॥

असद्वृत्तो नाऽयं न च खलु गुणैरेव रहितः
प्रियो मुक्ताहारस्तव चरणमूले निपतितः ।
गृहाणैनं मुग्धे व्रजतु तव कण्ठप्रणयिता-
मुपायो नाऽस्त्यन्यस्तव हृदयदाहोपशमने ॥ ५ ॥

---

१ नम्रः २ उपवासशीलाः ३ संततरोदनेन शोथयुक्तानि नयनानि यासां ताः ४ पाषाणहृदये. ५ प्रियः ६ मौक्तिकानां हारः पक्षे मुक्तस्त्यक्तः; आहारः अशनं येन प्रियेणेत्यर्थः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नायककर्तृकमानाऽपनोदः ।

इन्दीवरेण नयनं मुखमम्बुजेन
कुंदेन दन्तमधरं नवपल्लवेन ॥
अङ्गानि चम्पकदलैः सविधाय वेधाः
कान्ते कथं घटितवानुपलेन चेतः ॥ १ ॥

आक्षिपसि कर्णमक्ष्णा बलिरपि बद्धस्त्वया त्रिधा मध्ये।
इति जितसकलवदान्ये तनुदाने लज्जसे सुतनु ॥ २ ॥

सुतनु जहिहि मौनं पश्य पादाऽऽनतं मां
न खलु तव कदाचित्कोप एवं विधोऽभूत् ॥
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किंतु ॥ ३ ॥

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ॥
तत्किं रोदिषिगद्गदेन वचसा कस्याऽग्रतो रुद्यते ॥
नन्वेतन्मम का तवाऽस्मि दयिता नाऽस्मीत्यतो रुद्यते ॥४॥

नयनविपातेऽङ्कुरितः पल्लवितो वचसि पुष्पितो हसिते ॥
फलतु कृशाङ्गि तवाङ्गस्पर्शनमात्रे मनोरथाऽऽरूपतरुः ॥५॥

सुतनु हृदयात् प्रत्योदश्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत् ॥
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥ ६ ॥

---

१ नीलोत्पलेन, २ पाषाणेन तस्सदृशाकाठिनत्वात् ३ प्रोथं भङ्गाधिपं च ४ बलि नामा वैश्य। बवयोः सावर्ण्यात् बलिः वलित्रयम् ५ जितसर्वकृशोदरे. ६ त्यज ७ न किंचिदपि उक्तम् ८ क्रोधम् ९ निराकृतिदुःखम् १० मालाम्. ११ सर्पशङ्कया

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहान्मया सुतनु पूर्वमुपेक्षितस्ते
यो बाष्पबिन्दुरधरं परिबाधमानः ॥
तं तावदाकुटिलपक्ष्मविलग्नमद्य
कान्ते प्रमृज्य विगताऽनुशयो भवामि ॥७॥

प्रियनर्मोक्तयः ।

अपूर्वं चौर्यमभ्यस्तं त्वया चञ्चललोचने ॥
दिवैव जाग्रतां पुंसां चेतो हरसि दूरतः ॥ १ ॥

उचितं गोपनमनयोः कुचयोः कनकाऽद्रिकान्तितस्करयोः ।
अवधीरितविधुमण्डलमुखमण्डलगोपनं किमिति ॥ २ ॥

केशाः संयमिनः[1] श्रुतेरपि परं पारं गते लोचने[2]
अन्तर्वक्त्रमपि स्वभावशुचिभिः कीर्णं द्विजानां[3] गणैः ॥
मुक्तानां[4] सततं निवासरुचिरं वक्षोजकुम्भद्वय-
मित्थं तन्वि वपुः प्रशान्तमपि ते रागं[5] करोत्येव नः ॥३॥

बाले तवाऽधरसुधारसपानकाले चेतो-
मदीयमभिवाञ्छति शेषभावम्[6] ॥
आलिङ्गने तव विरोचनपौत्रभाव-[7]
माखण्डलत्वमखिलाऽङ्गनिरीक्षणे[8] ते ॥ ४ ॥

भ्रूचापे[9] निहितः कटाक्षविशिखो[10] निर्मातु मर्मव्यथां
श्यामाऽऽत्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम् ।
मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तं स्तनमण्डलं तव कथं प्राणैर्मम क्रीडति ॥ ५ ॥

कमलाक्षि विलम्ब्यतां क्षणं कमनीये कचभारबन्धने ॥
हृदलग्नमिदं दृशोर्युगं शनकैरद्य समुद्धराम्यहम् ॥ ६॥

---

१ बन्धनयुक्ताः नियमवन्तश्च २ कर्णस्य वेदस्य च ३ दन्तानां ब्राह्मणानां च ४ मौक्तिकानां जीवन्मुक्तानां च ५ अनुरागं विषयाभिलाषं च ६ शेषत्वं जिह्वासहस्रवत्त्वात्. ७ सहस्रार्जुनत्वम् ८ इन्द्रत्वम् ९ भ्रूरेव चापस्तस्मिन्. १० कटाक्ष एव विशिखो बाणः [illegible]

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुतः कुवलयं कर्णे करोषि कलभाषिणि ॥
किमपाङ्गमपर्याप्तमस्मिन् कर्मणि मन्यसे ॥ १ ॥

वयःसंधिवर्णनम् ।

मन्दंमन्दं श्रवणपुटकोपान्तगं तादृगन्तः
किंचित्किंचित् विरमति मनो धूलिकेलीरसेभ्यः ॥
आविर्भावः स्तनमुकुलयोः कापि कान्तिः समन्ता-
दद्य श्वो वा कुसुमधनुषो यौवराज्याऽभिषेकः ॥१॥
स्मितं किंचिद्वक्त्रे सरलतरलो दृष्टिविभवः
परिस्पन्दो वाचामभिनवविलासोक्तिसरसः ॥
गतीनामारम्भः किसलयितलीलापरिकरः
स्पृशन्त्यास्तारुण्यं किमिह नहि रम्यं मृगदृशः ॥ २ ॥
श्रोणीबन्धस्त्यजति तनुतां सेवते मध्यभागः
पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्याम् ॥
धत्ते वक्षः कुचसचिवतामद्वितीयं तु वक्त्रं
त्वद्गात्राणां गुणविनिमयैः कल्पितो यौवनेन ॥ ३ ॥
बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ॥
अधुना हृदयेऽप्येष मृगशावाक्षि दृश्यते ॥ ४ ॥
म्यञ्चति वयसि प्रथमे समुदञ्चति तरुणिमनि सुदृशः ॥
दधतिस्म मधुरिमाणं वाचो गतयश्च विभ्रमाश्च भृशम् ५
यदवधि विलासभवनं यौवनमुदियाय चन्द्रवदनायाः ॥
दहनं विनैव तदवधि यूनां हृदयानि दह्यन्ते ॥ ६ ॥
अधरः किसलयरागः कोमलविटपाऽनुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥ ७ ॥

---

१ सूक्ष्मतनाम् २ चञ्चलगमनानि ३ विपर्ययः 'बदल' इति लोके ४ गच्छति सति ५ हृदयं प्राप्य ६ स्पृहणीयम्।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ॥
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥ ८ ॥

अत्युन्नतस्तनमुरो नयने सुदीर्घे
वक्रे भ्रुवावतितरां वचनं ततोऽपि ॥
मध्योऽधिकं तनुरनूनगुरुर्नितम्बो
मन्दा गतिः किमपि चाऽद्भुतयौवनायाः ॥ ९ ॥

दृश्यं दृशां सहस्रैर्मनसामयुतैर्विभावनीयं च ॥
सुकृतशतकोटियोग्यं किमपि वयः सुभ्रुवो जयति ॥ १० ॥
मृदुलवलिललितमध्यं पृथुलकुचं चारुविपुलभूजघनं ॥
पुन्नागस्पृहणीयं स्फुरति वनं यौवनं च नारीणाम् ॥ ११ ॥

प्रणयकलहान्तरितनायिकानुनयः ।

गतप्राया रात्रिः शशिमुखि शशी शीर्यत इव
प्रदीपोऽयं निद्रावशमुपगतो घूर्णत इव ॥
प्रणामान्तो मानस्तदपि न जहासि ध्रुवमहो
कुचप्रत्यासत्त्या हृदयमपि ते चण्डि कठिनम् ॥ १ ॥
क्षीणांऽशुः शशलाञ्छनः सखि पुनः क्षीणो न मानस्तव
स्मेरं पद्मवनं मनागपि न ते स्मेरं मुखाऽम्भोरुहम् ॥

१ आच्छिन्नम् २ वेधरहितम् ३ ध्येयम् ४ मृद्वी या लवलिर्वृक्षविशेषः तेन ललितः मध्यभागो यस्य तत् पक्षे मृदुलाः याः वलयः वलित्रितयं तेन ललितः मध्यो यस्मिन् ५ पृथवः स्थूलाः लकुचाः पनसाः यस्मिन् पक्षे पृथुलौ कुचौ यस्मिन् ६ सुन्दरं ७ विपुलाः ये भूजाः वृक्षान्तैर्घनं निबिडं पक्षे विपुला भूर्येषां ते विपुलभुवः एतादृशाः जघनाः यस्मिन् तत् बहुप्रदेशव्यापकजघनमित्यर्थः विपुलभूसदृशं जघनं यस्मिन्निति वा. ८ पुन्नागैः केसरवृक्षैः स्पृहणीयं. पक्षे पुरुषश्रेष्ठैः स्पृहणीयम् ९ [illegible] १ [illegible]निवासिताम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीतं श्रोत्रयुगेन षट्पदरुतं पीतं न ते जल्पितं
रक्ता शक्रदिगङ्गना रविकरैर्नाऽद्यापि रक्ताऽसि किम् २

पुरोदिगनुरागिणी तदपि नाऽनुरागोदयः
कृशोदरि निशा कृशा तदपि ते न मानः कृशः ।
प्रसन्नमिदमम्बरं तदपि न प्रसन्नं मनो
ननाद चरणायुधस्तदपि मौनमालम्बसे ॥ ३ ॥

आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-
र्नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा ।
मोहेनाऽन्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा
गङ्गारोधःपतनकलुषा गृह्णतीव प्रसादम् ॥ ४ ॥

वीररसः ।

श्रीः । भूमाङ्क कियदेतदर्णवमितं तत्साधितं हार्यते
यद्वीरेण भवादृशेन वदति त्रिःसप्तकृत्वो जयः ।
डिम्भोऽयं नवबाहुरीदृशमिदं घोरं च वीरव्रतं
तत्क्रोधाद्विरम प्रसीद भगवन् जात्यैव पूज्योऽसि नः १

त्रैलोक्यत्राणशौण्डः सरसिजवसतेर्यः प्रसूतो भुजाभ्यां
सक्षत्रं नामवर्णः कुलिशकठिनयोर्यस्य दोष्णोर्विलीनः ।
ज्वालाजिव्हालकालानलकवलभयभ्रान्तदेवासुराणि
व्यातन्वानो जगन्ति ज्वलति मुनिरयं पार्वतीधर्मपुत्रः २

पुरोजन्मा नाऽद्यप्रभृति मम रामः स्वयमहं
न पुत्रः पौत्रो वा रघुकुलभुवां च क्षितिभुजाम् ।
अधीरं धीरं वा कलयतु जनो मामयमयं
मया बद्धो दुष्टद्विजदमनदीक्षापरिकरः ॥ ३ ॥

---

१ भ्रमरशब्दः २ प्राची ३ तीरपातेन मृदाविद्धा ४ नैर्मल्यम् ५ रक्षणम्
६ ब्रह्मणः ७ बाह्वोः ८ भार्गवः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चत्वारो वयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः
संग्रामाध्वरदीक्षितो नरपतिः[1] पत्नी[2] गृहीतव्रता ।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति[3] स्फीतं यशोदुन्दुभिः ॥ ४ ॥

करुणरसः ।

श्रीः । सद्यः पुरीपरिसरे[4]ऽपि शिरीषमृद्वी[5]
गत्वा जवात्त्रिचतुराणि पदानि सीता ।
गन्तव्यमस्ति कियदित्यसकृद्[6] ब्रुवाणा
रामाऽश्रुणः कृतवती प्रथमाऽवतारम् ॥ १ ॥

अथेदं रक्षोभिः कनकहरिणच्छद्म[7]विधिना
तथावृत्तं[8] पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये[9]करुणकरुणैरार्यचरितै-
रपि ग्रावा[11] रोदित्यपि दलति[12] वज्रस्य हृदयम् ॥ २ ॥
अविशीर्णकान्तपात्रे नव्यदशे सुमुखि संभृतस्नेहे ।
मद्गृहदीपकलिके कथमुपयाताऽसि निर्वाणम् ॥ ३ ॥
यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
अन्तर्बाष्पभरोपरोधिगदितं चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः[13]
पीडयन्ते गृहिणः[14] कथं नु तनयाविश्लेषदुःखैर्नवैः[15] ॥ ४ ॥
पातुं न प्रथमं व्यवस्यति जलं युष्मास्व[16]सिक्तेषु या
नाऽऽदत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।

---

१ युधिष्ठिरः २ द्रौपदी ३ शब्दं करोति ४ अयोध्यासमीपदेशे ५ शिरीषकुसुनवत्कोमला ६ वारंवारम् ७ कपटम् ८ आचरितम् ९ कुड्यैः १० अत्यन्तकरुणैः ११ पाषाणः १२ दीर्यति १३ अरण्यवासिनः १४ गृहस्थाश्रमिणः १५ कन्यावियोगदुःखैः १६ 'युष्मास्वपीतेषु ये' इति पाठः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदौ वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ ५ ॥

यस्य त्वया व्रणविरोहणमिंगुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ॥
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ ६ ॥

अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ॥
जातोऽस्मि सद्यो विशदान्तरात्मा चिरस्य निक्षेपमिवाऽर्पयित्वा ७

जातेति कन्या महती हि चिन्ता कस्मै प्रदेयेति महान् वितर्कः ।
दत्ता सुखं यास्यति वा नवेति कन्यापितृत्वं खलु नाम कष्टम् ८

दैवे पराग्वदनशालिनि हन्त जाते
याते च संप्रति दिवं प्रतिबन्धुरत्ने ।
कस्मै मनः कथयितासि निजामवस्थां
कः शीतलैः शमयिता वचनैस्तवाऽऽधिम् ॥ ९ ॥

सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता
विद्याऽपि खेदकलिता विमुखी बभूव ।
सा केवलं हरिणशावकलोचना मे
नैवाऽपयाति हृदयादधिदेवतेव ॥ १० ॥

धृत्वा पदस्खलनभीतिवशात्करं मे
याऽऽरूढवत्यसि शिलाशकलं विवाहे ॥
सा मां विहाय कथमद्य विलासिनि द्या—
मारोहसीति हृदयं शतधा प्रयाति ॥ ११ ॥

भूमौ स्थिता रमणनाथमनोहरेति
संबोधनैर्यमधिरोपितवत्यसि द्याम् ।

पराङ्मुखे १ खेद. ३ मनोव्यथाम् ४ अपमपादिता ५ स्वर्गम्

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गं गता कथमिव क्षिपसि त्वमेण-
शावाक्षि तं धरणिधूलिषु मामिदानीम् ॥ १२ ॥

ध्रुवं ध्वंसो भावी जलनिधिमहीशैलसरिता-
मतो मृत्योः शीर्यत्कणलघुषु का जन्तुषु कथा ।
तथाऽप्युच्चैर्बन्धुव्यसनजनितः कोऽपि विषमो
विवेकप्रोन्माथी दहति हृदयं शोकदहनः ॥ १३ ॥

निकृन्ततीव मर्माणि देहं शोषयतीव मे ।
दहतीवान्तरात्मानं क्रूरः शोकाऽग्निरुत्थितः ॥ १४ ॥

अद्भुतरसः ।

श्रीः ॥ किं ब्रूमो हरिमस्य विश्वमुदरे किं वा फणान् भोगिनः
शेते यत्र हरिः स्वयं जलनिधेः सोऽप्येकदेशे स्थितः ॥
आश्चर्यं कलशोद्भवो मुनिरसौ यस्यैकहस्तेऽम्बुधि-
र्गण्डूषीयति पङ्कजीयति फणी भृङ्गीयति श्रीपतिः ॥ १ ॥

कस्मै किं कथनीयं कस्य मनःप्रत्ययो भवति ॥
रमयति गोपवधूटी कुञ्जकुटीरे परं ब्रह्म ॥ २ ॥

आदाय चापमचलं कृत्वा हीनं गुणं विषमदृष्टिः ॥
यश्चित्रमच्युतशरो लक्ष्यमभाङ्क्षीन्नमस्तस्मै ॥ ३ ॥

चित्रं कनकलतायां शरदिन्दुस्तत्र खञ्जनद्वितयम् ।
तत्र च मनोजधनुषी तदुपरि गाढाऽन्धकाराणि ॥ ४ ॥

---

१ नाशः २ विवेकोन्मूलनः ३ अगस्त्यः ४ विश्वासः ५ स्त्री. ६ स्थिरम् पक्षे चंचलम् ७ गुणरहितं पक्षे अहीनामिति पदच्छेदः सर्पराजं गुणं कृत्वेत्यर्थः अस- मदृक् पक्षे त्रिलोचनत्वात् विषमदृष्टिः ९ न च्युतः शरो यस्य पक्षे अच्युतः विष्णुः स एव शरो यस्य. १० शरस्य अपराममित्यर्थः ११ यमक
CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णेनाऽम्ब गतेन रन्तुमनसा मृद्भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुसली मिथ्याऽम्ब पश्याऽऽननम् ।
व्यादेहीति विकासितेऽथ वदने माता समस्तं जग-
द्दृष्ट्वा यस्य जगाम विस्मयपदं पायात्स वः केशवः ॥ ९ ॥

हास्यरसः ।

श्रीः ॥ अत्तुं वाञ्छति वाहनं गणपतेराखुं क्षुधार्तः फणी
तं च क्रौञ्चपतेः शिखी च गिरिजासिंहोऽपि नागाननम् ।
गौरी जह्नुसुतामसूयति कलानाथं कपालाऽनलो
निर्विण्णः स पपौ कुटुम्बकलहादीशोऽपि हालाहलम् ॥१॥

दृष्ट्वा षडाननजनुर्मुदिताऽन्तरेण पञ्चाननेन सहसा चतुराननाय ।
शार्दूलचर्मभुजगाभरणं सभस्म दत्तं निशम्य गिरिजाहसितं पुनातु

रामाद्याचय मेदिनीं धनपतेर्बीजं बलाल्लाङ्गलं
प्रेतेशान्महिषं तवाऽस्ति वृषभः फालं त्रिशूलादपि ।
शक्ताऽहं तव चान्नदानकरणे स्कन्दोऽस्ति गोरक्षणे
खिन्नाऽहं तव याचनात्कुरु कृषिं भिक्षाटनं मा कृथाः ३

विष्णोश्चाऽऽगमनं निशम्य सहसा कृत्वा फणीन्द्रं गुणं
कौपीनं परिधाय चर्म करिणः शम्भुः पुरो धावति ।
दृष्ट्वा विष्णुरथं सकम्पहृदयः सर्पोऽपतद्भूतले
कृत्तिर्विस्खलिता ह्रिया नतमुखो नग्नो हरः पातु वः ॥४॥

उदरद्वयभरणभयादर्धाङ्गीकृतदारः ।
यदि नैवं तस्यैकसुतः कथमद्याऽपि कुमारः ॥ ५ ॥

---

१ बलरामः २ विकासय ३ मूषिकम् ४ कार्तिकेयस्य ५ मयूरः ६ गजवदनम् ७ देहि ८ भार्गवात् ९ कुबेरात् १० बलभद्रात् ११ यमात् १२ वृषभम् १३ नग्नम् १४ गजचर्म ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं गोत्रं किमु जीवनं किमु धनं का जन्मभूः किं वयः
किं चारित्र्यममुष्य के सहचराः के वंशजाः प्राक्तनाः ।
का माता जनकः शिवस्य क इति प्रश्नेन पृथ्वीभृता
पृष्टाः सस्मितनम्रमूकवदनाः सप्तर्षयः पान्तु वः ॥ ६ ॥

भस्माऽन्धोरगफूत्कृतिस्फुटभवद्भालस्थवैश्वानर-
ज्वालाखिन्नसुधांशुमण्डलगलत्पीयूषधारारसैः ।
संजीवद्गजचर्मगर्जितभयाद्भ्राम्यद्दृशाऽऽकर्षण-
व्यासक्तः सहसाऽद्रिजोपहसितो नम्रो हरः पातु वः ॥ ७ ॥

हे हेरम्ब किमम्ब रोदिषि कथं कर्णौ लुठत्यग्निभूः
किं ते स्कन्द विचेष्टितं मम पुरा संख्याकृता चक्षुषाम् ।
नैतत्ते ह्युचितं गजास्य चरितं नासा प्रमीता च मे
तावेवं सहसा विलोक्य हसितव्यग्रा शिवा पातु वः ॥ ८ ॥

कृष्णो गोरसचौर्यमम्ब कुरुते किं कृष्ण मातः सुरा—
पानं न प्रकरोमि राम किमिदं नाऽहं परस्त्रीरतः ।
किं गोविन्द वदत्यसौ हलधरो मिथ्येति तां व्याहरन्
गोपीगोपकदम्बकं विहसयन् मुग्धो मुकुन्दोऽवतु ॥ ९ ॥

परान्नं प्राप्य दुर्बुद्धे मा प्राणेषु दयां कुरु
परान्नं दुर्लभं लोके प्राणा जन्मनि जन्मनि १०
उपभुक्तखदिरवीटकनिजाधरजरागभङ्गभयात् ।
पितरि मृतेऽपि न वेश्या रोदिति हा ताततातेति ॥ ११ ॥
चितां प्रज्वलितां दृष्ट्वा वैद्यो विस्मयमागतः ।
नाऽहं गतो न मे भ्राता कस्येदं हस्तलाघवम् ॥ १२ ॥
वैद्यराज नमस्तुभ्यं क्षपिताशेषमानव ।
त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते ॥ १३ ॥

१ स्कन्दः ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सायगायनपूतं मे नोच्छिष्टमधरं कुरु ।
उत्कण्ठिताऽसि चेद्भद्रे वामं कर्णं दशस्व मे ॥ १४ ॥

आदौ वेश्या पुनर्दासी पश्चाद्भवति कुट्टिनी ।
सर्वोपायपरिक्षीणा वृद्धा नारी पतिव्रता ॥ १५ ॥

भयानकरसः ।

श्रीः ॥ ग्रीवाभङ्गाऽभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धाऽवलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ १ ॥

निर्मज्जच्चक्षुरन्तर्भ्रमदतिकपिलक्रूरताराननाऽस्थि-
ग्रन्थि दन्ताऽन्तरालग्रथितमविरतं जिह्वया घट्टयन्ती ।
ध्वान्तेऽपि व्यात्तवक्त्रज्वलदनलशिखाजर्जरे व्यक्तकर्मा
निर्मान्ती गृध्ररौद्रीं दिवमुपरिपरिक्रीडते ताडकेयम् ॥ २ ॥

अन्त्राऽऽकल्पचलत्पयोधरभरव्याविद्धमेदच्छटा
सृक्कस्था[1]मिषगृ[2]ध्नुगृध्रग[3]रुदास्फालोच्चन्मुर्धजा ।
व्यादायाननमट्टहासविकटं दूरेण तारापथा-
न्नस्यत्सिद्धपुरन्ध्रिवृन्दरभसोन्मुक्तादुपक्रामति ॥ ३ ॥

बीभत्सरसः ।

श्रीः ॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथपृथूत्सेधभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आत्तस्नायवन्त्रनेत्रप्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥ १ ॥

१ ओष्ठप्रान्तः २ लालसाः ३ पक्षाः ४ स्त्री ५ चर्म ६ कटिदेशस्यमांसपिण्डः 'कुले' ७ अत्यन्तदुर्गन्धीनि ८ भक्षयित्वा ९ मांसम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराभूषयत्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लस-
द्व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥ २ ॥
रक्तं नक्तंचरौघैः पिबति च वमति व्यग्रकुन्तः शकुन्तः
क्रव्यं नव्यं गृहीत्वा प्रणदति मुदितो मत्तवेतालबालः ।
क्रीडत्यव्रीडमस्मिन् रुधिरमधुवशात्पूतना नूतनाङ्गी
योगिन्यो मांसमेदःप्रमुदितमनसः शूरशक्तिस्तुवन्ति ३

रौद्ररसः ।

श्रीः ॥ येन स्वां विनिहत्य मातरमपि क्षत्राऽस्रमध्वासव-
स्वाद ऽभिन्नपरश्वधेन विदधे निःक्षत्रिया मेदिनी ।
यद्बाणव्रणवर्त्मना शिखरिणः क्रौञ्चस्य हंसच्छला-
द्घ्याप्यस्थिकणाः पतन्ति स पुनः क्रुद्धो मुनिर्भार्गवः ॥ १ ॥
राज्ञो मानधनस्य कार्मुकभृतो दुर्योधनस्याऽग्रतः
प्रत्यक्षं कुरु बान्धवस्य च तथा कर्णस्य शल्यस्य च ।
पीतं तस्य मयाद्य पाण्डववधूकेशाम्बराऽऽकर्षिणः
कोष्णं जीवत एव तीक्ष्णकरजक्षुण्णादसृग्वक्षसः ॥ २ ॥
स्पृष्टा येन शिरोरुहे नृपशुना पाञ्चालराजात्मजा
येनाऽस्याः परिधानमप्यपहृतं राज्ञां कुरूणां पुरः ।
यस्योरः स्थलशोणिताऽऽसवमहं पातुं प्रतिज्ञातवान्
सोऽयं मद्भुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः ॥ ३ ॥
योयः शस्त्रं बिभर्ति स्वभुजगुरुमदःपाण्डवीनां चमूनां
योयः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यागतो वा ।
योयस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ४

१ रक्तम् ।

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Prof. Satya Vrat Shastri Collection.